कमलाकरभट्टप्रणीता

मीमांसाशास्त्रमाला

सम्पादक

आचार्य पी० एन्० पट्टाभिरामशास्त्री

'पद्मभूषण'

वेदमीमांसानुसंधान केन्द्र

बी. ४/७ हनुमान घाट

वाराणसी

वेद-मीमांसानुसन्धानकेन्द्रस्य

चतुर्थं पुष्पम्

कमलाकरभट्टप्रणीता

मीमांसाशास्त्रमाला

तदात्मजानन्तभट्टकृतवृत्तिसहिता

सम्पादकः

आचार्य पी० एन्० पट्टाभिरामशास्त्री

'पद्मभूषण'

प्रकाशनस्थानम्

वेद-मीमांसानुसन्धानकेन्द्रम्

वाराणसी सन् १९८६

प्रकाशक

वेद-मीमांसानुसन्धान केन्द्र
बी. ४/७ हनुमान घाट
वाराणसी

मूल्य : ८०.०० रुपये

मुद्रक

महाकान्त प्रेस
रेवड़ी तालाब
वाराणसी

Veda-Mimansa Research Centre

4

MIMANSA SASTRAMALA

By

Kamalakar Bhatta

With vritti by

Ananta Bhatta

Edited & Published by

Acharya P. N. Pattabhirama Sastri
'Padmabhushan'

Varanasi
1986

Published

Veda-Mimansa Research Centre
B. 4/7 Hanuman Ghat
Varanasi

Price : 80.00

Printer

Mahakant Press
Rewari Talab
Varanasi

विषयसूची

प्राक्कथनम्

भट्टकुलावतंसेन श्री कमलाकरभट्टेन प्रणीतां मीमांसाशास्त्रमालां तत्सुतेनानन्तभट्टेन विरचितया वृत्त्या सहितां 'वेदमीमांसानुसन्धानकेन्द्र' द्वारा प्रकाशितां विद्वदपश्चिमानां कण्ठतलेषु मीमांसाविद्यायाः प्रचाराय सादरं समर्पयन् परमां मुदमवाप्नोमि। इदम्प्रथमतया मालाया अस्या भवति प्रकाशनम्। अस्या मातृका विद्वद्वरैर्लब्धप्रतिष्ठैः श्री के० टी० पाण्डुरङ्गी कृष्णाचार्यमहेच्छैः कर्णाटकेषु बेंगलूरनगरवास्तव्यैरस्मत्केन्द्राय प्रकाशनार्थं सादरं समर्पिता। मातृकायाम् एकोनाशीत्यधिकशतं १७९ पृष्ठानि वर्तन्ते। प्रतिपृष्ठं प्रायः चतुर्विंशतिसङ्ख्याकास्सन्ति पङ्क्तयः। एकैकस्यां पङ्क्तौ प्रायः पञ्चचत्वारिंशदक्षराणि विद्यन्ते। तत्रादितः त्रयोदशपृष्ठानि क्रमेण वर्तन्ते, चतुर्दशतः सप्तदशपृष्ठपर्यन्तं नष्टानि पत्राणि। एवमष्टादशत एकाशीतितमपृष्ठपर्यन्तं क्रमेण पृष्ठानि सन्ति तदूर्ध्वं पृष्ठद्वयं नष्टम्। तत एकोनविंशत्यधिकशततमपृष्ठपर्यन्तं क्रमेण सन्ति पृष्ठानि। ततः पृष्ठचतुष्टयं नष्टम्। ततः पञ्चत्रिंशदधिकशततमात्पृष्ठात्पृष्ठद्वयं नष्टम्। अष्टत्रिंशदधिकशततमात्पृष्ठादेकोनाशीत्यधिकशततमपृष्ठपर्यन्तं क्रमेण पृष्ठानि विद्यन्ते। अन्तिमं पृष्ठं नष्टम्, अत्रैव ग्रन्थसमाप्तिः। आहत्य त्रयोदशपृष्ठानि नष्टानि, तद्गता विषयास्स्ववाक्यैः सङ्ग्रहेण मया पूरिताः। मातृकालेखकेन भूयस्सु स्थलेषु महान् प्रमादः कृतः। ते च प्रमादास्संशोधिताः। मातृका अवलम्ब्य ग्रन्थसंशोधनं नाम न साधारणक्लेशसाध्यम्। अतिचिरन्तनेषु कालेषु तत्तद्विषयाभिज्ञैरेव तालपत्रेषु भोजपत्रेषु च ग्रन्था लिख्यन्ते स्म। तालपत्राणां ग्रन्थलेखनाय प्रथमं परिपाकः क्रियते, तदनु तर्जनीमध्यमानामिकानाभङ्गुलीनां कनिष्ठिकासहितानां वा तिर्यक्प्रसारितानां यावान् व्यासः, अरत्निपरिमाणश्च व्यायामः तावन्ति पत्राणि कर्तयित्वा पत्राणां मध्ये लघूनि छिद्राणि समानाकारेण विधाय तत्र दृढतरं सूत्रं प्रवेश्य पत्राण्येकीकृत्य तेनैव सूत्रेण प्रबध्य निक्षिपन्ति। इद तेषां पुस्तकं परिगण्यते। तत्र पत्राणि नातिकोमलानि नातीव च शुष्काणि भवेयुः। अक्षरलेखनसाधनञ्च लौहशलाका। पृष्ठद्वयेऽप्यक्षराणां लौहशलाकयोत्कर्तनम्। प्रतिपृष्ठं दश द्वादश वा पङ्क्तयः, प्रतिपङ्क्ति च प्रायः पञ्चाशत् पञ्चपञ्चाशद्वाऽक्षराणि, यदि तत्र लेखनप्रमादस्तर्हि तत्र* इति चिन्हं हंसपादपदाभिधं विधाय पत्राणामुपर्यधोभागे वा रिक्तप्रदेशे हंसपादं पङ्क्तिसङ्ख्याञ्च सूचयित्वा प्रमादपरिमार्जनं कुर्वद्भिः प्राचीनैः पुस्तकानि लिख्यन्ते स्म। प्रथमं लिखिता इमा मातृकाः शुद्धा एव भवन्ति। पुस्तकस्यास्य तथैव प्रतिलिपि सम्पादकाः तत्तद्विषयज्ञातार एवासन्। अतश्च तानि पुस्तकानि प्रमादरहितान्ये-

वासन्। एवं पुस्तकलेखनप्रकारे प्रचलति लेखकानां ग्रन्थगताः पङ्क्तयो वाचो विधेया एवाभवन्। लेखनसमयेऽनेकवारं वाचोच्चारणं मनसा तदर्थचिन्तनं तदनुसारेण हस्तेन सावधानतया लेखनञ्चेति व्यापारत्रयं सहैवासीत्। अध्येतॄणां सकाशे पुस्तकाभावेऽपि गुरुमुखेन विषयानवगत्य तच्चिन्तनावसरे यदि स्यात्क्वचित्संशयः तदैव पुस्तकविलोकनमभवत् छात्राणाम्। एतेन स्मरणशक्तिः कीदृशी तदानीमासीदित्यभ्यूहितुं शक्यते। एतादृशग्रन्थलेखनप्रकारस्तालपत्रेषु वङ्ग-बिहारान्ध्र-द्राविड-कर्णाटकोढ्रकेरलेषु भूयानासीत्। नेपालकाश्मीरगूर्जरादिप्रान्तेषु भोजपत्रेषु विलक्षणमशीद्वारा लेखनप्रकारः प्रचलितोऽभवत्। प्रथमं लिखितानां ग्रन्थानां प्रतिलिपिसम्पादनं तैरेव क्रियते स्म ये च तत्तद्विषयाभिज्ञाः, अतएव ता मातृकाः शुद्धा एवोपलभ्यन्ते स्म। अनन्तरमीषत्संस्कृताभिज्ञाः, केवलं प्राप्ताक्षरपरिचयाश्च प्रतिलिपिकरणे प्रवृत्ताः, अतएव मातृकासु भूयांसः प्रमादा अजायन्त। स्वयमध्ययनाय लेखनं द्रव्यसञ्चयाय लेखनं इत्यत्र महदन्तरं भवेदेव। प्रकृतशास्त्रमालाया मातृका केवलं द्रयार्जनाय लेखकेन लिखितेति प्रतीयते। कतिपयाक्षराणां भेद एव न विलोक्यते 'त्र न्न,प य श्च च्च,ध घ,य थ इत्यादीनाम्। कतिपयानामक्षराणामन्यादृश एवाकारः। क्वचिद्दीर्घस्य ह्रस्वः, ह्रस्वस्य च दीर्घः, क्वचिदक्षरस्य लोपः क्वचिदसम्बद्धाक्षरविन्यास इत्येवं प्रमादाः। यद्यपि लेखकस्य लेखनधारापरिचयेन शुद्धाक्षराणां स्फुरणं भवेदेव तस्य, यदि विषयाभिज्ञस्सः, तथापि तत्संशोधनं प्रयाससाध्यमेव। परिवर्तनशीले संसारचक्रे सम्प्रति सा तालपत्र-भोजपत्रलेखनकला नाममात्रावशिष्टा सती यन्त्रारूढा समजायत। लोहमयाक्षराणां संयोजनेन कर्गजपदाभिधेयैः यन्त्रे मुद्रणरूपां धारयति सा कला। अत्राप्यक्षरसंयोजकाः यथा तथा वाक्षराणि संयोज्य 'प्रूफ' पदाभिधं प्रददति। संशोधकश्च सुनिपुणं संशोध्य मुद्रणायादिशति। तत्रापि जायमाना अशुद्धीः यन्त्रेष्वारोपयति-यान्त्रिकाशुद्धयो जाता इति। तानीमानि पुस्तकान्यधीत्य विषयाभिज्ञाः दोषानपाकृत्य छात्रान् ग्राहयन्त्यध्यापकाः। विषयानभिज्ञास्तु तथैव पाठयन्ति यथामुद्रितम्। सर्वोऽप्ययमनर्थः तदारभ्य सञ्जातः यदा प्राचीन लेखनकलाया लोपस्समजनि। यान्त्रिकः खल्वधुना युगः, युगानुसारेण किल मानवेनापि वर्तितव्यम्। अचेतनानि यन्त्राणि जातानि चैतन्यवन्ति, चेतनाश्च मानवा अचेतनास्सम्पद्यन्ते। मितव्ययितां परित्यज्यामितव्यये लोकानां प्रवृत्तिस्समजायत। प्रकृतिसिद्धं वस्त्वपहाय कृत्रिमवस्तुसम्पादने लोकानां युगानुसारेण महती रुचिः। किन्तु चैतन्यहीनाः निरुद्यमा लोका भवन्तीत्यत्राप्यवधानं देयमेव। देशेऽस्मिन् तालवृक्षाणां भूर्जतरूणाञ्च न न्यूनता। तेषां पत्राणां य उपयोगः तत्रोत्पन्नयाऽश्रद्धया मितव्ययाधायिकायाः कलाया लोपो जातः। अमितव्ययसाध्यां यन्त्रमुद्रणकलामवलम्ब्य सम्प्रति छात्राः पुस्तकक्रयणेऽक्षमा इतस्ततः परिभ्रमन्ति। मुद्रितपुस्तकान्यवलम्ब्य परिचाल्यमानेऽध्यापनक्रमे सम्प्रति स्मृतिशक्तेः क्षीणतां न केवलं छात्रेष्वेवानुभवामः, किन्त्वध्यापकेष्वपि।

यथाहि लेखनकलायां सुमहत्परिवर्तनमनुभवामः, तथैवाध्ययनव्यापारेऽधीतस्य विषयस्यावगमने चिन्तने च भूयसा परिवर्तनं विलोकयामः। इतः चतुःपञ्चसहस्राद्वर्षेभ्यः पूर्वं महर्षिर्जैमिनिः सूत्रात्मना मीमांसां जग्रन्थ। परम्पराऽध्ययनाध्यापनव्यापारारूढैवेयं मीमांसा सूत्ररूपा परिदृश्यते। तदानीन्तनानामेव लोकानां स्मृतिशक्तेः क्षीणतां विभाव्य जैमिनिः सूत्रात्मना मीमांसां जग्रन्थेति ज्ञायते। इमानि सूत्राण्येवाधीत्य लोका मीमांसायामनितरसाधारणं वैदुष्यमवापुः। अतिविस्तृतमिदं मीमांसातन्त्रम्। द्वादशाध्यायाः, तत्र षष्टिसंख्याकाः पादाः, तत्रेषन्न्यूनत्रिसहस्रं सूत्राणि, तानीमानि सूत्राणि सप्ताधिकनवशतेनाधिकरणैर्विभज्य जैमिनिर्मीमांसां निबबन्ध। सूत्रारूढान् विषयान् समधीत्य स्मृतिपथे निक्षिपन्तः पूर्वजा मीमांसानिपुणा अवर्तन्त। विश्वस्य जगतो न्यायपालिकेयं मीमांसा। भगवतीयं न्याय्येन पथा लोकान् गमयितुं प्रवृत्ता। लोकेन सहास्या अस्ति नान्तरीयकस्सम्बन्धः। तदिदं 'यथा लोके' 'लोकवत्' 'तथा लोके' इत्येवं स्वसूत्रेषु पदानि प्रयुञ्जानो जैमिनिरवद्योतयति। कालत्रयवेत्ता खलु जैमिनिः। आयतौ भारतराष्ट्रे प्रजातन्त्रशासनं प्रचलिष्यतीति निर्द्धार्य तदनुकूला न्यायाः प्रवर्तनीया इति मनीषया जैमिनिः प्रावर्ततेव प्रतिभाति। अतएव प्रत्यध्यायं प्रतिपादञ्च 'अधिकरणानि' कल्पयामासेव। अधिकरणं नाम न्यायालयः कथ्यते। न्यायपालिकयैव प्रजातन्त्रसूत्रं सुदृढं भवितुमर्हति। प्रजानां शास्यशासकभावे स्वातन्त्र्ये सत्यपि प्रजाशासनाय शासकैस्सम्भूय नियमेषु निर्मितेष्वपि तेषां नियमानाभौचित्यानौचित्यपरिशीलनाय न्यायपालिकाया आवश्यकतेत्यत्र न कोऽपि सन्दिहीत। तदैव लोकानां मर्यादायां वर्तनं सिध्येत्। अन्यथा अमर्यादिताः पारिप्लवा भवेयुः। मर्यादायां वर्तनं नाम चिरन्तनः पन्थाः। सोऽयं पन्था जैमिनिना प्रवर्तितः। प्रजातन्त्रानुकूलान् नियमान् संसदि विधायका निर्मान्ति, त इमे नियमाः न्यायपालिकया परिशील्यन्ते। परिशीलितन्यायानुसारेण शासकैः शास्यैश्च वर्तितव्यम्। अतः शासकानां न्यायपालिकायाश्च समन्वय आवश्यकः। एतदर्थं न्यायनिबन्धनात्मकं मीमांसाशास्त्रं सूत्ररूपेण जैमिनिना आविष्कृतम्। अत्र बहवो न्यायाः प्रजातन्त्रोपकारका विद्यन्त इति प्रदर्शितमस्माभिः कुतूहलवृत्तेश्चतुर्थभागभूमिकायाम्।

तदस्य सूत्रारूढेऽध्ययने प्रचलति सति क्रमेण बुध्या धारणस्मरणशक्त्या तपसाऽऽयुषा च कार्श्यमनुभूयमानान् अध्येतॄननुभूय वृत्तिग्रन्थान् वृत्तिकारा उपवर्षादयो लिलिखुः। एभिरपि लाभान्विता लोका न भवन्तीत्यवगत्य भाष्यकाराः श्री शबरस्वामिनः प्रसन्नगम्भीरं भाष्यमभाषिषुः। अतिविस्तृतमिदं भाष्यं भाष्ययुगेऽतिप्राचीनं परिगण्यते। लोकेन सह विद्यमानं सन्निकटं मीमांसायाः सम्बन्धं 'लोके येष्वर्थेषु प्रसिद्धानि पदानि' इति भाष्यमारभमाणाः शबरस्वामिनोऽवबोधयन्ति। प्रत्यधिकरणं धर्मस्वरूपनिर्द्धारणाय श्रुतिवाक्येषु विचार्यमाणेष्वध्येतॄणां झटिति तत्र प्रवेशाय प्रायो लौकिकोदहरणानि प्रदर्शयन्ति। इमान्युदा

हरणान्यवलम्ब्याध्येतारोऽतिगहनं श्रौतं पदार्थं सुखेनावगच्छन्ति। शबरस्वामी तु महान् परिनिष्ठितोऽध्यापकः। अध्यापकस्येदमेव कौशलं परिगण्यते यदुताध्यापनावसरे विविधोदाहरणप्रदर्शनेन छात्राणां मनसां प्रकृतविषयेऽवस्थापनम्। तदिदं कौशलं शबरस्वामिनां कृतौ मीमांसाभाष्ये परिलक्ष्यते। सोऽयं विषयो मत्सम्पादनकर्मीभूतस्य टुप्टीका-वार्तिकाभरण-तन्त्रशिखामणि-भाष्यसन्दर्भयोजिनीसमेतशाबरभाष्यस्य सप्तमाष्टमाध्यायपरिमितस्य भूमिकायां-विस्तरेण प्रतिपादयिष्ते। तत्रैकं मनोविनोदाय प्रदर्शयितुमिच्छामि सप्तमाध्यायचतुर्थपादस्य प्रथमं 'इतिकर्तव्यताविधेर्यजतेः पूर्ववत्वम्' इति सूत्रं व्याचक्षाणा भाष्यकारा लिखन्ति—'यो ह्यमेध्यं द्रव्यमुच्छिष्टश्शयानो वा प्रौढपादो वामेन हस्तेन पादेन वा यथाकथञ्चिद्देवतायै उत्सृजति तस्य फलं न भवतीति शिष्टास्स्मरन्ति। यस्तु मेध्यं द्रव्यं शुचौ देशे प्रयतः प्राङ्मुखो दक्षिणेन हस्तेन समाहितमना मन्त्रवन्नियमवच्च देवतायै उत्सृजति तस्य फलं भवतीति स्मरन्ति' इति। फलार्थं विधीयमानानि कर्माणि स्वस्वानुकूलेतिकर्तव्यतामाकाङ्क्षन्त्येव, विनेतिकर्तव्यताचरणेन प्रधानमात्रानुष्ठानेन न किमपि प्रयोजनम् इत्युपपादनावसरे वाक्यानीमानि दृश्यन्ते। सन्दर्भोऽयं लोके नैतिकतायास्सदाचारस्य च प्रकारमवबोधयतीति स्पष्टं प्रतीयते। सह पुरुषकारेण दैव्याश्शक्तेरावश्यकतेत्यत्र चित्तवृत्तिमावर्जयन्ति भाष्यकाराः। सर्वैरङ्गैरुपेतमपि यन्त्रं यद्येकेन केनापि लघुना महता वाङ्गेन विहीनं कार्यसम्पादनक्षमं न भवतीति लोकसिद्धं पन्थानं निर्दिशन्ति भाष्यकाराः। महीतले जनिमातस्थुषा सर्वेण मानवेन स्वबुद्धिशक्तिमतीत्य दैवी काचन महीयसी शक्तिरस्ति, तस्या अर्जने यतितव्यमित्यनुरुन्धन्तीव भाष्यकाराः प्रतिभान्ति। परमेश्वरः करुणावान जनतासु समदृष्टिः स्वर्वस्वप्रदाता यथा तथा वा सपर्यया तृप्तिमवाप्नुयादिति नियममुल्लङ्घ्यापि तदाराधनेन फलं दास्यत्येवेति न मन्तव्यम्, आराधको भक्त्या श्रद्धया यथाविधि सपर्यामाचरति न वेति यथालोचयति परमेश्वरस्तथा शुचिर्भूत्वा मदेकमनास्सपर्यां करोति न वेति चिन्तयेदेवेत्यपि ज्ञापयन्त्यनेन सन्दर्भेण। देवताविषयकीर्तनव्याजेन दैवभावमापन्नानां गुरूणां विषयेऽन्तेवासिभिः कथं वर्तितव्यमिति सूचयन्ति। अनुभवजन्यसंस्काराहितचेत सश्शिष्टा विषयमिमं बोधयन्ति न लोकान् प्रतारयितुमिति 'शिष्टास्स्मरन्ति' इत्यनेन प्राचीनपरम्परावलम्बनं श्रेयस इति द्योतयन्ति। एवं तत्र तत्र लोकोपयोगिनः पदार्थान् निबध्नन्तो भाष्यकारा मीमांसाया लोकोपकारकत्वं व्यवस्थापयन्ति।

भाष्यानन्तरं मीमांसेयं त्रिपथगा संवृत्ता। भट्टपादाः प्रभाकरमिश्राः मुरारिमिश्राश्चेति महात्मानो गङ्गामिव भगीरथः मार्गत्रयेण मीमांसां नीत्वा विपुलगात्रामकारिषत। तदनु पार्थसारथि-भवदेव-खण्डदेवप्रभृतयो मनीषिणः सुदृढगात्रामिमां व्यदधः। सूत्रात्मना प्रवहन्त्यां मीमांसायामवगाहने क्लेशमनुभवतो जनानवगत्यास्या विस्तारः कृतो मनीषिभिः। विस्तृते देशे वेगेन प्रवहन्त्यां

नद्यामवगाहनं भीतेः कारणमिति विज्ञाय केचन विद्वद्वराः सङ्कुचितगात्रामिमां विधातुमारेभिरे। तत्र वेदानां भाष्यकर्तारः श्रीमाधवाचार्याः—

'सर्वथापि सहस्रे द्वे नातिक्रामति सङ्ग्रहः।
मीमांसासागरस्तेन क्रीडापुष्करणी भवेत्॥'

इति प्रतिज्ञाय जैमिनीयन्यायमालां प्रणीय भगवतीं मीमांसां तनुमध्यमां व्यदधुः। एकेन द्वाभ्यां त्रिभिर्वा पद्यैः विषयसंशयपूर्वोत्तरपक्षान् पञ्चावयवसंयुतान् प्रदर्शयाम्बभूवुः। सिद्धान्ततोऽल्पेन कालेन मीमांसामधिगत्य वेदभाष्यदर्शनान्तराध्येतॄणां सौकर्याय ग्रन्थमिमं जग्रन्थुर्माधवाचार्याः। विचारभूयिष्ठान् मीमांसाशास्त्रीयोद्ग्रन्थानध्येतुं मनोहरां भूमिं निर्मितवन्तो माधवाचार्याः। माधवाचार्याणां पद्यानि सर्वाण्यनुष्टुप्छन्दस्कानि। अतएवाधिकरणस्वरूपावबोधाय क्वचिद्द्वयोः क्वचिच्च त्रयाणां पद्यानां निर्माणमावश्यकमापतितम्। तदितोऽपि लाघवं सम्पादनीयमिति मन्वाना मण्डनमिश्रा मीमांसानुक्रमणिकां रचयाम्बभूवुः। अनुक्रमणिका नाम विषयाणां सूची कथ्यते। यथा ह्यधुना ग्रन्थसम्पादका ग्रन्थान्ते सूत्राणां पद्यानां विषयवाक्यानां वाऽकारादिक्रमेण सूचीं निर्माय योजयन्ति तथैव मण्डनमिश्राः मीमांसासागरस्यानुक्रमणिकां निरमासत। अधुना केचन सूचीपण्डिता भवन्ति उपोद्घातपण्डिता वा तथैव प्राक्तने कालेऽपि तथाविधाः पण्डिता भवन्त्विति मण्डनमिश्राणामयमुपक्रमः। नेदं सूचीपाण्डित्यमुपहासाय, किन्तु शास्त्रीयसिद्धान्तदार्ढ्याय कल्पितमिति मन्ये। तत्र माधवाचार्याणां शब्दान्तराधिकरणपद्यानि—

'ददाति यजतीत्यादौ भावनैक्यमुतान्यता।
आख्यातैक्यात्तदेकत्वं धातुभेदोऽप्रयोजकः॥
धातुभेदेन भिन्नत्वमाख्याते श्रूयते ततः।
उत्पत्त्येकानुरक्तत्वाद्भिद्यन्ते भावना मिथः'॥ इति॥

अस्यैवाधिकरणस्य मीमांसानुक्रमणिकायां मण्डनमिश्राणां पद्यम्—

'शब्दान्तरे विधियुते खलु कर्मभेदः,
भूयः श्रुतिश्च समिदादि यजीन् भिनत्ति।
वाक्यं न कर्म विदधाति य एवमादि,
स्यादन्तरालवचने यजतेर्विधानम्'॥

एकं पद्यमिदम् चतुर्णामधिकरणानां बोधकम्। तत्तदधिकरणानां सिद्धान्ता एवात्र प्रतिपाद्यन्ते, न विषयसंशयपूर्वपक्षाः। किन्तु विषयसंशयपूर्वपक्षाणामुन्नयने सूक्ष्मरूपेण सामग्री परमुपलब्धुं शक्या। जैमिनीयन्यायमाला चाध्ययनाय निर्मिता, मीमांसानुक्रमणिका तु अधीताधिकरणस्मरणाय। अथवा मीमांसाध्यापकानां स्मृतिशक्तिप्रवर्धनाय मीमांसानुक्रमणिका प्रणीता स्यात्। जैमिनीयन्यायमालातो मीमांसानुक्रमणिकायाः तत्तदधिकरणप्रतिपाद्यविषयवस्तुनि न किमपि लाघवम्,

किन्तु न्यायमालायां सर्वाभरणविभूषिता प्रौढा नायिकेव मीमांसा विलसति, अनुक्रमणिकायान्तु गुप्तालङ्कारा एकेनैवालङ्कारेण विशदेन विभूषिता गृहस्थनारीव मधुराकृतिर्विद्योतते। अवयवानां तत्तदलङ्काराणाञ्च गोपनमेव नारीणां सुषमावर्द्धकम्। 'अर्थो गिरामपिहितः पिहितश्च कश्चित्सौभाग्यमेति' इति खलु सहृदयानां न्यायः। अथवा महर्षेर्जैमिनेः प्रसूता मीमांसाकन्या बह्वर्थवती शबर कुमारिलप्रभृतिभिः परिवर्धिता तैस्तैर्मीमांसकधुरन्धरैः पुष्टिं गमिता बृहदुदरा सम्पन्ना। न खलु बृहदुदरा अलघुविलम्बिपयोधरा अनघराभरणैर्भूषितापि जनतायै रोचेत इति मनीषया तां माधवाचार्या मण्डनमिश्राश्च सङ्कुचितगात्रां मधुराकृतिं विधाय मीमांसकसमाजे प्रेषयामासुरिव।

इतोऽपि मीमांसाया गात्रं संक्षिप्य सप्ताष्टवर्षिकीं कन्यामिव मीमांसां विधाय खेलनकूर्दनाय मीमांसकसमाजे प्रेषणीयेति निश्चिन्वानः श्री कमलाकरभट्टः मीमांसाशास्त्रमालां प्रणिनाय। अयमपि श्लोकात्मना मालामिमां जग्रन्थ। तत्र शब्दान्तराधिकरणपद्यम्—

'शब्दान्तरेण भेदस्स्यात्' इति।

कमलाकरभट्टस्यानुष्टुभेषु पद्येष्वेकस्मिन् पादे सर्वत्राष्टानामेवाक्षराणां नैवावश्यकता, क्वचित् षड्भिरक्षरैः क्वचिच्च चतुर्भिः पञ्चभिर्वाक्षरैरधिकरणस्वरूपं स प्रकाशयति। 'न विरोधतः' 'गीतिस्साम' 'निगदोऽपि न च' इत्येवं पूर्वेणोत्तरेण वा संबद्धान्यक्षराणि विन्यस्य पद्यानि करोति। अत्रापि केवलं सिद्धान्त एव प्रदर्श्यते नान्येऽधिकरणानामवयवाः। मण्डनमिश्रैर्मीमांसानुक्रमणिका कृता, अनेन तु मीमांसासूची निर्मितेति वक्तुं शक्यते। यथा समग्रग्रन्थाध्ययनेन वैदुष्यार्जनं क्रियते, तथा सूच्यध्ययनेनापि तदर्जनं परम्परासिद्धम्। महर्षिर्जैमिनिः 'यस्य लिङ्गमर्थसंयोगादभिधानवत्' (८.१.२.) इति सूत्रयन् एकेनैव सूत्रेण निखिलयागानां प्रकृतिविकृतिभावं सूचयति। तदिदं सूत्रं विवृण्वन् भाष्यकारः श्रीशबरस्वामी संक्षिप्तं सूत्रसूचितं प्रकृतिविकृतिभावं प्रदर्शयन् अन्ते लिखति—'श्लोकमप्युदाहरन्ति—

'विस्तीर्य हि महज्जालमृषिः संक्षिप्य चाब्रवीत्।
इष्टं हि विदुषां लोके समासव्यासधारणम्'॥ इति॥

ईसातः पूर्वं तृतीयशतके स्थितः शबरस्वामी प्राचीनं पद्यं प्रदर्शयति। तत एवारभ्य शास्त्राणां समासेन व्यासेन च धारणं विद्वद्भिः क्रियते स्म। तमिमं चिरन्तनं पन्थानमाश्रित्य कमलाकरभट्टोऽपि संक्षेपेण शब्दतोऽर्थतश्च समग्रं मीमांसाशास्त्रं मालारूपेण जग्रन्थ, मालामिमां मीमांसाध्येतारः कण्ठे धारायन्त्विति। लघुगुरुभूतान् ग्रन्थान् विरचयितुं ग्रन्थकृतामयमाशयः-पद-वाक्य-प्रमाणनिरूपकाणि शास्त्राणि व्याकरणं मीमांसा न्यायश्चेति त्रीणि। त्रयाणामपि सर्वशास्त्रोपकारकत्वमनुभवसिद्धम्। एकस्योपकार्यत्वेऽन्येषामुपकारकता। नात्र प्रबलदुर्बलभावो व्यवस्थितः। सर्वेषामेवोपकार्यत्वं यथा तथोपकारकत्वमपि। यदेव शास्त्रं प्राधान्येन योऽधीते तस्यान्यानि भवन्त्युपकारकाणि। प्राधान्येनाध्ययनं भवति

सर्वेषाम्। लोके चतुर्वेदिनः, त्रिवेदिनो द्विवेदिन इति यथा नामान्युपलभामहे तथा चतुश्शास्त्रपण्डितः, शास्त्रत्रयपण्डितः शास्त्रद्वयपण्डितः, नैयायिकः, वैय्याकरणः, मीमांसकः वेदान्ती इत्येवं पण्डितान् पश्यामः। वेदविषये परं एकवेदीति न कुत्रापि व्यवहारः, किन्तु शास्त्रे परं नैय्यायिको वैय्याकरण इत्यादिर्व्यवहारोऽस्ति। वेदाननधीत्य केवलशास्त्राध्येतारः नासन्निति प्रदर्शितव्यवहारेण प्रतीयते। वेदद्वयमधीत्य किमप्येकं शास्त्रमध्येतुं चिरन्तनानां प्रवृत्तिरासीत्। एकशास्त्राध्ययनावसरेऽध्येतॄणां शास्त्रान्तरपरिचयस्सिद्धान्तत आसीदेव। शास्त्रान्तरपरिचयावाप्तय एव सर्वेषु शास्त्रेषु लघुग्रन्था निर्मिता दृश्यन्ते। तत्र मीमांसा लघुग्रन्थाध्ययनेन यज्ज्ञानं तच्छास्त्रान्तराध्ययनोपकारकं भवति, तथा व्याकरणस्य न्यायस्य चाध्ययनम्। 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इत्युक्त्या पद प्रमाणशास्त्रयोः यथा सर्वशास्त्रोपकारकत्वमनुभवसिद्धम्, तथैव—

'मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिता'

इति भट्टपादोक्त्या मीमांसा न केवलं शास्त्रं किन्त्वियं विद्यापि इत्यवगम्यते। सेयं विद्या विद्यान्तराणामाश्रयभूतेति भट्टपादाः प्रतिपादयन्ति। तत्रेदं कारणं प्रतिभाति-यच्चिरन्तनकालपाठ्यक्रमे वेदाध्ययनमनिवार्यमासीत्। अध्ययनानन्तरं तदर्थविचाराय प्रवृत्ताः व्याकरणं न्यायञ्च किञ्चिदधीत्य वाक्यशस्त्रस्यावश्यकतां निश्चित्य तदध्ययनाय गुरुकुलवासमकार्षुः। न्यायनिबन्धनात्मकं खलु मीमांसाशास्त्रम्। मीमांसासिद्धन्यायानामवलम्बनेनैव निष्कृष्टो वेदवाक्यार्थोऽवगन्तुं शक्यते। वेदवाक्यार्थाधिगमाय मीमांसान्यायानां यथा सञ्चारो भवति तथैव शास्त्रान्तरसिद्धवाक्यार्थाधिगमाय न्यायानामावश्यकतां निश्चिन्वानाः शास्त्रकारा न्यायान् सञ्चारयन्ति। न्याय्येन मार्गेण गन्तव्यमिति सर्वेषां शास्त्रकाराणां मुख्यस्सिद्धान्तः। एकैकेन शास्त्रकारेण स्वस्वविषये प्रवर्तिता न्यायाः सर्वैरेवाभ्युपगन्तव्या भवन्ति। तत्र पदशास्त्रं शब्दसाधुत्वसाधकान् न्यायान् प्रवर्तयति, प्रमाणशास्त्रं प्रमेयपरिज्ञानसाधकान् न्यायान् निर्दिशति, तथा वाक्यार्थनिर्णायकान् न्यायान् वाक्यशास्त्रं परिगणयति। अत्र मिथ उपकार्योपकारकभावे विद्यमाने किं प्रबलं किञ्च दुर्बलमिति न निर्णेतुं शक्यते। तत्र मीमांसाशास्त्रं यान् न्यायान् बोधयति तेषां स्वस्वग्रन्थेषु वैयाकरणाः नैयायिकाः वेदान्तिनः आलङ्कारिका अन्ये च दार्शनिकाः निबन्धग्रन्थप्रणेतारश्च सञ्चारयन्तः प्रतिपाद्यविषयसम्पुष्टिं कुर्वन्तीति समेषां विदितचरम्। न्याय्ये पथि गन्तुं व्यवसितमतयो दार्शनिका न्यायानभ्युपगन्तुं किमिति सन्दिहीरन्। प्रकृतप्रतिपाद्यविषयनिर्णयाय न्याया इतिकर्तव्यताकोटौ सन्निविष्टाः खलु भवन्ति। यथा हि विधिना विधीयमाना भावनाः किं केन कथमित्याकाङ्क्षात्रयवत्यः साध्यं साधनञ्चावाप्यापि विनेतिकर्तव्यताभिः साधनमात्रेण साध्यं साधयितुमक्षमाः इतिकर्तव्यता अपेक्षन्ते, अपेक्षिता विहितेतिकर्तव्यता अवाप्य परिपूर्णास्सत्यः अविहितेतिकर्तव्यताकेषु कर्मसु इतिकर्तव्यताः प्रापय्य साध्यसाधनक्षमाणि तानि

प्रकुर्वन्ति तथैव मीमांसापि शास्त्रान्तरेषु न्यायानतिदिश्योपकरोतीति इति-कर्तव्यताभागप्रपूरिकेति 'इतिकर्तव्यताभागं मीमांसा पूरयिष्यति' इत्यभिदधाना भट्टपादास्सर्वशास्त्रोपकारकत्वं मीमांसायाः प्रसाधयन्ति। वेदश्शास्तीति शास्त्रं भवति, शास्त्रस्यास्येतरनिरपेक्षे शासकत्वे सत्यपि भ्रमप्रमादालस्यादिदोष दूषितान् मानवान् समीचीने पथि गमयितुं प्ररोचकानर्थवादान् आश्रयते, तथापि वेदस्य शास्त्रस्य शासकत्वं न हीनं भवति तथैव तस्य तस्य शास्त्रस्य स्वातन्त्र्येण शासकत्वे सत्यपि मीमांसासिद्धन्यायानवलम्ब्य शास्त्राणीतराणि शासतीति समन्वये स्वीक्रियमाणे वेदतुल्यत्वमेव तेषामाश्रितं भवति।

यथा हि श्री महात्रिपुरसुन्दरी महाषोडशी-षोडशी-पञ्चदश्याद्यक्षरैस्स-माराधिता सकलज्ञानसाम्राज्यप्रदात्री परिगण्यते, सैव त्र्यक्षर्यापि समाराधिता तादृशफलदायिनी भवति, तथैव मीमांसाख्या तु विद्येयम् शबरकुमारिल-पार्थ-सारथिखण्डदेवादिप्रणीतप्रौढग्रन्थनिचयाध्ययनेन विमलज्ञानदायिन्येव किन्तु शास्त्रमालादि लघुग्रन्थाध्ययनेनापि तादृशं ज्ञानं जनयितुं क्षमेति साधयितुं कमलाकरभट्टस्यायं यत्न इति प्रतिभाति। अथवा भगवति जैमिनिमहर्षौ कन्यामिमां संसृज्य—

'कन्या हि जाता महतीह चिन्ता कस्मै प्रदेयेति महान् वितर्कः।
दत्वा सुखं प्राप्स्यति वा नवेति कन्यापितृत्वं खलु नाम कष्टम्' ॥

इत्युक्तदिशा चिन्तामुपगतवति उपवर्षबोधायनशबरकुमारिलादिभिः परिवर्धितां सर्वैरेव दार्शनिकैस्समादृतां वीक्ष्य निर्वृतान्तःकरणे सति पुनरपि तां कन्यां विधाय परिवर्द्धयितुमिच्छन् कमलाकरभट्टः शास्त्रमालां ग्रथितवानिवेति प्रतीयते।

कमलाकरभट्टविरचितेषु सिद्धान्तपद्येषु बाला मीमांसा नृत्यन्तीव मनो-हारिणी विद्यते। इमानि पद्यानि यदि वाचोविधेयानि क्रियन्ते मन्ये तर्हि बृहच्छरीरा मीमांसा सङ्कुचितगात्रा सती अध्येतृनध्यापकांश्च रञ्जयेदिति। यथा हि जैमिनिः स्वीयेषु सूत्रेषु विषयसंशयपूर्वोत्तरपक्षानन्तर्भाव्य सूत्राणि प्रणिनाय तथैव तमनुसरन् कमलाकरोऽपि विषयादीनन्तर्भाव्य सिद्धान्तमात्रं प्रतिपादयन् स्मृतिशक्तिप्रवर्धनाय शरीरशक्तिप्रवर्धकव्यायामशालामिव स्मृति-शक्तिप्रवर्धकशास्त्रमालां प्राणिनायेव। अनेन 'गुरुरनुगन्तव्यः' इति स्मृत्यर्थो-ऽनुसृतः कमलाकरेण। मीमांसाया आदिगुरुर्जैमिनिः। गुरोर्यद्यदाचरणं तत्तदाच-रितव्यमन्तेवासिभिः, गुरुणा यः पन्थाः क्षुण्णः तस्मिन्नेव पथि गन्तव्यमन्तेवसभिः। इयं भारतीया संस्कृतिः संस्कृतिमिमां कमलाकरः परिगृहीतवान् इति नाश्चर्यं किमपि। पूर्वजैर्मीमांसकैः ये पदार्था निरूपिताः तेषां सङ्ग्रहात्मकोऽयं ग्रन्थः प्रणीत इत्यत्रापि न किमपि वैशिष्टयम्, किन्तु कमलाकरेणान्यदेकं विरचितं ग्रन्थरत्नं मीमांसाकुतूहलाभिधम्। यथा न्यायशास्त्रे 'न्यायसिद्धान्तमुक्तावली' ति प्रसिद्धं ग्रन्थरत्नं न्यायमतसिद्धपदार्थनिरूपणपरं व्युत्पादकत्वेन प्रथितम्, तथाविधग्रन्थरत्नं

मीमांसायामप्यावश्यकमिति विभाव्य भट्टमतसिद्धपदार्थनिरूपणपरमिदं ग्रन्थरत्नं कमलाकरः प्राणैषीत्। मीमांसाग्रन्थकारेषु केनापि नैतादृशो ग्रन्थः प्रणीतः। तत्र भट्टपादानां संमतिं तत्र तत्र प्रकाशयन् कमलाकरः स्वकपोलकल्पितत्वञ्च निराकुर्वन् प्रामाणिकत्वेनोपादेयतां स्वीयारम्भपद्येनावद्योतयति—

'मीमांसातन्त्रगहनच्छन्नानर्थान् यथामति।
चौरानिव निबध्नामि सुखं सन्तश्चरन्त्वतः'॥ इति॥

सत्यमेव मीमांसातन्त्रं गहनम्, शबरस्वामिनां भट्टपादानाञ्च निबन्धोऽतिगहनः। कुत्र कस्मिन् कोणे पदार्थो निलीन इति वेत्तुं न शक्यते। यथा चोरा गहने वने निलीना भवन्ति तथैवेमे भट्टमतसिद्धाः पदार्थाः। वेदवाक्यानां निष्कृष्टमर्थं प्रतिपादयितुमेव खल्वियं विचारात्मिका मीमांसा प्राधान्येन प्रवृत्ता न प्रमाणानां प्रमेयानाञ्च निरूपणाय। गौणमिदं मीमांसकानां प्रमाणप्रमेयनिरूपणं नाम। अतः पूर्वजैर्ग्रन्थकर्तृभिः भट्टकुमारिलप्रभृतिभिः तत्र तत्र वेदवाक्यार्थविचारावसरे प्रसङ्गानुरोधेन प्रमाणप्रमेयपदार्था उल्लिखिता इति निलीनास्सन्ति। निलीनानामन्वेषणं गुप्तचरैकसाध्यम्। आत्मानं गुप्तचरं विधाय कमलाकरः चोरानन्विष्य ददात्यस्मभ्यम्, येन स्वच्छन्दं गहने वने सञ्चरितुं शक्नुमः। अत्र 'निबध्नामि' इति पदं प्रयुञ्जानः कमलाकरः निगडेन निबद्धाश्चोराः निगडश्च पूर्वजैरेव प्रदत्तः, केवलं मम तत्र निबन्धनमेव कार्यम्, तदहमकरवमिति सूचयति। एतेन स्वकपोलकल्पितत्वं निराकृतं भवति। एवमयं कमलाकरो विपुलस्य न्यायनिनिचयस्य पूर्वजानां ग्रन्थेषु तत्र तत्र निलीनस्य प्रमेयजातस्य च सङ्ग्रहेण ग्रन्थद्वयं विरचय्य मीमांसाया महतीं न्यूनतां पूरयामास। न्यायनिबन्धनात्मकस्य भागस्य शास्त्रान्तरेण सह विवादप्रसक्तिरेव नास्ति। न्यायस्तु न्याय्य एव भवति। तत्र कस्य को विवादः? भागान्तरस्य प्रमाणप्रमेयात्मकस्य नूनं विवादो भवेत् शास्त्रान्तरैस्सह। विवादस्तु चर्चयैव प्रशमनीयः। चर्चायां त एव प्रवेष्टुमर्हन्ति ये चोभयसिद्धं सर्वमान्यं प्रमाणमेकमङ्गीकृत्य गच्छन्ति। तच्चैकं प्रमाणं वेदः। वेदे चास्ति दार्शनिकानामविशेषेण मान्यता इति न कस्यापि विवादः। तत्र परापेक्षं प्रामाण्यं वा स्वत एव वा तत् इत्येव विवादः, न तु प्रामाण्ये। वेदेन सह दूरात्सम्बन्धः केषाञ्चन, आराच्चापरेषाम्। सम्बन्धिनश्च सर्वं एव। तत्र दूरात्सम्बन्धी स्वसम्बधिनं साधारणतया सत्कुर्यात्, आराच्च सम्बन्धी विशेषेण सत्कुर्यादिति लौकिको मार्गः। मीमांसकानामतिसन्निकटस्सम्बन्धो वेदेन, अतस्स्वमार्गानुसारेण ते गच्छेयुः,वयञ्च दूरात्सम्बन्धिनो नैय्यायिकादयः। तत्र हस्तक्षेपो न कर्तव्य इति ते जोषम्भावमवलम्ब्य स्थातुं शक्नुयुः। मीमांसकास्तु, विशिष्य पदार्थविवेचनाय प्रवृत्तान् नैय्यायिकानवगत्य सत्यपि पदार्थेषु विरोधे सम्बन्धो वेदस्तैराद्रियते इति तूष्णीं तिष्ठन्ति। कलहन्तु मध्यवर्तिनः कुर्वन्ति। स चान्तः कलहः। अन्तः कलहप्रशमनाय चर्चैव वार्तालापरूपा साधनम्, न तु वादविवादः, विवदमानयोरुभयोर्भिन्न-

प्रमाणावलम्बित्वात्। चर्चायान्तु साक्षात्परम्परया वा वेदः प्रमाणम्। सर्वत्रैवं समन्वयदृष्ट्या गच्छन्ति भट्टपादाः, तमेव पन्थानमनुसरन् कमलाकरः स्वीये मीमांसाशास्त्रकुतूहले पदार्थान् विचारयति। तदस्य विचारसरणिं विशेषेण शास्त्रकुतूहलभूमिकायां प्रदर्शयिष्यामः।

ग्रन्थादौ कमलाकरः स्वपितरं श्रीरामकृष्णभट्टं नमस्कर्तुं महता गौरवेण निर्दिशति-भगवानादिपुरुषः श्रीमन्नारायणो युगभेदेन दशस्वरूपाणि जग्राह। स नारायणः एकमाश्रयमवाप्य रूपद्वयं धारयितुमियेष। तदेव रूपं राम-कृष्ण इति विश्रुतमिति वर्णयन् पितरं श्रीरामकृष्णं साक्षान्नारायणं साधयति।

'आसादितानि प्रथमेन पुंसा
दशस्वरूपाणि युगप्रभेदात्।
एकाश्रयं रूपयुगं प्रपित्सुः
श्रीरामकृष्णो भुवि विश्रुतोऽभूत्॥

तत्पादसंसेवनजातप्रभावात्
आसाद्य हृष्यन्धिषणाविलासम्।
तदात्मजः श्री कमलाकराख्यः
कुतूहलाद्भाट्टमतेऽभिधत्ते ॥

पितुस्सकाशादेव प्राप्तविद्यमात्मानं निर्दिशति। न केवलं पितरमेव निर्दिशति, किन्तु पितामहं श्रीनारायणभट्टं प्रपितामहं श्रीरामेश्वरभट्टञ्च निर्दिशति—

'भट्टरामेश्वरं नत्वा भट्टनारायणं तथा।
श्रीरामकृष्णचरणौ नमामि स्फूर्तिहेतवे॥' इति।

अनन्तभट्टश्च शास्त्रमालावृत्तिकारः पितरं कमलाकरभट्टं ग्रन्थादौ प्रणमति। भव्येयं गुरुपुत्रपरम्परा, गुरुशिष्यपरम्परा च। भगवती मीमांसा पञ्चसु पुरुषेष्वविच्छिन्ना समागच्छति। गुरुमुखादहमश्रौषम्-यत्काश्यां भट्टकुलं देवकुलञ्चेति कुलद्वयम्, तत्र भट्टकुले पञ्चदशपुरुषपर्यन्तं धर्मशास्त्रस्य मीमांसायाश्चाध्ययनाध्यापन-ग्रन्थप्रणयन-तद्व्याख्यासम्पादनकार्याणि कुलपुरुषाः कुर्वन्त आसन्। एवमेव देवकुलेऽप्यत्रैव काश्यां कुलपुरुषाः धर्मशास्त्रस्य मीमांसायाश्च प्रचारका आसन्निति। धन्येयं भारतभूमिरिमान् सुतान् प्रासूय समजनिष्ट। एवं परम्परायां सत्यां गुरुलघुरूपेण ग्रन्थेषु सत्स्वपि न मीमांसामध्येतुं लोकः प्रवर्तत इति महतो विषादस्य स्थानम्। इदन्तु निश्चितं यत्, वेदाध्ययनं वेदोदितश्रौतस्मार्तकर्मणामनुष्ठानम्, तत्र तत्र गोष्ठीषु धर्ममीमांसयोश्चर्चा इत्येवं भूयसी स्थितिरासीत्पुरा। अत एवैतदध्ययने प्रवृत्तिर्लोकानामभूत्, सम्प्रति तु तत्सर्वं लुप्तमिति धर्म-मीमांसयोरध्ययने न कस्यापि प्रवृत्तिरिति, तथापि परम्परागतां संस्कृतिमाश्रित्यैकैकेनापि भारतीयेन वर्तितव्यमित्यत्र ध्यानं देयमेव।

अतिसंक्षिप्तशरीरा शास्त्रमाला, अधीतमीमांसाशास्त्रैरेव बोद्धुं शक्या। ये मीमांसाशास्त्रे प्रविविक्षवस्तेऽध्ययनानन्तरं विषयान् जानन्त्विति मनीषया सारगर्भितां वृत्तिं प्रणीतवान् कमलाकरात्मजोऽनन्तभट्टः। लघुशरीरापि वृत्तिस्सारगर्भिता। 'इत्यत आह' इति शास्त्रमालामवतारयन् पद्यानि व्याख्याति। 'इत्यत आह' इत्यतः पूर्वं पूर्वपक्षं हेतुभिरवस्थाप्य सिद्धान्तं प्रदर्शयति। सिद्धान्ते पूर्वपक्षहेतूनां खण्डनमुपलभ्यते। उभयत्रापि न्यायसञ्चारवैदग्ध्यं प्रदर्शयति। मीमांसान्यायाः तत्र तत्र सञ्चारायैव प्रवृत्ता इति वृत्तिग्रन्थाध्ययनेन प्रतीयेत। पूर्वपक्षे सिद्धान्ते च पञ्चम्यन्ता हेतवः सुखेन सङ्ग्रहेण च विषयग्राहका भवन्ति। वृत्तिग्रन्थे पार्थसारथिमिश्रस्य शैलो परिलक्ष्यते। उद्ग्रन्थाध्ययनावसरे यथा क्लेशो न स्यात् तथा वृत्तौ सङ्ग्रहेण सहेतुनिर्देशमधिकरणशरीरं प्रकाशयति। विवादग्रस्तस्थलेषु 'पितृचरणाः' इति सगौरवं निर्दिश्य प्रकृतविषयं व्यवस्थापयति। भाष्यवार्तिकयोर्यत्र मतभेदः तं कमलाकरभट्ट एव विवृणोति। तत्र तत्र पितुस्सम्मतिप्रदर्शनेन ज्ञायते पितुर्जीवदवस्थायामेव वृत्तिरियमनन्तभट्टेन प्रणीतेति।

कमलाकरभट्टः स्वीये निर्णयसिन्धुग्रन्थे ग्रन्थान्ते ग्रन्थपरिसमाप्तिसमयं निर्दिशति–'वसुऋतुऋतुभूमिते १५६८ नरपति विक्रमतोऽथ याते रौद्रे'इति। अनेन चतुरशीत्यधिकत्रिशताद्वर्षेभ्यः पूर्वं अर्थादीसवीये सप्तदशशताब्द्या आदौ कमलाकर आसीदिति ज्ञायते। अस्मिन्नेव समये देवकुलतिलकः मीमांसान्यायप्रकाशप्रणेता श्री आपदेवोऽप्यासीत्। आपदेवस्य तिथिनिणयोऽस्मत्पूज्यपादैः सारविवेचनीसमेतन्यायप्रकाशभूमिकायामयमेव समयो निर्णीतः। कमलाकरः भट्टपादवार्तिक, टीकां भावनाविनोदं भाट्टमीमांसाकुतूहलं भाट्टमीमांसाशास्त्रमालाञ्च मीमांसायाम्। निर्णयसिन्धुं धर्मशास्त्रे, काव्यप्रकाशटोकां साहित्ये, वेदान्तरत्नं वेदान्ते च प्राणैषीदिति मीमांसाकुतूहलग्रन्थाध्यनेन ज्ञायते। इतिहासग्रन्थेषूद्धृतसङ्ग्रहश्लोकैरवगम्यते–कमलाकरः एकविंशतिग्रन्थनां प्रणेतेति। सर्वेऽपि ग्रन्था भारतीयसंस्कृतिस्वरूपावबोधकाः। तत्र तत्त्वकमलाकरो दशपरिच्छेदात्मको विशेषेण भारतीयसंस्कृतिप्रदर्शनपरस्सर्वलोकपरिग्राह्यः। यथा हि कमलाकरस्तत्र तत्र निलीनान् पदार्थानन्विष्य स्वीये कुतूहले सङ्गृहीतवांस्तथा तेन प्रणीतान् ग्रन्थानन्विष्य प्रकाशपथमानेतुमद्यावधि समयो नागत इति महान् खेदस्य विषयः। नाद्यावधि तेन लिखिता बहवो ग्रन्थाः प्रकाशिताः। भट्टकमलाकरीयमीमांसाकुतूहलस्यापि टीका तत्पुत्रेणानन्तेन विरचितेति शास्त्रमालावृत्तितो जानीमः। भारतीयसंस्कृतिसंरक्षणायैव मोमांसाधर्मशास्त्रे प्रवृत्ते। तत्र मीमांसाधर्मशास्त्रयोर्नास्ति कोऽपि भेदः। तास्ताः स्मृतीरादाय धर्मशास्त्रं प्रवृत्तम्। तस्य च धर्मस्य याथातथ्येन स्वरूपं निर्णेतुं मीमांसा प्रवृत्तेति नानयोर्विषयभेदः। यथा स्मृतीनां मूलं वेदः तथैव मोमांसाया अपि मूलं वेदः। तत्र मीमांसा मूलं वेदं साक्षाद्विचारयति, धर्मग्रन्थास्तु स्मृतयो मूले वेदेऽभिहितान् विषयान् सङ्गृह्णाति इत्येवं पर्यवसाने उभयोरेकत्वमेव पर्यवस्यति। यो धर्मशास्त्रमधीते तेन

मीमांसाप्यध्येतव्या, यो मीमांसामध्येति स धर्मग्रन्थान् परिशीलयेदेव। तदिदं कमलाकरविरचितेषु ग्रन्थेषु परिशील्यमानेषु स्फुटं ज्ञायते। सामाजिकव्यवस्था धर्मग्रन्थैरेव सिध्यति, व्यवस्थायास्तस्या साधुत्वासाधुत्वे विचारयति मीमांसा। न्यायपालिकायाः स्थाने मीमांसा वर्तत इति प्रागवोचम्। विधायकैर्मनुयाज्ञवल्क्य प्रभृतिभिस्समाजशास्त्रिभिः निर्णीतानां विधीनां परिशीलनाय न्यायपालिकाया आवश्यकतेति नात्र कश्चन संशयः। अतएव चिरन्तना भारतीयसंस्कृतिपरिरक्षणैकतानमतयः सर्वलोकोपकारिकां सर्वशास्त्राश्रयभूतां भगवतीं मीमांसाविद्यां प्रेम्णाऽधिगच्छन्तोऽध्यापयन्तः लघूनि गुरूणि ग्रन्थरत्नानि चाविष्कुर्वन्तो भारतं गौरवान्वितमकार्षुः।

एवं तेषामुद्यमे विद्यमाने वयमिदानीं तदध्ययनाध्यापनतद्ग्रन्थप्रकाशनादिकार्येषु विमुखाः स्मः चतुश्शतवर्षेभ्यः पूर्वं प्रणीतस्यास्य ग्रन्थस्य शास्त्रमालाख्यस्य नाद्यावधि प्रकाशनं जातमिति महद्विषादस्थानम्। तत्र तत्र प्रच्छन्नानां ग्रन्थरत्नानां सङ्ग्रहमात्रेण नाहं कृतकृत्यतामङ्गीकरोमि। ग्रन्थप्रकाशनं नाम महता द्रव्यव्ययेन साध्यम्। यद्यपि कृतेऽपि प्रकाशने तदध्येतारो नोपलभ्यन्त इति प्रकाशनव्ययो व्यर्थ इति तु सत्यम्, तथापि मातृकानां सङ्ग्रहमात्रेण घुणानां भक्षणायैव तास्युः। तदपेक्षया प्रकाशितेषु ग्रन्थेषु कालान्तरे तेषामुपयोगो भवेदिति विश्वासेन प्रकाशनं समुचितमिति मन्ये। दैवयोगात् विद्वद्वरैः श्री पाण्डुरङ्गी कृष्णाचार्यैः अस्मत्केन्द्राय प्रेम्णा प्रदत्तोऽयं ग्रन्थः कथमपि प्रकाशपथमानेतव्य इति निश्चित्यास्मिन् कर्मणि प्रावर्तिषि। द्रव्याभावेन मदीय उद्यमः कुण्ठित इवासीत्, परन्तु दैवी घटना तादृशी आसीत् यया च मदुद्यमस्सफलोऽभवत्। एकदा मां वीतरागाः सर्वेषु शास्त्रेष्वप्रतिहतप्रसराः भारतीयसंस्कृतिप्रसारणैकतानमतयः अनन्तश्री विभूषिता **अखण्डानन्दसरस्वतीस्वामिचरणा** आदिशन् हिन्दीभाषया जातकर्मप्रभृतिसंस्कारविषये ग्रन्थमेकं लिख, तत्प्रकाशनाय यद्यदावश्यकं तत्सर्वं प्राप्तं भविष्यतीति। नाहं हिन्दीभाषाज्ञः तथापि स्वामिचरणानामनुग्रहेण 'संस्कारविज्ञानम्' इति नाम्ना ग्रन्थमेकं व्यरचयम्। तत्प्रकाशनाय स्वामिचरणाः बिडलापरिवारे उद्योगपतिं श्री **बसन्तकुमारबिड़लामहोदयं** तत्पत्नीं **श्रीमतीं सरलादेवीञ्च** प्रेरयामासुः संस्कारविज्ञानप्रकाशनाय। तस्य प्रकाशनकार्यं सम्पन्नम्। प्रकाशनाय यावद्द्रव्यं दम्पतिभ्यां प्रदत्तं तत्र कियानंशोऽवशिष्टः। अवशिष्टस्य द्रव्यस्य विनियोगाय दम्पत्योस्सम्मतिमवाप्य शास्त्रमालायाः प्रकाशने समर्थोऽभवम्। एतदर्थं स्वामिचरणेभ्यः प्रणामान् समर्पयामि। श्रीमन्तं वसन्तकुमारबिडलामहोदयं तज्जायां श्रीमतीं सौभाग्यवतीं सरलादेवीञ्चाशिषा पूरयामि। वेदमीमांसानुसन्धानकेन्द्राय मूलमातृकां प्रदत्तवद्भ्यः श्री पाण्डुरङ्गी कृष्णाचार्येभ्यो धन्यवादान् वितरामि। एकैवेयं मातृका दोषपूर्णा च। तां कथञ्चित्संशोध्य प्रकाशपथमानीतोऽयं ग्रन्थः। तत्रावश्यं भवेयुस्त्रुटयः, ताः क्षन्तव्या इति प्रार्थये विद्वद्वरान्। वृत्तिग्रन्थस्यानन्तभट्टविरचितस्य बहुषु स्थलेषु विवरण-

मावश्यकमासीत् तन्न मया कृतम् । पुस्तकाकारो वर्द्धेत, तेन च व्ययाधिक्यं स्यात् स्मृतिशक्तेश्च वृद्धिर्न स्यादध्येतॄणाम् । बहूनि स्थलानि सन्ति विवरणसापेक्षाणि । इमं ग्रन्थमधीत्य छात्राः शास्त्रदीपिकाभाट्टदीपिकादिग्रन्थानध्येतुं शक्नुयुः । भाष्ये तर्कपादे येऽन्ये विषयाश्चर्चितास्ते कमलाकरेण न स्पृष्टाः । मीमांसानुक्रमाणिकायां मण्डनमिश्रैः भाष्यगतान् विषयान् श्लोकरूपेण निबबन्धुः । मीमांसा शास्त्रमालामधीत्य छात्राः मीमांसानुक्रमिणिकां स्वयं पठेयुः तर्हि अर्थावबोधः सुखेन स्यादिति तर्कयामि । मीमांसायां सर्वे ग्रन्था गुरोर्मुखादेवावगन्तव्या इति नास्ति निर्बन्धः, एकं द्वौ वा सम्यगधीत्य छात्रा यदि स्वयं परिश्रम्य ग्रन्थान्तरं व्याख्यानं वा समन्वयदृष्ट्या विलोकयेयुस्तर्हि शास्त्रे प्रवेशो लघुनैव कालेन सिध्येत् । एतदर्थमेव गुरुलघुभूता ग्रन्था विद्वद्भिः प्रणीताः ।

मीमांसाशास्त्रस्याप्रकाशितानां मातृकारूपेण विद्यमानानां, प्रकाशितानामपि दुर्लभानां ग्रन्थानां प्रकाशनाय प्रवृत्तोऽहं परिणते वयसि वर्तमानोऽपि नेत्राभ्यां श्रोत्राभ्याञ्च क्षीणशक्तिरपि सवृत्तिकशास्त्रमालायाः कथञ्चित्प्रकाशनकार्यसमापने सक्षमोऽभवम् । मातृकासंवाद-'प्रूफ'संशोधनादिकार्येषु महदुपकृतवतीं मत्सहधर्मिणीं नाम्ना शारदाम्बां सौमङ्गल्यादि शुभाशंसनैः परिपूरयामि । यथासमयं मुद्रणकार्यं सम्पादितवन्तं महाकान्त-मुद्रणालयाधिपं शुभैराशीर्वचोभिस्संवर्द्धयामि । एतादृशेषु शैक्षणिक कार्येषु मां शिक्षितवद्भ्यः पूज्यपादेभ्यः सहस्रशः प्रणामान् समर्पयन् विद्वदपश्चिमान् प्रार्थये-यदस्य ग्रन्थस्य मीमांसातन्त्रस्य च प्रचारायानुकूलां सामग्रीसम्पदं वितन्वन्तो मामनुगृह्णीयुरिति ।

संवत् २०४३ विद्वदाश्रवः
वैशाख शुक्ल पञ्चमी **पट्टाभिरामशास्त्री**

श्रीः

सवृत्तिशास्त्रमालायां

प्रमाणाध्यायः

।। श्री गणेशाय नमः ।।

सूर्यवंशावतंसाय दशस्यन्दनसूनवे ।
जगज्जाड्यापहाराय जानकीपतये नमः ।।
मीमांसानलिनीभानुं नत्वा श्रीकमलाकरम् ।
तत्सूनुना त्वनन्तेन शास्त्रमाला विविच्यते ।।
भट्टश्री कमलाकराख्यजनकैर्विद्वत्कुलाभूषणैः
पूजार्हैर्गुणगुम्फितो विरचितो यश्छास्त्रमालाख्यकः ।
वृत्तिस्तत्र वितन्यते स्फुटतरानन्तेन तत्सूनुना
मेदिन्यां मुदमातनोतु विदुषां चित्ते चिरं सा भृशम् ।।

१

अथातो धर्मजिज्ञासा ● ननु स्वाध्यायोऽध्येतव्य इत्यध्ययनविधौ स्वाध्यायस्य कर्मोत्पन्नतव्यप्रत्ययेन साध्यत्वावगतेः पारायणाद्युपयुक्तत्वादक्षरग्रहणमेव भाव्यम् । ततश्च विचारायोगान्नारभ्यं शास्त्रमत आह—

स्वाध्यायो ह्यर्थधीहेतुर्न विचारं विना भवेत् ।
तदर्थं शास्त्रमारभ्यं जिज्ञासासूत्र ईरितम् ।।

न तव्यप्रत्ययेन स्वाध्यायस्य भाव्यत्वं सम्भवति, तथात्वेऽपुरुषार्थसाध्यकभावनायां विधेरप्रवर्तकत्वापत्तेः । कर्मोपयुक्तार्थज्ञानार्थत्वे सम्भवत्यदृष्टार्थत्वायोगाच्च । तेन तव्यप्रत्ययेन साध्यत्वोक्तावपि[1] सक्तूनितिवत्करणत्वे लक्षणा । रेवतीवारन्तीयवद्भावनाविशिष्टभावनान्तरविधिरयमिति पितृचरणाः । क्वचिदक्षरग्रहणार्थत्वमपि पारायणविधिना तस्यापेक्षिततत्वात् । न च वैरूप्यम्, यच्छक्नयते तत्कुर्यादित्यनेन सर्वसङ्ग्रहात् । तेनाध्ययनविधेः दृष्टार्थत्वाद्विचारार्थमिदं शास्त्रमारभ्यमित्युपोद्घातः ।।

२

चोदनालक्षणोऽर्थो धर्मः ● ननु न धर्मजिज्ञासा सम्भवति । लक्षणप्रमाणाभावेन धर्मस्वरूपस्यैवासत्त्वादत आह—

१. सक्तून् जुहोति' इत्यत्र यथा सक्तुभिर्जुहोतीति तृतीयायां लक्षणाऽऽश्रीयते तथेत्यर्थः ।

धर्मं स्वरूपप्रामाण्ये चोदनालक्षणत्वतः ।

अनेन सूत्रेण धर्मस्य स्वरूपं प्रमाणञ्चोच्यते । चोदना लक्षणं प्रमाणं यत्रेत्यर्थः । अर्थः बलवदनिष्टाननुबन्धीष्टसाधनम् । तेन चोदनालक्षणत्वे सति य इष्टसाधनं स[1] धर्म इति लक्षणमप्यर्थादुक्तं भवति । अर्थपदन्तु श्येनव्यावृत्यर्थम् ।

३

तस्य निमित्तपरीष्टिः ● इदं सूत्रं वेदस्य धर्मनिमित्तत्वे परीक्षाप्रतिज्ञार्थमित्याह—

तत्प्रमाणपरीक्षातः,

तत्सम्प्रयोगे ● ननु धर्मस्य प्रत्यक्षानुमानोपमानलौकिकशब्दार्थापत्यभावाख्यप्रमाणगम्यत्त्वसम्भवान्न वेदगम्यत्वमत आह—

प्रत्यक्षादेरमानता ॥

४

न प्रत्यक्षगम्यो धर्मः, इन्द्रियसन्निकर्षाभावात् ।[2] अलौकिकप्रत्यक्षस्य चासत्वात् । न च यागादिक्रियायाः प्रत्यक्षत्वात्प्रत्यक्षगम्यत्वमिति वाच्यम्, फलसाधनत्वस्याप्रत्यक्षत्वात् । नानुमानगम्यः, धर्मव्याप्तलिङ्गाभावात् । सुखादेर्दृष्टचन्दनाद्यैः सम्भवेन धर्मत्वेन सुखत्वेन कार्यकारणभावानङ्गीकारात् । सादृश्याभावान्नोपमानम् । अनुपपद्यमानार्थाभावान्नार्थापत्तिः । योग्यानुपलब्ध्यभावान्नानुपलब्धिः । धर्मस्य प्रमाणान्तरगम्यत्त्वाभावान्न लौकिकः शब्दः । तेन वेदबोध्य एव धर्मः ॥

५

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः ● ननु न वेदमात्रबोध्यो धर्मः, तस्याकाङ्क्षायोग्यतासंनिध्याद्यपेक्षत्वात्, तेषाञ्च पौरुषेयत्वात् । वर्णानां नित्यत्वेऽप्यानुपूर्व्याः पौरुषेयत्वात् । तेन वेदस्य परापेक्षत्वेनाप्रामाण्यात् कथं तन्मात्रगम्यत्वं धर्मस्यात आह—

विधेरेव प्रमाणत्वं,

नाकाङ्क्षादीनां पुँधर्मत्वम् । पदार्थानामेव पिधेहीति क्रियायाः कर्मकारकाकाङ्क्षावत्परस्परविषयाकाङ्क्षोत्थापकत्वेन साकाङ्क्षत्वात् । आद्योच्चारणत्वादिरूपोच्चारणरूपानुपूर्व्याप्यनादिः । जातेर्वाच्यत्वेन शब्दस्य नित्यत्वेन

---

१. बलवदनिष्टाननुबन्धीष्टसाधनत्वं श्येनयागे नास्ति तस्याभिचारफलकत्वात् । यद्यपि तत्र चोदनालक्षणत्वमिष्टसाधनत्वञ्चास्ति, तथापि तदिष्टसाधनं बलवदनिष्टाननुबन्धि नास्तीति तद्व्यावृत्यर्थं विशेष्यदलमित्यर्थः ।

२. अलौकिकसन्निकर्षो मीमांसकैर्न स्वीक्रियते । अतोऽलौकिकप्रत्यक्षगम्यत्वं धर्मस्य नास्तीति भावः ।

वाच्यवाचकभावसम्बन्धोऽध्ययनादिरेव । अतो वेदस्य परापेक्षाभावात्तस्यैव धर्मे प्रामाण्यम् ।।

६

कर्मेके तत्र दर्शनात् ● ननु वर्णानां पदानाञ्चानित्यत्वेन सम्बन्धस्यानित्यत्वात्स एवायं गकार इति प्रत्यभिज्ञायाश्च भ्रान्तत्वात्कथं वेदस्यापौरुषेयत्वमत आह—

पदानां नित्यता ततः ।

न वर्णानां पदानाञ्चानित्यत्वं सम्भवति । स एवायं गकारस्तदेवेदं पदमिति प्रत्यभिज्ञया चानित्यत्वनानात्वयोर्बाधात् । न चोत्पन्नो गकारः नष्टो गकार इति प्रतीतिद्वयात्प्रत्यभिज्ञाया एव भ्रान्तत्वमिति वाच्यम् । अनेकवर्णतत्प्रागभावतद्ध्वंसतन्निष्ठजातिप्रत्यभिज्ञाभ्रान्तीनां कल्पने बहुगौरवापत्या तयोरेव भ्रान्तित्वस्वीकारात् । तेन नित्य एव वेदः ।।

७, ८

तद्भूतानां क्रियार्थेन समाम्नायः ● वेदांश्चैके ● ननु नित्यत्वेऽपि पदानां धर्मस्यापदार्थत्वात् पदसमुदायस्य च समुदाय्यतिरिक्तत्वाभावेनावाचकत्वान्न तद्बोध्यत्वं धर्मस्य, ततश्च वाचकत्वात्काठकादिसमाख्यानाद्वेदः पौरुषेयो वाक्यत्वाद्रघुवंशादिवदित्यनुमानाच्च पौरुषेय एव वेद इति चेत् । काठकादेः प्रवचनाद्वेदवाक्यस्य नित्यता । फलसाधनत्वरूपधर्मत्वस्य लौकिकवाक्यार्थवत् पदार्थान्वयलभ्यत्वाच्छक्तिग्रहापेक्षाभावाद् वाक्यगम्यत्वोपपत्तेः । पदार्थान्वयस्तु संसर्गमर्यादया भासते लक्षणया वेत्यन्यदेतत् । नापि समाख्या,तस्याः प्रवचननिमित्तत्वात् । नानुमानम् ।[1] उपलम्भ-रहितत्वस्योपाधितत्वात् । कर्त्तुर्योग्यानुपलब्ध्या बाधाच्चापौरुषेयो वेदः ।।

प्रथमः पादः ।।

द्वितीयः पादः

१

आम्नायस्य ● ननु 'वायुर्वै क्षेपिष्ठा देवते'त्यादीनां भूतार्थबोधनेन निराकाङ्क्षत्वात् भूतिं गमयतीति क्रियापदश्रवणाच्चाध्याहारेण धर्माधर्मप्रतिपादकत्वाभावाद्विध्येकवाक्यतावशात् प्राशस्त्ये लक्षणायामन्योन्याश्रयाद्विधीनाञ्च विशिष्ट भावनाविधानेन निराकाङ्क्षत्वेनोत्थाप्याकाङ्क्षयाप्यन्वयाभावाद्विधिनैवेष्ट-

१. अस्मार्यमाणकर्तृत्वस्येर्थः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । वेदे वाक्यत्वहेतोस्सत्वेऽपि पौरुषेयत्वं नास्तीति बाधः ।

साधनत्वे बोधिते प्रवृत्तेः सिद्धौ प्राशस्त्यानपेक्षणादर्थवादानाञ्च तदप्रतिपादकत्वाद्भूतार्थपरत्वे तु वैय्यर्थ्यान्न धर्मे प्रामाण्यमत आह—

स्तुत्यर्था ह्यर्थवादाः स्युः,

नार्थवादानामध्ययनविध्यध्यापितानामप्रामाण्यं सम्भवति। विध्यपेक्षितस्तुतिपरत्वेन तत्वोपपत्तेः। विध्यपेक्षितस्तुतिपरत्वञ्चेत्थम्—विधेर्हि द्वे रूपे। सर्वाख्यातसाधारणमाख्यातत्त्वं लिङ्त्वादिकञ्च। तत्राख्यातत्वेनार्थीभावना वाच्या लिङ्त्वेन च प्रेरणा। तत्रार्थवादानां नार्थभावनया सम्बन्धः। तस्या अंशत्रयपूर्णत्वात्। शाब्दभावनया तु प्रवृत्तौ कर्त्तव्यायां प्रवृत्ति-प्रतिबन्धकालस्यादिभञ्जकत्वेन प्राशस्त्यमपेक्षितम्। अतस्तत्प्रतिपादकत्वेनार्थवादानां शाब्दभावनेतिकर्तव्यतासमर्पकत्त्वात् प्राशस्त्येन लक्षणया सिद्धं प्रामाण्यम्। न चान्योन्याश्रयः। अध्ययनविधेरेव तात्पर्यग्राहकत्त्वात्। यद्यप्यत्र मूले अर्थवादवन्मन्त्रनामधेययोरपि प्रामाण्यमत्र साध्यत इत्युक्तम्। तथापि तयोः सामान्यतः प्रामाण्यस्य चोदनासूत्र एव सिद्धेर्विशेषतः प्रामाण्यस्य च तत्तदधिकरणे करिष्यमाणत्वेन पुनरुक्तत्वादित्यभिप्रेत्य स्तुत्यर्था ह्यर्थवादा इत्युक्तम्॥

२

विधिर्वा स्यात् • ननु नार्थवादत्त्वावच्छेदेन स्तुतिपरत्वं सम्भवति। वैकृतसोमापौष्णपशुयागसंनिधौ[1] विहितस्यौदुम्बरो यूपो भवतीत्यस्य फलाकाङ्क्षायां 'ऊर्ग्वा उम्दुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जे पशून् अवरुन्ध' इत्यस्य द्वितीयाश्रुत्या पशुरूपफलप्रतिपादकत्वेन फलविधित्वात्। यद्वा द्वितीयया पशूनां साध्यत्वेऽवगते तस्य साधनाकाङ्क्षायां दण्डोऽस्ति प्रहरेतिवत्संनिधानादेव साधनत्वप्रतीतौ इष्टसाधनत्वावगमादेव प्रवृत्तिसम्भवान्नौदुम्बरो यूपो भवतीत्यस्य विधित्वम्। तेनाधिका[2]राख्यप्रकरणेनौदुम्बरत्वस्य क्रत्वङ्गत्वावगमेऽपि इन्द्रियार्थदध्यादिवत्फलार्थत्वञ्च स्यादत आह—

क्वचित्फलविधिर्न च।

न स्तुत्यर्थत्वेन निराकाङ्क्षस्यैवंकामशब्दरहितस्य च फलप्रतिपादकत्वं सम्भवति। नाप्यौदुम्बरो यूपो भवतीत्यत्र विध्यभावः। तथात्वे औदुम्बरत्त्वस्यैव सन्निहितत्वेन साध्यत्वापत्तेः। तेनोर्जमिति द्वितीयया पशूनां साध्यत्वेऽप्यविहितस्य फलायोगान्न तत्परत्वम्। तेन स्तुत्यैव विधिः फलञ्च कल्पनीयमिति

---

१. 'सोमापौष्णं त्रैतमालभेत' इति वाक्यविहितो वैकृतः पशुयागः।

२. प्रकरणञ्चोभयाकाङ्क्षारूपं भवति। सोमापौष्णयागस्य विकृतित्वादुभयाकाङ्क्षाया न सम्भवः। तथापि विधीयमानस्यौदुम्बरत्वस्य प्रकरणग्राह्यत्वं साधनीयम्। अतः अधिकाराख्यप्रकरणेन-अन्यतराकाङ्क्षारूपेणौदुम्बरत्वस्य क्रत्वङ्गत्वं प्रसाध्य 'दध्नेन्द्रियकामस्य जुहुयादि' तिवत् गुणफलविधिरस्त्विति पूर्वपक्षिण आशयः।

वाक्यभेदः। किञ्च नौदुम्बरत्त्वस्याश्रयाभावे फले विधानं सम्भवति। न च सोमापौष्णपशुयागस्याश्रयत्वम्, तस्यौत्पत्तिकपशुद्रव्यावरुद्धत्वेनौदुम्बरुत्त्वस्य तत्र करणत्वासम्भवात्। न च काम्येनौदुम्बरत्वेन पशोर्बाधः, तथात्वे हि यूपशब्द-वैय्यर्थ्यात्। न च पशुनियोजनस्य यूपस्य वाश्रयत्वम्। तयोरतिदेशतः प्राप्तत्वेन प्रकरणादनुपस्थितेः। न च प्रकृतिवच्छब्देन तयोरुपस्थितिः। तस्य जुह्वादि साधारण्येन पृथगनुपस्थितेः। तादृशोपस्थितौ पुनर्यूपग्रहणानर्थक्यम्। तस्मादौ-दुम्बरत्वस्याश्रयालाभात् वाक्येनोभयसम्बन्धे विधीयमाने वाक्यभेदः। न चैव-ञ्जातीयकस्यार्थवादत्वं पर्णमय्यधिकरणेनैव सिद्धमिति तेन पौनरुक्त्यमिति वाच्यम्। साध्यसाधनविचारभेदेन भेदात्। यद्वा इहार्थवादत्वे सिद्धे तत्र रात्रि-सत्रवद्विध्यर्थवादसमुच्चयेन पूर्वपक्षोत्थानात् न पौनरुक्त्यम्॥

३

हेतुर्वा स्यात् ● ननु चातुर्मास्यप्रकरणपठितस्य 'शूर्पेण जुहोति तेन ह्यन्नं क्रियत' इत्यस्य हिशब्दश्रुत्या हेतुपरत्वावगतेर्वैदिकहेत्वन्यथानुपपत्त्यैव यद्यदन्नकरणं तेन तेन होतव्यमिति व्याप्तिवचनकल्पनात्तेन च दर्विपिठरादीनां साक्षात्पाकव-दन्नकरणत्वाभावेप्यन्नक्रियाप्रयोजकत्वेन विप्रकृष्टलाङ्गलाद्यपेक्षया करणत्वो-क्त्या शूर्पस्याऽपि तत्सिद्धेः शूर्पेण जुहोतीत्यस्यावयुत्यानुवादत्वान्न विधित्वं, किन्तु तेन ह्यन्नं क्रियत इत्यस्यैव प्राशस्त्यपरत्वे लक्षणापत्तेर्हेतुविधित्वमस्तु अत आह—

क्वचिद्धेतुविधिर्न च,

न शूर्पेणेति प्रत्यक्षे विधौ सति दर्व्यादीनां कल्पितवचनेन होमार्थत्वं सम्भवति। न च दर्व्यादिभिस्तद्बाधः प्रत्यक्षत्वात्। नापि विकल्पः, तुल्यबल-त्वाभावात्। न समुच्चयः, व्रीहिवन्निरपेक्षकरणत्वश्रवणात्। तथा होमस्यापि शूर्पेण नैराकाङ्क्ष्यान्न द्रव्यान्तरापेक्षा। न च श्रुत्यनुमानं विना हेतोर्वैय्यर्थ्यम् स्तावकत्वेनोपपन्नत्वात्। किच क्रियत इति लटा वर्तमानान्नकरणस्य होमार्थत्वं बोधितम्। तच्च बाधितम्। येन येनान्नं कृतं करिष्यते वेति लक्षणा स्यात्। सा चान्याय्या विधौ। स्तुत्यर्थत्वे तु सा युक्ता। तस्मादर्थवादः॥

४

तदर्थशास्त्रात् ● अर्थवादप्रसङ्गे समाप्ते मन्त्रविचारः क्रियते। ननु न मन्त्राणामर्थप्रकाशनद्वारा कर्माङ्गत्वं सम्भवति। तस्यान्यतः सिद्धेः मन्त्रकृतप्रका-शनाददृष्टं तु[1] सिद्धान्तेऽपि तुल्यम्। ततश्च प्राथम्याल्लाघवात् पुम्व्यापारगोचर-त्वादावश्यकत्वाच्चोच्चारणादेव तदस्तु। एवं च तदर्थशास्त्रमप्युपपद्यते। अन्यथा ग्रहणावेक्षणादिवन्मन्त्रप्रकाश्यत्वेनैव विनियोगसिद्धेः 'इति पुरोडाशं प्रथयति' 'इत्य-श्वभिधानीमादत्त' इत्यादिविधीनां वैय्यर्थ्यं स्यात्। किंच असमवेतार्थेषु सवित्रादि-

१. सिद्धान्ते मन्त्रैरेव प्रयोगसमवेतानामर्थानां स्मरणं कर्तव्यमिति नियमविध्याश्रयणान्नि-यमजन्यमदृष्टं स्वीकर्तव्यमेव। तददृष्टमुच्चारणादेव स्वीक्रियतामित्याशयः।

शब्देषु जपादिषु चादृष्टार्थत्वमावश्यकम् । तत्सामान्यादन्यत्राऽपि तदेवाऽस्तु न त्वर्थस्मरणत्वमत आह—

मन्त्राणां स्मृतिहेतुता ।

न मन्त्राणां दृष्टार्थार्थप्रकाशनद्वाराऽङ्गत्वे सम्भवत्यदृष्टद्वारा तत्सम्भवति । नियमादृष्टन्त्वत्यन्तादृष्टापेक्षया दृष्टार्थलाभात् लघुभूतमगत्या स्वीक्रियते । न च तदर्थशास्त्रवैय्यर्थ्यम् । रशनादानविधेः सर्वत्रापूर्वविधानरूपत्त्वमिति वार्तिकोक्त-नीत्यापूर्वविधित्वेन फलतः परिसङ्ख्यात्वात्, प्रथनविधेस्तु 'यज्ञपतिमेव तत्प्रजया पशुभिश्च प्रथयती'त्याद्यर्थवादार्पितस्तुतिसिध्यर्थं मन्त्रविशिष्टप्रथनविधित्वात् । न चासमवेतार्थेष्वदृष्टार्थत्वम्, तेषामपि समवेतनिर्वापादिविशेषणत्वेन दृष्टार्थ-त्वादिति नवमे वक्ष्यामः । स्तोत्रशस्त्रजपादौ त्वन्यथानुपपत्यादृष्टार्थत्वम् । ननु मन्त्राणां स्मारकत्वे कथं प्रामाण्यम् स्मृतेरनुभवभिन्नत्वादिति चेत् स्मृति-वदबाधितत्वाख्यप्रामाण्यादिति केचित् । बोधितबोधकत्वात् फलतः स्मृतित्वम् न तु तत उल्लेखादिति पितृचरणाः । तेन सिद्धमर्थप्रकाशनद्वारा अङ्गत्वम् ॥

इति द्वितीयः पादः

तृतीयः पादः

१

धर्मस्य शब्दमूलत्वात् ● त्र्यंशवेदप्रामाण्ये उक्ते नामधेयस्यापि विध्यन्त-र्गत्या तत्सिद्धेर्नामधेयमूलस्मृतेरभावान्मूलमूलिभावसङ्गतिलाभाच्च नाम्नः पूर्वं स्मृत्यादिचिन्ता । ननु स्मृतीनां पौरुषेयत्वात्तेषाञ्च भ्रान्त्यादिसम्भवात्प्रत्यक्षश्रु-तिमूलत्वेन प्रामाण्ये स्मृतिवैय्यर्थ्यादुत्सन्नश्रुतिमूलत्वस्य तु वेदशाखापरिमाणनियमेन शाखोत्सादस्य सावधानं पालकानां वाक्योत्सादस्य चासम्भवेनायुक्तत्वादनुमे-यश्रुतिमूलत्वस्य तु तद्व्याप्तलिङ्गाभावेनायोगात्स्मृतेश्च पौरुषेयत्वेन नित्यलिङ्गा-दिवच्छ्रुत्यगमकत्वादेवमपि तत्वेनाज्ञानाज्ज्ञेयभूतार्थसिध्यभावेनान्धपरम्परादोष-प्रसङ्गान्न स्मृतीनां प्रामाण्यमत आह—

स्मृतीनां वेदमूलत्वात्प्रामाण्यम्,

न स्मृतीनामप्रामाण्यं सम्भवति । स्मृतिवाक्याद्धर्मज्ञानस्य जायमानत्वात् । तत्र च तत्कर्तॄणां वैदिकत्वात्तेषाञ्च दृढ़परिग्रहात् वैदिकत्वस्मरणात् लोभाद्यग्रह-णाच्च वेदमूलत्वेन प्रामाण्यं नानुपपन्नम् । ताश्च स्मृतिमूलभूताः श्रुतयः पठ्यन्त एव विप्रकीर्णाः । न च स्मृतिप्रणयनवैय्यर्थ्यम्, तस्य सर्वशाखोपसंहारार्थत्वात् । तेन सिद्धं स्मृतीनां प्रामाण्यम् ॥

२

विरोधे त्वनपेक्षं स्यात् ● औदुम्बरीं स्पृष्टोद्गायेदिति प्रत्यक्षश्रुतिविरुद्धायाः 'औदुम्बरी सर्वा वेष्टयितव्ये' त्यस्याः स्मृतेः प्रत्यक्षश्रुतिविरोधेऽपि मूलश्रुतिक-

ल्पनया प्रयोगभेदेन व्रीहियवादिवदेकज्योतिष्टोमसम्बन्धाद् विकल्पेन प्रामाण्योपपत्तेः पक्षेऽप्यनुष्ठानसत्वेन वन्हिशैत्यवत्प्रमेयविरोधेन बाधाभावात्स्मृतेर्मुलाकाङ्क्षासत्वेन श्रुतिलिङ्गादिवदाकाङ्क्षोच्छेदेन बाधाभावाच्च विरुद्धाया अपि स्मृतेः प्रामाण्यमस्त्वत आह—

न, विरोधतः ।

न श्रुतिविरोधे प्रामाण्यं सम्भवति । मानान्तरेण शैत्यानुमानस्येव प्रत्यक्ष श्रुत्या कल्पनस्य विरुद्धत्वात् । तेनात्र प्रमेयविरोधादेव बाधः । अतुल्यबलत्वाच्च न विकल्पः, येन प्रयोगभेदेनानुष्ठानेन प्रमेयविरोधपरिहारः स्यात् । तेन प्रत्यक्ष श्रुतिविरोधे स्मृतेरप्रामाण्यमेव ॥

२

हेतुदर्शनाच्च । ननु 'वैसर्जनहोमीयं वासोऽध्वर्युः प्रतिगृह्णति' इत्यादिस्मृतेर्वैदिकपरिग्रहादिभिः श्रुत्यनुमानात् प्रत्यक्षश्रुतिविरोधाभावाच्च प्रामाण्यमस्त्वत आह—

वेदाविरोधेऽपि च न लोभादेर्मूलसम्भवे ॥

लोभस्यैव दृष्टहेतोर्मूलत्वसम्भवेनान्यथानुपपत्त्या श्रुतिकल्पनम् । तेनाप्रमाणमेवञ्जातीयका स्मृतिः । वार्तिके तु प्रत्यक्षश्रुतिविरोधेऽपि स्मृतेः पुरुषान्तरप्रत्यक्षनानावेदशाखागतश्रुतिमूलत्वसम्भवे तस्यानुपलब्ध्या वस्त्वभावनिश्चयाभावात्पुरुषान्तरप्रत्यक्षस्य च स्वप्रत्यक्षसमत्वाद् विकल्प एव युक्तः । सूत्रं भाष्यञ्चाननुष्ठानरूपाप्रामाण्यपरमित्युक्तम् ।

यद्वा—ननु शाक्यादिनिर्मितधर्मशास्त्राभासानामसत्यप्यग्निहोत्रादिभिः कर्तृसामान्ये भिन्नप्रस्थानवेदमूलकत्वेन मन्वादिवत्प्रामाण्यमस्त्विति चेत्—उच्यते । न तेषां मन्वादिवत्प्रामाण्यं सम्भवति । वैदिकपरिग्रहाभावाद्वेदद्वेषिभिः कृतत्वाच्छ्रुतिः स्मृतिः सदाचार इत्यादिना धर्मप्रमाणानां नियमाच्च नैवञ्जातीयकानां प्रामाण्यम् ॥

४

शिष्टाकोपे । ननु स्मृतिषु क्रत्वङ्गत्वेनोक्तानामाचमनादीनां क्रतुमध्येऽनुष्ठाने श्रुत्यादिप्रमाणकस्य क्रमस्य, पूर्वाह्णादिकालस्य प्रयोगविध्यवगतप्रयोगप्राशुभावस्य पदार्थैयत्तारूपस्य परिमाणस्य च बाधापत्तेः क्रमकालादेः श्रौतत्वेन प्रयोगविधिना शीघ्रं ग्रहणात्तदुत्तरं स्मार्ताचमनादिग्रहे पूर्वप्रवृत्तक्रमादिबाधापत्तेः प्रमाणबलाबलस्य पश्चात्तनप्रमेयबलाबलापेक्षया बलवत्त्वादाचमनादीनां स्मार्त्तत्वेन श्रौतभेदनहोमादिवत्क्रमाद्यनङ्गकत्वाच्च न प्रामाण्यमाचमनादिस्मृतीनामित्याशङ्क्याह—

आचमनादिस्मृतेः श्रौतक्रमहानेऽप्यबाधनम् ।

न श्रौतक्रमादिहानेऽप्याचमनादीनामप्रामाण्यं सम्भवति, क्रमस्य प्रबल-

दुर्बलप्रमाणकपदार्थोपजीवकत्वेन तद्बोधकश्रुतेस्तदविरोधेनैव नयनात्। तेनाविरोधाद्विरोधेऽपि क्रमस्याङ्गत्वेन दौर्बल्यात्प्रमाणयोश्चोपजीव्यप्रमेयविरोधेनैव विरोधान्न स्मृतेर्बाध इति प्रामाण्यमेवाचमनादिस्मृतीनाम्। वार्तिके तु प्रयोगविधेः श्रौतस्मार्तातिदेशिकादिसर्वाङ्गानन्तरमेव प्रवृत्तेः स्पष्टत्वेन पूर्वपक्षस्य मन्दत्वादुपवीतस्य च 'उपव्ययत' इति श्रौतत्वेनानुदाहरणत्वादयुक्तमिदमिति मत्वा शाक्यादिशास्त्रस्थाहिंसादिवाक्यानां श्रुत्याद्यविरुद्धत्वात्प्रामाण्यमित्याशङ्क्य 'वेदो धर्ममूलमि'त्यादिना धर्मप्रमाणानां नियमान्नैवञ्जातीयकानां धर्मे प्रामाण्यमित्युक्तं तदाह—

बौद्धप्रसिद्धाहिंसादि प्रमाणं नेति वार्तिके ॥

५

अपि वा कारणाग्रहणे ● नन्वाचाराणां वसन्तोत्सवादीनां ग्रन्थेऽनिबन्धनाद्धर्मे व्यतिक्रमादिभिः सङ्करदर्शनाच्चाप्रामाण्यमत आह—

अनिबन्धेऽपि शिष्टानामाचारस्य प्रमाणता ।

आचाराणां नानात्वेन मन्वादिभिर्विशिष्यानभिधानेऽपि 'श्रुतिः स्मृतिस्सदाचार' इत्यादिना सामान्यतस्तस्यापि प्रामाण्याभिधानाद्धर्मबुध्या वैदिकैरनुष्ठीयमानाचारस्यैव प्रमाणत्वेन रागद्वेषादिकृतव्यतिक्रमादेर्बौद्धाचारस्य चाचारत्वाभावात्सिद्धमाचारस्यप्रामाण्यम् ॥

६

तेष्वदर्शनात् ● अत्र भाष्ये 'यवमयश्चरु'रित्यादौ यवशब्दस्य प्रियङ्गुषु 'यत्रान्या औषधय' इति वाक्यशेषाच्च यवेष्वपि प्रयोगादुभयविधस्यापि शिष्टानामर्थे प्रयोगरूपाचारस्य सत्वेन विकल्पेन यः कश्चिदर्थो ग्राह्यः इत्याशङ्क्य वाक्यशेषानुगुणस्य बलित्वात्तदनुगुणो ग्राह्य इत्युक्तं तदाह—

वाक्यशेषाद्दीर्घशूकाद्यर्थो यवपदादिषु ॥

वार्तिके तु वाक्यशेषान्निर्णये अक्ताधिकरणेन गतार्थत्वापत्तेर्यवेष्वेव सर्वशिष्टानां प्रयोगाच्च युक्तमिति मत्वान्यथाधिकरणं व्याख्यातम्। 'पैलवौदुम्बरौ वैश्या दण्डमर्हन्ति धर्मत' इति स्मृतौ प्रयुक्तस्य पीलुशब्दस्यार्याणां वृक्षे म्लेच्छानाञ्च गजे प्रयोगाच्छब्दार्थस्य च लोकगम्यत्वादनादित्वकारणस्यावध्यस्मरणस्योभयत्र तुल्यत्वेनाभियुक्तप्रसिध्योस्तुल्यत्वाद् वार्क्षो हस्तिदण्डो वा कश्चिदर्थोऽस्त्वत आह—

आर्यप्रसिद्धः पील्वादौ म्लेच्छार्थो न गजादिकः ।

न वृक्षे मुख्यस्योद्र्ध्वत्वसाम्याद्गजे गौण्यापि प्रयोगोपपत्तावन्याय्यश्चानेकार्थत्वमिति न्यायोल्लङ्घनं सम्भवति। न च वैपरीत्यम्। आर्याणां धर्माधर्मविप्लवाय शब्दार्थविवेकादरात् म्लेच्छानाञ्च दृष्टार्थमात्रव्यवहारिणां तदभावात् गौणत्वाज्ञानाच्चान्येषां शक्तिभ्रमः। अतो वृक्षादिरेवार्थः ॥

यद्वा––ननु 'मातुलस्य सुतामूढ्वा' इत्यादिस्मृतीनां मातुलकन्यापरिणयनाद्याचाराणाञ्चोभयोः श्रुतिमूलत्वात्तुल्यबलत्वमेवास्त्वत आह––

स्मृतेर्विरुद्ध आचारो नादृत्योऽदृष्टहेतुकः ।

न स्मृतितुल्यता आचारस्य सम्भवति । स्मृतीनां सनिबन्धनत्वेन मन्वादीनां विश्वास्यत्वेन च तद्वाक्याच्छीघ्रं कर्तव्यताप्रतीतेः । आचारे त्वर्थसुखाद्यसम्भवविचारपूर्वमाचरितॄणाञ्चाज्ञत्वेन परप्रकरणादिगतश्रुतितात्पर्यज्ञानाभावान्मूलस्मृतिं तया च श्रुतिं कल्पयित्वा कर्तव्यताकल्पनमिति विप्रकर्षः । रागादिमूलत्वञ्च विस्पष्टमेव । तेन नैवञ्जातीयकानामाचाराणां प्रामाण्यम् ॥

यद्वा-त्रिवृच्चर्वश्ववालादिशब्दानां लोकात् त्रैगुण्यस्थालीहयकेशवाचित्वस्य 'नवभिः स्तुवन्ती' त्यादिवाक्यशेषेभ्यश्च स्त्रोत्रीयानवकौदनकाशवाचित्वावगतेरदृष्टसाधनत्वबोधे वेदस्याधिक्येऽपि शक्तिग्रहे उभयोस्तुल्यत्वम् । लोकस्य वा उपजीव्यत्वेन प्राबल्यम् । तेन 'त्रिवृद् बहिष्पवमानमि'त्यादौ यः कश्चिदर्थो ग्राह्य इत्यत आह—

त्रिवृदादौ नवर्चादिर्वाक्यशेषेऽर्थनिर्णयः ॥

न विधौ त्रित्वादिग्रहणं सम्भवति । विधिस्तुत्योरेकविषयत्वनियमेन स्तुत्यस्यैव विधेयत्वावगतेः । अविधेयस्तुतिवैयर्थ्याच्च । तेनात्र वाक्यशेषात्सिध्यत्यप्यर्थे यत्र न वाक्यशेषो यथा 'त्रिवृदग्निष्टुत्' इत्यादौ तत्र स एवार्थो ग्राह्य इति चिन्ताफलं वाक्यशेषात्पूर्वं सन्देहाभावाल्लोकसिद्धस्य वाक्यशेषेण बाधाच्च न सन्दिग्धेष्विति न्यायः ॥

७

चोदितन्तु ● नन्वार्येष्वप्रसिद्धार्थानां पिकनेमादिशब्दानां म्लेच्छप्रसिद्धकोकिलादिग्रहणे तेषु विप्लवदर्शनादप्रामाण्यापत्तेः निगमनिरुक्तादिना यः कश्चिदर्थः कल्पयितव्य इत्यत आह—

आर्याविरोधे म्लेच्छोक्तोऽप्यर्थः स्यात्तु पिकादिषु ।

वेदे प्रयुक्तानां शब्दानां केनचिदर्थेन भाव्यम् । तत्र म्लेच्छप्रसिद्धेः क्लृप्तत्वेन कल्प्यनिरुक्तादिप्रसिध्यपेक्षया बलवत्वान्मुख्यभावे च गौणत्वायोगान्निरुक्तादीनामुभयत्राप्रसिद्धे सावकाशत्वात्प्रमेयबलाबलस्य बलित्वाच्च म्लेच्छप्रसिद्ध एवैषामर्थः ॥

८

प्रयोगशास्त्रात् ● ननु कल्पसूत्राणां स्मृतीनामङ्गानां बौद्धग्रन्थानां पौरुषेयत्वे तद्दोषादप्रमाण्यापत्तेर्मूलनित्यत्वकल्पनातो मूलिन एव तत्कल्पनोपपत्तेः समाख्यायाश्च काठकादिवत्कर्तृप्रवचननिमित्तत्वादनित्यत्वे च'यद्ब्राह्मणानीतिहासानिति नित्यब्रह्मयज्ञविधिविषयत्वायोगादङ्गानां 'षडङ्गमेक' इति वेदत्वस्मरणात् कल्पानाञ्च प्रत्यक्षवेदार्थनिबन्धनेन शाखान्तरतुल्यत्वात्स्वातन्त्र्येणैषां प्रामाण्यमस्त्वत आह—

न स्वातन्त्र्यं कल्पसूत्रमन्वादेर्वेदवन्मतम् ।

न स्वातन्त्र्येणैषां प्रामाण्यं सम्भवति, पौरुषेयत्वात् । कल्पादिष्वध्येतॄणां श्रुतित्वाप्रसिध्या मन्वादिसमाख्यायाः काठकादिवत्प्रवचननिमित्वायोगाच्च । ग्रन्थव्यक्तीनामनित्यत्वेऽपि प्रवाहनित्यतया नित्यविधिविषयत्वम् । एकोक्तिस्तु पूर्वपक्षः । बौद्धवाक्यानान्तु श्रुतिमूलत्वस्वातन्त्र्ये च निरस्ते अप्रामाण्यमेव फलति । कल्पेष्वपि यत् प्रत्यक्षश्रुतिन्यायविरुद्धं यथा 'सर्वाणि हवींषि पर्यग्निकरोति' 'अङ्ग वा समभिव्याहारादि'त्यादि तदप्रमाणम् । तेन न स्वातन्त्र्येणैषां प्रामाण्यम् ॥

९

अनुमान ● ननु होलाकाद्याचाराणां प्राच्यैरेवानुष्ठानात् स्मृतीनाञ्च कैश्चिदेव पाठात्तन्मूलभूता श्रुतिरपि व्यवस्थितैवास्तु । तेन न सर्वधर्मत्वमित्यत आह—

होलाकादेरव्यवस्था मूलश्रुत्यविशेषतः ।

न स्मृतौ आचारेषु चान्यव्यावृत्तधर्मविशेषोपादानमस्ति, यच्छ्रुतौ कल्पयित्वा तस्याः व्यवस्थितविषयत्वं कल्पयेत् । संस्थानविशेषादीनाञ्चान्येष्वपि सत्वेन व्यभिचारित्वात् । प्राच्यत्वस्य तु तद्देशस्थितत्वतद्देशोत्पन्नत्वाभ्यां दुर्निरूपत्वात् यौगिकत्वेन पाचकादिवज्जातिवाचित्वाभावाच्च । पाठव्यवस्था तु कर्त्तुस्तच्छाखीयत्वात् । अतः सर्वेषां धर्माः ॥

१०

प्रयोगोत्पत्यशास्त्रत्वात् ● ननु व्याकरणं न प्रमाणम्, मूलाभावात् । न च साधूनेव प्रयुञ्जीतेत्येवं कल्पितं वेदवाक्यं मूलम् । साधुत्वस्य प्रत्यक्षाद्यगोचरत्वात् । अनादिवाचकत्वस्यार्थप्रतीतिजनकत्वस्य च गाव्यादिष्वप्यविशेषात् । प्रतिपदञ्च वेदवाक्यकल्पनायोगात् । असाधुभ्योऽप्यर्थस्य गम्यमानत्वेन नियमवैयर्थ्याच्च । मूलाभावाच्च न भोजनाद्याश्रितदिङ्नियमवत्प्रयोगनियमोऽपि । रक्षोहादीनाञ्च लोकमीमांसादिभ्यः सिद्धेः । तेन व्याकरणस्याप्रामाण्यात् पूर्वं म्लेच्छाद्यनभियुक्तप्रसिद्धेरपि प्रामाण्योक्तेर्गाव्यादीनां लोके प्रयोगाविशेषात्स्मृतिविरोधाभावाच्च सर्वे साधवः प्रयोज्याश्चेत्यत आह—

प्रामाणन्तु व्याकरणम्,

न प्रयोगप्रत्ययान्यथानुपपत्या गाव्यादीनां वाचकत्वं सम्भवति । लाक्षणिकेषु शब्देषु व्यभिचारात् । कथं तर्हि गाव्यादीनां वाचकत्वाभावे प्रयोगः प्रत्यायकत्वञ्चेति चेत्, वाचकाशक्तिजतया तटस्थस्य शक्तिभ्रमेण साधुशब्दोपस्थितया वोपपत्तेः । एवञ्चानेकशब्दत्वमपि न कल्पितं भविष्यति । न च निर्मूलत्वम्, साधूनेव प्रयुञ्जीतेत्यस्यैवैकस्य धर्मार्थप्रयोगनियमाय कल्पनात् । साधुस्वरूपनियमे च व्याकरणस्मृतेरन्या स्मृतिर्मूलम् । गवादिशब्दस्वरूपस्य श्रोत्रप्रत्यक्षत्वाच्च

नान्धपरम्परान्यायः। यत्तु यदकालयदित्यादि वेदविरुद्धम् यथा 'कलेर्वामदेव्याड्य-ड्या'विति, यच्च न्यायविरुद्धं वाक्यस्फोटादि तत्सर्ववेष्टनस्मृतिवत्'अङ्गं वा सम-भिव्याहारादि' त्यादिवच्चाप्रमाणमेव। न च प्रयोजनाभावः, ऊहादीनां वर्णागम-लोपादीनां प्रयोजनत्वात्। तेन सिद्धं व्याकरणस्य प्रामाण्यम्॥

११

प्रयोगचोदना ● वाचकप्रसङ्गाद्वाच्यविशेषे चिन्तनीये तदुपोद्घातत्वेनेदमा-रभ्यते। ननु लोकवेदयोः स्वरच्छान्दसवर्णागमलोपाध्यायानध्ययनादिविरुद्धधर्म-योगादिमे लौकिका इमे वैदिका इति व्यपदेशभेदेन शब्दानां भिन्नत्वावगमात्तद्भे-दाच्चार्थस्यपि 'उत्ताना वै देवगवा वहन्ति' इत्यादि दर्शनेन भिन्नत्वाद्भेद एवा-स्त्वत आह—

अभेदो लोकवेदयोः।

न शब्दार्थानां गवादिशब्दानां भिन्नत्वं सम्भवति। प्रत्यभिज्ञया एकत्त्वा-वगमात्। यत्र तु स्वरन्यूनादिरर्थप्रतीतिजनको धर्मो भिन्नस्तत्रैव भेदः। यथा इन्द्रशत्रुरित्यत्र, ब्रह्मब्राह्मणौ च। यत्र तु न तादृशधर्मभेदौ, तत्र किञ्चिद्रू-पभेदेऽपि प्रत्यभिज्ञयाऽर्थाभेदेनैकत्वावगमान्न भेदः। तेन शब्दार्थयोरैक्यमेव।

ननु समस्तविधिनिषेधानां घटौ घटा इत्यादिलिङ्गसङ्ख्याकारकाणां गौः शुक्ल इति समानाधिकरण्यस्य च व्यक्तावेवान्वयसम्भवात्सामान्यस्य चोपलक्षण-त्वेनाद्यजातायां गवि प्रयोगोपपत्तेर्व्यक्तिरेव शुद्धा विशिष्टा वा वाच्याऽस्त्वत आह—

जातिरेव च शब्दार्थः मीमांसा शास्त्रसम्मतः॥

न प्रथमप्रतीतजात्युल्लङ्घनेन व्यक्तेर्वाच्यत्वं सम्भवति, 'विशेष्यं नाभिधा-गच्छेदि'ति न्यायात्। अनेकव्यक्तिषु च सङ्केतग्रहाभावेन वाच्यत्वायोगात्। न च सामान्यलक्षणा। सामान्यस्यैव वाच्यत्वात्। विधिनिषेधलिङ्गसङ्ख्यादिकन्तु जातिव्यक्त्योरभेदेन व्यक्तौ लक्षणया चोपपन्नम्। तेन जातिरेव वाच्या॥

तृतीयः पादः॥

चतुर्थः पादः

१

उक्तं समाम्नायैदमर्थ्यम् ● एवमध्ययनविधिवशाद्विध्यर्थवादमन्त्रात्मकस्य स्मृतिकल्पस्य च वेदस्य प्रामाण्यमुक्तम्। इदानीमवशिष्टस्य नामधेयस्योच्यते। ननु उद्भिदादिशब्दानां लिङाद्यतिरिक्तत्वेनाख्यातभिन्नत्वेन च विधिक्रियाद्यन्त-र्भावाभावात् भावनायाश्च समानपदोपात्तधात्वर्थकरणावरुद्धत्वेन तत्समर्पकत्वे-

नाप्यन्वयाभावादेवंसंज्ञकस्य च गुणस्याप्रसिद्धत्वेन तत्समर्पकत्वाभावात्स्तुतिबुध्यभावेन चार्थवादत्वाभावाद् अस्यन्तत्वान्तत्वादिलक्षणस्य प्रसिद्धिगम्यत्वस्य च मन्त्रलक्षणस्याभावेन मन्त्रत्वाभावात् न प्रामाण्यमत आह—

उद्भिदादेर्यौगिकस्य नाम्नः प्रामाण्यमीरितम् ।

नाध्ययनविध्यध्यापितानामुद्भिदादिशब्दानामप्रामाण्यं सम्भवति । तत्र च त्वदुक्तरीत्यैव विधित्वादेर्निरस्त्वाद्विधिवाक्यान्तर्भावस्य च स्पष्टत्वात्तत्रैव गुणविधित्वेन नामत्वेन वा सिद्धं प्रामाण्यम् ।।

२

अपि वा ● इदानीं पूर्वोक्तप्रामाण्यस्थिरीकरणार्थं गुणविधिनामधेयविचारः प्रस्तूयते । ननु उद्भिदा यजेतेत्यादौ उद्भिदादीनां व्रीह्यादिवत् रूढ्यभावेऽपि ऊर्ध्वं विदारणकर्तृत्वेन खनित्रादिवाचित्वात्प्रवृत्यौपयिकत्वादर्थाक्षिप्तसाध्यत्वानुवादेन च गुणविधाने मत्वर्थलक्षणाभावात्सर्वत्र नामत्वाक्षेऽपि इतिकर्त्तव्यतासन्निधिविशेषेण ताण्डके ज्योतिष्टोमस्य पूर्वभावित्वाच्च तद्वाक्ये यागस्य विधेयत्वेन ज्योतिष्टोमपदस्यान्यथानुपपत्त्या नामधेयत्वाद्वा एष ज्योतिरित्यादिषु करणविभक्त्यभावेन गुणविधित्वायोगात् ज्योतिष्टोमाद्भेदकतया कर्मनामत्वस्यावश्यंवाच्यत्वात्तत्र गुणविधिरथवा गुणफलसम्बन्धविधिर्विशिष्टविधिर्वास्त्वत आह —

धातुपारार्थ्यादिदोषादुद्भिदादिषु नामता ।

न तावत्फले गुणविधिः सम्भवति, तथात्वे धात्वर्थस्योद्देश्यत्वोपादेयत्वाभावात् केवलं प्रत्ययानुग्रहार्थमेव धातोरुच्चारणम् विप्रकृष्टार्थविधानम् नित्यसोमबाधादिकञ्च स्यात् । इन्द्रियकामादौ तु दधिपदस्य रूढत्वादगत्येदमाश्रितम् । यागस्याप्रकृत्वेन तद्वदाश्रयालाभाद्वाक्यभेदश्च । न यागे धातुपारार्थ्यानदनीययागफलदानानर्थक्यसोमविकल्पाद्यापत्तेः । दध्ना जुहोतीत्यादावगत्या सर्वमाश्रितम् । नाऽपि विशिष्टविधिः । तथात्वे सर्वेषां पदानामतिरिक्तविशिष्टरूपवाक्यार्थलक्षकत्वेन पारार्थ्यापत्तेः । विशेषणविधिकल्पनाद्द्वयोः करणयोरन्वयसिध्यर्थं मत्वर्थलक्षणा देवताभावेनारूपत्वं च स्यात् । तद्वरं यागनामत्वम् । सोमादौ त्वगत्या मत्वर्थलक्षणाद्याश्रयणम् । प्रयोजनं तु नाम्नः गुणोपबन्धादि स्पष्टमेव ।।

३

यस्मिन् ० ननु 'चित्रया यजेत पशुकामः' 'पञ्चदशान्याज्यानि सप्तदशानि पृष्ठानी'त्यत्र स्त्रीत्वस्य प्राणिनिष्ठत्वेन तद्द्रव्यकाग्नीषोमीययागानुवादेन पशुनेत्यादिवदेकपदेन चित्रत्वस्त्रीत्वविशिष्टकरणकारकविधौ, यद्वाग्नीषोमीययागानुवादेन चित्रत्वमात्रविधौ वाक्यभेदाभावादर्थाक्षिप्तसाध्यत्वानुवादेन च गुणविधाने मत्वर्थलक्षणाभावात् पशुकामपदस्य च साधनकामनानुवादित्वात्

प्रकृतयागनामत्वस्य च तेषां बहुत्वेन 'चित्रया' इत्येकत्वस्त्रीत्वयोः अयोगेन चायुक्तत्वात्, पञ्चदशादिवाक्ये चाज्यानां स्वतः सङ्ख्याशून्यत्वेऽपि पात्रलक्षणया पृष्ठानाञ्च पुरुषावयवानाम् 'आज्यैस्तुवते पृष्ठैः स्तुवते' इत्याद्युत्पत्तिवाक्यप्राप्तस्तोत्रानुवादेन सन्निधिस्थापनक्रियया अवान्तरप्रकरणेन चाङ्गत्वसम्भवाद् गुणविधित्वमस्त्वत आह—

चित्राज्यादेर्वाक्यभेदात्,

नामतेत्यनुषङ्गः, नाग्नीषोमीयानुवादेन चित्रत्वस्त्रीत्वविधिः सम्भवति, वाक्यभेदात्। न च विशिष्टकारकविधिः। तस्योत्पत्तिवाक्यप्राप्तत्वात्। उत्पत्तिशिष्टपुंस्त्वक्रमप्राप्तलोहितसारङ्गत्वाद्यवरुद्धत्वाच्च। नापि स्त्रीत्वानुवादेन चित्रत्वविधिः, एकपदे उद्देशोपादानविभागायोगात्। फलसम्बन्धास्त्वन्यो वाक्यभेदः। न च साधनकामनानुवादः तत्वे वैय्यर्थ्यात्। तद्वरं प्रकृतफलाकाङ्क्षदध्यादियागस्यैव चित्राशब्दो नामधेयमिति। न चाष्टमिकनीत्या तत्तद्रव्यकाणां प्रकृतयागानां नानात्वादेकत्वचित्रद्रव्यकत्वस्त्रीत्वायोगः, राजसूयवत्समुदायाभिप्रायेणैकत्वात्। होमनिष्ठस्य च चित्रद्रव्यकत्वस्य यागे औपचारिकत्वात्। स्त्रीत्वस्य चेष्टचभिप्रायत्वात्। यदा तु राणकरीत्या संसृष्टस्यैकदेवतायोगस्तदा न कोऽपि दोषः। एवमाज्यपृष्ठवाक्ये स्तोत्रानुवादेन द्रव्यसङ्ख्ययोर्विधौ वाक्यभेदः। द्रव्यानुवादे ऽविध्ययोगश्च। तद्वरं 'यदाजिमीयुः''आपो वा ऋत्वियमार्ध्वत्' इत्याद्यर्थवादानुरोधादुत्पत्तिवाक्ये आख्यातसामानाधिकरण्याच्च नामधेयत्वम्॥

४

तत्प्रख्यं ● ननु'अग्निहोत्रं जुहोती'त्यत्र अग्नये होत्रं होमसाधनद्रव्यमस्मिन्निति बहुव्रीहिसमासान्तर्गतचतुर्थ्याऽग्नेर्देवतात्वावगतेर्बहुव्रीहिणा च मत्वर्थस्योक्तत्वेन मत्वर्थलक्षणाभावाद्वाक्यभेदाभावाच्च विशिष्टकर्मविधिः। अथवाऽविहितदेवताकदर्विहोमानुवादेन गुणमात्रविधिः,आघारमाघारयतीति वाक्येन द्वितीयया क्षरणसमर्थस्याज्यादिद्रव्यस्योक्तेस्तस्य क्षारणसंस्कारविधिरस्तु। न च तत्वे वैय्यर्थ्यम्, संस्कृतस्य पूतीकवत् संस्कार्यत्वान्यथानुपपत्त्या प्रकृतद्रव्याकांक्षे उपांशुयाजे विनियोगात्। न चोपांशुयाजे'तावब्रूतामि'ति वाक्यादाज्यप्राप्तेरेतद्वैय्यर्थ्यमिति वाच्यम्। तत्र पौर्णमासीकालमात्रविधानात्। 'सर्वस्मै वे'ति वाक्यविहितस्य ध्रौवाज्यस्य तूपांशुयाजे क्षरणद्रव्योक्तेस्तद्भिन्नपरत्वात्। प्रकरणाच्च गुणे विधीयमाने मत्वर्थलक्षणाभावात्। तस्माद्गुणविधिरेवास्त्वत आह—

तत्प्रख्यादग्निहोत्रके।

नामतेत्यनुषङ्गः। आघारे इत्यपि द्रष्टव्यम्। न तावद्दर्विहोमानुवादेन गुणविधिः सम्भवति, तेषां दूरस्थत्वात्। पदश्रुत्या धात्वर्थविधानसम्भवे गुणविध्ययोगाच्च। नापि विशिष्टविधिः। गौरवान्मत्वर्थलक्षणापत्तेरग्नेः प्राप्तत्वेन तद्विधिवैय्यर्थ्याच्च। 'तद्वरं यदग्नये चे'त्येतद्वाक्यप्राप्तं मन्त्रवर्णप्राप्तं वाग्निं निमित्तीकृत्याग्निहोत्रशब्दस्य नामत्वम्। न च प्रातर्होमेऽग्न्यभावात्तन्नामता न

स्यादिति वाच्यम् ।'सायञ्च प्रातश्च जुहोती'ति वाक्ये उत्पत्तिवाक्यावगतस्यैकस्य कर्मणः कालद्वये अभ्यासमात्रविधानेन कर्मभेदाभावात् । एतच्चाहवनीयाहुत्योरेव प्राधान्यमिति पक्षे । तस्मिन्पक्षे आहवनीय एव होमो नापरयोरिति श्रुतेः । 'सप्त च शतानि विंशतिश्च संवत्सरे सायमाहुतयः सप्तशतानि विंशतिश्च प्रातरिति, प्रकृत्य 'य एवं विद्वानग्निहोत्रं जुहोती'ति लिङ्गाच्च । यदा तु द्वे आहवनीये चतस्रो गार्हपत्ये चतस्रोऽन्वाहार्यपचने इति दशाहुतिपक्षः षडाहुतिपक्षो वा तदा गार्हपत्यान्वाहार्ययोः 'अग्नये गृहपतये अग्नये संयेशपतये' इति प्रातर्होमेऽप्यग्निसम्बन्धोऽस्त्येवेति राणके [क्षुण्णम्] एवमाधारवाक्येऽप्याघारसंज्ञके कर्मणि विहिते सूक्तवाकवत् 'इन्द्र ऊर्ध्वोऽध्वर इत्याधारमाधारयतो'ति वाचनिकमन्त्रवर्णाद्देताप्राप्तेः 'चतुर्गृहीतं वा एतदभूत्तस्याधारमाधार्य' त्यनेन च क्षारणात्मकत्वप्राप्तेस्तन्निमित्तीकृत्य वायव्यपश्वादौ मन्त्रविध्यर्थत्वेनार्थवत्वाच्च यागनामधेयमेवाघारः । स चायं प्रयाजाज्यसंस्कारकोऽपि स्विष्टकृत् देवतोद्देशांशेनादृष्टार्थः प्रधानकर्म । न च नामत्वे विधितः कर्मगः करणत्वावगमाद्द्वितोयानुपपत्तिः । तस्याः सक्तूनितिवत्करणत्वलक्षणार्थत्वात् ॥

५

तद्व्यपदेशं • ननु श्येनेनोभिचरन् यजेते' त्यात्यादौ श्येनादिशब्दानां द्रव्ये रूढत्वात् प्रकृतज्योतिष्टोमानुवादेन च गुणविधाने मत्वर्थलक्षणावाक्यभेदाद्यभावाद्गुणविधिः अथवा गुणफलसम्बन्धविधिर्विशिष्टविधिर्वास्तु । वरञ्च वाच्यलक्ष्य गुण लक्ष्यवत्यर्थगर्भगौणीतो मत्वर्थलक्षणा । अतो गुणविधिरेवास्त्वत आह—

श्येनादावुपमायोगात्,

न यागानुवादेन गुणविधिः, फलपदवैय्यर्थ्यात्, सोमविकल्पापत्तेः धात्वर्थविधाने सम्भवत्युपपदार्थविध्ययोगाच्च । किञ्च गुणविधौ तस्यैव स्तोतव्यत्वेन 'यथा वै श्येन' इति वाक्ये उपमाया भेदगर्भत्वात्स्वेन स्वस्योपमानोपमेयभावानुपपत्तिः । न फले गुणविधिः, धातुपारार्थ्यादिदोषात् । नापि बिशिष्टविधिः, गौरवान्मत्वर्थलक्षणादोषाच्च । वत्यर्थलक्षणातूभयोस्तुल्या । अपिच श्येनबिशिष्टयागविधौ प्राणिद्रव्यकत्वेन दैक्षयागविकारत्वं स्यात् । ततश्च सङ्ग्रामरथौघविधान इत्यादि सोमधर्मानुवादेन गुणविधानं न स्यात् । अतो वाक्यशेषावगतेन नामैव श्येनशब्दः ॥

६

नामधेये • ननु 'वाजपेयेन स्वाराज्यकामो यजेत' 'उद्भिदा यजेते' त्यादौ सर्वत्र विशिष्टविधावपि क्रियावद्धात्वर्थस्य तन्त्रेण गुणफलसम्बन्धे मत्वर्थलक्षणाद्यभावाद्यागे च कर्मत्वकरणत्ववाचिविभक्त्यश्रवणेन यजेतेत्यादौ पदश्रुत्या धात्वर्थभावनयोः सम्बन्धसामान्यावगतेः तस्य च कर्मत्वकरणत्वसाधारणत्वादर्थाद्योग्यतया फलसम्बन्धमपेक्ष्य करणत्वस्य गुणसम्बन्धञ्चापेक्ष्य कर्मत्वस्योपपत्तेर्धात्वर्थस्यैव

वा क्रियारूपत्वेन भावनावदनेककारकसम्बन्धेऽपि वैरूप्याभावान्न नामधेयं वाजपेयशब्दः किन्तु गुणविधिरेवास्त्वत आह--

वैरूप्याद्वाजपेयके

नामधेयत्वमिति शेषः। न यागभावनयोः सम्बन्धसामान्ये आख्यातस्य तात्पर्यं सम्भवति, सामान्यस्याननुष्ठेयत्वात् षष्ठ्यभावाच्च। किन्तु फलस्य शाब्दकर्मत्वाद्यागकरणिकैव भावना तत्सम्बन्धयोग्या। एवं गुणस्य करणत्वाद्यागकर्मिकैव तत्सम्बन्धयोग्या शाब्दी ह्याकाङ्क्षेति न्यायात्। सकृदुच्चरितस्य चाख्यातस्यैकैकसम्बन्धबोधकत्वात्। उभयान्वयस्तु नावृत्तिं विनेति न तन्त्रसम्बन्धः। तत्र धात्वर्थस्य कर्मत्वे करणत्वे वा लक्षिते एकस्यैव सम्बन्धः स्यात्। भावना तु क्रिया। अतो युक्तस्तत्र त्रितयसम्बन्धः। न चैतावता वैरूप्यम्, यागस्य स्वर्गं प्रति करणत्वेन भावनां प्रति यौगिककरणत्वाभावेन तस्यां साध्यत्वाभावात्। कारकं हि तस्या एव किंचित् साध्यत्वेन किञ्चित्साधनत्वेनावच्छेदकम्। न च धात्वर्थः क्रिया, तथात्वे करणत्वायोगात्। किञ्च धात्वर्थभिन्नभावनाभावे दध्नेन्द्रियकामस्येति गुणात्फले 'अग्नये दात्रे पुरोडाशं निर्वपेदि' त्यभ्युदयेष्टौ मासमग्निहोत्रमित्यादौ च कथं धात्वर्थभेदो भावनाभेदश्च स्यात्। धात्वर्थभिन्नभावनाभावात्। धात्वर्थभेदे तु प्रकृतबाधो भिन्नश्च प्रयोगः स्यात्। कथञ्च धात्वर्थभिन्नभावनाभावे यजति ददातीति शब्दान्तरे, अभ्यासे च धात्वर्थभेदाद्भावनाभेदः स्यात्। काष्ठैः पाक इत्यादौ क्रियापदाध्याहारोच्छेदापत्तेश्च। न च तत्र काष्ठादिकरणान्वयात् क्रियारूपत्वम्, सुबुत्पत्या च द्रव्यत्वमित्युभयरूपत्वं धात्वर्थस्येति वाच्यम्। एकक्रियात्वकारकत्वनामाख्यातत्वसिद्धत्वसाध्यत्वविरोधात्। 'कृत्तद्धितसमासाश्चे'ति प्रातिपदिकसंज्ञया धातुसंज्ञाबाधाच्च। अन्यथा धातुसंज्ञासत्वे तत्कृता तिङुत्पत्तिरपि स्यात्। ततश्च पाकतिक इत्यादि प्रयोगापत्तिरिति पितृचरणाः। तेन धात्वर्थभिन्नैव भावना। किञ्च गुणविधौ यागस्य फलं प्रत्युपादेयत्वम् विधेयत्वं गुणत्वं गुणं प्रति चोद्देश्यत्वानुवाद्यत्वप्रधानत्वादि विरुद्धम् त्रिकद्वयञ्च स्यात्। यद्यप्यार्थिकं त्रिकद्वयं न विरुद्धं व्रीह्यादौ सर्वत्र सत्वात्। न वा शाब्दम्, उद्देश्यत्वादेरवाच्यत्वात्। तथाप्येकवाक्ये लक्षणाद्वयेनोभयभाने शब्दतो विरोधोऽस्त्येवेति पितृचरणाः। अतो विशिष्टविधौ मत्वर्थलक्षणा स्यादेव तद्वरं सुराग्रहाणां प्राप्तत्वात् तत्प्रख्यन्यायेन नामत्वम्॥

७

तद्गुणास्तु ● ननु 'यदाग्नेयोऽष्टाकपालो भवती'त्यत्र प्रयोज्यव्यापारेण प्रयोजकव्यापाररूपभावनाक्षेपान्मन्त्राणां व्युत्क्रमेऽपि क्वचिच्छाखायां एवंक्रमो भविष्यतीति[1] मान्त्रवर्णिकदेवतायाः प्राप्तौ आग्नेयपदं नामधेयमिति चेत्-

१. इत आरभ्य द्वितीयाध्यायारम्भ पर्यन्तम् चत्वारि पत्राणि मातृकायां नष्टानि। अतस्तेषामधिकरणानां स्वरूपं सङ्ग्रहेण वयं प्रदर्शयामः।

'आग्नेय' इति तद्धितान्तेन पदेनैव देवाताप्राप्तेः मान्त्रवर्णिकदेवतास्वीकारस्यानुचित्त्वात् आग्नेपदं न नामधेयम्। देवताया द्रव्यस्य च विधाने वाक्यभेद इति नाशङ्कनीयम्, विशिष्टविधानाङ्गीकरात् ॥

८

बर्हिराज्य ● ननु बर्हिर्लुनाति' 'आज्यं विलापयति' इत्यादौ श्रूयमाण बर्हिराज्यादिशब्दाः लवनविलापनादि संस्कारवाचिनो भवन्त्विति चेत् न, असंस्कृतेऽपि बर्हिरादिशब्दानां प्रयोगदर्शनाद् बर्हिरादयश्शब्दा जातिवाचका एव ॥

९

प्रोक्षणीषु ● ननु 'प्रोक्षणीरासादय' इत्यत्र प्रोक्षणीशब्दः अभिमन्त्रणादिसंकारसंस्कृताब्वाचकोऽस्तु, यद्वा बर्हिरादिशब्दवज्जातौ रूढ़त्वादुदकत्व जातिवाचकोऽस्तु इति चेन्न, संस्कारवाचित्वेऽन्योन्याश्रयः, जातिवाचित्वेन वृद्ध व्यवहाराभावात् न जातिवाचित्वम्, अतः सोपसर्गात् धातोः करणे ल्युट् प्रत्ययेन प्रोक्षणीशब्दं व्युत्पाद्य यौगिक एवायं प्रक्षणीशब्दः ।।

१०

तथा ● अग्नौ श्रूयते 'निर्मन्थ्येनेष्टकाः पचन्ति' इति। तत्र निर्मन्थ्यशब्दः बर्हिरादिशब्दवत् वन्हित्वजातौ रूढः, अथवा प्रोक्षणीशब्दवद्यौगिकोऽस्तु इति चेत्-न, अचिरनिर्मथिताग्निप्रतिपत्तये निर्मन्थ्यशब्दो योगरूढ़ः पङ्कजादिपदवदित्याश्रयणीयम्। अतः लौकिकमथनेन जातो योऽग्निः तेनेष्टकानां पाकः कर्तव्यः।

११

वैश्वदेवे ● चातुर्मास्येषु वैश्वदेवे पर्वणि 'आग्नेयमष्टाकपालं निर्वपति' इत्यादिवाक्यैः अष्टौ यागान् विधायान्ते 'वैश्वदेवेन यजेन, इति श्रुते वैश्वदेव शब्दे संशयः किमयं वैश्वदेवशब्दो विश्वेदेवदेवतारूप गुणसमर्पकः? उत नामधेयम्? इति। ननु आग्नेयादिवाक्येषु यजतिपदाश्रवणात् वैश्वदेव वाक्ये च तत्सत्वात् वैश्वदेवशब्दस्य तद्धितान्तत्वात् देवतासमर्पकत्वमेवास्तु। न चाग्नेयादिवाक्येषु अग्न्यादिदेवतानां निर्देशात् विश्वेदेवानां तत्र कथं निवेश इति वाच्यम्, विकल्पेन विश्वेदेवानां निवेशसम्भवात्। अतो वैश्वदेव शब्दो देवतासमर्पक इति चेन्न, उत्पत्तिशिष्टगुणावरुद्धे कर्मणि उत्पन्नशिष्ट गुणस्य विश्वेदेवरूपस्य निवेशासम्भवात्। न च वैश्वदेवशब्दस्य नामत्वे प्रवृत्ति निमित्ताभाव इति वाच्यम्। 'यद्विश्वेदेवास्समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्' इत्यर्थवादेन विश्वेदेवाः अष्टानां यागानां कर्तार इति तत्कर्तृत्वं निमित्तीकृत्य नामधेयत्वसम्भवात्। यद्वा अष्टसु यागेषु 'सा वैश्वदेव्यामिक्षा' इति सप्तमो

विश्वेदेवदेवताकः, तत्सहचरितानामष्टानां यागानां छत्रिन्यायेन नामधेयत्व सम्भवात्। न च नामधेयत्वे वैयर्थ्यं शङ्कनीयम्, 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इति विहितप्राचीनप्रवणदेशस्याष्टानामपि यागानां विधानार्थत्वेन सार्थक्यात्। अतो वैश्वदेवशब्दो नामधेयम्॥

१२

पूर्ववन्तः ● 'वैश्वानरं द्वादशकपालं निर्वपेत्' इति जातेष्टिं विधाय 'यदष्टाकपालो भवति, यन्नवकपालः, यद्द्वादशकपालः, इत्यादीनि वाक्यानि श्रुतानि। एतेषु अष्टाकपालादयश्शब्दाः शते पञ्चाशन्नयायेन इष्टिविधायक-वाक्ये श्रुतायां द्वादशसंख्यायामष्टत्वादीनां सत्वात्, तेन चाष्टत्वादीनां प्राप्तत्वादग्निहोत्रशब्दवत् अष्टाकपालत्वादयश्शब्दाः कर्मनामधेयानि भवन्तु। ननु द्वादशकपालशब्दस्य पुरोडाशवाचित्वादष्टाकपालादिशब्दानामपि तद्वा-चित्वात् पुरोडाशे पुरोडाशान्तरस्यानन्तर्भावात् नामधेयस्य निमित्तं कथमिति चेत्-अष्टाकपालादयश्शब्दा जातेष्टौ द्रव्यसमर्पकास्सन्तु। न चोत्पत्तिशिष्ट द्वादश-कपालद्रव्ये विद्यमानेऽष्टाकपालादिद्रव्याणां निवेशो न भवितुमर्हतीति वाच्यम्, ब्रह्मवर्चसादिफलाय गुणविधित्वसम्भवात्। पक्षद्वयमप्यनुपपन्नम्। प्रथमं पक्षस्तु द्वितीयपक्षेण निराकृतः। द्वितीयपक्षश्चानेकगुणानां विधाने वाक्य भेदान्निराकृतः। अतोऽष्टाकपालादयः शब्दाः अंशांशिस्तुतिन्यायेन स्तावकाः॥

१३

तत्सिद्धि ● गौणीप्रवृत्तिनिमित्तानि षट् तत्सिद्धिः, जातिः, सारूप्यम्, प्रशंसा, भूमा लिङ्गसमवाय इति। 'यजमानः प्रस्तरः' इत्यत्र प्रस्तरशब्दो दर्भ-मुष्टिवाची। उभावपि शब्दौ गोमहिषाविव भिन्नार्थनिष्ठौ, एकत्र अपरस्य गुण समर्पकत्वं वा नाम समर्पकत्वं वा न सम्भवतीति प्रस्तरस्य स्तावको यजमान शब्दः सिंहो माणवक इतिवत्। यजमानकार्यकारित्वं हविर्धारणादिकं प्रस्तरेऽस्तीति तत्सिध्या यजमानपदं प्रस्तरस्तावकम्। 'आग्नेयो वै ब्राह्मणः' इत्यत्र मुखजन्यत्वरूपं जननमादाय आग्नेय शब्दो ब्राह्मणस्य स्तावकः। 'यज-मानो यूपः' इत्यत्र यजमानगतोर्ध्वत्वरूपसादृश्यमादाय यजमानशब्दो यूपस्य स्तावकः। 'अपशवो वाऽन्ये गो अश्वेभ्यः' इत्यत्र गवाश्वातिरिक्तपशूनांमप-शुत्वकीर्तनं न निन्दापरम्, किन्तु 'न हि निन्दा निन्दितुं प्रवृत्ता अपि तु स्तुत्यं स्तोतुम्' इति न्यायेन गवाश्वानां प्रशंसापरम्। 'सृष्टीरुपदधाति' इत्यत्र सृष्टि शब्देन सृजिधातुघटितमन्त्रोपधेयेष्टका उच्यन्ते। अत्र 'उपदधाति' इत्या ख्यातान्तेन शब्देन सृष्टिशब्दाभिसम्बन्धात् सृष्टिशब्देनेष्टकोपधाने मन्त्रा विधीयन्ते इति पक्षे प्राप्ते, पाठादेव मन्त्रेषु प्राप्तेषु विधानस्यावश्यकता नास्तीति सृष्टीरुपदधातीति वाक्यं मन्त्राननूद्येष्टकोपधानं विधत्ते। मन्त्राणामनुवादकः सृष्टिशब्दः। अनुवादप्रयोजनन्तु 'यथासृष्टमेवावरुन्धे' इत्यर्थवादोपपत्त्यर्थम्।

सर्वेषु मन्त्रेषु सृजिधातुघटित्वाभावेऽपि सृष्टिशब्दः सृष्टचसृष्टिसमुदाये भूमगुणयोगेन वर्तते । 'प्राणभृतमुपदधाति' इत्यत्रापि सृष्टिन्यायेन मन्त्रविधिरिति पक्षे प्राप्ते लिङ्गप्रकरणाभ्यां प्राप्तमन्त्राननूद्येष्टकोपधानविधिरिति सिद्धान्तः । पूर्वं भूमगुणयोगेन सृष्टचसृष्टिसमुदायपरत्वं सृष्टिशब्दस्य प्रकृते च छत्रिन्यायेन प्राणभृच्छब्दस्य प्राणभृदप्राणभत्समुदायपरत्वमिति भेदः ॥

१४

सन्दिग्धेषु ● 'अक्ताः शर्करा उपदधाति' इत्यत्र शर्करा द्रवद्रव्येणाञ्जनीयाः । द्रवद्रव्याणि घृततैलवसादीनि । एतेषु येनकेनचिदञ्जने प्राप्ते 'तेजो वै घृतम्' इत्यर्थवादेन घृतस्य स्तूयमानत्वात् विध्यर्थवादयोरेकवाक्यत्वसिद्धये घृतेनैवाञ्जनं कर्तव्यम् । विध्यपेक्षयार्थवास्य दौर्बल्येऽपि 'यःस्तूयते स विधीयते' इति न्यायेनार्थवादस्य प्राबल्यमङ्गीकृत्य घृतेनैवाञ्जनं कर्तव्यम् ॥

१५

अर्थाद्वा ● 'स्रुवेणावद्यति' 'स्वधितिनावद्यति' 'हस्तेनावद्यति' इत्यत्रावदान साधनानि स्रुवादीनि विहितानि । अवदेयं किमिति न ज्ञायते । अवदेयञ्चाज्यपुरोडाशमांसादिकम् । केन साधनेन किमवदेयमिति संशये निर्णायकस्य कस्याप्यभावादनियमे प्राप्ते, 'आख्यातानामर्थं ब्रुवतां शक्तिस्सहकारिणो' इतिन्यायेन सामर्थ्यस्य नियामकत्वात् स्रुवेणाज्यस्य, स्वधितिना मांसस्य, हस्तेन पुरोडाशस्य चावदानं कर्तव्यम् ॥

इति श्रीकमलाकरभट्टसूनुनानन्तेन विरचितामां
शास्त्रमालावृत्तौ प्रथमः प्रमाणाध्यायः ॥

अस्मिन्नध्याये पादाः ४
अधिकरणानि ३७

अथ द्वितीयो भेदाध्यायः

प्रथमः पाद

१

भावार्थाः • पूर्वस्मिन्नध्याये धर्मप्रमाणचिन्ता वृत्ता । अस्मिन्नध्याये प्रमाणसिद्धस्य प्रमेयस्य धर्मस्य भेदोभेदौ निरूप्येते । भेदाभेदपरिज्ञानायापूर्वं कस्माद् भवतीति चिन्तनीयम् । तदर्थं 'सोमेन यजेत' इत्यत्र वाक्ये श्रुतसोमयजतिपदयोरुभयोरपूर्वप्रतिपादकत्वमुतैकस्य तत्प्रतिपादकत्वमिति विचारणीयम् । तदस्मिन्नधिकरणे विचार्यते । प्रधानसम्बन्धस्याभ्यर्हितत्वात् उभयोस्तत्प्रतिपादकत्वे* प्राप्ते, अनेकादृष्टकल्पनादोषात् एकं पदमपूर्वकल्पकम्, इतरच्च तदर्थं स्वीकर्तव्यम् । एवं तर्हि एकत्र विरुद्धत्रिकद्वयापत्तिरिति चेत्, 'उद्भिदा यजेत' इत्यादौ उद्भित्पदस्य नामधेयत्वात्, 'सोमेन यजेत' इत्यत्र विशिष्टविधिस्वीकाराच्च न दोषः । विशिष्टविधौ मत्वर्थलक्षणा स्यादिति चेत्, तस्याः स्वीकारात् । ततश्च मत्वर्थलक्षणाया एव ज्यायस्त्वात् । तस्मादेकस्यैव फलसाधनत्वम् । यत्फलसाधनं तस्मादेवापूर्वम् ।। ननु फलस्य सिद्धसाधनापेक्षत्वात्सीमादेश्च तथात्वात् तदेव फलभावनाकरणं तत एवापूर्वम् । न तु यागः साध्यत्वादित्यत आह—

भावार्थेभ्यस्त्वपूर्वं स्यात्,

न प्रत्ययवाच्यायां भावनायां पदश्रुतिगम्यधात्वर्थकरणत्वत्यागेन द्रव्यादेर्वाक्येन तत्सम्भवति । न च धात्वर्थस्यासिद्धत्वम्, स्वसाधननिष्पादितस्य सिद्धत्वात् । किञ्च द्रव्यादपूर्वे यागस्य द्रव्यार्थत्वे दृष्टोपकाराभावाददृष्टद्वयं स्यात् । तेन धात्वर्थ एव भावनाकरणम् । भावना च प्रयोज्यफलकप्रयोजकव्यापाररूपप्रत्ययवाच्या, तदन्वयव्यतिरेकानुविधानात् । सा च करोतौ भावयतौ च मुख्या, उभयव्यापारप्रतीतेः । पुरोडाशो भवति देवदत्त एतीत्यत्र तु प्रयोज्यप्रयोजकव्यापारमात्रप्रतीतेर्गौणीति । तेन धात्वर्थ एव भावनायां करणम् । तद्भेदाच्चापूर्वभेदः ।।

२

चोदना • ननु 'यजेत स्वर्गकाम' इत्यादौ यागस्वर्गातिरिक्तापूर्वकल्पने श्रुतसाध्यसाधनभावबाधापत्तेर्विनष्टादेव फलम् । यद्वा श्रुतिप्रामाण्यात् क्षणिकस्यापि यागस्य सूक्ष्मरूपेणावस्थानं प्रतियोगिवैचित्र्यादभावाद्वा फलमस्तु न त्वपूर्वं नामातिरिक्तमस्तीत्यत आह--

* एतदन्तं पृष्ठानि नष्टानि

तत्सत्ता साधिता ततः ।

न विनष्टस्य फलजनकत्वम्, प्रत्यक्षविरोधात् । न च सूक्ष्मरूपेण स्थितिः । योग्यानुपलब्ध्या बाधात् । नापि यागध्वंसः फलजनकः, श्रुतिबाधात्, फलानन्त्यापत्तेश्च । न च वर्षावच्छिन्नस्वर्गव्यक्तिं प्रति तदवच्छिन्नध्वंसस्य कारणतेति न फलानन्त्यमिति वाच्यम् । फलसमकालत्वेन पूर्वभावित्वाभावात्पूर्वकालीनस्य च यागवदतीतस्य व्यापारं विना हेतुत्वाभावादवच्छेदस्याश्रुतत्वाच्चेत्याद्याकरे स्पष्टम् । तेन श्रुतान्यथानुपपत्त्या यागेनापूर्वं कृत्वा स्वर्गं कुर्यादिति शब्दकल्पनाद् व्यापाररूपं वैदिकमेवापूर्वमवश्यमेष्टव्यम् । न च व्यापारिणो नष्टत्वात् कथं व्यापारस्थितिरिति वाच्यम् । त्यागाख्यक्रियाया आत्मनश्च तादात्म्येन आत्मनिष्ठापूर्वकल्पनात् । ततश्च फलापूर्वमङ्गोपकृतात्प्रधानाज्जायते । तज्जनकान्युत्पत्त्यपूर्वाण्यङ्गापूर्वाणि वा । दर्शपूर्णमासादौ त्वेकं फलापूर्वम् । समुदायापूर्वद्वयम् । उत्पत्त्यपूर्वाणि च षडिति नवापूर्वाणि ॥

३

तानिद्वैधं० ● ननु व्रीहीनवहन्तीत्यत्र कल्प्यमानमपूर्वं धात्वर्थादेवास्तु, व्रीहीणान्तु सिद्धत्वाद्धात्वर्थार्थत्वम् । अन्यथादृष्टदृयापत्तेरित्यत आह—

गुणकर्मावघातादिः

नात्र प्रधानकर्मत्वम् । द्वितीयया व्रीहीणां प्राधान्यावगमादन्यथा करणत्वे लक्षणापत्तेः यागीयव्रीह्यनुवादेन वितुषीभावार्थत्वेनावघातविधौ तदर्थत्वादवघातोद्देशेन तु व्रीहिविधाने दृष्टार्थत्वाभावादत्यन्तादृष्टापेक्षया दृष्टस्य लघुत्वाच्च गुणकर्मैवावघातः ॥

४

धर्ममात्रे ● ननु 'स्रुचस्सम्मार्ष्टि' इत्यत्र द्वितीयायाः सक्तून् जुहोति, बल्वजान् कुर्वित्यादौ च तृतीयार्थे दर्शनात्स्रुचः संमार्गार्थाः । संमार्गस्त्वपूर्वार्थ इत्याशङ्क्याह—

स्रुचां सम्मार्जनं तथा ।

गुणकर्मेत्यर्थः । द्वितीयया ईप्सितानीप्सितसाधारण्येन क्रियाव्याप्यमानत्वरूपसाध्यत्वोक्तेस्तदेव द्वितीयार्थः । तत्त्वे परशुं छिनत्तीति वाक्यस्य योग्यतापत्तेः । सक्तूनान्तु होमसाध्यत्वायोगाल्लक्षणया साधनत्वम् । तेन द्वितीयायास्तृतीयार्थे लक्षणा । जुहोतीत्यत्र देवतोद्देशपूर्वकद्रव्यत्यागप्रक्षेपसमुदायात्मकहोमे सक्तूनां कर्मत्वं सुतरां न सम्भवतीति होमेन स्वावयवभूतप्रक्षेपलक्षणा द्वितीया स्रुचान्तु क्रतावुपयोगेनेप्सितत्वात्तन्निष्ठमेव संस्कारजन्यमपूर्वमङ्गीकृतमिति संस्कारकर्मैव संमार्गः ॥

५

स्तुतशस्त्रयोस्तु ● ननु'आज्यैस्तुवते प्रउगं शंसती'त्यादीनां प्रगीताप्रगीत-

मन्त्रसाध्यानां गुणगुणिसम्बन्धरूपाणां स्तोत्रशस्त्राणां मन्त्रेषु याज्यावद्देवताभिधानस्य दर्शनेन संमार्गवद्गुणकर्मत्वमेवास्त्वत आह—

स्तोत्रशस्त्रं प्रधानं स्यात्,

गुणसम्बन्धप्राधान्ये स्तुतिर्भवति। तथैव लोके वक्रकेशान्तो देवदत्त इत्यादौ दर्शनात्। तेन स्तौति शंसतिश्रुतिबलाददृष्टार्थे एव स्तोत्रशस्त्रे। एवञ्च माहेन्द्रग्रहयागे ऐन्द्रीस्तुतिर्घटते। अन्यथोत्कृष्येत। तेन प्रधानकर्मत्वमेव। प्रयोजनं 'आग्नेय्या ग्रहा भवन्ती' त्यादावविकारः॥

६

विधिमन्त्रयोः ● आख्यातस्य गुणप्रधानकर्मविधायकत्वेन द्वैविध्यमुक्तम्। तत् प्रसंगादभिधायकत्वमपि प्रसङ्गाद्विचार्यते। ननु 'देवाश्च याभिर्यजते ददाति च' 'यस्योभयं हविरार्तिर्छेदि'ति मन्त्रनिमित्तवाक्यादिगतान्याख्यातान्याख्यातत्वाविशेषात् विधायकानि सन्तु। ततश्च मन्त्रविध्योर्विधायकत्वे विशेषाग्रहादुभयत्र विधावभ्यासात्कर्मभेदोऽस्त्वत आह—

मन्त्रस्थे लिङि नो विधिः।

नैषां विधायकत्वम्। यच्छब्देनानुवादत्वप्रतीतेः। कर्मोपयुक्तार्थस्मारणेन चरितार्थानां विधिकल्पकत्वायोगाच्च। तेन दृष्टार्थत्वादभिधायकान्येवैतानि॥

७

तच्चोदकेषु ● मन्त्रेष्वनुगतधर्माभावान्न मन्त्राणां लक्षणमस्तीत्याशङ्क्य मन्त्रप्रसिद्धिगम्यत्वमेव तदित्याह—

मन्त्रप्रसिद्धो मन्त्रः स्यात्,

८

शेषे ब्राह्मणशब्दः ● मन्त्रादन्यद्वेदवाक्यं ब्राह्मणमित्याह—

शिष्टं तु ब्राह्मणं भवेत्।

९

अनाम्नातेषु ● ननूहप्रवरनाम्नां मन्त्रान्तर्गतत्वादन्यथा मन्त्रेणैव स्मर्त्तव्यमिति नियमभङ्गापत्तेश्च मन्त्रत्वमेवास्त्वत आह—

ऊहादेर्नैव मन्त्रत्वम्,

वेदेऽनाम्नातत्वादेवैषाममन्त्रत्वम्। तद्युक्तस्य तु वेदवाक्यस्यैकदेशविकृतन्यायेनास्त्येव मन्त्रत्वम्। किञ्चैषामेकवाक्यतया मन्त्रत्वम्? तत्कार्यकरत्वाद्वा? नाद्यः, इषे त्वा छिनद्मीत्यध्याहारेऽतिप्रसक्तेः। नान्त्यः, रथघोषादावभावात्। तेन सिद्धमेषाममन्त्रत्वम्। वेदत्वन्त्वस्त्येव। पुत्रस्य नाम गृह्णाति इत्यत्र मन्त्रत्वाच्च नियमोऽपि युक्तः॥

१०

तेषामृक् ● ऋगादेः मन्त्रविशेषस्य लक्षणं प्रसङ्गादुच्यते। वेदत्वे सति छन्दोवशेनार्थवशेन वा यत्र पादव्यवस्था स्यात्सा ऋगित्याह—

पादबद्धा ऋगुच्यते ॥

११

गीतिषु ● वेदत्वे सति गानं सामेत्याह—

गीतिः साम ,

शेषे यजुः ● मन्त्रत्वे सति ऋक्सामाभ्यामन्यद्यजुरित्याह—

तयोर्भिन्नं यजुः स्यात्,

१२

निगदो वा ● ननु 'प्रोक्षणीरासादये' त्यादीनां परसम्बोधनरूपाणां निगदानां 'उपांशु यजुषा उच्चैर्निगदेन' इति धर्मभेदात् संज्ञाभेदादन्यथा उच्चैर्गुण-योगाद्यजुषां तत्वे ऋचामपि तत्वापत्तेर्यजुर्भ्यो भिन्नत्वमेव। तेन शेषे यजुष्ट्वं नेत्याशङ्क्याह—

निगदोऽपि न तु।

न धर्मभेदाद्भेदः। निगदेषु परप्रत्यायनकार्यविरोधेनार्थादुच्चैष्ट्वसिद्धौ निगदेनेत्यस्यानुवादत्वात्। उपांशु यजुषेति सामान्यन्तु निगदभिन्नपरम्। किञ्चाप्रधानभूतपरप्रत्यायनाङ्गमुच्चैष्ट्वम्। उपांशुत्वन्तु मन्त्राङ्गम्। तच्छ्रुति-प्रमाणकमप्यङ्गाङ्गत्वाद्बाध्यमेव। तत्वतस्तु तृतीयाश्रुत्यभावाद्वाक्यीयमेवो-पांशुत्वम्। तल्लिङ्गेन बाध्यते। न च ऋचां निगदत्वापत्तिः। गद्यमित्यपाद-बद्धपदसमूहवाचिनो गदतेर्निशब्देन तन्निष्ठस्यैव गुणस्योक्तेः। तेन यजुष्वेव निगदाः। प्रयोजनं पूर्वपक्षे निगदानां ऋगादिभिन्नत्वान्न वाचस्तोमे पाठः। सिद्धान्ते तु यजुष्ट्वादस्ति पाठः ॥

१३

अर्थैकत्वात् ● यजुः परिमाणज्ञानार्थं वाक्यलक्षणमाह—

एकार्थकञ्च साकाङ्क्षमेकं वाक्यं यजुश्च तत् ॥ एकप्रयोजनकं विभागे साकङ्क्षमित्यर्थः। 'भगो वां विभजतु पूषा वां विभजतु' इत्यादौ विभागरूपैका-र्थ्येन व्यभिचारवारणाय विभागेत्युक्तम्। स्योनन्ते तस्मिन्सीद'त्यत्र तच्छब्दस्य पूर्वसापेक्षत्वेऽपि सदन-सादनरूपार्थभेदान्नैकवाक्यतेति वक्तुमेकप्रयोजनकमि-त्युक्तम् ॥

१४

समेषु वाक्यभेदःस्यात् ● ननु यत्र निराकङ्क्षीकरणसमर्थं पदं न दृश्यते 'यथा इषेत्वोर्जेत्वा' 'आयुर्यज्ञेन कल्पतामि'त्यादौ तत्र साकाङ्क्षत्वेनैषाम-

भिधानेनोपकारकत्वाभावाददृष्टद्वारा क्रत्वङ्गत्वं वाच्यम्। तस्य चैकेनोपपत्तौ अनेककल्पनायोगाददृष्टार्थं मन्त्रादपूर्वमेकं वाच्यम्। न चैकमन्त्रत्वे 'इषेत्वेति छिन्नती'त्यादि प्रतीकभेदेन विनियोगभेदस्य क्लृप्तीरित्यादि बहुत्वस्य चाऽनुपपत्तिः। संकर्षणकाण्डगत 'नः प्राणएत्विति मन्त्रस्य 'प्राणएत्विति हिरण्यमभिमृशती' त्यन्तप्रतीकेनेव एकस्यैव मध्यान्तप्रतीकभेदेन विनियोगसम्भवात्। एकमन्त्रत्वेऽपि कल्पतामित्यस्य पुनः पुनः प्रयोगेण बहुत्वस्याऽपि सम्भवात्। तेनैकमन्त्रत्वमेवास्त्वत आह—

इषेत्वादौ मन्त्रभेदो विनियोगस्य भदेतः।

इषत्वेति छिनत्ति इत्यादि विधिभिर्यावद्विनियुज्यते तावदेव प्रयोक्तुं न्याय्यम्। ततश्च शाखाच्छेदने श्रुतिविनियुक्तस्य साकाङ्क्षस्य मन्त्रस्य करणत्वात्क्रियाप्रकाशनं च विना तदयोगाददृष्टार्थस्यैतस्य क्रियाङ्गत्वनिर्वाहार्थं छिनद्मीत्यादिपदस्याध्याहारः। एवं कल्पतामित्यत्र क्रियायाः भेदेन क्लृप्तिभेदात् अर्थभेदाद् वाक्यभेदः॥

१५

अनुषङ्गो • अत्रापि यजुः परिमाणज्ञानार्थमनुषङ्गविचारः। ननु उपसत्प्रकरणे 'याते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा'इत्याद्यनन्तरं'याते अग्ने रजाशया या ते अग्ने हराशया इति मन्त्रद्वयस्याध्याहारेणैव शेषपूरणम्, नतु तनूरित्यस्य भागस्यानुषङ्गेण। वैदिकपाठातिक्रमापत्तेर्वा लौकिकत्वापत्तेरानन्तर्याद्देशभेदाच्च। तेनायमाद्यस्यैव शेषो नोत्तरयोः। ततश्चोहादिवदध्याहृतस्यामन्त्रत्वाद्यावदुक्तमेव मन्त्रद्वयमित्याशङ्क्याह—

तनूरित्यस्यानुषङ्गो यात इत्यादिके ततः।

नाकाङ्क्षायोग्यता सन्निधिभिरुपस्थितेन तनूर्वर्षिष्ठेत्यनेनानुषङ्गेण वाक्यपूरणे सम्भवति लौकिकस्याध्यारो भवति। न चानिबद्धत्वम्। तन्त्राम्नानेन सर्वार्थत्वे सति तस्याप्रयोजकत्वात्। न च द्वितीयात् पूर्वं पाठापत्तिः। आद्यस्यान्ते पाठदर्शनेनोत्तरयोरप्याकाङ्क्षाबेलायामवैरूप्येणान्ते एव पाठात्। तेनाऽनुषङ्गयुक्तयोरेव मन्त्रत्वम्। एवं शेषिभूतमन्त्रद्वयस्याकाङ्क्षया शेषाकांक्षोत्थापनेनान्वय उक्तः। यत्र तु शेषिणां निराकाङ्क्षत्वेऽप्यन्त्यमन्त्रस्य शेष एकस्यां पावनक्रियायां पुनः पुनः प्रकाश्यायामच्छिद्रादेः करणप्रकाशकत्वात् प्रतिप्रधानं गुणावृत्तिन्यायेनानुषज्यत इत्याह—

अच्छिद्रादेः पुनात्वैक्यात्त्रिषु स्यादनुषञ्जनम्।

१६

व्यवायात् • 'सन्ते वायुर्वातेन गच्छतां संयजत्रैरङ्गानि संयज्ञपतिराशिषेत्यत्राङ्गानीति बहुवचनान्तेनासम्बन्धिपदेन विच्छेदान्नानुषङ्गः। किंत्वध्याहार इत्याह—

व्यवयान्नानुषज्यते संयज्ञेन गच्छतामिति ।

व्यवाय: व्यवधानम् ॥

द्वितीयस्य प्रथम: पाद: ॥

द्वितीय: पाद:

१

शब्दान्तरे ● ननु यजति ददाति जुहोतीत्यत्र प्रत्ययस्यैकत्वेनैकैव भावना । तत्रैवानेकधात्वर्थविधि: । न च गुणभूतधात्वर्थानुसारेण प्रधानभूतभावनाभेद: सम्भवति । तेन वाक्यैकवाक्यतया सर्वधात्वर्थविशिष्टैकभावनाविधिरस्त्वत आह—

शब्दान्तरेण भेद:स्यात्,

प्रत्ययस्यैकत्वेऽप्यपर्यायधातुरूपशब्दान्तरात् भावनाया: भेद: स्यात् । किञ्च धात्वर्थविशेषं विना भावनासामान्यस्याननुष्ठेयत्वाद्विधिरेव भावनाया न स्यात् । न च संहृत्य विशेषकत्वम् । तथाग्नीषोमवत्पदैक्याद्वा क्रयवद्वाक्यैकत्वाद्वा ? नाद्य:, तद्वत्समस्तोपर्येकस्य प्रत्ययस्याभावात् । नान्त्य:, क्रीणातीतिवद्भिन्नस्य प्रत्ययस्य प्रयोगाभावात् । तेनैकस्यां भावनायां सजातीयानेककारकनिवेशासम्भवादेकभावनानुवादेन हिरण्यात्रेयदानानां विधौ वाक्यभेदाच्च भिन्ना एव भावना: । प्रयोजनं पूर्वपक्षे सर्वेषां प्राधान्यम् । सिद्धान्तेऽङ्गाङ्गित्वम् ॥

२

एकस्यैवम् * ननु 'समिधो यजति तनूनपातं यजती' त्यादिषु पञ्चधाम्यस्तेषु यजतिषु धातुप्रत्यययोरेकत्वेन यागभावनयोरेकत्वावगतेरेकैव भावना यागश्च । ततश्च समिच्छब्दे दाशमिकन्यायेन नामत्वेऽपि तनूनपादादौ यागभेदासिद्धौ संज्ञात्वस्यैवासिद्धेरन्योन्याश्रयाच्च देवताविधिरेव 'विष्णुं यजती' तिवन्न तु यागविधिर्येनाभ्यासाद्भेद:स्यादित्याशङ्क्याह—

अभ्यासाच्च तत: परम् ।

न क्रमविनियुक्तमन्त्रवर्णाद्देवताप्राप्तिं निमित्तीकृत्य तनूनपादादेर्नामत्वेनोपपत्तौ देवताविधायकत्वं सम्भवति, अनुपपत्यभावात् । किञ्च यदि समिद्वाक्ये यागविधिस्तदा याज्यानां विकल्पेन होमैक्याच्चतुर्दशेत्यादिलिङ्गमनुपपन्नं स्यात् । न स्याच्च समिच्छब्दस्य पक्षे मन्त्रदेवताया: प्राप्त्यभावे नामत्वम् । तेन श्रुत्या यागभावनयोर्विधेयत्वावगतेरेकस्य धातो: पुन:श्रवणलक्षणादभ्यासादेवात्र भेद: ॥

३

प्रकरणं तु ● ननु यदाग्नेयादिवाक्यैः षड्यागान् विधाय श्रुतस्य 'य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजते' इति वाक्यद्वयस्य कर्मान्तरविधायकत्वमस्तु। न च रूपालाभः। 'सर्वस्मै'वेति वाक्येनाज्यस्य वार्त्रघ्नीवाक्येन च मन्त्रयोः यागाङ्गत्वे सति लिङ्गाद्देवताप्राप्तिसम्भवात्। न चैकस्मिन् यागे कथमनुवाक्याद्वयं याज्याभावश्चेति वाच्यम्। अनुवाक्ययोर्विकल्पे सति तदनुरोधेनाग्निसोमयोर्याज्याकल्पनसम्भवात्। यद्वाऽनयोरेवैका याज्याऽपरा चानुवाक्या भविष्यति। तेन रूपलाभात्कर्मान्तरमेव विद्वद्वाक्ये, न तु समुदायानुवादः, वैयर्थ्यात्। एवञ्च 'पौर्णमास्यां पौर्णमास्ये'ति वाक्यद्वयं विद्वद्वाक्योक्तयोः कालविधानादर्थवद्भवति। अन्यथाग्नेयादिषु उत्पत्तिवाक्यादेव कालस्य प्राप्तत्वेन तत्रानेन कालस्याविधानाद्वैयर्थ्यं स्यात्। अतश्च फलवाक्यगतस्य कालयोगिनो द्विवचनान्तस्य दर्शपूर्णमासाभ्यामिति पदस्याग्नेयादौ कालयोगेऽपि बहुत्वाद्द्वित्वबाधेनाऽज्यभागादौ द्वित्वेऽपि कालयोगाभावेनाप्रसिद्धार्थत्वाद् विद्वद्वाक्ययोः कर्मान्तरविधायित्वेन च पूर्वं त्रिकयोरेकशब्दाभिधानाभावेन समुदायद्वयासिद्धौ तदपेक्षया द्वित्वायोगाद्राजसूयवदाख्याताधीनेन द्विवचनप्रतिरूपकेण नाम्ना सर्वयागानां फले विधानात्सर्वेषां समप्राधान्यम्। यद्वा विद्वद्वाक्ये द्रव्यदेवतालाभात्कर्मान्तरत्वे सिद्धे तस्य 'पौर्णमास्यां पौर्णमास्ये'ति वाक्यद्वयेन काले विहिते तत्प्रख्यतया विद्वद्वाक्यगतपौर्णमास्यमावास्याशब्दयोः कर्मनामत्वात् तत्पर्यायेण फलवाक्यगतेन यजिसमानाधिकरणेन दर्शपूर्णमासपदेन यागद्वयस्यैव फलसम्बन्धो भविष्यति। तेनाभ्यासाद्भेद इत्याशङ्क्याह—

अभ्यासस्यापवादः स्याद्विद्वद्वाक्येऽनुवादतः ॥

न विद्वद्वाक्ये कर्मविधिः, अरूपत्वात्। कथञ्चिद् द्रव्यलाभेऽपि देवताभावादरूपत्वम्। वार्त्रघ्नीवचनस्य चाज्यभागयोरेवाव्यवस्थया प्राप्तानां मन्त्राणां व्यवस्थार्थत्वात्। न च यागत्वाद्देवताकल्पनम्, शब्दगम्यत्वात्तस्याः। नापि द्वयोः 'पौर्णमास्यां पौर्णमास्ये'ति कालविधानात् फलसम्बन्धः। संज्ञात्वासिद्धौ तदुद्देशेन कालविधानायोगात्; अन्योन्याश्रयाच्च। किञ्च द्वयोः प्राधान्ये सत्याग्नेयसान्नाय्ययागादेरङ्गत्वं स्यात्। ततश्चाज्यभागप्रयाजादेः 'गुणानाञ्च परार्थत्वादि'ति न्यायेन सान्नाय्यादियागाङ्गत्वे प्रमाणाभावात्। अवान्तरप्रकरणस्य वाऽसत्वात्सान्नाय्यविकारे पशावाज्यभागादिप्राप्त्यभावात् 'न तौ पशौ' 'न होतारं नार्षेयमि'ति निषेधपर्युदासयोरनुपपत्तिः स्यात्। न च'नान्तरिक्ष'इतिवन्नित्यानुवादत्वं वैयर्थ्यात् न स्याच्च प्रयाजानुवादेनैकादशत्वसङ्ख्याविधानम्, प्राप्त्यभावात्। तेन द्वयोः प्राधान्ये सति तद्विकार एव प्रयाजादिप्राप्तिः स्यान्नतु सान्नाय्यादिविकारे इति सिद्धं षण्णां प्राधान्यम्। विद्वद्वाक्यस्य तु रूपाभावात्स-

मुदायानुवादत्वम् । न चानुवादे वैयर्थ्यम् । त्रयाणामेकशब्दोपादानेन समुदाये सिद्धे फलवाक्यापेक्षितद्विवचनसिद्धेः प्रयोजनत्वात् । न च पौर्णमास्यां पौर्णमास्येति द्वयोर्वैयर्थ्यम्, यागत्रयस्य सहप्रयोगार्थत्वात् । न चाग्नेयवाक्येन रूपलाभः । प्राप्तकर्मानुवादेनानेकगुणविधाने वाक्यभेदात् । तेन सिद्धं समुदायानुवादत्वम् । प्रयोजनं प्रयाजादेरनतिदेशोऽतिदेशश्च ।।

४

पौर्णमासी ● इतः परमधिकरणत्रयं समुदायानुवादापवादार्थमित्याह—

समुदायानुवादस्याप्यपवादस्ततस्त्रिषु ।

ननु 'विष्णुरुपांशु यष्टव्यः प्रजापतिरुपांशु यष्टव्यः अग्नीषोमावुपांशु यष्टव्यौ' इत्यत्र तव्यप्रत्ययेन कर्मत्रयस्य विधानात्तत्र च विष्ण्वादिदेवत्ययाज्यानुवाक्यायुगलानां स्थानप्रमाणेनाङ्गत्वे मान्त्रवर्णिकदेवतालाभेन रूपलाभादजामित्वायेत्युपसंहारभेदेन चैकस्य जामित्वोपक्रमस्य त्रिष्वनुषङ्गादन्तरावाक्ये च रूपाभावाद्वर्तमाननिर्देशाच्च समुदायानुवादत्वमस्त्वत आह—उपांशुयाजेति । नान्तरालवाक्येऽन्येषां समुदायानुवादः, विष्ण्वादिवाक्यानामर्थवादत्वात् । तथाहि—जामित्वोपक्रमादजामित्वोपसंहाराच्चैकवाक्यत्वे निश्चिते सत्युपक्रमे जामितारूपदोषसङ्कीर्तनमेतद्गमयति—नूनं किञ्चिदन्तराले विधेयमिति । तेनान्तरावाक्य एव यागविधिः । विष्ण्वादिवाक्यानान्तु तत्रैवाजामित्वकरणेन स्तावकत्वम् । अन्यथा जामित्वेनोपक्रमे सत्यजामित्वायेत्युपसंहारोऽनन्वित एव स्यात् । विष्ण्वादिवाक्ये चान्तराशब्दाभावान्मध्ये कर्तव्यत्वाप्राप्तेरजामित्वायेति स्तुतिरसङ्गता स्यात् । न चान्तरालवाक्ये यागविधिः विष्ण्वादिवाक्ये तु तदनुवादेन देवताविधिरिति वाच्यम् । अजामित्वायेत्यन्तराविहितकर्मणः स्तुत्यवगमेन देवतास्तुत्यप्रतीतेः । शाखाभेदेनाम्नातैः याज्यानुवाक्यायुगलैः प्राप्तिसम्भवे तद्विधिवैयर्थ्याच्च । तेन विधेयान्तराभावादर्थवादा एव । न चान्तरावाक्याद्द्रव्याभावः सर्वस्मैवेति वाक्येनाज्यप्राप्तेः । न चोपांशुयागस्य वैकल्पिकदेवताकत्वे तावब्रूतामिति वाक्ये अग्नीषोमग्रहणात्तस्यैव पौर्णमासीकालसम्बन्धः स्यान्नेतरदेवत्यस्येति वाच्यम् । देवताया उपलक्षणत्वेन तदपायेऽपि तदुपलक्षितयागानपायेनान्यदेवत्येऽपि पौर्णमासीकालसम्बन्धस्य दशमान्ते साधयिष्यमाणत्वात् । तेन सिद्धः कर्मभेदः ।।

५

आधाराग्निहोत्रमरूपत्वात् ● ननु 'दध्ना जुहोति उर्ध्वमाधारयती' त्यादौ कर्माप्राप्त्या तदनुवादेन गुणविधानायोगात्प्राप्तावपि सिद्धरूपस्याव्यापारात्मकस्य च दध्यादेर्होमरूपव्यापारं विना विधेयत्वायोगाद् 'अग्निहोत्रं जुहोत्याधारमाघारयती'त्यत्र च कर्मसामान्यस्याननुष्ठेयत्वेन विशेषस्य च रूपाभावेन विधानायोगाद्दध्यादिवाक्येषु गुणविशिष्टकर्मविधिः सम्भवति । श्रुतस्य विधेर्गुणाक्षिप्तशक्ति-

त्वेन लाघवाद्गुणस्यैव विधेयत्वावगतेः । न च भावनाधात्वर्थौ उज्झित्वा कथं दध्यादेर्विधिरिति वाच्यम् । द्रव्यविशिष्टक्रियाविधायकस्याऽपि विधेः प्राप्ताप्राप्तविवेकेन फलतो गुणविधित्वात् । अतोऽग्निहोत्रवाक्ये आघारवाक्ये च किञ्चिद्रूपं भविष्यतीति प्रकल्प्य लक्षितलक्षितः कर्मविशेष एव विधेयः । तस्यैवाग्निहोत्रमाघारमिति च संज्ञा । दध्यादिवाक्यैस्तु रूपविशेषमात्रसमर्पणम् । तेनाघाराग्निहोत्र वाक्यं कर्मविधायकं न तु समुदायानुवादकमिति सिद्धम् । प्रयोजनं पूर्वपक्षे दशसु-कर्मसु देवतैक्यात्सहप्रदानम् । सिद्धान्ते विकल्पः । एवम् 'इन्द्र उर्ध्वोध्वर' इति मन्त्रस्य पूर्वपक्षे त्रिषु सम्बन्धः सिद्धान्ते तु न ॥

६

द्रव्यसंयोगात् • अग्नीषोमीयं पशुमालभेतेति प्रकृत्य 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया' इत्यादि श्रुतम् । तथा सोमेन यजेतेति प्रकृत्य 'ऐन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णाति आश्विनं गृह्णाति' इत्यादि । तत्रैन्द्रवायवमिति तद्धिते द्रव्यदेवतासंयोगात् हृदयस्याग्रेऽवद्यत्यथ जिह्वाया इत्यादौ चावदानसंस्कारान्यथानुपपत्त्या पूतीकवद्यागविधिकल्पनात्'सोमेन यजेताग्नीषोमीयं पशुमालभेते'त्येतद्वाक्यगतयोरालभतियजत्योः समुदायानुवादत्वमस्तु । न चैवं सोमपशुशब्दयोः कथमन्वयः ? उच्यते – सोमशब्दस्य गृह्णातिसामान्याक्षिप्तद्रव्यनियामकत्वात् । यद्वा आज्यव्याघारणगृह्णातीति धारयाक्षिप्तस्य प्रकृतिद्रव्यस्य नियमोऽयम् । यद्वाऽभिषवादिवाक्यैः सोमस्यापि प्राप्तत्वाद्वैश्वदेववद्यज्युक्तसमुदायानुवादेन सोमशब्दो नामधेयं भविष्यति । अन्यथा ग्रहणानां देवतानां वैकार्थ्येन विकल्पाद्दशैतानध्वर्युः, आश्विनो दशम इत्यादि समुच्चयक्रमदर्शनमनुपपन्नं स्यात् । एवं पशुशब्देन हृदयादिद्रव्यं गौण्या वृत्या उच्यते तस्य चाग्नीषोमपदेन देवतासम्बन्धे तावन्तो यागाः, ततश्च पशुप्रभवं हृदयाद्यग्नीषोमदेवत्यं कुर्यादित्यर्थः । अनुवादत्वाच्च विकारे प्रकृतिवाचिनोः पशुसोमशब्दयोर्लक्षणापि न दोषः । तस्मात् समुदायानुवादत्वमेवास्त्वत आह—

पशुसोमयोरिति

न सोमवाक्ये स्पष्टे यागविधाने सम्भवत्यैन्द्रवायवादिवाक्येषु तत्कल्पना सम्भवति अनुपपत्त्यभावात् । नापि सोमशब्दस्य तत्प्रख्यन्यायेन नामत्वम्, तथात्वे सोमस्य वाक्यान्तरेणाविहितत्वेनाभिषवादिवाक्यानां विनियोगभङ्गेनारादुपकारकाभिषवादिविधायित्वापत्तेः । तेन ग्रहणवाक्यानामभिषवादिवाक्यैः प्रापितरसस्य ग्रहणसंस्कारतद्विशेषणदेवतायाश्च विधानेन नैराकाङ्क्ष्यान्न यागविधायित्वम् । तत्र च ग्रहणे देवता यागद्वारेण भवतीत्यर्थाद्यागेऽपि सैव देवता । सोमश्चोत्पत्तिशिष्टोऽप्यभिषवादिवाक्यानुरोधेन रसद्रव्यके यागे साक्षात्साधनत्वेना सम्बध्यमानः प्रदेयप्रकृतितया परम्परया यागसाधनं भवति । ततश्चैन्द्रवायवादिवाक्येषु यागं विना देवतात्वायोगाद्यज्यपेक्षायां सोमवाक्यविहितः **प्रत्यक्ष एव**

यजिः सर्वत्र द्रव्यदेवतासम्बन्धान् घटयन् यागान्तरकल्पनां निरुणद्धि । 'दशमुष्टीर्मिमीत' इति च दशमुष्टिपरिमितस्य सोमस्याल्पपात्रैः सोमप्रतिपत्तिरूपहोमासिद्धेर्ग्रहैर्जुहोतीत्युपादेयगतबहुत्वाच्चोपपन्नं तृतीयत्वदशमत्वादिकम् । एवं पशोरप्यवदानद्वारैव यागसाधनत्वम् । ततश्च हृदयादिष्वग्नीषोमपदेन देवतासम्बन्धे कृते एकादशहविष्को राणकमते चित्रेष्टिवदेको यागः । वचनात्तु वपायां तस्याभ्यासः । तेन पशुसोमवाक्यं विधायकमेव न त्वनुवादः । प्रयोजनं पूर्वपक्षे कर्मभेदः, सिद्धान्तेऽभेदः ।।

७

पृथक्त्व • सङ्ख्यया कर्मभेद इदानीमुच्यते । 'तिस्र आहुतीर्जुहोती' त्यत्राख्यातैक्यात्कर्मैकत्वेऽवगते संख्याश्रवणं प्रयाजैकादशत्ववदभ्यासान्नेयमित्याशङ्क्य वाक्ये श्रुतानां पदानां संहत्य वाक्यार्थबोधजनकत्वेनाख्यातमात्रस्य कर्मविधायित्वाभावात्कर्म विदधदेवाख्यातं संख्यासामानाधिकरण्यात्सङ्ख्यायाः पृथक्त्वनिवेशित्वाच्च सङ्ख्याविशिष्टानि बहून्येव कर्माणि विधत्ते । प्रयाजानान्तु निर्ज्ञातसङ्ख्यत्वादभ्यासः । तेन बहून्येव कर्माणीत्युक्तम् । भाष्ये त्वत्र संख्यायाः कर्मसामानाधिकरण्ये सिद्धान्तस्य स्पष्टत्वात् सप्तदशप्राजापत्यानिति द्रव्यगतां संख्यामुदाहृत्य प्राजापत्यपदे साऽस्य देवतेति तद्धितेऽस्येति सर्वनाम्नोक्तं पशोरस्येति सप्तदशकृत्वोच्चारणैकशेषे प्रत्ययार्थे प्रधानभूते द्रव्ये एषामिति पूर्वं बहुत्वान्वयात्पश्चादेषां प्रजापतिर्देवतेति बहूनामेकदेवतायोगादेकपशुनिष्पन्नैकादशावदानद्रव्यकत्वस्य त्वातिदेशिकत्वे च बाधाद् हृदयादिद्रव्यकपशुयागवदनेकपशुद्रव्यक एक एव याग इत्याशङ्क्य तद्धितान्तर्गतया देवताविशिष्टस्य पशोः प्रकृत्यर्थत्वेन तद्धितान्तानामेकशेषात्तदन्ते सुपा द्रव्यदेवतासम्बन्धबहुत्वोक्तेर्यागैक्ये चोदकस्याप्येकत्वेनैकस्यैव गणस्य प्राप्त्या तस्यैव देवतायोगेनान्येषां वैयर्थ्यापत्तेश्च यागभेद इत्युक्तम् । तदाह—

सङ्ख्यया कर्मभेदस्स्यात्,

८

संज्ञा • 'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेते'त्यत्र सहस्रदक्षिणागुणे विधेये यागानुवादापेक्षायां 'वसन्ते ज्यौतिषे' तिवदेकदेशेन ज्योतिष्टोमस्यानुवादादेतच्छब्दाच्चाभेदावगमाद्विश्वसर्वज्योतिश्शब्दयोश्च त्रिवृदादिष्वेव यथाकथञ्चित्साकल्येन वृत्तेरथशब्दस्य च अथ जिह्वाया इतिवत्पाठसिद्धक्रमानुवादित्वात्तत्रैव सहस्रदक्षिणागुणो विकल्पेन विधेयोऽस्त्वत आह—

ज्योतिरादिषु नामता ।

नैतच्छब्देन ज्योतिष्टोमानुवादेन गुणविधिः सम्भवति । तथात्वेऽनेनैव सिद्धेर्वाक्यत्रयवैयर्थ्यापत्तेः । तेन संज्ञया कर्मान्तरावगतेरथशब्देन प्रकरणविच्छेदाच्च कर्मान्तरमेव युक्तम् । एतच्छब्दस्तु प्रस्तूयमानपरः । तेन सिद्धास्संज्ञया भेदः ।।

९

गुणाश्चापूर्वसंयोगे ● ननु 'वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमि'त्यामिक्षायागस्योत्पत्तिशिष्टगुणावरुद्धत्वेऽपि वाजिनाकाङ्क्षया यागाकाङ्क्षामुत्थाप्य वाजिभ्य इत्यनेनामिक्षारूपान्नयोगेन तद्विशेषणकान् तदुपलक्षणभूतान्वा विश्वान् देवान्निर्दिश्य समुच्चयेन विकल्पेन वा वाजिनविधिः यद्वा यागमात्रं निष्कृष्य तदनुवादेन गुणविधिरन्यथा प्रकृतहानाप्रकृतकल्पनापत्तेरित्याशङ्क्याह—

वाजिनाख्यगुणाद् भेदः,

न तद्धितश्रुतिविहितदेवताके आमिक्षायागे उत्पन्नशिष्टस्य वाक्यीय देवतासम्बन्धस्य च वाजिनस्य निवेशः सम्भवति। न च वैश्वदेवीपदे स्त्रीमात्रोक्त्या अमिक्षापदैकवाक्यतया तत्परत्वमपि वाक्यीयमेवेति वाच्यम्। सर्वनाम्नां पदान्तरोक्ते प्रकृते शक्त्या वैश्वदेवीपदस्य देवताविशिष्टामिक्षावाचकत्वात्। न चोत्थाप्याकाङ्क्षा, यागान्तरविधायित्वेऽपि चारितार्थ्यात्। प्राप्त्यालोचनायां गुणविशिष्टस्य प्राप्तत्वाच्च न शुद्धानुवादः। तेन द्रव्यदेवतायोगात्कर्मान्तरमेव॥

१०

अगुणे तु ● 'अग्निहोत्रं जुहोती'ति निर्गुणे कर्मणि विहितानां दध्यादीनां पूर्वस्मिन्नेव निवेशान्न कर्मान्तरत्वापादकत्वमित्याह—

दध्याद्यैस्तदभिन्नता॥

११

फलश्रुतेस्तु ● ननु 'दध्नेन्द्रियकामस्य जुहुयादि'त्यत्र होमानुवादेन गुणविधाने गुणस्य च फलसम्बन्धविधाने वाक्यभेदादग्निहोत्रहोमात्कर्मान्तरं दधि विशिष्टं फलार्थं विधीयते। यद्वा दध्ना जुहोतीति वाक्याद्दधिप्राप्तेस्तद्विशिष्टहोमस्य फलसम्बन्धमात्रं विधेयम् अन्यथा होमस्यानुवाद्यत्वेनाविधेयत्वात् क्रियावेषं विना च सिद्धस्य फले विध्ययोगादत आह—

दध्यादिगुणमात्रात्तु फलं होमाभिधानतः।

न तावद्विशिष्टविधिः। गौरवान्मत्वर्थलक्षणादोषात्प्रकृतहानाप्रकृतकल्पनापत्तेः। नापि दधिविशिष्टहोमानुवादेन फलसम्बन्धविधिः विशिष्टानुवाददोषात्। तेन धात्वर्थस्य प्राप्तत्वाद्दधिकरणकं भावनान्तरं विधीयते। तस्य च फलभावनाकरणत्वं न स्वरूपेणेति संनिधिलब्धहोमसम्बन्धो जुहोतिनानूद्यते। अतो दध्न एव विधेयत्वात् तस्यैव फलसाधनत्वमिति भावनामात्रभेदः॥

१२

समेषु कर्मयुक्तं स्यात् ● ननु 'त्रिवृदग्निष्टुदग्निष्टोमः इत्यनेनाग्निष्टुद्यागं तस्य च 'वारवन्तीयमग्निष्टोमसामकार्य' मित्यनेन प्राकरणिकवाक्येन गुणं

विधाय श्रुते 'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेते'ति वाक्ये एतच्छब्दसामर्थ्यात् पूर्वयागाश्रितं रेवत्याधारं वारवन्तीयं रेवतीवारवन्तीयसम्बन्धो वा फले विधेयो न तु विशिष्टयागान्तरम् गौरवात् प्रकृतहानाप्रकृतकल्पनादोषाच्च। न च रेवतीवारवन्तीयसम्बन्धः फलसम्बन्धश्चेत्युभयविधानाद्वाक्यभेदः। कृत्वाशब्दाद्रेवतीवारवन्तीयसम्बन्धसिद्धेः। न च तादृशस्य साम्नः अग्निष्टोमस्तोत्रसम्बन्धाद्वाक्यभेदः। यागस्य सामाजन्यत्वे वाग्निष्टोमसामशब्दस्यानर्थक्यतदङ्गन्यायप्राप्तस्तोत्रसम्बन्धानुवादकत्वात्। न च स्तोत्रान्तराणां सत्वात्कथमग्निष्टोमस्तोत्रसम्बन्ध एव नियत इति वाच्यम्। क्रत्वर्थस्य वारवन्तीयस्याग्नीष्टोमस्तोत्रस्थानकत्वेन फलार्थस्यापि तत्स्थानकत्वात्। तेन वाक्यभेदाभावाद्गुणविधिरेवास्त्वत आह—

रेवत्यादिगुणान्नैव फलं कर्मान्तरन्त्विह।

नात्र गुणात्फलम् आश्रयालाभात्। न च प्रकृतयागास्याश्रयत्वम्, द्रव्यदेवताकरणकस्य यागस्य सामाजन्यत्वेन द्वाराख्याश्रयत्वाभावात्। प्रधानसम्बन्धस्याश्रवणाच्च नाङ्गावतारन्यायः। न च स्तोत्रस्य सामसाध्यत्वादाश्रयत्वम्। तस्यातिदेशिकत्वेन प्रकरणादनुपस्थितेः। तेन यस्य प्रकरणं न तस्याश्रयत्वयोग्यत्वम्। यत्तु योग्यं स्तोत्रं तन्न प्रकृतमित्येकाङ्गवैकल्यान्नाश्रयलाभः। तत्वतस्तु साम्नः स्वतः क्रियारूपत्वान्नाश्रयापेक्षा। तेन गुणफलसम्बन्धायोगात् कृत्वाशब्देन रेवतीवारवन्तीयसमानकर्तृकभावनाविशिष्टभावनान्तरविधिर्यागान्तरविधिश्च। एतच्छन्दः प्रस्तोष्यमाणपरः। तेन सिद्धं यागान्तरम्॥

१३

सोभरे ● ननु ज्योतिष्टोमं प्रकृत्य 'यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीते'ति फलत्रयार्थसौभरसन्निधौ श्रुतानां 'हीषिति वृष्टिकामाय निधनं कुर्याद् ऊर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामाये'ति निधनविशेषाणां हीषादीनां चतुर्थ्या पुरुषाङ्गत्वात्तस्य च तदभिलषितफलसाधनत्वरूपत्वाद् वृष्ट्यादिसाधनसौभराङ्गत्वे तु लक्षणापत्तेः साक्षात् हीषादिकमेव फलार्थमस्त्वत आह—

फलार्थे सौभरे साम्नि हीषादेर्नियमो मतः॥

नात्र हीषादीनां फलसाधनत्वमपूर्वं विधीयते। किन्तु शाखाभेदेन पाठतोऽनियतप्राप्तानां हीषादीनां नियममात्रम्। किञ्च नात्र सौभरस्य निधनस्य वा आश्रयत्वं सम्भवति। सौभरस्य हीषिति शब्दजन्यत्वात् न निधनं तस्याङ्गत्वेनाप्रकृतत्वात्। न चाङ्गावतारन्यायः। प्रधानसम्बन्धाश्रवणात्। तेन तत्फलार्थसौभरे हीषादीनां नियममात्रं न तु तेषां भिन्नं फलम्॥

द्वितीयस्य द्वितीयः पादः॥

तृतीयः पादः

१

गुणस्तु ● इदानीं गुणच्छेदापवाद उच्यते। सोमे 'यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयाद् यदि बृहत्समा शुक्राग्रान्' इति श्रुतम्। तत्र हि सोमशब्दलक्षितोऽन्यपदार्थो यागः प्रधानीभूतः बृहद्रथन्तरे तु पृष्ठस्तोत्र एव विहिते न सर्वत्र । रथन्तरस्य च विशेषणत्वमन्यव्यावृत्या विशेष्याव्यापित्वेन वा स्यात् । ज्योतिष्टोमे तु सामान्तराणां सत्वान्नान्यनिवृत्तिर्न वा विशेष्यव्याप्तिः सम्भवति । तेन रथन्तरसामेत्यनेन ज्योतिष्टोमानुवादायोगाद्बृहदेव साम यत्रेत्यन्यसामयोगव्यवच्छेदेनैकमात्रसामसाध्यककर्मान्तरविधिः। यदि शब्दस्तु रुच्यध्याहारपरो न निमित्तपर इत्यत आह—

निमित्तार्थश्रुतो नैव रथन्तरगुणाद्भिदा ॥

नात्र कर्मान्तरम् तथात्वे यदिशब्दप्रकरणयोर्बाधापत्तेः । तेन पृष्ठे पाक्षिकयोर्बृहद्रथन्तरयोरन्योन्यव्यावृत्याऽसत्वव्यावृत्या विशेषणत्वात् ज्योतिष्टोमे एव तन्निमित्ता ग्रहाग्रता विधीयते । भविष्यतोऽपि रथन्तरस्य बुद्धिस्थत्वेन वृष्टेर्गृहादिकर्मादाविव निमित्तत्वमविरुद्धम् ॥

२

अवेष्टौ ● राजसूयान्तर्गतायामवेष्टौ 'यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेद्यदि राजन्य ऐन्द्रम् यदि वैश्यो वैश्वदेवमि'ति श्रुतम्। तत्र राजसूयवाक्यान्तर्गतेनार्यावर्तप्रसिध्यनुगृहीतेन राजपदेन राज्ययोगाद्वर्णत्रयस्य राजसूये प्राप्ताववेष्टावपि प्राप्तेर्यदिशब्दाच्च मध्यनिधानविशिष्टाभिघारणं संस्कारो नैमित्तिको विधीयते । ततश्चेदं भिन्नार्थश्रवणं न तु कर्मान्तरमित्याशङ्क्याह—

अवेष्टौ प्राप्त्यभावात्तु ब्राह्मणादिविधिर्मतः ।

न राजसूयवाक्ये राजशब्दो राज्ययोगापेक्षः । 'राजानमभिषेचयेत्' इति श्रुतौ राज्यसम्बन्धात् पूर्वमपि राजशब्दयोगात् । एवञ्च क्षत्रियमात्रे राजशब्दप्रयोगस्य द्रविडप्रसिद्धिमूलत्वादक्षत्रिये प्रयोगस्य तु गौण्याप्युपपत्तेर्न यौगिकोऽयं किन्तु बर्हिरादिवज्जातिनिमित्त एवेति न राजसूये वर्णत्रयस्य प्राप्तिः । ततश्च ब्राह्मणादीनामवेष्टावप्राप्तब्राह्मणादिकर्तृकावेष्टिप्रयोगान्तरस्य विधायकानि वाक्यानि । तस्य च प्रयोगान्तरस्य'एतयान्नाद्यकाममि'ति फलसम्बन्धः । क्रत्वन्तःपातिनस्तु प्रयोगस्य स्वाराज्यार्थतया न फलान्तरसम्बन्धः । तेन राजसूयान्तर्गतायामवेष्टौ दक्षिणाभेदेनैकैकहविष्कप्रयोगाणां भिन्नत्वान्मध्यनिधानानुपपत्तेः कर्मान्तराण्येवेति पूर्वापवादः ॥

३

आधाने ●'वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य'इति श्रुतम्।

तथा च 'वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमि'ति। तत्र 'नक्तं गार्हपत्यमादधाति' इत्यादि गुणवाक्यपर्यालोचनया आहवनीयादेराधानसाध्यत्वावगमात् अग्न्युपायत्वेन क्रतुभिराधानस्याक्षेपात् प्राप्तेः यद्वा 'य एवं विद्वानग्निमाधत्ते' इति वाक्याज्जातपुत्रवाक्याद्वा आधानप्राप्तेः उपनयनस्य तु विद्योपायत्वेन प्राप्तेर्यदिशब्दाभावेऽपि ब्राह्मणश्चेदादधीत तदा वसन्त इत्येवंनिमित्तार्थमेव श्रवणमस्तु न तु विशिष्टाधानविधिरित्याशङ्क्याह—

बसन्ते ब्राह्मणादीनामाधानविधिरिष्यते ॥

न तावत्क्रत्वर्थाग्निविद्यार्थत्वेनाधानोपनयनपरो ज्ञेयः। आहवनीयोपनयनयोरलौकिकत्वेनोपायाज्ञानात्। न च'य एवं विद्वानि'ति वाक्यात्तत्प्राप्तिः। तस्य वर्तमानापदेशत्वेन सम्भारविधिस्तुत्यर्थत्वात्। नापि जातपुत्रवाक्ये विशिष्टाधानविधिः। तथात्वे वसन्तादिवाक्येषु कर्तृकालयोर्विधौ कर्तृविशिष्टे वाधाने कालविधौ वाक्यभेदात्। तेन वसन्तादिकालकर्तृविशिष्टा नानाधानविधय उपनयनविधयश्चेति सिद्धम् ॥

४

अयनेषु ● इष्टौ 'दाक्षायणज्ञेन स्वर्गकामो यजेत साकम्प्रस्थायीयेन पशुकाम' इति श्रुतम्। तत्रैवंसंज्ञकगुणाप्रसिद्धेर्दाक्षायणसाकम्प्रस्थायीयशब्दयोरेवंनामककर्मविधायित्वम् ज्योतिरादिवदस्त्वत आह—

दाक्षायणे गुणस्यैव फलं कर्मान्तरं न च ।

नात्र गुणाप्रसिद्धिः 'द्वे हि पौर्णमास्यौ 'सह कुम्भीभिरभिक्रामतींति' वाक्याभ्यामावृत्तिसहप्रस्थानवाचित्वात्। तेनात्र गुणादेव फलम् न तु कर्मान्तरम् गुणस्य प्रसिद्धत्वाच्च न धातुपरार्थ्यादिदोषः ॥

५

संस्कारश्चाप्रकरणे ● ननु 'वायव्यं श्वेतमालभेत सौर्यञ्चरुमि'त्यादौ यजत्यश्रवणाद्वैदिकत्वसामान्येनैष्टिकादिष्वालम्भनिर्वापावनूद्य श्वेतचरुगुणविधिः यावदुक्तकर्मविधिर्वास्त्वत आह—

वायव्यं श्वेतमित्यादौ दर्शालम्भे गुणौ न च ।

नात्र गुणविधिः तथात्वे फलपदवैय्यर्थ्यात्। तेनात्र द्रव्यदेवतासम्बन्धाद्यागकल्पना। दैक्षात्पशोर्विशसनप्राप्तेरालम्भशब्दोऽनुवाद एवं निर्वपतिरपि ॥

६

विशये प्राय ● इतः पञ्चभिरधिकरणैर्यागविधिर्न वेत्येतद्विचार्यत इत्याह

इतो गुणविधिर्यागविधिर्नैवेति पञ्चभिः ।

ननु 'वत्समालभेते' त्यत्र पूषासीति वत्समुपावसृजतीति वाचनिकमन्त्रवर्णाद्देवताप्राप्तेर्यागविधिरस्त्वत आह—

वत्सालम्भो न यागः स्यात् ।

नात्र पूष्णो देवतात्वम् । पुष्टियोगादसीति साम्मुख्येन वत्सस्यैवोक्तेः । तेन देवताभावान्मारणे च 'वत्सनिकान्ता हि पशव इति वाक्यशेषविरोधाद्दोहादिसंस्कारप्राये पाठाच्च न यागः । किन्तु वत्सलालनरूपः स्पर्शो विधीयत इति पूर्वापवादः ॥

७

संयुक्तस्तु ● ननु चयने 'चरुमुपदधाति बृहस्पतेर्वा एतदन्नं यन्निवारा' इत्यत्र कृदन्तान्नशब्दयोगेन कर्तृकर्मणोः कृतीति कर्तरि षष्ठ्या बृहस्पतेर्भोक्तृत्वावगमाद्देवतायाः तदभावेऽपि तेनोद्देशत्वमात्रलक्षणा । 'बार्हस्पत्यो भवती'ति तैत्तिरीयवाक्याद्वा देवतात्वावगतेर्यागविधिरस्त्वत आह—

न चरूपहितौ,

नात्र देवतासंयोगः वैशब्दश्रवणात् । उपधानविधानाच्च नानपेक्षितदेवता सम्बन्धस्तैत्तिरीयवाक्ये । तेन बृहतो वेदस्य एति ब्राह्मणस्तस्यान्नमुत्पन्नम् । तस्योपधानरूपः संस्कारो विधीयते । चरोः पूर्वमुपयुक्तत्वाभावेऽपि संस्कार्यत्वान्यथानुपपत्त्यादृष्टे स्थलनिष्पादने विनियोगः कल्प्यते । तेनोपधानमात्रविधिर्न यागः ॥

८

पात्नीवते ● ननु 'त्वाष्ट्रं पात्नीवतमालभेते'ति यागं विधाय श्रुते'पर्यग्निकृतं पात्नीवतमुत्सृजन्ती'ति वाक्ये पत्नीवत्त्वष्ट्रपेक्षया पत्नीवन्मात्रस्येन्द्रमहेन्द्रन्यायेन देवतान्तरत्वात्तत्संयोगेन वायव्यं श्वेतमितिवद् यागान्तरविधिरस्तु । एवञ्च पर्यग्निकृतं पात्नीवतमित्यव्ययवहितसम्बन्धोऽपि लभ्यते । अन्यथा व्यवहितसम्बन्धापत्तेः । न च पूर्वयागे पर्यग्निकरणमुत्सर्गस्तयोः क्रमो वा विधेयः प्राप्तत्वात् । नान्याङ्गपरिसङ्ख्या, तस्यास्त्रिदोषत्वात् । क्तप्रत्ययेन विशिष्टपशूक्तेश्च न विशेषणं पर्यग्निकरणं विधेयम् । येन गृहमेधीयाज्यभागवत्प्राकृतस्य पुनश्रुतेरपूर्वत्वं स्यात् । तेन पूर्वकर्मासंयोगिदेवतारूपगुणात्कर्मान्तरत्वमस्त्वत आह—

पर्यग्निकृतवाक्ये च त्वाष्ट्रे गुणविधिस्त्वयम् ।

नात्रोत्सृजतिनाऽपूर्वो याग उच्यते किन्तु मनोतामन्त्रस्थितेनाग्निनाऽग्नीषोमयोरिव पात्नीवतशब्देन पूर्वोपस्थितेरुत्सर्गेण प्रकृतं यागमनूद्य पर्यग्निकरणाख्यो गुणश्चोदकप्रवृत्तेः प्रागेव गृहमेधीयवद्विधीयते । न च क्तप्रत्ययेन विशिष्टपशूक्त्या न पर्यग्निकरणं विधेयमिति वाच्यम् । विशेष्यपशोः प्राप्तत्वेन विशेषणस्यैव विधेयत्वात् । पूर्वं तेन याग एव पर्यग्निकरणान्ताङ्गरीतिविधानम् । न तु यागान्तरमिति सिद्धम् ।

९

अद्रव्यत्वात् ● ननु'एष वै हविषा हविर्यजते योऽदाभ्यं गृहीत्वा सोमाय यजते परा वा एतस्यायुः प्राण एति योंऽशु गृह्णाति' इत्यनारभ्याधीतवक्यद्वये ग्रहण-

संस्कारस्य नामवैय्यर्थादंशुवाक्ये च यागाश्रवणेऽपि ग्रहणस्य यागीयद्रव्यार्थत्वाद-व्यक्तत्वेन सौमिकद्रव्यदेवताप्राप्तेरालम्भवद् ग्रहणस्यानुवादत्वात्संज्ञया याग-द्वयं विश्वजिद्वत्कल्प्यफलं विधीयत इत्यत आह--

अंश्वदाभ्यग्रहौ चापि,

नात्र यागविधिः। अंश्वदाभ्ययोः संस्कारनामत्वे बाधकाभावाद् अदाभ्यं गृहीत्वेत्यनेन व्यवधानाच्च। अंशौ तु यजिनैव श्रुतः न चातिदेशाद्रूपलाभः। तथात्वेऽतिदेशाद्रूपलाभे यागकल्पना तया चातिदेश इत्यन्योन्याश्रयात्। तेन ग्रहणनामनी एते गृह्णातिचोदनासामान्येन 'यदंशुँ गृह्णाति अदाभ्यं गृह्णाति' इति प्रकरणपठितेन वा वाक्यद्वयेन ज्योतिष्टोमसम्बन्धः। न चानारभ्याधीतवाक्य द्वयवैय्यर्थ्यम्, तस्य साप्तदश्यवदुत्पत्तिमात्रार्थत्वात्॥

१०

अग्निस्तु • ननु 'य एवं विद्वाग्निं चनुते' इत्यत्र'अग्नेः स्तोत्रमग्नेः शास्त्र'-मिति लिंगात् यद्वा 'अथातोऽग्निमग्निष्टोमेनानुयजती'ति संस्थाविधिपरे वाक्ये यदग्निं यजतीति यजिनानुवादान्मैत्रमनुगच्छति चैत्र इतिवदनुयागत्वाद्वाग्नेर्या-गत्वमस्त्वत आह--

अग्निं चिनुत इत्यपि।

न वन्हौ रूढ़स्य द्वितीयया च संस्कार्यत्वेन निर्दिष्टस्याग्नेर्लक्षणया याग-नामत्वे प्रमाणमस्ति। अग्नेः शस्त्रमिति तु अग्नि चयने निमित्ते यागस्य शस्त्रा-दिविधानाद्गौणम्। पौर्वापर्यन्तु पाकमनुभुङ्क्ते इति विजातीयेऽपि दृष्टान्तेन य एवं विद्वानित्यस्य चयनसंस्कृते स्थण्डिलेऽग्निं स्थापयेदित्यर्थेनाग्नेश्चयन संस्कारविधिपरत्वात्संस्कृतस्य चाथातोऽग्निमित्यादिवाक्यैः क्रत्वङ्गत्वावगमा-त्संस्कारमात्रविधिरेवायं न तु यागः। न चानिर्देशादेव विकृतावग्निप्राप्तेस्त-मुक्थ्येनेत्यादिविकृतौ विधानं व्यर्थमिति वाच्यम्। तस्य समानविधानार्थत्वात् तस्य च फलं गुणकामप्राप्तिरित्यन्यत्र विस्तरः। उपसंहरति--

न हि यागविधिस्त्वेषु संस्कारविधयो ह्यमी॥

११

प्रकरणान्तरे • स्थितो गुणप्रसङ्गः। इदानीमसंनिधिरूपात्प्रकरणान्त-राद्भेद उच्यते। ननु 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति' इति कौण्ड-पायिनामयनसत्रप्रकरणाधीतवाक्येनाम्नातनित्याग्निहोत्रोपस्थितेः कालस्यानु-पादेयत्वेऽपि सन्निधाविव दूरेऽपि कर्मसम्बन्धित्वेन वसन्तादिवत्कालस्त्रिशद्वर्षादि-वदशक्तस्य विधीयते। 'यद्वा दीक्षितो न जुहोती'ति निषिद्धहोमस्य मासप्रतिप्रसव-बोधकम्, यद्वा 'मासमग्निहोत्रमाराद्दर्शपूर्णमासाभ्याम्'इत्यादिषण्मासपरिमितानां षण्णां कर्मणां षण्मासपरिमितसोमयागसहितानां संवत्सरपरिमितसत्रप्रयोगवचनेन फले विधिर्भविष्यति। न चात्रानुपादेयफलसम्बन्धात्कर्मभेदः फलान्तरसम्बन्धस्या-वेष्टिवत्प्रयोगभेदेऽप्युपपत्तेः। तेनात्र न कर्मान्तरमित्याशङ्क्याह--

नित्याद्भिन्नन्तु मासाग्निहोत्रं स्यात्तदसंनिधेः ॥

न नित्ये उपसदस्तदानन्तर्यं मासश्चेत्यनेकविधानं सम्भवति, वाक्यभेदापत्तेः। नापि प्रतिप्रसवविधिः नित्यस्योपसदानन्तर्याप्राप्त्या वाक्यभेदतादवस्थ्यात्। एतेन सत्रैकदेशत्वेनापि विधिः प्रत्युक्तः। ननु माभूत्प्रकृते गुणविधिः कर्मान्तरत्वे किं प्रमाणमिति चेत्। अप्रकृताभिधानलक्षणं प्रकरणान्तरमिति ब्रूमः। यद्यप्यत्रानेकगुणोपदानत्तद्गुणादेव भेदः सिध्यति तथापि सासं दर्शपूर्णमासाभ्यां यजेतेत्यत्र तदभावात् प्रकरणान्तरादेव भेदः सिध्यति। तेन मासस्यानुपादेयत्वेन 'यदाहवनीये जुहोती'त्यादिवद्दूरस्थकर्मानुवादेन विधानायोगात्संनिध्यभावेन च वाक्यस्य कालसम्बन्धपरत्वायोगात्कर्मैव विधीयते। अत्र च नाम्नापूर्वकर्मोपस्थितावप्याख्यातेनासिद्धावस्थधात्वर्थोक्तेर्नाम्नश्च तत्पारतन्त्र्याद्धात्वर्थभेदो भावनाभेदश्चेत्येकः पक्षः। यद्वा धात्वर्थः स एव, भावनामात्रं भिन्नमिति द्वितीयः ॥

१३

फलं वा कर्मसन्निधौ ● ननु 'आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः' '**त्रैधात**व्या दीक्षणीये'त्यत्र फलस्य संस्कार्यस्य च प्रयत्नसाध्यत्वेनोपादेयत्वात्प्रकृताग्नेय फलस्य, काम्ये च त्रैधातवीये दीक्षणीयाकार्ये यजमानसंस्कारविधिरस्त्वत आह––

असन्निधौ फलं तद्वत् संस्कारश्चापि भेदकः।

फले संस्कार्ये च रागतो विध्यन्तराच्च प्रवृत्तत्वेन तयोरुपादेयत्वाभावात्कर्मासन्निधेश्च तयोर्विधिः, किन्तु कर्मान्तरम् ॥

१४

सन्निधौ ● ननु सन्निधावपि 'समे दर्शपूर्णमासाभ्यां यजेते'त्यादौ देशादीनामुद्देश्यत्वेनाविधेयत्वात्कर्मणश्च प्राप्तेर्विधानायोगात्कर्मान्तरत्वमस्त्वत आह––

सन्निधौ त्वविभागात् स्यान्न देशाद्यैस्तु भिन्नता ॥

नात्र कर्मान्तरम् किन्तु प्राप्तस्यापि कर्मणोऽप्राप्तदेशकालादिसम्बन्ध एवात्र विधीयते। तेन दर्शादिसम्बन्धार्थम् विहितविधावपि न कर्मान्तरम् ॥

१५

आग्नेयस्तु ● दर्शपूर्णमासयोः कालद्वययुक्ताग्नेयं विधाय'आग्नेयोऽष्टाकपालोऽमावास्यायां भवती'त्येककालयुक्ताग्नेयसंयुक्तं वाक्यं पुनः श्रुतम्। तदपि न कर्मान्तरं किन्त्वैन्द्राग्नस्तुत्यर्थमर्थवाद इत्याह––

न कालद्वययुग्भिन्न आग्नेयादेककालिकात् ॥

द्वितीयस्य तृतीयः पादः ॥

चतुर्थः पादः

१

यावज्जीवकोऽभ्यासः ● कर्मभेदप्रसङ्गात्प्रयोगभेद इदानीमुच्यते। ननु काम्यं दर्शादिप्रयोगं विधाय श्रुते 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेते'त्यादि वाक्ये यजतिनापूर्वकाम्यकर्मोक्तेर्यावज्जीवशब्दे च मरणावधिकालप्रतीतेस्तावति काले यागोऽभ्यासेन विना नैव सम्बद्धुं शक्यत इत्यभ्यासविधिरस्त्वत आह—

नित्यः काम्यप्रयोगात्तु भिन्नः कर्म न भिद्यते ।।

न हि यावज्जीवपदं कालवाचकम्, किन्तु लक्षणया। न च मुख्यार्थसम्भवे सा युक्ता। तेनात्र यावज्जीवशब्देन समस्तं जीवनमुच्यते। णमुला तज्जीवनं धात्वर्थसम्बन्धीत्युच्यते। 'धातुसम्बन्धे प्रत्यया' इत्यधिकारेण णमुल विधानात्। अतो णमुला जीवनयागयोः सम्बन्धावगतेस्तस्य वान्यस्यानुपपत्तेः निमित्तनैमित्तिकभाव एव सम्बन्धः। एवञ्च जीवने निमित्ते यागप्रयोगविधान्न कस्यापि लक्षणा। भवतस्तु यावज्जीवपदे काललक्षणा यजौ चाभ्यासलक्षणेति लक्षणाद्वयं स्यात्। तच्च विधौ न युक्तम्। तेन जीवने निमित्ते दर्शादेः प्रयोगः पुरुषार्थ उच्यते। नियतनिमित्तत्वाच्च तस्य नित्यत्वम्। एवं 'वसन्ते वसन्ते ज्योतिषे'त्यादावपि वीप्सावशान्नित्यत्वं द्रष्टव्यम् ।।

२

नामरूप ● ननु नानाशाखागतानामग्निहोत्रादिकर्मणां'ऐन्द्राग्नमेकादशकपालं द्वादशकपालमि'ति धर्मभेदात् काठकं तैत्तिरीयकमिति नामभेदाच्च भेदोऽस्त्वत आह—

सर्वशाखासु कर्मैक्यं न तु भेदो गुणादितः ।।

नात्र कर्मान्तरम्। द्रव्यदेवताख्यरूपस्य नाम्नः फलस्य चैकत्वावगमेन तत्प्रत्यभिज्ञानात्। स्वाध्यायविधौ उपादेयगतस्यैकत्वस्य विवक्षितत्वेन स्वस्वाध्येतृन्प्रति तत्तद्विधायकवाक्यानामेकस्मिन्नप्युपपत्तेः। विरुद्धगुणयोस्तु विकल्पः। तेन प्रवर्त्यभेदेनोपयोगान्न कर्मान्तरम्। फलन्त्वविरुद्धाङ्गानामुपसंहारः ।।

इति श्रीगुरुरामकृष्णभट्टसूरिसूनुकमलाकरभट्टात्मजानन्तभट्टकृतायां
शास्त्रार्थमालावृत्तौ
द्वितीयाध्यायस्य चतुर्थः पादः ।।
द्वितीयो भेदाध्यायस्समाप्तः
पादाः ४ अधिकरणानिः ४७

तृतीयः शेषाध्यायः

प्रथमः पादः

१

अथातः शेषलक्षणम् ● द्रव्यकर्मणां शेषशेषिभावस्य कर्मभेदानपेक्षत्वेऽपि कर्मणां शेषशेषिभावस्य तद्भेदायत्तत्वात् द्रव्यकर्मभेदात्परं शेषलक्षणमाह—

भेदाधीनन्तु शेषत्वम्,

शेषः परार्थत्वात् ● अत्र शेषस्वरूपं शेषशब्दप्रवृत्तौ हेतुश्चोच्यते। नन्वविनाभावप्रयोज्यत्वाधिकत्वविध्यन्तविहितत्वोपकारकत्वादिकमेव शेषत्वमस्तु न तु पारार्थ्यमत आह—

पारार्थ्यं शेषता मता।

नाविनाभावः शेषत्वम्, रूपस्पर्शाधानद्रव्यार्जनादिषु च व्यभिचारात्। न प्रयोज्यत्वम्, पुरोडाशकपालादावप्रयोज्येऽपि शेषत्वात्। नाधिकत्वम्, अङ्गापेक्षया प्रधानेऽप्याधिक्यात्। न विध्यन्तविहितत्वम्, विध्यादिविहितेषु शाखाच्छेदनादिष्वव्याप्तेः। नोपकारकत्वम्, तथात्वे अङ्गानां प्रधानानाञ्च परस्परोपकारकत्वेन तत्त्वापत्तेः। तेन परोद्देशप्रवृत्तत्वरूपं पारार्थ्यमेव शेषत्वम्॥

२

द्रव्यगुण ● ननु न पारार्थ्यं शेषत्वम्। किन्तु द्रव्यगुणसंस्काराणां प्रत्यक्षेणोपकारकत्वात्तदेव शेषत्वमस्तु। एवञ्च न यागः फले, फलं वा पुंसि शेष इत्याशङ्क्याह—

यागः फले फलं पुंसि द्रव्यवच्छेष इष्यते॥

नोपकारकत्वं शेषत्वम्, उक्तदोषात्। यागादेश्च विधिश्रुत्या फलभावनां प्रति करणत्वात्। फलस्य चाधानवाक्यगतात्मनेपदेन पुरुषार्थत्वात्। तेन पारार्थ्यमेव तत्॥

३

तेषामर्थेन ● इदानीं कथं शेष इति निरूप्यते। ननु दर्शपूर्णमासयोरवघातोत्पवनादिधर्माणां व्रीह्याद्यर्थत्वे वैयर्थ्यात्फलवत्परमापूर्वप्रयुक्तत्वादव्यवस्थास्त्वत आह—

व्रीह्यादाववघातादेर्व्यवस्था,

न धर्माणां परमापूर्वार्थत्वम्। उत्पत्त्यपूर्वस्याप्यज्ञातोपायत्वात् परमापूवार्थत्वेन च फलवत्त्वेन तदर्थतत्रे वैयर्थ्याभावात्। तेन दृष्टार्थत्वाय व्रीहिशब्देन तण्डुलनिष्पत्तिप्रणालिकयापूर्वसाधनत्वस्य लक्षणात्तदर्था धर्मा नाज्ये इति सिद्धा व्यवस्था ॥

४

द्रव्यं च ॰ नन्विष्टौ 'स्फ्यश्च कपालानि चे'त्याद्युक्त्वा श्रुते 'एतानि वै दश यज्ञायुधानी' ति वाक्ये आयुधशब्देन सर्वेषां यागाङ्गत्वोक्तेः पुरोडाशावरुद्धे साक्षात्तदभावेऽप्यङ्गावतारेण सकलाङ्गार्थत्वात् प्रयोगप्राशुभावार्थं येन यच्छक्यं तेन तत्कार्यम् 'स्फ्यनोद्धन्ती'त्यादिकन्त्ववयुत्यानुवादस्तेन **न** व्यवस्थेत्याशङ्क्याह—

स्फ्यादिके तथा ।

व्यवस्थेत्यनुषङ्गः। नात्र बहूनां वाक्यानां वैयर्थ्यं सम्भवति। तेन तान्येव विधायकानि। आयुधवाक्यन्तु वैशब्दाद्'यज्ञायुधानि सम्भरती'त्यनन्तरं श्रुतासादनविधिशेषत्वाच्चार्थवादः। तेनात्रापि यथा संयोगं व्यवस्था ॥

५

अर्थैकत्वे ॰ ननु 'अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाती'त्यत्रारुणा शब्देनाकृतिन्यायेन गुणमात्रोक्तेस्तस्य चामूर्त्तस्य क्रियया सम्बन्धाभावादेकहायन्या सम्बन्धे च वैय्यर्थ्यापत्तेस्तृतीयया प्रातिपदिकेन वा लक्षणया प्राकरणिकानि करणद्रव्याण्यनूद्य गुणो विधीयते। स्त्रीलिङ्गन्तु छत्रिन्यायेन जुह्वादिपरम्। तेन च न क्रये आरुण्यमित्याशङ्क्याह—

आरुण्यं क्रय एव स्यात्,

अमूर्त्तस्यापि गुणस्य एकहायनवद्गोद्रव्यपरिच्छेदद्वारा क्रयं प्रति करणत्वोपपत्तौ न लक्षणया वाक्यभेदेन च प्रकृतद्रव्ये निवेशः सम्भवति। न च योग्यताभावान्नारुण्यस्य क्रयान्वय इति वाच्यम्। अयोग्यतानिश्चयाभावस्यैव शाब्दबोधत्वावच्छिन्ने हेतुत्वेन योग्यताज्ञानस्य सर्वत्र शाब्दबुद्धौ हेतुत्वे मानाभावात्। अन्यथा यागस्य स्वर्गान्वयशाब्दबोधानुदयेनापूर्वकल्पनाया एवानुपपत्तेः। तेन यथात्र योग्यगवेषणायां यागस्य साक्षादयोग्यत्वेऽप्यपूर्वद्वारा योग्यत्वावधारणं नानुपपन्नम्, तथात्रापि गुणस्य साक्षात्क्रियान्वयायोग्यतानिश्चयाभावमात्रेण यागस्य स्वर्गार्थत्वेऽवगते यथाऽयोग्यतात्वेऽपि द्रव्यपरिच्छेदद्वारा योग्यत्वावधारणे न क्षतिः। न च क्रये अन्वयेऽपि तत्साधनेषु वासः प्रभृतिष्वपि अवधातस्य यवेष्विवान्वयः स्यादिति वाच्यम्। क्रयाणां भिन्नत्वेन गोसाधनक एव क्रये आरुण्यस्य निवेशात्। अथाप्यनेकगुणोपादानादरुणावाक्ये एव एकः क्रयः हिरण्यादीनान्त्वानत्यतिरेकार्थं तत्रैव विधिः। अन्यथा क्रयानिष्पत्तेस्तथाप्युपस्थितिलाघवात्क्रयाङ्गत्वेनावघातद्रव्याङ्गत्वाभावाच्चार्थिकः

स्ववाक्यस्थगवैवारुण्यस्यान्वयो न वाक्यान्तरस्थैर्वास आदिभिरिति सिद्धं क्रय प्रयुक्तत्वम् ।।

६

एकत्व युक्त ● ननु 'ग्रहं सम्मार्ष्टीत्यत्र' यथा 'पशुना यजेते' त्युपादेयगतमेकत्वम् विवक्षितं तद्वदुद्देश्यगतमपि विवक्षितमस्तु । यद्वा एकत्वाद्द्वित्रिग्रहनिष्ठमेकमेव कर्मकारकं द्वितीयया उच्यते । अथवा 'अर्द्धमन्तर्वेदी'तिवत्प्रातिप्रदिकैकवचनाभ्यामेकत्वविशिष्टग्रहं लक्षयित्वा तदुद्देशेन सम्मार्गविधिः वरश्चाविवक्षातो लक्षणाश्रयणम् । यद्वा अस्तु वाक्यभेदस्तथापि तस्य वाक्यदोषत्वाद्वाक्यस्य चोपजीव्यपदार्थोपस्थितिसापेक्षत्वेन तदविवक्षानुपपत्तेरेकत्वविवक्षा युक्तैव । यद्वा संख्यायाः सर्वत्र विधेयद्रव्यविशेषणत्वद्वारा कारकान्वयः । प्रकृते च ग्रहस्याविधेयत्वेन तद्द्वारा एकत्वस्य कारकान्वयायोगे सति विधेयसंमार्गद्वारा तस्य कारकान्वयो नानुपन्नः । तेन विवक्षितमेव ग्रहैक्यमत आह—

ग्रहैक्यं न विवक्षितम् ।

ग्रहमिति द्वितीयया तस्योद्देश्यत्वेन प्राधान्यात्संमार्गस्य च गुणत्वेन प्रतिप्रधानमावृत्तेर्ग्रहणाच्च निर्ज्ञातसंख्यत्वेन भूय एकत्वेन परिच्छेदाभावात्तत्वे वा वाक्यभेदापत्तेः परिसंख्यापत्तेश्चाविवक्षितमेव ग्रहैकत्वम् । न चोभयवृत्येकमेवाखण्डोपाधिरूपं कर्मत्वम् क्रियाजन्यफलाश्रयत्वरूपकर्मत्वस्याश्रयभेदे ऐक्यानुपपत्तेः । नाप्यर्द्धमन्तर्वेदोतिवद्विशिष्टे लक्षणा, तद्वदन्यतरपदवैय्यर्थ्याभावेन विशिष्टे लक्षणायोगात् । यत्र तु विशेषणसम्बन्धं विना नोद्देश्यपर्यवसानं तत्र विशिष्टस्योद्देश्यत्वम् । यथा 'अष्टवर्षं ब्राह्मणमुपनयीते'त्यत्र । तेनैकत्वमविवक्षितमेव ।।

७

संस्काराद्वा ● ननु संमार्गस्य सोमावसेकनिर्हरणप्रयोजनत्वाद्यागैक्येन च तदपूर्वैक्यादपूर्वसाधनलक्षणया व्रीहिषु श्रुतोऽवघातो यवेष्विव ग्रहेषु श्रुतः संमार्गश्चमसेष्वप्यस्तु तेन ग्रहप्रातिपदिकस्याप्यविवक्षास्त्वत आह—

ग्रहत्वस्य विवक्षा स्यात्,

अपूर्वसाधनलक्षणायामपि ग्रहयज्यभ्यासजन्यापूर्वेभ्यश्चमसाभ्यासजन्यापूर्वाणां भिन्नत्वान्न चमसानां लक्षणा । व्रीहिशब्देन यवानां लक्षणा त्वेकापूर्वसाधनत्वादिति न दोषः । तेनोद्देश्यापर्यवसानाद्ग्रहप्रातिपदिकं विवक्षितम् ।।

८

आनर्थक्यात् ● यद्यपि 'सप्तदशारत्निर्वाजपेयस्य यूपो भवती'त्यत्र सप्तदशारत्नयो यस्येति बहुव्रीहिणा यूपोक्तेस्तद्गतारत्न्युद्देशेन साप्तदश्योक्तेर्न पूर्वपक्षोत्थानं युक्तम्, तथाप्यानन्तर्येण प्रकरणेन प्रधानगामित्वेन च सप्तदशारत्नित्वस्य वा यूपाङ्गत्वात्तस्य च सोमयागत्वेन तत्र यूपाभावात्सप्तदशारत्नित्वस्य

बहुव्रीह्यर्थयूपोद्देशेन विधाने एकप्रसरताभङ्गापत्तेश्च बहुव्रीहेर्विशेष्यान्वय-बाधादवश्यं वाजपेयेन सम्बन्धो वाच्यः। तत्र च साक्षात्तत्सम्बन्धे बाधितेऽवश्यं भावी प्रधानप्रकृतानन्तरसम्बन्ध इति यूपशब्दलक्षिते तदीयोर्ध्वपात्रेऽतिदेशोऽस्तु, अन्यथा मुख्ये वाजपेयशब्दे पशुयागलक्षणा स्यात्। तस्माद्वाजपेयाङ्गमेव साप्तदश्यमत आह—

पश्वङ्गे यूप एव तु साप्तदश्यं वाजपेये ॥

देवदत्तस्य नप्तेत्यादिवत् परम्परासम्बन्धेन षष्ठ्याः वाजपेयाङ्गभूत-पशुयागाङ्गयूपसम्बन्धेनोपपत्तौ, न कस्यापि लक्षणा। तेन 'एकं साम तृचे क्रियते स्तोत्रीयमि'त्यत्र ऋग्गतं त्रित्वं स्तोत्राङ्गतयेवारत्निगतं साप्तदश्यं यूपाङ्गतया विधीयत इति यूप एव निवेशः ॥

९

कर्तृगुणे तु ● इष्टौ प्रयाजसमीपे 'अभिक्रामं जुहोती'ति श्रुतम्। अत्र भाष्ये जुहोतेः संनिहितप्रयाजपरत्वादभिक्रमणस्य चामूर्त्तस्य तत्साधनत्वायोगात् प्रयाजकर्तुस्त्वशाब्दत्वात्तदुभयसम्बन्धेऽभिक्रमणस्य बाधिते प्रकरणकर्तृद्वारा कृत्स्नप्रयोगाङ्गत्वमाशङ्क्याशाब्दस्यापि कर्तुरारुण्ये गोरिवार्थालिलङ्गादभिक्रमणे द्वारत्वात्प्रयाजकर्त्रैवान्वय इत्युक्तम्। वार्तिके तु धातुसम्बन्धविहितणमुला जुहोत्येकवाक्यतायाः स्पष्टत्वेन विच्छेदाशङ्कानुदयाज्जुहोत्येकवाक्यतामङ्गीकृत्य प्रयाजानां फलकरणत्वाभावेन इतिकर्तव्यताकाङ्क्षारूपप्रकरणाभावात्संन्निधेश्च प्रकरणाद्दुर्बलत्वान्महाप्रकरणेन सर्वार्थत्वेनाशङ्क्याङ्गनामप्यनिर्ज्ञातप्रकरणत्वेन कथम्भावाकाङ्क्षासत्वादभितः सङ्कीर्तनाच्च सन्दशाख्यावान्तरप्रकरणोद्भूतेस्त-न्मात्राङ्गत्वादभिक्रमणस्येत्युक्तं तदाह—

प्रयाजाङ्गमभिक्रमः ॥

१३

संदिग्धे तु ● ननु दर्शपूर्णमासयोः सामिधेनीर्निविदः काम्यसामिधेनी-कल्पांश्च विधाय श्रुतस्य वासोविन्यासरूपस्योपवीतस्यानन्तरं सामिधेनीनां-'तिष्ठन्नन्वाहे'त्यादिगुणोक्त्या अवान्तरप्रकरणोद्भूतेरुपवीतस्य तन्मात्राङ्गत्व-मस्त्वत आह—

उपवीतन्तु दर्शाङ्गं समिधेन्यङ्गता न तु ॥

नात्रावान्तरप्रकरणम् समिद्धाग्निप्रकाशकनिविद्भिः काम्यसामिधेनी कल्पैश्च व्यवधानात्। न च तेषामप्यवान्तरप्रकरणात्सामिधेन्यङ्गत्वमिति वाच्यम्। लिङ्गेन प्रतिष्ठाकामस्येति षष्ठीश्रुत्या च संयुक्तत्वेन तदङ्गत्वायोगात्। तेन नात्र प्रकरणानुवृत्तिः। येन यूपमन्त्रवत्परप्रकरणयागाङ्गत्वं वा स्यात्। न च निविदङ्गम्, तासामभितः सुङ्कीर्तनाभावेन प्रकरणाभावात्। तेन महाप्र-करणात्सर्वार्थमेवोपवीतम् ॥

११

गुणानां च ● अत्र भाष्यकारेणाधानप्रकरणे 'वारणो यज्ञावचरो वैकङ्कतो यज्ञावचर' इति यज्ञसंयोगेन श्रुतानां पात्राणामाधानस्य यज्ञत्वाभावादानर्थक्य-तदङ्गन्यायेन तदङ्गभूतास्विष्टिषु निवेश इत्याशङ्क्य पवमानेष्टीनां यदाहवनीये जुहोतीति प्राकरणिकवाक्येनाग्न्यर्थत्वादाधानतुल्यत्वेन चानङ्गत्वात्स्वातन्त्र्येण च प्रकरणाभावात्प्रकरणोत्कर्षेण वन्क्यात्सर्वज्ञाङ्गत्वमित्युक्तं तदाह—

सर्वयज्ञेषु पात्राणि वारणानीति भाष्यकृत् ।

वार्तिके तु वाक्यद्वये मानाभावेन सन्निध्याम्नातेन वाक्येनेष्टीनामग्न्यर्थ-त्वाभावादाधानाङ्गत्वेऽपि वाजपेयस्येतिवदाधानसम्बन्धाश्रवणेनाङ्गावतारायो-गात्प्रकरणेन वाक्यसङ्कोचायोगाच्च वाक्यबलादेव सर्वयज्ञार्थत्वं पात्राणां सिध्यतीति नैवमिदमधिकरणमिति मत्वा निविदां सामिधेन्यङ्गत्वाशङ्कानिरासार्थं सूत्रं पूर्वाधिकरणशेषत्वेनैव व्याख्यातम् ॥

१२

मिथश्चानर्थसम्बन्धः ● ननु दर्शपूर्णमासयोर्वार्त्रघ्नीवृधन्वत्संज्ञकयाज्या-नुवाक्यायुगलद्वयस्य यथासङ्ख्यपाठेनाज्यभागाङ्गत्वं प्राप्तं बाधित्वा 'वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वन्ती अमावास्यायामि'ति वाक्यद्वयेन प्रधानयागा-ङ्गतया विधिरस्त्वत आह—

वार्त्रघ्न्योश्च वृधन्वत्योर्व्यवस्था त्वाज्यभागयोः ॥

यद्यप्यत्र पौर्णमास्यमावास्याशब्दौ कर्मवचनौ स्यातां तथाप्यनुवचनस्य शब्दधर्मत्वादनुवाक्ययोश्चैकस्मिन् कर्मणि त्रिषु वा निवेशायोगादनुवाक्यान्तर-सत्त्वाच्च बाधविकल्पायोगात्सोम्ये लिङ्गविरोधादग्नीषोमीये सोमसत्त्वेऽपि समासेन व्यासज्यदेवतात्वोक्त्या केवलस्य सोमस्य देवतात्वाभावादाज्यभागक्रम-बाधे मनाभावाच्चाज्यभागाङ्गत्वेनाव्यवस्थया प्राप्तानां मन्त्राणां काले व्यवस्था-र्थमेवेदं वचनम् । तेन कालवचनावेतौ ॥

१३

आनन्तर्या ● ननु 'हस्ताववनेनिक्ते उलपराजीं स्तृणाती'ति दर्शपूर्ण-मासयोः श्रुतस्य हस्तशुध्यर्थस्यावनेजनस्य सोमे च श्रुतयोः 'मुष्टीकारोति' 'वाचं यच्छति' 'दीक्षितमावेदयती'ति मनःप्रणिधानार्थयोर्मुष्टीकरणवाग्यमयोश्चानन्त-र्यात्स्तरणावेदनाङ्गत्वमस्त्वत आह—

हस्तावनेजनं मुष्टीकरणं सर्वकर्मयुक् ।

नात्रानन्तर्यादङ्गत्वम् । बुद्धेरैकाग्र्यस्य च लिङ्गेन प्रकरणेन च क्रमबाधेन सर्वार्थत्वावगतेः । तेन कर्तृसंस्कारद्वारा सर्वार्थत्वमेव ॥

१४

शेषस्तु ● ननु 'आग्नेयं चतुर्धा करोती'त्यत्राग्नेयपदे चतुर्धाकरणस्य यागा-

भावेन देवातातद्धितायोगादग्नीषोमीयैन्द्राग्नयोरप्यग्निसम्बन्धेनाग्नेयत्वाच्चतुर्धाकरणमस्त्वत आह—

चतुर्धाकरणन्त्वाग्नेयस्यैव हविषः स्मृतम् ।

न ह्यत्राग्नेयो विधेयः किन्तूद्देश्यः, स च प्राप्त्यधीनः । प्राप्तिश्च देवतात्वेनैव न सम्बन्धमात्रेण सामान्येन व्यवहारायोगात् । एवं सति यदि केवलाग्नेयो न स्यात्ततः सम्बन्धमात्रे स स्यात् । तेन ग्रहवदुद्देश्यस्य विवक्षितत्वान्न चमसवत् द्विदेवत्योपलक्षणमिति तस्यैव चतुर्धाकरणम् । यदपि तं चतुर्धा कृत्वेति सामान्यवाक्यम् तदप्यनेन विशेषेणोपसंह्रियत इति न द्विदेवत्यानां चतुर्धाकरणम् इति ।

तृतीयस्य प्रथमः पादः ।।

द्वितीयः पादः

१

अर्थाभिधान • इह मन्त्राधिकरणसिद्धं लिङ्गस्य विनियोजकत्वमुपजीव्य विनियोगप्रकारश्चिन्त्यते । नन्वनेन मन्त्रेण यच्छक्नुयात्तदभिदध्यादिति गौणमुख्यसाधारणश्रुत्यनुमानादर्थयोः प्राधान्येन च मन्त्राणां प्रतिप्राधानमावृतेर्युक्तत्वान्मुख्य इव गौणेऽप्यर्थे विनियोगोऽस्त्वत आह—

मन्त्राणां मुख्य एवार्थो न गौणः,

उभयत्र विनियोगः किं विकल्पेन समुच्चयेन वा ? नाद्यः,मुख्यस्यानित्यत्वापत्या पक्षे मुख्यवैय्यर्थ्यादिष्टदोषादिकञ्च स्यात् । नान्त्यः, स्वार्थं मुक्त्वा तत्र विनियोगेनमन्त्र तदध्ययनविधिप्रकरणिनां नैराकाङ्क्ष्ये गौणार्थत्वायोगात् । तेन मुख्ये सति गौणो नैव प्रतीयते । अतएव गौणाप्रतीतेः पूषादिमन्त्राणां लिङ्गादुत्कर्षः सौर्यादावग्निपदबाधादूहश्च सङ्गच्छते ।।

२

वचनात्व • ननु चयने 'ऐन्द्र्या गार्हपत्यमुपतिष्ठत' इत्यत्र गार्हपत्यपदेन गृहपतेरयमिति व्युत्पत्या यज्ञसाधनत्वसाम्येन इन्द्रोक्तेस्तदर्थत्वे तद्धितश्रुतेरानुगुण्याद्गार्हपत्यार्थत्वे अयोग्यतानिश्चयस्य प्रतिबन्धकत्वाच्च तस्मिन्नेव मुख्ये मन्त्रस्य विनियोगोऽस्तु । यद्वा द्वितीयया सक्तूनितिवत्कारकान्तरसप्तम्यर्थं सामीप्य लक्षणया गार्हपत्यसमीपे स्थित्वा इन्द्रं प्रकाशयेदित्यस्त्वत आह —

वचनात्तु सः ।

गौण्यर्थ इत्यर्थः । नात्रेन्द्रार्थत्वम् । तथात्वे लिङ्गादेव मन्त्रस्य तदर्थत्वसिद्धेर्विधिवैय्यर्थ्यं स्यात् । न च तद्धितश्रुतिविरोधः । देवतात्वे शक्त्या तया इन्द्रार्थ-

त्वावगमेऽपि तदुत्तरभाविन्या गार्हपत्यमिति कारकश्रुत्या पूर्वबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यतीति न्यायेन गार्हपत्यार्थत्वबोधनात्। न च योग्यताभावाद्गार्हपत्यार्थत्वबाधः। शाब्दबोधे अयोग्यतानिश्चयाभावस्यैव हेतुत्वेन योग्यताज्ञानस्य हेतुत्वे मानाभावात्। तेन ऐन्द्र्येति वाक्यसहितया तृतीयाश्रुत्या गार्हपत्ये विनियोगाद्विधिमन्त्रविरोधे च मन्त्रस्य प्राप्तानुवादत्वाच्चरमप्रतीतेश्च गौणत्वस्यैवोचितत्वादैश्वर्ययोगेनेन्द्रपदस्य गार्हपत्ये सम्भवाच्च तदर्थत्वमेव युक्तम्। न च समीपस्थितौ अन्वयः तस्या हि आत्मनेपदाभिहितार्थाभिधाने गुणत्वेन तत्रान्वयाभावात्। तेन श्रुतिबलाद्गौणे गर्हपत्य एव विनियोगः। अत्राग्न्यर्थत्वे सिद्धे इन्द्रेऽप्यस्ति विनियोगो न वेत्येतद्बलाबलाधिकरणविषयः॥

३

तथाह्वान ● नन्विष्टौ 'हविष्कृदेहीति त्रिरवघ्नन्नाह्वयती'त्यत्र हविष्कृदिति सम्बुध्याह्वानाङ्गत्वस्य लिङ्गात्प्राप्तत्वेन वचनवैय्यर्थ्यादन्यथावघ्नन्निति विधौ काललक्षणापत्तेस्त्रित्वस्य च शाखान्तरे त्रिः पाठेनानुवादत्वादाह्वयतेश्च एहीति मन्त्रलिङ्गानुवादित्वाद्गौणेऽवघात एव मन्त्रस्य विनियोगोऽस्त्वत आह—

गौणेऽवघातो नाङ्गन्तु हविष्कृन्मन्त्र इष्यते।

न मन्त्रोऽवघाताङ्गम्। नानाशाखासु मन्त्रस्य सकृद्द्विस्त्रिर्वा पाठेन त्रित्वस्य नियमेनाप्राप्तेस्तस्यैवात्र विधेयत्वात् तत्र च लिङ्गान्मन्त्रस्यावघातकालस्य तस्मिन्काले सहायाह्वानस्य च प्राप्तेर्नैषां विधिः। तेनात्र त्रित्वमात्रविधेः श्रौतविनियोगाभावाच्च न लिङ्गबाधः। किन्तु लिङ्गादाह्वान एव विनियोगः॥

४

तथोत्थानम् ● ननु 'व्रतं कृणुतेति वाचं विसृजते' 'उत्तिष्ठन्नन्वाहाग्नीदग्नीन्विहर' इत्यत्र पूर्ववद्वाक्यभेदाभावाद्वाग्विसर्गे उत्थाने चाङ्गत्वमस्त्वत आह—

व्रतं कृणुत नाग्नीदित्येतयोर्वाग्विसर्जने। उत्थाने चाङ्गता,

नात्र मन्त्रयोर्वाग्विसर्गाद्यङ्गत्वम्। मन्त्रलिङ्गविरोधाच्छ्रुतिविनियोगाभावाच्च। तेनात्रापि कालार्थ एव संयोगः। कालस्त्विह नानूद्यते किन्तु विधीयत इत्येतावान्विशेषः॥

५

सूक्तवाके च ● ननु 'सूक्तवाकेन प्रस्तरं प्रहरति' इत्यत्र सूक्तवाकस्येष्टदेवताप्रकाशनेन प्रहरणस्य च प्रस्तरप्रतिपत्त्या निराकाङ्क्षस्याङ्गाङ्गित्वायोगाद्दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यादिवत्कालार्थ एव संयोगोऽस्त्वत आह—

सेष्टा सूक्तवाकप्रहरयोः।

अत्राङ्गता इष्टैवेत्यर्थः। तृतीयाश्रुत्या मन्त्रस्य प्रहरणे अङ्गत्वावगमात्तत्र

च क्रियातत्सम्बन्धिप्रकाशकत्वाभावेऽपि श्रुतिविनियोगान्यथानुपपत्त्या एतत्प्रकाश्यस्य फलदेवतादेः क्रियासम्बन्धकल्पनात्। तेन प्रहरतिर्यागलक्षकः। चतुर्थं तु हरतौ साहित्यं न तु याग इति वक्ष्यते ॥

६

कृत्स्नोपदेशादुभयत्र ● ननु सूक्तवाकशब्दस्याध्येतॄणां सम्पूर्णेऽनुवाके प्रसिद्धेः सकलस्यैव पौर्णमास्याममावास्यायाञ्च प्रयोगोऽस्त्वत आह—

सूक्तवाकस्य लिङ्गात्तु विभागः पर्वणोर्द्वयोः।

न सर्वस्योभयत्र विनियोगः। अवयवव्युत्पत्त्या सूक्तवाकशब्दस्येष्टदेवताप्रकाशकमन्त्रवाचित्वेनानिष्टानुकीर्तने दुरुक्तवाकतापत्तेः। तेन द्रष्टार्थत्वायलिङ्गेन विभज्य विनियोगः ॥

७

लिङ्गक्रमसमाख्यानात् ● ननु काम्येष्टिकाण्डक्रमे 'इन्द्राग्नी रोचनादिव' इत्यादिकाम्ययाज्यानुवाक्याकाण्डमिति समाख्यातस्य मन्त्रकाण्डस्य यत्र यत्रेन्द्राग्न्यादिदेवतास्तत्र तत्र क्रमसमाख्ये बाधित्वा लिङ्गाद्विनियोगोऽस्त्वत आह—

काम्ययाज्यानुवाक्यानामैन्द्राग्न्याद्यङ्गता क्रमात् ॥

न लिङ्गात् सर्वत्रविनियोगः। सामान्यसम्बन्धकारिप्रमाणं विना लिङ्गमात्रस्याविनियोजकत्वात्। देवतास्वरूपे वैय्यर्थ्याच्च। तेन सामान्यतः क्रतुसम्बन्धप्रमाणेन तत्सम्बन्धे सिद्धे लिङ्गाद्द्वारविशेष एव विनियोग इति याज्यादेः काम्येष्टिष्वेव निवेशः। यत्र त्वेकान्तस्तत्र लिङ्गमात्रादपि विनियोगः। यथाध्ययनजन्यस्यार्थज्ञानस्य लिङ्गात्सर्वार्थत्वम् ॥

८

अधिकारे च ● इदानीं प्रसङ्गाच्छ्रुतेरपि सामान्यसम्बन्धकारि प्रमाणापेक्षत्वमुच्यते। नन्वा'ग्नेय्याग्नीध्रमुपतिष्ठत' इत्यत्र पशुनेत्यादिवदाग्नेय्या उपादेयत्वेन प्रकृतग्रहणे मानाभावात्प्रकृतानाञ्चान्यार्थत्वात् पुरोडाशकपालवत्परप्रयुक्तग्रहणाभावाच्च या काचिद्दाशतयीस्थाग्नेय्यस्त्वत आह—

आग्नीध्रादेरुपस्थाने त्वाग्नेयी प्रकृता भवेत्।

आदिपदात् ऐन्द्र इत्यादि गृह्यते। नात्राप्राकृतग्रहणं प्रकृतानां प्रकरणेन क्रतुसम्बन्धस्य सिद्धत्वेन द्वारविशेषमात्रविधौ लाघवात्। न च प्रकृतानां विनियुक्तत्वान्न ग्रहणमिति वाच्यम्। अप्राकृतानामपि वाचस्तोमे विनियोगात्। तेन प्रकृतग्रहणे लाघवात्ता एव ग्राह्याः ॥

९

लिङ्गसमाख्याभ्यां ● इह लिङ्गमचोदितेऽर्थाक्षिप्तेऽप्यनुष्ठेयेऽर्थे विनियोजकं नवेति चिन्त्यते। ननु ग्रहणावेक्षणभक्षणसम्यग्जरणप्रकाशकानां

'भक्षेहि माविशे'त्यादि भक्षानुवाकभागानामविहिताङ्गभूतग्रहणाद्यर्थत्वेऽपूर्वार्थत्वाभावात्स्वरूपार्थत्वे तु वैय्यर्थ्यादन्यथा सवित्रादावतिप्रसङ्गात् ग्रहणाद्यै-र्विनापि भक्षसम्भवे तेषां नित्यमप्राप्त्या नित्यानित्ययोगविरोधाच्च न ग्रहणादि-प्रकाशकत्वम् किन्तु सवित्रादिवदेव स्तुत्यर्थत्वेन विशिष्टभक्षप्रकाशकत्वमस्त्वत आह—

भक्षानुवाकभागानां ग्रहणाद्यङ्गता पृथक् ।

नात्र क्लृप्तसामर्थ्यैः मन्त्रैः प्राधान्येन ग्रहणादिप्रकाशने सम्भवति लक्षणया भक्षप्रकाशकत्वं सम्भवति । न च तेषामविहितत्वम्, श्रुतार्थापत्तिकल्पितविधिना तेषां विधानात् । न च सवित्रादितुल्यत्वम् ग्रहणादेः श्रुतभक्षाङ्गत्वेनानुष्ठेयत्वात्तत्र साक्षादनुष्ठेयत्वाभावात् । नापि नित्यानित्यसंयोगविरोधः । छागविशिष्टवपा प्रकाशनात् छागनियमवद्विशिष्टभक्षप्रकाशने ग्रहणनियमकल्पनात् । तेन मन्त्र-प्रकाशनवैय्यर्थ्यात् सौर्यादौ यागस्येव तत्तद्विधीनां कल्पनाद् वाक्यभेदेन तत्त-दर्थत्वमेव युक्तम् ॥

१०

गुणाभि ● ननु ग्रहणादिवत्तृप्तेरपि बहुपानादियत्नसाध्यत्वाद्भक्ष-फलत्वेऽपि स्वर्गवत्प्रोत्साहनेनाङ्गत्वात्तृप्यत्विवत्यन्तस्य तृप्तौ विनियोगोऽस्त्वित्या-शङ्क्याह—

तृप्तौ नाङ्गन्तु मन्द्राभिभूतिरित्यादिको मतः ।

नात्र तृप्तिः फलम् । भक्षप्रतिपत्तौ तदभावात् । अल्पं भक्षयतीति बहुपान तृप्तिनिषेधात् । नापि भिन्नप्रयत्नसाध्या, येनानुष्ठेयत्वान्मन्त्रग्राहिका स्यात् । तेन न तत्र विनियोगः किन्तु विशिष्टे भक्षे ॥

११

लिङ्गविशेषः ● तस्मिन्नेव भक्षमन्त्रे इन्द्रपीतस्येत्यस्य बहुव्रीहिणा सवनवाचित्वस्य स्वार्थहानापत्त्याऽन्याय्यत्वादन्यपदार्थप्रधानतत्पुरुषाङ्गीकारेण ऐन्द्रभक्षण एव विनियोगोऽवश्यं वाच्यः । तत्रश्चैकस्मिन् कर्मणि प्रकृतिविकारा-भात्रेनोहायोगादनैन्द्राणाममन्त्रकं भक्षणमित्याशङ्क्य प्रदानभेदादैन्द्रे बहु-धर्माभ्नाच्चांशतः प्रकृतिविकृतिभावादूहं परमतेनाह । इन्द्रपीतस्येति मन्त्रो-ऽनैन्द्रेषूह्य इतीतरे । उहे निरस्ते तद्विशेषविचारायोगात्सिद्धान्तं त्रिनैव मध्ये-पञ्च कृत्वाचिन्ता आह—

तदा कृत्वापञ्च चिन्ताः ।

१२

पुनरभ्युन्नीतेषु ● मैत्रावरुणादीनां चमसेषु इन्द्राय सशेषेषु हुतेषु पुन-रभ्युन्नीय मित्रावरुणादिभ्यो हुत्वा भक्ष्यमाणेषु संदेहः किं पाने पूर्वदेवतोपलक्ष्या

नेति । तत्र प्रदानकाले पूर्वशेषस्यापि स्विष्टकृद्वद्देवतान्तरायत्तत्यागात्तस्य चाभ्युदयेष्टिवत्पूर्वदेवतापनयं विनाऽनुपपत्तेर्नयने पूर्वदेवतोपलक्षणमित्याशङ्क्याह सशेषेषु हुतेष्वपि इन्द्रश्च मित्रावरुणौ वाच्यौ, शास्तुः नात्रैकपात्रस्थत्वमात्रेण पूर्वशेषस्यापि देवतान्तरसम्बन्धः। किन्तु उन्नयनस्य करिष्यमाणयागार्थत्वेन दृष्टार्थत्वादुन्नीतस्यैव सः। तेनैकपात्रस्थत्वेऽपि बुध्या विवेकेन उन्नीतमात्रस्यैव देवतान्तरसम्बन्धादिन्द्रमित्रावरुणपीतस्येत्येवं वाच्यम् ॥

१३

पात्नीवते ● द्विदेवत्यानामैन्द्रवायवादीनां शेषा आदित्यस्थालीतः आग्रयणस्थाल्यां समायान्ति। पात्नोवतश्चाग्रयणात् गृह्यते। तदत्र पात्नीवन्तमाग्रयणाद्गृह्णातीत्यत्राग्रयणपदेन तस्यैव देवतायोगात्प्राग्वत्पूर्वेषां सम्बन्धानपायात्तेषामप्युपलक्षणमस्त्वत आह—

तथोत्तरे पात्नीवते ।

द्विदेवास्तु इन्द्रवाय्वादयः। न च नात्र पूर्वोपलक्षणम्। आग्रयणादित्यपादानत्वश्रवणेन तस्माच्च्युतस्य सर्वस्यापि देवतान्तरसम्बन्धात्। न च भूतपूर्वगत्या उपलक्षणम्। प्रकृतौ तथाऽकृतत्वात् तेन पत्नीवान् वोपलक्षयितव्यः ॥

१४

त्वष्टारम् ● तस्मिन्नेव ग्रहे 'अध्वर्यो अग्नाई पत्नीवां' इति होममन्त्रे 'त्वष्ट्रा सोमं पिब स्वाहे'त्युक्तम्। तत्र त्वष्टुः सह पानेन देवतात्वाद्विधिगतस्य च पत्नीवत अग्निनेव त्वष्टृपरत्वाविरोधात् उभयोरुपलक्षणमस्त्वत आह—

त्वष्टुः ,

नात्र त्वष्टा पत्नीवान् देवता। मन्त्र अग्ने पत्नीवन्निति सामानाधिकरण्येन तस्यैव पत्नीवत्वात्। त्वष्टुस्तु सहभावमात्रम्। तेन त्वष्टा नोपलक्षणीयः ॥

१५

त्रिंशश्च ● ननु तस्मिन्नेव पात्नीवते 'एभिरग्न' इत्यादि होतृमन्त्रे 'पत्नीवतस्त्रिशतं त्रींश्च देवानि'ति श्रुतम्। तत्र सामानाधिकरण्यादाध्वर्यवमन्त्रेऽग्नेरिव पत्नीवतस्त्रिशतस्त्रींश्च देवानिति सामानाधिकरण्येन पत्नीवतां देवतात्वात्तदनुरोधेन च विधौ पत्नीवांश्च पत्नीवांश्च इत्येकशेषं कृत्वा देवता अस्येति तन्त्रेण सर्वेषां पत्नीवतां देवताविधावुपादेयगतस्य साहित्यस्य विवक्षितत्वादग्नेस्तेषां च समुच्चितं देवतात्वमस्त्वत आह—

त्रयस्त्रिशतां न ॥

देवतात्वमित्यर्थः। पूर्वार्धं एभिस्सहायाहीति त्वष्टुस्तेषामप्राधान्यात्। न चाग्नेरन्यदीयेन द्रव्येणान्यमादनं सम्भवति। अनिश्चितत्वात्। तेनाग्नेरेव देवतात्वात्तदनुरोधेन चैकवचनविग्रहात्तस्यैवोपलक्षणं न त्रयस्त्रिशद्देवानाम् ॥

१६

वषट्कारश्च ● 'सोमस्याग्ने वीही'ति मन्त्रवर्णादनुवषट्कारदेवताया अग्नेर्देवतात्वात्तस्याप्युपलक्षणमस्त्वत आह—

देवेऽप्यनुवषट्कृतेः ।

नोपलक्षयितव्य इति शेषः। ऐन्द्रप्रदाने तस्यानुपलक्षणात्। तेनात्राप्यप्राकृतकार्यत्वापत्तेर्नोपलक्षणम् ॥

१७

छन्दः प्रतिषेधस्तु ● एवमूहे पञ्च कृत्वाचिन्ता उक्ताः। कर्मणामेकत्वेन प्रदानानां समानविधानत्वात् प्रकृतिविकाराभावेन ऊहाभावादनैन्द्राणाममन्त्रकं भक्षणमिति प्रथमपक्ष एव स्थितमधिकरणम् तदाह—

अनैन्द्राणाममन्त्रत्वमुक्तमिति ।

एवं स्थिते पुनः कृत्वा चिन्ता ।

१८

ऐन्द्राग्ने ● ननु यदाप्यनैन्द्राणाममन्त्रकं भक्षणम् तदाप्यैन्द्राग्ने इन्द्रपीतस्ये तद्वक्तव्यं उभाभ्यां पीतस्येन्द्रेणापि पानादित्याशङ्क्याह —

ऐन्द्राग्नेऽप्यमन्त्रता ।

नवमनीत्या देवतायाः पानाभावात् पिबतिरत्र दानलक्षणार्थः। तेन मिश्रोद्देशेन व्यक्तस्यैकेन व्यपदेशायोगादाग्नेयवन्नैरपेक्ष्याभावेन च समासायोगादनैन्द्राणाममन्त्रकं भक्षणम् ॥

१९

छन्दश्च ● ननु तस्मिन्नेव मन्त्रे 'गायत्रच्छन्दस इन्द्रपीतस्ये'त्यस्यैन्द्राग्ने इवान्यच्छन्दः पक्षे प्राकृते प्रदाने गायत्रेण व्यपदेशसमासायोगात् केवलं तच्छन्दस्कप्रदानपरत्वमस्त्वत आह—

छन्दोऽन्तरेऽपि गायत्रच्छन्दसा स्यात्तथैव तु ।

सर्वत्र छन्दोन्तरसत्वेन केवलगायत्रच्छन्दस्कप्रदानाभावान्नित्यसापेक्षत्वेऽपि समासाविघातादन्यत्रापि भवत्येव मन्त्रः ॥

सर्वेषां सिद्धान्ते सवनार्थत्वादनैन्द्रेऽपीन्द्रपीतगीः ।

नेन्द्रपीतस्येत्यत्र तत्पुरुषः। लक्षणाबाहुल्यापत्तेः। तथा हि देवतायाः पानाभावात्पीतपदे दानलक्षणैका। भक्षकाले च हुतशेषस्येन्द्राय दानाभावात् तेन हुताहुतरूपा च लक्षणा द्वितीया। तादृशस्य च भक्षाभावात्तेनाहुतः शेषोऽवयवो भूतपूर्वगत्याऽऽक्षिप्येतेति तृतीया। भक्षयतेश्च सकर्मकत्वात् षष्ठ्या इन्द्रपीतं भक्षयामीति कर्मत्वलक्षणा चतुर्थी। यद्वा ते अवयवं भक्षयामीत्यत्रय-

लक्षणा वा। तद्वरं बहुव्रीहावन्यपदार्थस्य सवनस्य प्राधान्येऽपि समासस्यान्यपदार्थे शक्तेः गायत्रच्छन्दस इन्द्रपीतस्येति सामानाधिकरण्याच्चेन्द्रेण पीतं यस्मिन् सवन इति बहुव्रीहिणा सवनवाचित्वम्, तेन सवनसम्बन्धित्वस्यैन्द्रानैन्द्रयोस्तुल्यत्वाद्यथाम्नात एव सर्वत्र मन्त्रः ॥

द्वितीयस्य तृतीयः पादः ॥

चतुर्थः पादः ॥

१

श्रुतेर्जाताधिकारः स्यात् ● 'प्रजापतिरकामयते'त्याद्युक्त्वा 'अग्नेः ऋग्वेद' इत्यादिना वेदानुपक्रम्य श्रुतम् 'उच्चैः ऋचा क्रियते उपांशु यजुषा उच्चैस्साम्ने'ति। तत्र विधौ प्रधाने लक्षणायोगाद्भिन्नार्थकत्वाच्च द्वयोराञ्जस्येनैकवाक्यत्वाभावाद्विधेर्विशेषपरत्वेन चाञ्जनविधिवत्सन्दिग्धत्वाभावादवश्यं कस्यचिद्बाधे विधेः प्राधान्यादङ्गगुणविरोधन्यायेन विधिनार्थवादबाधाद्यथा दीक्षणीयादीनां मुख्यत्वेऽपि न पर्वकालानुग्रहस्तथात्रोच्चैष्ट्वादीनां वेदधर्मत्वमित्याशङ्क्याह—

उपक्रमाद्वेदधर्मा उच्चैष्ट्वाद्या ऋचां न तु।

न ह्यङ्गत्वमात्रेणार्थवादस्य बाधः किन्तु विरोधात्। न च पूर्वत्र प्रतिपक्षं विना विरोधबुद्धिर्भवति। तेनोपक्रमे वेदानां किञ्चिद्विधेयमित्यवगमात्तस्य वान्यतोऽनवगतस्य विधिना विशेषमात्रसमर्पणात् पूर्वोपजीवको विधिस्तदनुरोधेनैवात्मानं लभते इति सिद्धमुपक्रमप्राबल्यम्। न चोद्गातृप्रतिहर्त्रोः क्रमेणापच्छेद इवात्राप्युपसंहारप्राबल्यमिति वाच्यम्। तत्र विधिद्वयस्य निरपेक्षत्वादत्र चैकवाक्यत्वेन सापेक्षत्वात्। तदुक्तम्—

> पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्।
> अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेदिति।
> विशेषस्तु वार्तिकादावनुसन्धेयः॥

२

गुणमुख्यः ● अत्र भाष्ये याजुर्वैदिकस्याधानस्य यत्र सामवेदे वारवन्तीयाद्यङ्गविधिस्तत्र प्रधानविधिस्वरस्य प्रधानैकवाक्यतापेक्षित्वेन विलम्बितत्वाद्यत्राङ्गविधिस्तद्वेदनिबन्धन एव उच्चैः स्वरस्स्यादित्याशङ्क्य विधेस्त्वेकश्रुतित्वादित्यनेन न्यायेन प्रयोगविधिना सन्निकर्षविप्रकर्षावनादृत्य वेदान्तरीयाणामपि युगपद्विधानात्प्रधानविधिनिबन्धन एव उपांशुस्वर इत्युक्तम् तदाह—

वेदान्तरगतेऽङ्गन्तु मुख्यवेदसधर्मता॥

वार्तिके तु एवं सत्यङ्गगुणविरोधे चेत्यनेन सिद्धेरुदाहरणस्यापि 'वार-

वन्तीयं गायती'त्यङ्गविधेर्याजुर्वेदिकत्वान्नैवमिदमित्यन्यथा व्याख्यातम्। यस्य मन्त्रस्य वेदान्तरे उत्पत्तिः पाठः, वेदान्तरे च विनियोगः तत्रोत्पत्तेः प्रथमत्वात्तन्निबन्धन एव स्वर इत्याशङ्क्य पाठमात्रेऽङ्गानां प्रयोज्यत्वाभावेन स्वरानपेक्षणाद्यत्रानुष्ठेयत्वं तत्रैव स्वरापेक्षा। तच्च प्रधानविध्यधीनमिति तन्निबन्धन एव स्वर इत्युक्तम्॥

३

भूयस्त्वेनम् ● ननु नानावेदोक्तज्योतिष्टोमस्य यत्र विधिस्तदीय एव स्वरस्ततश्च विध्यनिश्चयात्स्वरविकल्पोऽस्त्वत आह--

अङ्गाधिक्यं यत्र वेदे तत्र कर्मविधिर्भवेत्।

नात्र विध्यनियमः। किन्तु यजुर्वेदे कर्मविधानयोग्यद्रव्यदेवताद्यङ्गानां भूयस्त्वात्तत्रैव कर्मविधिः। वस्तुतस्तु वाचनिकस्वराक्रान्ते ज्योतिष्टोमे वेदस्वरस्यानिवेशादृग्यजुर्वेदोक्तमग्निहोत्रमत्रोदाहरणं द्रष्टव्यम्॥

४

असंयुक्तम् ● इदानीं प्रकरणाद्विनियोग उच्यते। ननु प्रयाजादीनां श्रुत्यादित्रयेण वियोगात्करणत्वावच्छेदेनानुग्रहापेक्षायाश्च संयोगविभागकरणे कर्मणि व्यभिचाराद्विश्वजिदादिन्यायेन कल्प्यं फलम् आर्थवादिकं वा स्वर्गकामपदानुषङ्गेण वा फलमस्तु न तु प्रकरणादङ्गत्वमित्याशङ्क्याह—

प्रक्रियातः प्रयाजादेः,

अङ्गत्वमित्यर्थः। यागेन फलं कुर्यादित्युक्तेऽनिर्ज्ञातप्रकारत्वाद् भावनायाः कथं कुर्यादित्यस्ति प्रकारविशेषाकाङ्क्षा। प्रयाजानाञ्च भाव्यापेक्षा। तत्राश्रुतभाव्यकल्पनातः क्रत्वेकवाक्यताकल्पने तादर्थ्यमेव लघु। तेन यथा भावनायां फलसाधनञ्च सामान्यत आक्षिप्तं स्वर्गयागाभ्यां विशेषाभ्यां पूर्यते। तथा प्रकारोऽपि तया सामान्यत आक्षिप्तः प्रयाजावघाताद्यैर्विशेषैः पूर्यत इति सिद्धं प्रयाजादीनां दर्शाङ्गत्वम्॥

५

क्रमश्च ● दब्धिरसीत्यादेरुपांशुयाजाङ्गत्वे क्रमो मानमित्याह--

क्रमाद्दब्ध्यादिकस्य च।

अङ्गत्वमित्यर्थः। न च दब्धिमन्त्रस्यास्पष्टलिङ्गत्वात्क्रमबाधेन प्रकरणात्सर्वार्थत्वे प्रतिप्रधानावृत्तिन्यायात् प्रत्येकमेवाग्नेयाद्यङ्गत्वं स्यादिति वाच्यम्। लिङ्गान्मन्त्रान्तरैराग्नेयादेर्नैराकाङ्क्ष्येण तदर्थत्वे उभयाकाङ्क्षारूपप्रकरणाभावात्। तेन स्थानादुपांशुयाजाङ्गत्वमेव। स क्रमः पाठानुष्ठान सादेश्यात्। पाठोऽपि यथासङ्ख्यं सन्निधौ चेति द्वेधा। आद्यं दब्धिमन्त्रे कामेष्टिषु च।

सन्निधिपाठाच्छुन्धध्वमित्यस्य सान्नय्यपात्रशुन्धनाङ्गत्वम्। अनुष्ठानसादेश्यात्पशुधर्माणामग्नीषोमीयाङ्गत्वम् ।।

६

आख्या चैवम् • आध्वर्यवमित्यादियौगिकशब्दरूपासम्बन्धनिमित्ता समाख्यापि क्रमादिकल्पनयाध्वर्य्वादीनामङ्गत्वे मानम्। न चास्याः श्रुतितुल्यत्वम्। यौगिकेषु सम्बन्धस्य वाच्यत्वाभावेन तद्वत्सम्बन्धाबोधात्। तेन यौगिकेषु द्रव्यमात्रस्य वाच्यत्वेन सम्बन्धस्यावाच्यत्वात्तं कल्पयित्वा क्रमादि श्रुत्यन्तकल्पनेत्यर्थादङ्गत्वे समानमित्याह--

समाख्ययाध्वर्युहोतृकर्त्रादेरङ्गता मता ।।

७

श्रुतिलिङ्ग • श्रुत्यादिविनियोगोत्तरं वद्बलाबलचिन्तामाह--

श्रुतिर्लिङ्गञ्च वाक्यञ्च प्रक्रिया स्थानमेव च।
समाख्याशेषमानानि दुर्बलन्तु परंपरम् ।।

तत्रादौ श्रुतिलिङ्गयोर्विरोधे उच्यते। नन्वैन्द्र्याः श्रुत्या गार्हपत्यार्थत्वेऽपि लिङ्गान्मुख्येन्द्रार्थत्वमपि विकल्पेन समुच्चयेन वाऽस्त्विति चेत्, न प्रत्यक्षश्रुत्या-मन्त्रस्य विनियोगेनाकाङ्क्षोच्छेदे सति श्रुतिविकल्पनयेन्द्रार्थत्वायोगात्। न च श्रुत्यैन्द्रीगार्हपत्ययोः शेषशेषित्वमात्रोक्त्या ऐन्द्रीविषयकं गार्हपत्यस्य शेषित्वमित्येतस्य वाक्यगम्यत्वाद्वाक्यलिङ्गयोरेवायं विरोधो न श्रुतिलिङ्गयोरिति वाच्यम्। तथात्वे लिङ्गेन वाक्यबाधे सति पृथग्भूतयोः गार्हपत्यैन्द्रीपदयोरप्रामाण्यं स्यात्। किञ्च गार्हपत्यपदस्येन्द्रलक्षकत्वे द्वितीयाया वा सप्तम्यर्थलक्षकत्वे श्रुतेरेव बाधो न वाक्यस्य। तेनात्र वाक्यसहितश्रुतिविरोधेऽपि प्राधान्याद्-द्वितीयाश्रुतिप्राबल्ये लिङ्गस्यैव बाधाच्च श्रुतिलिङ्गयोरेवायं विरोधः। लिङ्गवाक्यविरोधस्तु तत्र यत्र पृथग्भूतयोरप्यर्थप्रतिपादकत्वं न विरुध्यते। यथा स्योनादौ। तेन सिद्धं श्रुतिलिङ्गविरोधे श्रुतेः प्राबल्यम्। लिङ्गवाक्यविरोधे 'स्योनन्ते' 'तस्मिन् सीदे'त्यत्र वाक्यभेदेऽदृष्टद्वयापत्तेर्यत्तच्छदयोरेकवाक्यत्वेन सम्पूर्णस्य सदने वा स्थापने वा वाक्याद्विनियोगः। लिङ्गात्तु विभज्य विनियोगः। लिङ्गाच्छ्रुतिं कल्पयित्वा विनियोग इति सन्निकर्षः। वाक्ये तु स्योनादेः स्थापनैकवाक्यतया विशेषणविशेष्यभावेन सामर्थ्यं प्रकल्प्य श्रुतिं कल्पयित्वा विनियोग इति विप्रकर्षः ।।

वाक्यप्रकरणयोः विरोधे सूक्तवाके देवतापदानां लिङ्गाद्व्यवस्थया उत्कर्षे स्थिते तत्समभिव्याहृतानाम् 'इदं हविरि'त्यादीनां समभिव्याहारेण तद्देवताया एव विशिष्टाभिधाने विनियोगाद्वाक्यवशेनोत्कर्ष एव युक्तः। ननु प्रकरणादग्नीषोमादि पदयोगेनोभयत्र विनियोगः वाक्ये ह्येकार्थपरत्वाच्छब्दानामर्थानाञ्च सम्बन्धः प्रत्यक्षः। तं दृष्ट्वा तेन सामर्थ्यं तेन च श्रुतिः कल्प्यत इति सन्निकर्षः। प्रकरणे

तु स्वार्थे समाप्तानां वाक्यानामेकवाक्यता कल्प्या। ततः सामर्थ्यम्। ततः श्रुतिरिति त्र्यन्तरितत्वमिति विप्रकर्षः। न च वाक्यसंयुक्तानां कथं प्रकरणादङ्गत्वाशङ्केति वाच्यम्, संयुक्तानामप्यवघातादीनां प्रकरणादेवाङ्गत्वात्। असंयुक्तमिति तु न प्रकरणग्राह्यस्य विशेषणम् किन्तु प्रकरणविरोध्यर्थासंयोगाभिप्रायमित्यन्यत्र विस्तरः।

प्रकरणस्थानयोर्विरोधे-राजसूयेऽभिषेचनीयाख्यसोमयागसन्निधौ श्रुतानां विदेवनादीनां क्रमादभिषेचनीयाङ्गत्वबाधेन प्रकरणाद् रासूयाङ्गत्वम्। एवमाज्यभागादीनामाग्नेयादिसंन्निधानान्न तन्मात्राङ्गत्वं किन्तु प्रकरणात्सर्वार्थत्वं द्रष्टव्यम्। क्रमे सन्निध्याम्नानेनाकाङ्क्षा कल्प्या। प्रकरणे तु क्लृप्ता। तेन चतुरन्तरतया क्रमो बाध्यः।

क्रमसमाख्ययोर्विरोधे पौरोडाशिकमिति समाख्याते दर्शपूर्णमासकाण्डे पठितस्य शुन्धध्वमिति मन्त्रस्य न पौराडाशिकसमाख्यया पुरोडाशपात्राङ्गत्वम्, किन्तु क्रमात्सान्नाय्यपात्रार्थत्वम् क्रमे देशसामान्यसम्बन्धः प्रत्यक्षः। तेन ततोऽपेक्षा तत एकवाक्यत्वं ततो लिङ्गं ततः श्रुतिरिति सन्निकर्षः। समाख्यया तु सम्बन्धिद्वयमुक्तम् न सम्बन्धः, यौगिकानां सम्बन्धावाचकत्वात्। तेन तं कल्पयित्वाकाङ्क्षादिकल्पनमिति विप्रकर्षः। तदेवं श्रुत्यादिष्वप्राप्तबाधेन बलाबलमुक्तम्। यस्तु दशमे बाधः सोऽप्राप्तबाध इति दिक्।

८

अहीनो वा • अतः प्रभृति पशुसामानविध्याधिकरणात्प्राक् प्रकरणस्य श्रुत्यादिभिः त्रिभिर्विरोधाविरोधौ विचार्येते। तत्र श्रुत्या तावदुच्यते। ननु ज्योतिष्टोमप्रकरणे 'तिस्र एव सान्हस्योपसदो द्वादशाहीनस्ये'त्यत्र यदि त्र्युपसत्त्वं सोमाङ्गं ततो द्वादशोपसत्वमपि न हीनो दक्षिणादिभिरित्यहीनः अन्यैर्वा क्रतुभिः प्रकृतित्वेन न हीयत इत्येवं नञ्समासेन ज्योतिष्टोमाङ्गमस्त्वत आह—

द्वादशोपसदः श्रुत्याऽहीनाङ्गं प्रकृतेर्न तु।

नात्राहीनशब्देन ज्योतिष्टोमस्यवादः। संज्ञाभेदेनार्थभेदावगमात्। खप्रत्ययान्तस्य मध्योदात्ताहीनशब्दस्य 'अन्हः खः क्रतुसमूह' इति स्मृत्या क्रतुसमूहवाचित्वाच्च। न च सत्रेऽपि प्रयोगापत्तिः। पङ्कजादिवद्योगरूढिस्वीकारात्। तेन श्रुत्याऽहर्गंगवाचित्वान्न प्रकरणेन ज्योतिष्टोमे निवेशः। तत्वन्तु द्वादशाहविकारत्वादेव तत्र द्वादशोपसत्वप्राप्तेस्त्र्युपसत्वमेवानेन स्तूयते॥

९

द्वित्वबहुत्वम् ज्योतिष्टोमे 'उपास्मै गायते'ति शस्त्रस्याद्यामृचं प्रतिपदं विधायोक्तम् 'युवं हि स्थःस्वर्पत्ती इति द्वयोर्यजमानयोः प्रतिपदं कुर्याद्एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः' इति। तत्र दित्वबहुत्वश्रुत्या क्रतोरनुक्तत्वेन प्रतिपद्विधानस्याहीनवत्साक्षाद्यागाङ्गत्वाभावान्नित्ये अशक्त्या यदा दिबहुयज-

मानयोः कर्तृत्वं तदाश्रयणेन प्रतिपद्विधानम्। यद्वा पत्न्यभिप्रायत्वेन द्वित्वबहुत्वयोः प्रकरण एव निवेशान्नोत्कर्षः प्रतिपद्विधानस्येत्याशङ्क्याह—

द्विस्वामिके ऋतावङ्गं युवं हि प्रतिपन्मता ॥

नात्रैकत्वे यथाशक्तिन्यायः कालवदननुष्ठेयत्वात्। नापि पत्न्यभिप्रायं द्वित्वं दम्पत्योः व्यासज्यकर्तृत्वात्। नापि विरूपैकशेषः, तस्य प्रमाणान्तरं विनाऽयोगात्। तेन यजमानयोरित्यनुवादत्वाद्द्विबहुयजमानके कुलायाहीनादौ सत्रादौ चोत्कर्षः।

१०

जाघनी ● ननु दर्शपूर्णमासयोः 'जाघन्या पत्नीः संयाजयन्ती'त्यत्र जाघनीशब्दस्य पश्ववयववाचित्वादुत्तरार्धादिवत्परप्रयुक्तद्रव्योपजीवित्वायोगे प्रयाजशेषवल्लक्षणया संस्कार्यत्वाद्धात्वर्थस्यान्यत्र विधौ श्रुत्यनुग्रहाच्च यत्र परप्रयुक्तजाघनी तत्र वाक्यादुत्कर्षोऽस्त्वत आह—

नोत्कर्षः स्यात्तु जाघन्याः,

नात्र जाघनी संस्कार्या येनोत्कर्षः स्यात्। किन्तु सा तृतीया श्रुत्या पत्नीसंयाजाङ्गत्वेनाज्येनापि कल्पितरूपा विधीयते। न चेयं कालादिवदनुपादेया, येनाविधेया स्यात्। न च संस्कार्यत्वात्तत्वम्, तदसिद्धेः। न च कृतार्थत्वात्संस्कार्यत्वम्। प्रयाजशेषवत्कृतार्थत्वबोधकशब्दाभावात्। न च जाघनीशब्द एवोत्तरार्धशब्दवत्तथेति वाच्यम्। उत्तरार्धशब्दस्य सापेक्षत्वेन 'शेषात्स्विष्टकृते समवद्यती'ति प्रकृतशेषस्योत्तरार्धदेशनियामकत्वात्। जाघनीशब्दस्य तु तद्वदवयववाचित्वे सत्यप्यसति प्रकृतद्रव्यनियमे जातिवाचित्वम् लोकसिद्धाया एव 'अनो ददाती'त्यादिवत्क्रयादिना उपादानं न तु संस्कार्यत्वम्। तेनात्रानुत्कर्षः ॥

११

सन्तर्दनम् ● ननु ज्योतिष्टोमे अधिषवणफलकयोर्न सन्तृणत्तीत्यसन्तर्दनं विधाय श्रुतस्य 'अथो खलु दीर्घसोमे सन्तृद्यत्' इति सन्तर्दनस्य दीर्घसोमशब्दार्थोद्देशेन विधानात्तस्य च यजमानदैर्घ्यणेष्टच' द्यपेक्षया वा प्रकृतावेवोपपन्नत्वात्सन्तर्दनासन्तर्दनयोः प्रकृतावेव विकल्पेन निवेशो युक्तो न तूत्कर्ष इत्याशङ्क्याह—

भवेत्सन्तर्दने तु सः।

स उत्कर्षः। न षष्ठीसमासेन कर्तृदैर्ध्यपरो दीर्घसोमशब्दः निषादस्थपतिन्यायेन कर्मधारयस्य बलवत्वात्। धृत्या इति वाक्यशेषायोगाच्च। नापि इष्ट्याद्यपेक्षया, व्यर्थविशेषणत्वात्। तेन प्रदानवृध्या सोमवृद्धेर्द्विरात्रादौ संस्थासु च वाक्येनोत्कर्षः। न च तत्र चोदकप्राप्तदशमुष्टित्रिपर्वपरिमाणयोर्बाधः। दीर्घपर्वग्रहणेनावशिष्टानां वा अंशूनां वृध्या तदुपपत्तेः ॥

१२

संख्यायुक्तम ● ननु सोमे 'न प्रथमयज्ञे प्रवृञ्ज्यादि'त्यत्र यज्ञशब्दसमानाधिकरणस्य प्रथमशब्दस्य प्रथमं प्रयुज्यमानत्वेन तत्प्रख्याद्यज्ञनामत्वादेष वा वेति वाक्ये 'एत एवाहिताग्नयो इष्टप्रथमयज्ञाः सत्राण्यासत' इत्यत्र च यज्ञे प्रयोगादन्यथाप्रयोगे लक्षणापत्तेश्च तदुद्देशेन विहितस्य प्रवर्ग्यनिषेधस्य प्रकरणात्सोमयागाङ्गत्वमेव न त्वाद्यप्रयोगाङ्गत्वम् सङ्कोचापत्तेरत आह—

प्रवर्ग्यस्य निषेधस्तु भवेदाद्यप्रयोगगः ।

न प्रथमशब्दो यज्ञनाम, मानाभावात् । आद्यप्रवृत्तिं विना स्वतः क्रतौ प्रयोगाभावात्तद्विशिष्टयज्ञवाचित्वे नागृहीतविशेषणान्यायेन प्रयोगवाचित्वात् । द्वितीये ज्योतिष्टोमे प्रथमशब्दाप्रयोगाच्च । तेन जघन्ये यज्ञशब्द एव लक्षणया प्रथमशब्देन प्रयोगोक्तेस्तत्रैव प्रवर्ग्यनिषेधः । यत्तु 'अग्निष्टोमे प्रवृणक्ती'ति वाक्यं तन्निषिद्धप्रतिप्रसवार्थम् । तेन 'कामन्तु योऽनूचानःस्यादि'ति वाक्यादग्निष्टोमप्रथमप्रयोगेऽनूचानस्य नित्यं प्रयोगः, अन्येषान्तु नेति व्यवस्थितो विकल्पः । अतिरात्रप्रथमाहारे तु प्रतिप्रसवाभावात्सर्वेषामेवाप्रयोगः ॥

१३

पौष्णं ● दर्शपूर्णमासयोः 'पूषा प्रपिष्टभागः' इति श्रुतं पेषणं प्रकरणे पूषाभावाद्यत्र पूषा तत्र तदुत्कृष्यत इत्याह—

स्यात्पौष्णपेषणोत्कर्षः,

१४

तत्सर्वार्थम् ● ननु तत्पेषणमविशेषात्तद्देवत्ये चरौ पशौ पुरोडाशे चास्त्वत आह—

चरौ न पशुडाशयोः ।

डाशः पुरोडाशः । न पुरोडाशे तद्विधीयते, अतिदेशात्प्राप्तेः । न पशौ, हृदयाद्याकारनाशात् । न चेदं पुरोडाशे द्वितीयं विधीयत इति वाच्यम्, तत्र मानाभावात् कूर्माद्याकारनाशाच्च । न च'अदन्तको हि स'इति वाक्यादवदानोत्तरं तन्न प्राप्तमिति विधेयमिति वाच्यम्, अप्राकृतकार्यत्वादवदानादि प्रदानान्तस्यैक पदार्थत्वेन मध्ये व्यवधानयोगाच्च । चरौ तु अर्थाभावान्निवृत्तं सत्प्रतिप्रसूयत इति लाघवम् । अस्ति च पिष्टकचरौ तत्प्रयोगः । तेन तत्रैव पेषणम् ॥

१५

एकस्मिन् ● ननु पूषेति प्रथमान्ते पूष्णः सत्तामात्रोक्त्या द्विदेवत्येऽपि तत्सत्तासत्वाद्द्वाभ्यां दत्तस्य पूष्णेऽपि दानाच्चान्यसहितेऽपि पूष्णे पेषणमस्त्वत आह-

अन्येन सहिते पूष्णि नैव पेषणमिष्यते ॥

न देवतार्थं पेषणम्, येनान्यसहितेऽपि सत्तामात्रेण तत्स्यात्। किन्तु भाग-शब्देन यागलक्षणया तद्देवत्ययागापूर्वप्रयुक्तम्। न चान्यसहितो यागः पूष्णा व्यपदेष्टुं शक्यत इति न तत्र पेषणम् ॥

तृतीयस्य तृतीयः पादः ॥

चतुर्थः पादः

१

निवीतम् ● इष्टौ 'निवीतं मनुष्याणामि'त्यादीनां 'उपव्ययत' इति विधेर्वादत्वमौदुम्बराधिकरणे सिद्धम्। यदा विधिस्तदा विचार्यते तत्र निवीतस्य षष्ठीश्रुत्या शुद्धपुरुषधर्मत्वं क्रतुधर्मत्वं वा। प्रकरणे यन्मनुष्यप्रधानं कर्मान्वाहार्य-दानादि तद्धर्मत्वं वा मनुष्यप्रधाने आतिथ्यादावुत्कर्षो वास्त्वत आह—

निवीतमुपवीतस्य स्तुतिः,

अनेन पूर्वोक्तं स्तुतित्वमेव स्थिरीक्रियते ॥

२

उपवीतन्तु ● ननु 'प्राचीनावीती दोहयेत् यज्ञोपवीती हि देवेभ्यो दोहयती'ति मृताग्निहोत्रे सिद्धवदग्निहोत्रस्थयज्ञोपवीतानुवादलिङ्गाद्दर्शेष्टौ चेन्द्रमहेन्द्रयोर्विकल्पेन देवेभ्य इति बहुवचनानुपपत्तेश्चोपवीतं सर्वदैव कर्माङ्गं न तु प्रकृत्यङ्गमत आह—

दर्शे तु तद्भवेत्।

नात्र प्रकरणोल्लङ्घनेन सर्वार्थत्वं सम्भवति। न च बहुत्वविरोधः, तस्य प्राकृतवैकृतदेवताभिप्रायत्वात्। मृताग्निहोत्रे तु 'प्राचीनावीती दोहयेदिति' विधाय तत्स्तुतये यज्ञोपवीतीत्याद्यनूदितम् अतो नेदं लिङ्गम्। तेन प्रकृत्यङ्ग-मेवोपवीतम् ॥

३

विधिर्वा ● ननूपवीतविधेः 'नित्योदकी नित्ययज्ञोपवीती'ति स्मृतिप्राप्ता-नुवादत्वान्न विधित्वम्, यद्वा स्मृतेः सर्वार्थत्वात्सर्वकर्मार्थत्वेनैव प्राप्तमुपवीत-विधिनानूद्यते न तु दर्शाङ्गत्वेन विधीयत इत्याशङ्क्याह—

उपवीतन्तु संयोगभेदाद्दर्शाङ्गमेव तु ॥

नात्र स्मृतिप्राप्तानुवादः। तया हि पुरुषार्थत्वेन प्राप्तिः। अयन्तु क्रत्वर्थो विधिः। तेनानुवादत्वासम्भवात् संयोगभेदाच्च दर्शाङ्गमेव तत् ॥

एवं वा। ननु मृताग्निहोत्रे 'यज्ञोपवीती हि देवेभ्यो दोहयती'त्यपि

दैवाग्निहोत्राङ्गतया उपवीतविधिरस्तु न तु प्राचीनावीतस्तुत्यर्थोऽनुवाद इत्याशङ्क्याह—

मृते यज्ञोपवीती हि दैवे नायं विधिर्मतः ।

नायं दैवाग्निहोत्रे 'ये पुरोदञ्चो दर्भाः तान् दक्षिणाग्रांस्तृणीयादि'त्यत्र यच्छब्दयुक्तस्यापि ये पुरा जीवद्दशायां दर्भास्ते उदञ्चः कार्या इत्येवं व्यवहित-कल्पनया वाक्यभेदेन वाप्राप्तत्वाद्विधित्वमस्त्वत आह—

पुरोदगग्रदर्भाणां स्मृतेः प्राप्तेर्विधिर्न च ॥

नात्र विधिः 'अग्रवन्त्युदगग्राणी'ति स्मृतेः प्राप्तेः । न चेदमेव स्मृतेर्मूलम्, अस्याग्निहोत्रमात्रपरत्वात्, स्मृतेश्च साधारणत्वात् । तेनात्रापि न विधिः ॥

४

विधिस्तु ● ननु तत्रैव 'अधस्तात्समिधं धारयन्ननुद्रवेत् उपरि हि देवेभ्यो धारयती'त्यत्राग्निहोत्रद्रव्यस्याभ्यर्हितत्वेन तत्प्रच्छादनरूपस्योपरिधारणस्याचारात्प्राप्तेर्हिशब्दाच्चानुवादत्वमेवास्त्वत आह—

धारयत्युपरीत्येतद्विधिः,

नायमनुवादः । प्रच्छादने समिधः सामर्थ्याभावेनोपरिधारणाप्राप्तेः स्रुग्दण्डे समिधमुपसङ्गृह्ये'ति वचनाच्च । तेन हिशब्दयुक्तस्यापि विधायकत्वमेवेति पूर्वापवादः ॥

५

दिग्विभागश्च ● ज्योतिष्टोमे 'प्राचीनवंशं करोती'ति विधाय 'प्राचीं देवा अभजन्त दक्षिणां पितरः' इत्यादिना निवीताधिकरणन्यायेनार्थवादत्वं सिद्धमेव । अधिकरणन्तु अभजन्तेति पुराकल्पात्सुकल्पो विधिरित्येतदाशङ्कानिरासार्थमित्याह—

प्राचीनविधिर्न च ॥

६

परुषि ● इष्टौ 'यत्परुषि दितं तद्देवानां यदन्तरा तन्मनुष्याणामि'त्यादौ 'यो विदग्धः स नैर्ऋत' इत्यादौ च निवीतवदर्थवादत्वं सिद्धमेव । अधिकरणन्तु विधित्वेऽपि लौकिके लवने पर्वादिनियममात्रकरणान्नैर्ऋते च विदग्धत्वादि गुणमात्रविधानान्न फलकल्पनेत्यधिकाशङ्कानिरासार्थमित्याह—

स्तुतिः यदन्तरेत्यादिः ॥

७

अकर्मक्रतु ● नन्विष्टौ 'नानृतं वदेदि'त्यत्र 'कर्त्तरि कृत् लः कर्मणि चे'ति स्मृत्या चकारेणानुकृष्टे कर्तरि लकारविधानात् तिङां लडादेशत्वेन कर्तृवाचित्वादन्यथा चैत्रः पचतीत्यत्र तिङा कर्तरनुक्त्याऽनभिहित इति स्मृत्या चैत्रे तृतीया-

पत्तेः सामानाधिकरण्याच्चाख्यातस्य कर्तृवाचित्वं निर्विवादम्। ततश्च वदनस्य पुरुषार्थत्वात्तन्निषेधोऽपि पुरुषार्थ एवेत्यनृतवदननिषेधस्य श्रुत्या शुद्धपुरुषार्थत्वं क्रतुयुक्तपुरुषधर्मत्वं वा स्मृतिप्राप्तानुवादत्वं वास्त्वत आह—

क्रत्वङ्गमनृतं भवेत्।

नाख्यातवाच्यभावनाविनाभावेन कर्तुर्लक्षणया प्रतीतिसम्भवे वाच्यत्वं सम्भवति। अनन्यलभ्यो हि शब्दार्थ इति न्यायात्। न च कर्त्तैव तिङर्थः। तेन च भावनाक्षेप इति वाच्यम्। कृत्याश्रयस्य कर्तृत्वान्नागृहीतविशेषणान्यायेन तिङः क्रियार्थत्वात् कर्त्रा करणादिका न्वयायोगात् कर्तृवाचित्वे सत्त्वप्राधान्यात् कृदन्तवन्नामत्वापत्तेश्च। न च धात्वर्थेन भावनाक्षेपः। पाक इत्यादि कृदन्ते तदभावात्। न च स्मृतिविरोधः। लः कर्तरीति विभक्तिशास्त्रस्य द्व्यकयोरिति सङ्ख्याशास्त्रस्य चैकवाक्यत्वेन कर्तरि द्वित्वैकत्वयोरित्यर्थात्। अन्यथा सङ्ख्येयप्राधान्यापत्तेः त्वयापि हि कर्तुः सङ्ख्यां प्रति विशेषणत्वमवश्यं वाच्यम्। तुल्यवद्द्वयोर्वाच्यत्वे तत्त्वापत्तेः। सङ्ख्याविशिष्टकर्तृवाचित्वे तु नामत्वापत्तिरित्यादि दूषितम्। न च कर्तुरवाच्यत्वे कथं तद्गतसङ्ख्यावाचित्वमिति वाच्यम् शौणकर्कादिवत्कर्तृगतैकत्वे एवाख्यातस्य शक्तेः। अनभिहित इत्यस्याप्यनभिहितसङ्ख्येत्यर्थः। तेन चैत्रः पचतीत्यत्र तिङा कर्तृसङ्ख्याया उक्तत्वाच्चैत्रे प्रथमा युक्ता। सामानाधिकरण्यन्तु लक्षणया। तेनाख्यातस्य कर्तृवाचित्वाभावान्न तदर्थोऽयं निषेधः, किन्तु प्रकरणात्क्रत्वर्थः। न च स्मृतिप्राप्तानुवादत्वम्, भिन्नविषयत्वात्। विशेषस्तु पितृकृतमीमांसाकुतूहलाख्यातवादटीकायामस्माभिरुक्तः परमतञ्च निरस्तम्॥

८

अहीनवत् • ननु दर्शपूर्णमासयोः 'जञ्झभ्यमानोऽनुब्रूयात् मयि दक्षक्रतू' इत्यत्र शानच् प्रत्ययेन कर्तुरुक्तेर्वाक्यशेषे 'प्राणापानावेवात्मन् धत्ते' इति फलसङ्कीर्तनाच्च मन्त्रवचनस्य वाक्यलिङ्गाच्च केवलपुरुषार्थत्वमस्त्वत आह—

क्रतुयुक्तस्य पुंसस्तु धर्मो जञ्झभ्यमन्त्रगः।

न मन्त्रस्य केवलपुरुषार्थत्वम्। प्रकरणेन क्रतुयुक्तपुरुषधर्मत्वेऽपि प्रत्ययविरोधाभावात्। तेन तदर्थ एव मन्त्रः। फलवचनन्तु स्तुतिः॥

९

शंयौ स • नन्विष्टौ 'नब्राह्मणायावगुरेत् तं शतेन घातयात्तस्माद् ब्राह्मणाय नावगुरेन्न हन्यात्' इत्यादिनिषेधस्यापि पूर्ववत्क्रत्वर्थत्वमस्तु। ननु का तत्र प्रसक्तिः। ऋत्विगानत्यर्थमन्वाहार्यनियमेन तन्मात्रेणानत्यभावे सामदानदण्डोद्यमनादीनां पक्षे प्राप्तेः। तेन तत्रायं निषेधः सार्थको भविष्यतीत्याशङ्क्याह—

त्यागोऽवगोरणस्यापि,

पुरुषार्थ इत्यग्रिमेणान्वयः। नात्र क्रत्वर्थत्वं यातयादित्यवगोरणसाध्यत्वेन यातनाया उक्तत्वान्निषेधस्य च तदभावमात्रफलत्वेन क्रत्वर्थत्वाभावात्। तथात्वे तु व्रीहिभिः सङ्कल्प्यानीजानस्य क्रतुवैगुण्यापत्तेः न क्रत्वङ्गत्वमिति विशेषः। तेनात्र पुरुषार्थत्वमेव ॥

१०

प्रागवरोधात् ● दर्शपूर्णमासयोः 'मलवद्वाससा न संवदेदि'त्यत्रापि नानृतं वदेदितिवत्क्रत्वर्थत्वे प्राप्ते 'तामपरुध्य यजेते'ति वचनेन सर्वस्मादेव क्रतुव्यापारान्निवृत्तया तया क्रतौ संवादाप्रसक्तेः पुरुषार्थत्वेनैव प्राप्तिरिति तत्रैव निषेध इत्याह—

मलवद्वाससा वदेत्पुषार्थः।

त्याग इत्यनुषङ्गः॥

११

अप्रकरणे तु ● नन्वनारभ्याधीते 'सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो भवती'ति वाक्ये हिरण्यधारणस्य क्रत्वङ्गतया विधिर्यद्वा हिरण्येन जुहोतीति क्रतुगतहिरण्यानुवादेन धारणस्य, यद्वा 'हिरण्यं हस्ते भवति' इत्यादि श्रुतधारणानुवादेन सुवर्णताया वा विधिरस्तु। कृत्यप्रत्ययेन संस्कार्यत्वावगतेरत आह—

स्वर्णधृतिस्तथा।

पुरुषार्थेति विपरिणतानुषङ्गः। नात्र क्रतोस्तद्गतहिरण्यस्य वा उपस्थितिः, अनारभ्याधीतत्वात्। नापि हिरण्यं जुह्वादिवदव्यवभिचरितम्, येन धारणं तदुद्देशेन विधानात् पर्णतादिवत्क्रत्वङ्गमुच्येत। न च संस्कार्यत्वात्क्रतुसम्बन्धः अन्योन्याश्रयात्। कृत्यप्रत्ययस्तु साध्यतामात्रमाह न संस्कार्यत्वम्। अतएव न धारणानुवादेनापि सुवर्णताविधिः। लोकेऽपि धारणसम्भवेन क्रतुगतधारणाप्रतीतेः। तेनात्र धात्वर्थकर्मत्वाद्रात्रिसत्रवदार्थवादिकं भ्रातृव्याभिभवरूपं फलम्। तेन पुरुषार्थमेव सुवर्णधारणम्॥

१२

शेषाःप्रकरणे ● नन्वनारभ्याधीतानां जयादीनां 'येन कर्मणेर्त्सेत् तत्र जयान् जुहुयादि'ति वाक्येन वैदिक इव लौकिककृष्यादिकर्मणापि ऋद्धेरिष्यमाणत्वेन तत्रापि विनियोगात् तत्रापि ते स्युरित्याशङ्क्याह—

श्रौते जयादयः,

न लौकिके कर्मणि जयादयः यदाहवनीयादिवाक्येन वैदिकानां सामान्यत आहवनीयविधानात्तेषाञ्च वैदिकत्वादेतेऽपि तत्साध्येष्वेव स्युरन्यथा क्षेत्रे कृषिराहवनीये च होम इति प्रधानवैदेश्यापत्तेः॥

१३

दोषात्त्विष्टि ● ननु 'यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्क-पालान्निर्वपेदि'तीष्टिरुभयत्राश्वदाने यद्वा वैधे दोषाप्रसक्तेः लौकिक एवाश्व-दानेऽस्त्वत आह—

वैदिके ह्यश्वदाने स्यात्,

अश्वेष्टिर्न लौकिकेऽश्वदाने। नैमित्तिक्या इष्टेः वैदिकत्वे च निमित्त-स्यापि दानस्याहवनीयादिसाध्यकर्माङ्गभूतस्यैव प्रतीतेः। न ह्यश्वदानं जलोदर-हेतुरित्यन्यत्र प्रसिद्धम्, नाप्यत्र, सिद्धानुवादेनेष्टिविधानात्। वरुणग्रहनिर्मोक-स्त्वर्थवादमात्रमिष्टिविध्यर्थम्। लौकिकेऽपि दाने फलश्रुतेर्दानस्यानिषिद्धत्वेन प्रत्यवायाहेतुत्वाच्च। 'न केसरिणो ददाती'ति निषेधस्तु विश्वजित्परोऽश्व-विक्रयपरो वा, तत्र दानलक्षणसत्वादिति वार्तिके क्षुण्णम्॥

१४

अचोदितम् ● नन्वियमिष्टिः प्रतिगृह्णीयादिति विधौ प्रतिग्रहीतुः श्रुतत्वा-दस्त्वत आह—

दातुरेव सा।

न प्रतिग्रहीतुरिष्टिः उपक्रमे 'प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवता-मार्च्छत् स पर्यदीर्यते'त्यादौ दातुरेवोक्तेः। तेनोपक्रमप्राबल्यात् प्रतिगृह्णीयादिति ग्राहयेदित्येवमन्तर्णीतणिजर्थपरतया व्याख्येयम्। यद्यप्युपक्रमप्राबल्यं पूर्वसिद्धम्, तथापि ऋगादिशब्दा वेदेऽपि बहुधा दृष्टाः। गृह्णातिस्तु दातुर्व्यापारे नेत्यधिका-शङ्का। वार्तिके तु मैत्रायणीयशाखायां साग्नेः प्रतिग्रहीतुः लौकिके वैदिके च प्रतिग्रहे प्रायश्चित्तत्वेनोक्ता। तेन वचनद्वयवशादुभयोः साग्न्योरिष्टिरित्युक्तं तदाह—

वार्तिके तूभयोरेषा,

१५

पानव्यापच्च ● ननु 'सोमेन्द्रं चरुं निर्वपेद्यः सोमं वमति' इत्यनारभ्या-धीतेष्टिर्लौकिक एव सोमे रसायनाद्यर्थं पीते वान्तेऽस्तु न तु वैधे। तत्र पानमात्रेण प्रतिपत्तेर्जातत्वादित्याशङ्क्याह—

वैधे सा सोमवामिनः।

लोके वमनार्थमेव पानाद्वेदे तु सम्यग्जरणान्तं पानस्यैव प्रतिपत्तित्वात्। तेन वमने वैगुण्यपरिहारार्थाऽसौ विधीयत इति वैदिके एव वमने इष्टिः॥

१६

तत्सर्वत्राविशेष ● ननु सेयमिष्टिरविशेषादृत्विग्वमने यजमानवमने वास्त्वत आह—

नर्त्विग्वमन इष्टिः स्यात् ।

'यः सोमं वमती'ति यच्छब्देनेष्टिवमनयोस्समानकर्तृकत्वादिष्टौ च स्वामिन एव विनियोगात्तत्कर्तृकमेव वमनं निमित्तमिति न ऋत्विग्वमने इष्टिः ॥

१७

सर्वप्रदानं ● वमनस्य हविःशेषविषयत्वात्तत्प्रसङ्गात्पञ्चमपादान्तं शेषचिन्ता क्रियते। प्रथमं तावदाग्नेयादिषु शेष एवास्ति ने ति चिन्त्यते। अत्र भाष्ये आग्नेयोऽष्टाकपाल इत्यत्र तद्धितेन सकलस्य पुरोडाशस्य देवतासम्बन्धात्तस्य च यागमन्तरेणानुपपत्तेः 'द्विर्हविषोऽवद्यती'त्यस्य चोपायपरत्वात् सोमयागवद्व्यवदानाभ्यासेन सर्वस्यैव होमाच्छेषकार्याणाञ्च सन्निहितशेषाभावेनान्यथानुपपत्या हविरन्तराक्षेपकत्वान्न शेषोऽस्तीत्याशङ्क्याभ्यासस्य श्रुतत्वात्पशोर्हृदयादिद्वारेव पुरोडाशस्य प्रदेयप्रकृतितयाप्याग्नेयत्वोपपत्तेर्यागस्य चैकेनद्व्यवदानेन साधनात्तस्य च द्रव्यमस्तीत्येतावताऽऽवृत्ययोगाच्छेषश्रवणाच्चास्त्येव शेष इत्युक्तम् तदाह—

यागाङ्गं द्व्यवदानकं भाष्ये ॥

वार्तिके तु यागहोमयोर्भेदाच्चतुरवत्तं जुहोतीत्यस्य चोपस्तरणादि वाक्यप्राप्तचतुरवत्तानुवादेनोत्पत्तिवाक्यप्राप्तप्रक्षेपरूपहोमविधायित्वाद्धोमप्राधान्ये तस्य विकृतावतिदेशायोगाच्च सकलस्यारण्यवत्त्यागेऽपि द्व्यवदानमात्रहोमादस्ति शेष इत्युक्तम् तदाह—

अथ वार्तिके प्रोक्ता कृत्स्नस्य हविषोऽङ्गता ।
प्रक्षेपो ह्यवदानस्य प्रतिपत्तिरितीरिता ॥

१८

अप्रयोजकत्वात् ● ननु तानि शेषकार्याणि 'शेषात्स्विष्टकृते समवद्यती'त्येकस्मादेव सन्त्वत आह—

सर्वेभ्यः शेषकार्याणि,

नात्र शेषस्य गुणत्वम्। येनोपादेयत्वादेकस्मादेव तानि स्युः। शेषसंस्कारकाणि त्वेतानि। तेन 'शेषात्स्विष्टकृते' इति शेषानुवादेनावदानसंस्कार विधानात्संस्कार्यविशेषणैकत्वस्य चाविवक्षितत्वात् 'सकृत्सकृदवद्यादि'ति लिङ्गात्प्रतिसंस्कार्यं संस्कारावृत्तिन्यायाच्च सर्वेभ्यः स्युः ॥

१९

एकस्माच्चेत् ● कृत्वा चिन्तेयम्। यदैकस्माद् ग्राह्याणि तदापि नानियमः। किन्त्वाद्यादेव स्युरित्याह—

यद्येकस्मात्तदाद्यतः ।

२०

भक्षाश्रवणात् ● नन्वाग्नेयं चतुर्धा कृत्वा 'इदं ब्रह्मण' इत्यादि व्यादेशैर्ऋत्विग्भ्यः श्रुतस्य दानस्य भक्षार्थत्वेनाश्रवणात्परिक्रयार्थत्वमेव सोमचमसवदस्त्वत आह—

व्यादेशो भक्षणार्थः स्यान्न स्यान्नेन परिक्रयः ।

नानेन परिक्रयः कर्तुं शक्यते देवतायै त्यक्तत्वेन यजमानस्य तत्र स्वामित्वाभावात् । तेन भक्षार्थमेव दानम् । ततश्च सिद्धं प्रतिपत्तित्वम् ।।

तृतीयस्य चतुर्थः पादः ।।

पञ्चमः पादः

१

आज्याच्च ● ननु तानि शेषकार्याण्याज्यादप्युपांशुयाजद्रव्यात्कर्तव्यानि शेषश्रुतेः स्विष्टकृदादौ 'सर्वेभ्यो हविर्भ्यः समवद्यती'ति वाक्याच्चेत्यत आह—

उपांशुयाजाज्ये नैव शेषकार्यम्,

कृतार्थस्य स्थितस्य प्रतिपत्त्यर्थानि हि शेषकार्याणि न चाज्यमेवंरूपमस्ति । 'सर्वस्मैवे'ति वाक्येनानेकार्थस्य ध्रौवस्यैकयागनिर्वृत्तावकृतार्थत्वेन शेषाभावात् । न च सर्वान्ते प्रतिपत्तिः 'समिष्टयजुर्जुहोती'ति प्रतिपत्त्यन्तरोक्तेः । यदि तदर्थकर्म तदा कार्यान्तरार्थत्वात्सुतरां शेषाभावः । जुहूस्थन्तु सर्वमेव हुतम् । तेन शेषाभावान्नाज्यात्तानि कार्याणि ।।

२

साकं प्र० ● ननु साकम्प्रस्थायीये 'सह कुम्भीभिरभिक्रामती'ति कुम्भीभिः सहाभिक्रमणमात्रोक्तेर्होमाश्रुतेश्च जुह्वाचतुरवत्तबाधे मानाभावादभिक्रम्याहवनीयं दक्षिणे होमाच्छेषकार्यं भविष्यतीत्याशङ्क्याह—

तथा न च साकंप्रस्थायीयकुम्भ्याम्,

तथा शेषकार्यम् । होमार्थं एवाभिक्रमणे जुहूमपहाय कुम्भीविधानात् ताभिश्च निश्शेषस्यैव होमाच्छेषकार्यनिवृत्तिः ।।

३

सौत्रामण्याम् ● ननु सौत्रामण्याम्'उत्तरेऽग्नौ पयोग्रहान् जुह्वति दक्षिणेऽग्नौ सुराग्रहानि'त्यत्र सोमग्रहतुल्यश्रुतित्वात्सोमे 'अल्पं जुहोति' इति वचनादिव 'उच्छिनष्टि न सर्वं जुहोती'ति वचनाच्छेषसत्वाच्छेषकार्याणि भक्षणादीनि सन्त्वत आह—

नापि सौत्रामणीग्रहे ।।

शेषकार्यमित्यनुषङ्गः । नात्र भक्षणादिका प्रतिपत्तिः । वाचनिकशेषस्य 'ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारमि'ति पयोग्रहेषु, 'शतातृण्णायां विक्षारयती'ति सुराग्रहेषु च प्रतिपत्यन्तरोक्तेः । शतच्छिद्रा कुम्भी शतातृण्णा । तेनात्रापि न शेषकार्याणि ।।

४

द्रव्यैकत्वे ● ननु 'य इन्द्रियकामो वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजयेदि'त्युक्तायां सर्वपृष्ठायां 'इन्द्राय राथन्तराय इन्द्राय बार्हताये'त्यादि पृथङ्निरुप्तानां 'रथचक्रमात्रो द्वादशकपालः पुरोडाशो भवती'त्येकपुरोडाश विधानात्तत्र च 'समन्तं पर्यवद्यती'ति वचनेनावयवानामेव यागसाधनत्वात्प्रति-कर्मावसायिचोदकभेदात् उत्तरार्धभेदाच्च भिन्नमेव स्विष्टकृदादिकमस्त्वत आह—

न पृथक् सर्वपृष्ठायाम्,

शेषकार्यमित्यनुषङ्गः । नात्र होमदेशस्योत्तरार्धः । किन्तु मध्यपूर्वार्धवदुत्त-रार्धोऽपि पुरोडाशस्यैव । तेन शेषस्य सङ्कीर्णत्वात्तत्कार्यं तन्त्रेणैकमेव ।।

५

ऐन्द्रवायवे ● ऐन्द्रवायवे संस्कार्यस्य सोमस्यैकत्वात् सकृद्भक्षे प्राप्ते 'द्विरैन्द्रवायवस्य भक्षयती'ति वचनाद्द्विर्भक्ष इत्याह—

द्विर्भक्षस्त्वैन्द्रवायवे ।

६

सोमेऽवचनात् ● सोमे 'ग्रहैर्जुहोति' इति कृत्स्नग्रहेण होमश्रवणात्सौत्रा-मणिसाकम्प्रस्थायीयवन्न शेषोऽस्तीत्याशङ्क्य 'अल्पं जुहोती'ति वचनाच्छेष-स्तावदस्तीत्याह—

सोमे शेषस्य मात्रादौ ,

अस्तीति शेषः । तस्य च'आश्विनं भक्षयन्ती'ति वचनाद्भक्षसिद्धिरित्याह—

वचनाच्छेषभक्षणम् ।।

७

चमसेषु ● सोमे'प्रैतु होतुश्चमस' इत्यत्र होतुश्चमस इति समाख्यान्तर्गत-स्य चमसशब्दस्य चभ्यते भक्ष्यते अस्मिन्निति यौगिकत्वात्समाख्याभक्षेति भिन्नमित्याह—

चमसेषु समाख्यानात् ।

भक्षणमित्यनुषङ्गः ।।

८

उद्गातृचमसं ● अत्र भाष्ये 'प्रोद्गातॄणा'मित्यत्र उद्गातुरेकत्वात्पाशवद्बहुत्वाविवक्षया एकस्यैवौद्गातुर्भक्षः यद्वा लक्षणया षोडशानामित्याशङ्क्योद्गातृभक्षसम्बन्धिनां ससुब्रह्मण्यानां चतुर्णां भक्ष इत्युक्तम्। वार्तिके तूद्गायन्तीति व्युत्पत्या उद्गातृशब्दस्य यौगिकत्वेन चतुर्थस्योद्गानाभावादेकस्तोत्रसम्बन्धः सदसि सन्निधानमित्यवान्तरसामान्याच्चापसुब्रह्मण्यानां त्रयाणां भक्ष इत्युक्तं तदाह—

सुब्रह्मण्यहीना भक्षे स्युरिति वार्तिकसंमतम्।

९

ग्रावस्तुतः ● ननु 'यथाचमसमन्यांश्चमसान् चमसिनो भक्षयन्त्यथैतस्य हारियोजनस्य सर्व एव लिप्सन्त' इत्यत्र सर्वनाम्ना प्रकृतचमसिग्रहणाद्ग्रावस्तुतश्चमसाभावान्न हारियोजनभक्ष इत्यत आह—

ग्रावस्तुतोऽपि भक्षस्स्याद्धारियोजनके ग्रहे।

न सर्वशब्देन प्रकृतसर्वग्रहणे सम्भवति भूयश्चमसिभिर्विशेषणं सम्भवति वाक्यभेदात्। अथैतच्छब्दाभ्यां चमसिमात्रशङ्काया अपन्हवाच्च। तस्माद्ग्रावस्तुतोऽपि हरियोजने भक्षः॥

१०

वषट्काराच्च ● 'वषट्कर्तुः प्रथमभक्षः' इत्यत्र समाख्याप्राप्तभक्षानुवादेन प्राथम्यमात्रविधिरित्याशङ्क्य वषट्कर्तृविशिष्टभक्षानुवादेन प्राथम्यविधौ वाक्यभेदादेकप्रसरताभङ्गाच्च विशिष्टभक्षान्तरविधिरित्याह--

प्रथमस्स्याद्वषट्कर्तुः,

भक्ष इत्यनुषङ्गः।

११

होमाभिषवाभ्याञ्च ● हविर्धाने'ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्तो'त्यत्र सर्वस्य वचनान्तरादर्थाच्च प्राप्तत्वेन विधिवैय्यर्थ्यादभिषवहोमसमानकर्तृको भक्षो विधोयते। अतस्तावपि निमित्तौ भक्षे निमित्तमित्यभिषवकर्तुरुन्नेतुः होमकर्तुश्च चमसाध्वर्योः न भक्ष इत्याह—

होमाभिषवयुक्परः।

१२

प्रत्यक्षोप ● ननु 'प्रैतु होतुश्चमस' इति समाख्यायाश्चमसरूपविशेषपरत्वाद्वषट्कारादेश्च ग्रहेष्वपि सावकाशत्वादनेकनिमित्तसमवाये एकभक्षेण प्रतिपत्तिसिद्धेरन्येषां बाधोऽस्त्वत आह—

समवाये तु भक्षाणां क्रमेणैवं समुच्चयः ।

सामान्यविशेषभावाभावेनान्योन्यं निमित्तानां बाधायोगात् स्विष्टकृदिडावत्सर्वैरवयवशः प्रतिपत्तेश्च न भक्षाणां बाधः किन्तु समुच्चय एव ॥

१३

एकपात्रे ● नन्वेकपात्रे वषट्कारस्यातीतत्वेन निमित्तत्वायोगाद्वचनस्य च चमसिभ्यः पूर्वं वषट्कर्तुर्भक्षविधायकत्वे होमनिमित्तोऽध्वर्योरेवादौ भक्षोऽस्त्वत आह—

एकपात्रे वषट्कर्तुरादितः स्यात्तु भक्षणम् ।

वचनस्याविशेषेण प्रवृत्तेः 'होतेव नः प्रथमः पाही'ति मन्त्रवर्णात्कारणस्य वषट्कारस्य प्रथमत्वाच्च वषट्कर्तुरेवादौ भक्षः ॥

१४

वचनात् ● तद्भक्षणं 'नानुपहूतेन सोमः पातव्यः' इति निषेधात् अनुज्ञयैवेत्याह—

अनुज्ञया तु भक्षः स्यात् ,

१५

तदुपहूत ● सा चानुज्ञा न लौकिकेन शब्देन किन्तु 'उपहूत उपह्वयस्व' इति मन्त्राम्नानात्तेनैवेत्याह—

मन्त्रेणैव च सा मता ।

१६

तत्रार्थात् ● 'उपहूत उपह्वयस्व' इत्यनुज्ञानानुज्ञापनमन्त्रयोर्वैपरीत्येऽपि पाठस्यार्थक्रमेण बाधादुत्तरोऽनुज्ञापने पूर्वस्त्वनुज्ञायां विनियोक्तव्य इत्याह—

अनुज्ञापूर्विका सा स्यात् व्युत्क्रमान्मन्त्रयोः भवेत् ॥

१७

याज्यापनये ● अत्र 'यजमानस्य याज्ये'ति वचनाद्धौत्राम्नातयाज्यामात्रापनयेऽपि 'याज्याया अधिवषट् करोती'ति वचनेन याज्यातो वषट्कारस्याभिन्नत्वात् वषट्कारस्तन्निमित्तश्च भक्षो होतुरेवेत्याशङ्क्यानवानविधानाद्वषट्कारेण विना याज्यामात्रेण पूर्णयष्टृत्वाभावाच्च याज्या वषट्कारस्तन्निमित्तश्च भक्षो यजमानस्यैवेत्याह—

याज्या वषट्कारभक्षा यष्टुरेव न होतृगाः ॥

१८

फलचमसो ● ननु 'यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं बिभक्षयिषेदि'ति प्राकृतभक्षानुवादेन वा फलचमसस्य तत्र च पेषणदधिमर्दन

संस्कारद्वयविधौ वाक्यभेदाद्वैरूप्याच्च रेवतीवारवन्तीयवत् संपिष्येति क्त्वाप्रत्ययाद्भावनाविशिष्टभावनाविधिना विशिष्टभक्षविधिरेवाङ्गीकर्त्तव्यः । ततश्च स भक्षः सजातीयं भक्षगतमेव सोमं बाधते न यागगतम्, उपक्रमोपसंहाराभ्यां श्रुतत्वादित्याशङ्क्याह—

स्तिभिनीभिश्च यागः स्यात्,

नात्रापूर्वो भक्षः । स किं अर्थकर्म संस्कारो वा ? नाद्यः, अदृष्टार्थत्वापत्तेः तमित्यत्र लक्षणापत्तेश्च । नान्त्यः, फलचमसभक्षस्यानन्तरमुपयोगाभावेन भूतोपयोगाभावेन च संस्कार्यत्वायोगात् । सोमानिवृत्तौ 'न गिरा गिरे'तिवन्निषेधानुवादायोगाच्च । तेनात्र भक्षयतेः निर्वपतिवत्प्राकृतभक्षानुवादित्वाद्गुणद्वयविशिष्टभक्षलक्षितयागसाध्यकफलचमसकरणकभावनान्तरमेव विधीयते । अतो न वैरूप्यं वाक्यभेदो वा । लक्षितयागोद्देशेन फलचमसविधानाच्च तमित्यस्य साधनलक्षणा । तेनेज्याविकार एव फलचमसः । एवं पूतीकेष्वपि ॥

१६

अनुप्र ● ननु राजसूयान्तर्गतदशपेये 'दशदशैकैकं चमसमनुप्रसर्पेयुः, शतं ब्राह्मणाः सोमान् भक्षयन्ती'त्यत्र दशदशेत्यत्रानुप्रसर्पेयुरिति विधिश्रुतेः सङ्ख्यया च प्राकृतसङ्ख्यामात्रबाधाच्छतं ब्राह्मणा इत्यस्य च छत्रिन्यायेन यथा प्राप्तानुवादत्वात्प्राकृतजात्यबाधाय यजमानचमसे दश राजन्यानामेव भक्षोऽस्त्वत आह—

भक्षे स्युः ब्राह्मणाः शतम् ।

न कृत्स्नस्य शतवाक्यस्यानुवादत्वं सम्भवति । दशदशेति विधौ विशेष्याश्रवणेन शतवाक्यस्य दशवाक्यप्राप्तशतानुवादेन ब्राह्मणरूपकर्तृ विशेषमात्रविधायित्वात् । तेन राजन्यचमसे दश ब्राह्मणैरेव प्रतिपत्तिसिद्धेर्न यजमानस्य भक्ष इति फलचमसभक्षे राजकर्तृकत्वापवादः प्रसङ्गादुक्तः ॥

तृतीयस्य पञ्चमः पादः ॥

षष्ठः पादः

१

तत्सर्वार्थं ● एवमनारभ्यवादप्रसङ्गाच्छेषविचारमुक्त्वा पुनरनारभ्यवादचिन्ता । ननु जुह्वाः प्रकृतौ विकृतौ च सत्वात्तदुद्देशेन 'यस्य पर्णमयी जुहू'रित्यादिना विहितं पर्णत्वं प्रकृतिविकृतिसाधारणमस्त्वत आह—

अनारभ्याधीतपर्णत्वादेः प्रकृतिगामिता ।

किमयं पर्णताविधिर्विकृतौ चोदकात्पूर्वं प्रवर्तते पश्चाद्वा ? नाद्यः, चोदक-

मन्तरेण जुह्वा अप्राप्तेः। अन्त्ये तु पर्णत्वस्य जुह्वा सहैव प्राप्तेर्व्यर्थस्तद्विधिः। तेन द्विरुक्तिदोषात्प्रकृत्यर्थमेव पर्णत्वम् ॥

२

प्रकरण ● ननु 'सप्तदश सामिधेनीरनुब्रूयादि'त्यनारभ्याधीतसाप्तदश्यस्य पर्णतान्यायात् प्रकृतावेव निवेशोऽस्त्वत आह—

साप्तदश्यं पाञ्चदश्यावरोधात् विकृतौ भवेत्।

न पाञ्चदश्यावरुद्धायां प्रकृतौ साप्तदश्यस्य निवेशः सम्भवति। तेन पाञ्चदश्यसाप्तदश्ययोः सामिधेनीसम्बन्धे वाक्यीयेऽपि सामिधेनीपदेऽपूर्वसाधन-लक्षणाच्छीघ्रं पाञ्चदश्यवाक्ये क्रत्वर्थताबोधः। साप्तदश्यवाक्ये त्वव्यभिचरित-क्रतुसम्बन्धिसामिधेनीरूपलिङ्गेन कथञ्चित्क्रतुं हृदयमागमय्य तदेकवाक्यता-कल्पनं विप्रकर्षः। तेन प्रकृतावनिवेशाद् विकृतावेव निवेशः। तत्रापि न सर्वासु, किन्तु श्रुतसाप्तदश्यास्वेवेति वक्ष्यते ॥

३

नैमितिकम् ननु 'सप्तदश वैश्यस्ये'ति प्रकृतौ श्रुतं नैमित्तिकं साप्तदश्यं-'एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्ये'ति काम्यं चैकविंशतित्वं पूर्ववद्विकृतिपरम्। यद्वा द्वयोः प्राकरणिकत्वात्क्रत्वर्थत्वाच्च विकल्पोऽस्त्वत आह—

नैमित्तिकञ्च काम्यञ्च प्रकृतौ नित्यबाधकम्।

न विशेषतः श्रुतस्य पश्चात्तनस्य निरवकाशस्य च साप्तदश्यस्य सामन्यतः पूर्वं श्रुतेन विप्रादिकर्तृके प्रयोगे सावकाशेन च पाञ्चदश्येन बाधः सम्भवति। यतो बाधितं सदुत्कृष्येत। नापि विकल्पः, तुल्यबलत्वाभावात्। तस्माद्धेतुत्रयेण नैमित्तिकं नित्यबाधकम्। एवं नैमित्तिकोक्तहेतुत्रयापुरुषार्थसमापत्या च काम्यस्य नित्यनैमित्तिकबाधकत्वं द्रष्टव्यम् ॥

४

इष्ट्यर्थं ● नन्वाधानस्य पवमानेष्ट्यर्थाग्निसंस्कारद्वारा इष्ट्यङ्गत्वमि-ष्टीनान्तु विश्वजिन्न्यायेन फलार्थत्वमस्त्वत आह—

अग्न्यर्थमेवाधानं स्यान्नेष्ट्यङ्गन्तास्तदर्थकाः ॥

नाधानस्येष्ट्यङ्गत्वं सम्भवति। उभयोर्द्वितीयाश्रुत्या भाष्योक्तेन 'यदा हवनीये जुहोती'ति प्राकरणिकवाक्येन च क्रत्वङ्गाग्न्यर्थत्वेनान्योन्याङ्गत्वा-भावात्। तेनाधानं नाङ्गम् ॥

५

तत्प्रकृत्यर्थम् ● नन्वाधानस्य पर्णतान्यायात्क्रत्वङ्गत्वमस्त्वत आह—

आधानं न क्रतोरङ्गं पूर्वं साध्यानुपस्थितेः।

नाधानं क्रत्वङ्गम् । स्वकाले वसन्तादौ क्रियमाणस्य तस्यागृह्यमाणविशेषत्वेन सर्वार्थत्वयोगेनाग्न्यर्थत्वात् । न चाग्निस्वरूपार्थत्वे वैय्यर्थ्यादपूर्वसाधनलक्षणया पर्णतादिवद्वाक्येनैव क्रत्वर्थत्वमिति वाच्यम् । यूपादिवदाहवनीयादिस्वरूपस्यालौकिकत्वेनाधानेष्टिभिर्विना तत्स्वरूपस्यैवासिद्धेः । तेनाधानवाक्यात्पूर्वं यदाहवनीयवाक्यप्रवृत्या साध्यानुपस्थितेस्तदर्थत्वेऽपि नानर्थक्यम् । अतो न क्रतुपर्यन्तं गमनम् । न च 'सोमेन यक्ष्यमाणोऽग्नीनादधीते' त्याधानस्य लृटा सोमयागाङ्गत्वमिति वाच्यम् । तथात्वे 'प्रणीताः प्रणेष्यन् वाचं यच्छती'त्यत्रापि लृटा प्रणयनार्थत्वापत्तेः । तेन यथा तत्र लिङ्गेन मनःप्रणिधानार्थत्वाद्वाग्यमस्य न प्रणयनार्थत्वम्, तथात्रापि सामर्थ्यरूपलिङ्गेनाधानस्य सर्वार्थत्वान्न सोमार्थत्वम् । लृट्श्रुतिस्तु सोमप्राक्काल इत्येव नेया ॥

६

तासामग्निः ● ननु पवमानेष्टिषु चोदकेन पवमानेष्टिसंस्कृताग्निप्राप्तेस्तत्रापि ताः कार्याः, न चानवस्था । तस्मिन्नहनि यावतीः शक्नुयात्तावतीः कुर्यादित्येवं सामर्थ्येन व्यवस्थासिद्धेरित्याशङ्क्याह--

पावमानेष्टौ तु सा नाङ्गम् ,

नातिदेशेनासां प्राप्तिः, प्रकृत्यनङ्गत्वेन पवमानेष्टिविधिदशायाञ्च प्रकृतावसत्वेनातिदेशायोगात् । तेन पवमानेष्टीनामग्नयः साध्या एव न साधनमिति न तास्वग्न्यर्थत्वेनेष्टयः । न च पवमानेष्टौ आहवनीयाभावात्कथं होम इति वाच्यम् । सम्पूर्णस्याहवनीस्याभावेऽप्याधानादिजन्यकिञ्चित् संस्कारविशिष्टस्य सत्वेन तत्र होमसम्भवादित्यन्यत्र विस्तरः ॥

७

तुल्यः सर्वेषाम् ● एवं प्रकरणस्य पूर्वैः सह विरोधाविरोधमुक्त्वा स्थानस्य तमाह—

पूर्वैः स्थानस्य चिन्तनम् ।

ननु ज्योतिष्टोमप्रकरणाधीतानां पशुधर्माणामुपाकरणादीनामानर्थक्यतदङ्गन्यायेन तदङ्गभूतेष्वग्नीषोमीयसवनीयानुबन्ध्येष्ववतारादविशेषणं त्रितयसाधारणत्वं न त्वग्नीषोमीयमात्रार्थत्वमत आह—

दैक्षाङ्गं पशुधर्मा स्युः,

नात्राविशेषः । पशुधर्माणामग्नीषोमीयस्य चौपवसथ्येऽन्ह्यालम्भनेन तेषां स्थानप्रमाणेन दैक्षाङ्गत्वात् । न च सवनीयोऽपि'आग्नेयः पशुरग्निष्टोम'इत्यादिना औपवसथ्येऽन्ह्याम्नात एवेति वाच्यम् । तदाम्नानेऽस्य 'यथा वै मत्स्य' इत्यादि निन्दापूर्वं सवनीये प्रचारविप्रकर्षरूपगुणार्थत्वात् । उत्पत्तिविधिस्तु सवनीयस्य 'आश्विनं ग्रहं गृहीत्वे'त्यादिना सुत्याह एव । तेन तस्य नावान्तरप्रकरणम्,

न वा स्थानम्। स्थानादग्नीषोमीयार्था एव धर्माः, इतरयोस्त्वतिदेशाद्गच्छन्ति। युपच्छेदादयस्तु दीक्षाकालत्वात्सर्वार्था इति विशेषः॥

८

दोहयोः ● नन्विष्टौ शाखाच्छेदनादीनां पूर्वेद्युरनुष्ठानादनुष्ठानसादेश्यात्सायन्दोहमात्रार्थत्वमस्त्वत आह—

दोहधर्मा द्वयोर्मताः॥

नात्रानुष्ठानसादेश्यं दधियागस्य परेद्युरेवानुष्ठानेन तदभावात्। तेन महाप्रकरणादुभयदोहार्थत्वम्॥

९

तद्वत्सवनान्तरे ● ज्योतिष्टोमे 'उपोप्तेऽन्ये ग्रहाः साद्यन्त' इत्यादि प्रातःसवनसन्निधौ श्रुता ग्रहधर्माः न तन्मात्रार्थाः, किन्तु महाप्रकरणात्सर्वग्रहार्था इत्याह—

ग्रहधर्मास्तु सर्वार्थाः प्रातःसवनिका अपि।

१०

रशना च ● ननु 'परिव्ययत्यूर्वं रशने'ति यूपपरिव्याणाङ्गभूताया रशनायास्तद्धर्माणाञ्च दर्भमयीत्वादीनामग्नोषोमीयसंनिधौ श्रुतत्वादितरपशुधर्मवदग्नीषोमीयार्थत्वमेव। सौत्यपरिव्याणे त्वतिदेशात् प्राप्तिरस्त्वत आह—

धर्माणां रशनायाश्च परिव्याणद्वयेऽङ्गता॥

न सवनीयोत्पत्तिवाक्ये त्रिवृत्त्वानुवादो धर्मसाधारण्यं विनोपपद्यते। तेन श्रुत्यैतद्रूपसम्बन्धिपरिव्याणाङ्गत्वाद्रशनाधर्माणां यूपधर्मत्वेन साक्षात्पशुधर्मत्वाभावाच्च न साधारण्यम्॥

११

आराच्छिष्ट ● सोमे 'ग्रहं संमार्ष्टी'त्यादयो ग्रहधर्माः न प्राकरणिकानामेव किन्तु वाक्यादनारभ्याधीतानामप्यंश्वदाभ्यानामित्याह—

अंश्वदाभ्येऽपि वाक्येन ग्रहधर्माः समा मताः॥

१२

अग्न्यंग ● अग्निप्रकरणाधीतानामखण्डामकृष्णामित्येवमादीष्टकाधर्माणामनारभ्याधीतेष्टकासाधारण्यमाह—

इष्टकानाञ्च ये धर्माश्चित्रिण्यादौ च ते समाः।

१३

नैमित्तिक ● ननु नैमित्तिकं फलचमसाद्यपूर्वसाधनत्वादभिषवादिधर्मसम्बन्धे व्रीहियवादिवत्सोमेन समानविधानमस्त्वत आह—

नैमित्तिकन्तु नित्येन तत्समानं विविच्यते॥

न धर्माणां नित्यसोमद्वारेण सम्भवत्यनित्यद्वारा तत्सम्भवति, नित्यानित्य-संयोगविरोधात्। राजन्यवैश्यपक्षेऽपि सोमस्य सत्वेन तदर्थत्वेन नैराकाङ्क्ष्यात्, यदि शब्देनानित्यत्वावगमाच्च। व्रीहियवानान्त्वनुष्ठानतोऽनित्यत्वेऽपि विधितो नित्यत्वाद्धर्मैरवैरूप्यमिति विशेषः। तेन फलचमसे यजमानचमसयज्यभ्यासज-न्यापूर्वभेदेनातिदेशाद्धर्मप्राप्तेर्न सामानविध्यम्॥

१४

प्रतिनिधिश्च ● ननु नीवारादिप्रतिनिधेरपि मुख्याभावनिमित्तकत्वाद-समानविधित्वमस्त्वत आह—

मुख्याभावे प्रतिनिधिः समानविधिरेव तु।

नात्र नीवाराणां तत्वेन साधनता किन्तु तद्गतानां विकलानां व्रीह्यवयवा-नामेव। तेन द्रव्यान्तराभावान्नातिदेशः। किन्तूपदेशादेव धर्मलाभः॥

१५

नियमार्थाः ● ननु 'यदि सोमं न विन्देत् पूतीकानभिषुणुयात्' इत्यत्र सोमाभावेऽन्यस्य स्थानापत्त्या विधानादतिदेशाद्धर्मलाभोऽस्त्वत आह—

पूतीकेषु प्रतिनिधिर्नियमात्स्यात् समानता॥

नात्र सोमाभावे पूतीकानां यागे विधानम्, अदृष्टार्थत्वापत्तेः किन्तु सोमा-वयवोपादित्सया प्रतिनिधिनियम एवायं नाभावे विधिरिति षष्ठे वक्ष्यते। तेनात्रापि सामानविध्यम्॥

१६

संस्थास्तु ● ननु ज्योतिष्टोमप्रकरणे श्रुतास्वग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रः अप्तोर्याम इति संस्थास्वग्निष्टोमसंस्थाकदी-क्षणीयाद्यङ्गविधानं साधारणमस्त्वत आह—

संस्थानामसमानत्वाद्धर्माःस्युरतिदेशतः।

न पशुकाम उक्थ्यं गृह्णीयादि'त्यादि वाक्यैः फलार्थं विधानेन फलचमसवद-नित्यानां संस्थानां नित्यधर्मग्राहकत्वं सम्भवति, नित्यानित्यसंयोगविरोधात्। तेनाङ्गानामपूर्वक्रत्वर्थत्वात् प्राक्तनक्रिया विधिसमये व्यावृत्तानामङ्गविधीनां पश्चात्तने गुणकामे विरम्य व्यापारप्रसङ्गाच्चातिदेशादेव संस्थासु धर्मा इत्य-सामानविध्यम्॥

तृतीयस्य षष्ठः पादः

सप्तमः पादः

१

प्रकरणविशेषात् ● नन्विष्टौ 'वेद्यां हवींष्यासादयति' 'बर्हिषि हवींष्या-

सादयती'ति प्रकरणेन प्रधानहविषामेव ग्रहणाद् 'वेदिं खनति' बर्हिर्लुनाती'त्यादि-श्रुतानां वेदिर्बर्हिस्तद्धर्माणां प्रधानमात्रार्थत्वमस्त्वत आह—

वेदिर्बर्हिश्च तद्धर्मा वाक्यादङ्गप्रधानगाः ।

न 'वेद्यां हवींष्यासादयती'त्यत्र प्रधानार्थहविरासादनद्वारा प्रधानापूर्वं वेद्यां कुर्यादित्यर्थः । किन्त्वङ्गहविषामप्याधारापेक्षत्वाद्यद्दर्शपूर्णमासोपकारि हविस्तद्वेद्यामिति । तेन वाक्यादङ्गप्रधानार्था धर्माः ॥

२

फलसंयोगात्तु ● ननु 'यजमानः केशश्मश्रु वपते' इति शानचा कर्तुरुक्ते-स्तस्य चाङ्गप्रधानसाधारण्यमस्त्वत आह—

केशश्मश्र्वादिवपनं नाङ्गाङ्गं तत्प्रधानगम् ॥

नाङ्गानां गुणभूतकर्त्रर्थत्वं सम्भवति, द्वयोः परार्थत्वात्, ऋत्विक्ष्वति-प्रसङ्गाच्च । किन्तु यजमानस्य द्व्वाकारत्वाददृष्टरूपेण प्रधानभूतेन भोक्तृत्वेनैव धर्माणां सम्बन्धः । तेन फलस्वामित्वरूपभोक्तृत्वस्य प्रधानमात्रजन्यत्वात्तदर्था एव धर्माः ॥

३

चिकीर्षया च ● ननु सौमिकी वेदिः 'इयति शक्ष्यामहेऽस्यां कर्तुमि'ति प्रधानमात्रस्य चिकीर्षितत्वात्तदर्थास्त्वत आह—

अङ्गप्रधानेषु समा सौमिकी वेदिरिष्यते ।

न प्रधानमात्रं चिकीर्षितम् । किन्तु साङ्गम् । तेन साङ्गचिकिर्षया सर्वार्था वेदिः ॥

४

तथाभिधानेन ● नन्विष्टौ 'चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रामा-वास्याया'मित्यत्र पौर्णमास्यमावास्याशब्दयोः प्रधानवचनत्वात्तद्धविर्मात्रार्थत्वम-स्त्वत आह—

चतुर्होत्राभिमर्शः स्यात्प्रधानाङ्गहविःसमः ।

न कालकर्मतत्समुदायानामाभिमर्शनं सम्भवति । तेन द्वितीयेयं सप्तम्यर्थे । 'आसन्नानि हवींष्यभिमृशती'ति वाक्याच्च । तेन फलद्वारेण प्रयोगद्वारेण वा व्यवस्थार्थमिदं श्रवणमिति सर्वार्थौ मन्त्रौ ॥

५

दीक्षादक्षिणम् ● ननु दीक्षाणां दीक्षितार्थत्वात्तस्य चाग्नीषोमीयादौ उपादीयमानत्वाच्च प्रधानार्थत्वम् । दक्षिणानां चानमनार्थत्वात्तस्य च साधारण-त्वात् 'दीक्षाः सोमस्ये'ति षष्ठ्याश्च परम्परयाप्युपपत्तेः चिकीर्षान्यायेनाङ्गप्रधाना-र्थत्वमस्त्वत आह—

दीक्षाश्च दक्षिणाश्चैव सोमाङ्गं नाङ्गगाः स्मृताः ।

न वचनस्य साक्षादपेक्षिताङ्गाङ्गिभावपरत्वे सम्भवति न्यायप्राप्तानुवादत्वं सम्भवति । तेन प्रधानमात्रार्थत्वम् । एवं दक्षिणानामपि । यस्त्वङ्गेषु दीक्षितविनियोगः स पुरोडाशकपालवत्परप्रयुक्तस्येत्यवगन्तव्यः ।।

६

तथा यूपस्य वेदिः ● ननु पशौ'अर्धमन्तर्वेदि मिनोति' अर्धं बहिर्वेदीत्यत्र देशलक्षणाया अन्याय्यत्वाद्वेद्येकदेशस्य यूपार्धाङ्गत्वेन विधावर्धं बहिर्वेदीत्यस्यानुवादत्वाद्वेद्येकदेशो यूपाङ्गमस्त्वत आह--

वाक्येऽन्तरालं लक्ष्यं स्यादर्धान्न बहिरित्यतः ।

न अन्तर्वेद्यर्धविधौ बहिर्वेद्यर्धं सिध्यति, एकेनैकस्यासिद्धेः । उभयविधौ च वाक्यभेदापत्तेः परिसङ्ख्यापत्तेश्च । तेनोपलक्षितो देशविशेष एवात्र विधीयते ।।

७

सामिधेनीः ● नन्वग्नीषोमीये पशौ'उत यत्सुत्वन्ति सामिधेनीस्तदन्वाहुरि' त्यत्र पूर्ववद्वाक्यभेदाभावाद्देशे लक्षणापत्तेश्च दक्षिणाहविर्धानमेव सामिधेन्यङ्गमस्त्वत आह—

लक्ष्यो देशो हविर्धानात्सामिधेन्यङ्गमिष्यते ।।

न हविर्धारणे निराकाङ्क्षस्य शकटस्य सामिधेन्यङ्गत्वं सम्भवति । तेन प्रकृतितः सामिधेन्यङ्गत्वेनाहवनीयप्रत्यक्देशस्यानियमेन प्राप्तौ नियमार्थमिदं विधानम्, तेनात्रापि देशलक्षणा ।।

८

शास्त्रफलं ● इदानीं समाख्यायाः पूर्वैः सह विरोधाविरोधौ विचार्येते इत्याह--

पूर्वैः सह समाख्याया विरोधस्याथ चिन्तनम् ।

नन्विष्टचादौ यजेतेत्येकत्वादात्मनेपदाच्च कर्त्तुरेव फलान्वयात्तस्यैवैकस्य कर्तृत्वं दक्षिणादिकन्त्वदृष्टार्थमशक्तपरं वा । तेन नाना कर्तार इत्यत आह--

दर्शादौ ऋत्विजो नाना स्वामिनस्त्याग एव तु ।।

न दक्षिणादेरपाक्षिकत्वे दृष्टार्थत्वे च सम्भवति आत्मनेपदात्फलं स्वामिनः कर्त्तृत्वन्तु प्रयोजकत्वेनाप्युपपन्नम् । तत्र उत्सर्गे दक्षिणादाने च स्वामिनः कर्तृत्वम् । अन्यत्र ऋत्विजाम् ।।

९

तत्रार्थात् ● नन्वध्वर्य्वादिशब्दानां कर्मनिमित्तत्वादेकस्यैव पाचकलावकवत् तत्तत्कार्यवशेन नानासंज्ञोपपत्तेः ऋत्विक्ष्वनियमोऽस्त्वत आह—

संज्ञा वरणभेदात्स्युर्भिन्ना होत्रादयश्च ते ।

न कर्मनिमित्ता एते शब्दाः, प्रवृत्तेः पूर्वमेव 'स ब्रह्माणं वृणीते' 'होतारं वृणीते' इति संज्ञानां श्रवणात् । तेन वरणानां भिन्नत्वात् तेषाञ्च दृष्टार्थत्वाद्या-वद्वरणं वरीतव्याः ॥

१०

चमसाध्वर्यवश्च ● 'चमसाध्वर्यून् वृणीते' इत्यत्र चमसेष्वध्वर्युवद्भवन्तीति योगेन वृतेष्वेव संज्ञोपपत्तेर्नान्य इत्याशङ्क्य वरणभेदात् चमसाध्वर्यूणां भेदः तदाह—

तद्भिन्ना बहवश्च स्युः,

११

उत्पत्तौ तु ● ननु चमसाध्वर्यूनिति बहुत्वस्य संस्कार्यगतत्वेनाविवक्षि-तत्वात्तेषामनियमः यद्वा बहुत्वस्य त्रित्वे पर्यवसानमस्त्वत आह—

चमसाध्वर्यवो दश ॥

नात्र बहुत्वाविवक्षा । चमसाध्वर्यूणां वरणसंस्कार्यत्वेनाप्यन्यथानुपपत्या वृतैश्चमसाध्वर्युभिः क्रतुं कुर्यादित्यनेनैव वाक्येन क्रतौ विनियोगेन बहुत्वस्योपा-देयगतत्वेन विवक्षितत्वात् । यद्वा उद्देश्यविशेषणस्याप्यप्राप्तौ उपनयने ब्राह्मण-गताष्टत्वादेरिव विधेयत्वमेव । तदुक्तम् 'विशेषणविवक्षायां कारणं तद्विधिरिति । न च बहुत्वस्य त्रित्वे पर्यवसानम् । वरणभेदेन चमसदशत्वेन दशपेये दश दश चमसाध्वर्यव इति दशत्वानुवादलिङ्गेन च तेषां दश सङ्ख्याकत्वावगमात् । तेन दशैव ते ॥

१२, १३

शमिता च उपगाश्च लिङ्गदर्शनात् ● शमिता तु 'पराङावर्तत' इति वचनादध्वर्युभिन्नः, तेष्वेवान्यतमो न त्वन्यः, संज्ञाया यौगिकत्वात् पृथग्वरणा-नुक्तेश्च । एवं चत्वार उपगातारोऽपि तन्मध्य एव न त्वन्ये इत्याह—

शमिता चोपगातारस्तेष्वेकः

१४

विक्रयी त्वन्यः ● संज्ञाया यौगिकत्वेऽपि सोमविक्रयी अन्य एव । क्रत्व-र्थोपात्तानां तेषामवैधे लोभार्थे विक्रये कर्तृत्वायोगादित्याह—

अन्यस्तु विक्रयी

१५, १६

कर्मकार्यात् ● ननु ऋत्विक् शब्दस्य ऋतुयजननिमित्तवरणोक्तेश्च चससाध्वर्यूणामपि ऋत्विक्त्वमस्त्वत आह

चमसाध्वर्यवो नैव

ऋत्विजः, किन्तु षोडशानां नात्र ऋतुयजनमात्रं निमित्तम्, 'सप्तदशर्त्विजः' इति वचनानुरोधेन ऋतुयजनविशेषस्य वरणविशेषस्य च निमित्तत्वाव गमात्। तेन योगरूढ्या चमसाध्वर्य्वादिभिन्नानां सप्तदशानामेव ऋत्विक्त्वम्॥

१७

नियमस्तु ● सप्तदशानामपि नानियमः, किन्तु ब्रह्मणेऽग्नीधे ददातीत्युक्तेस्तेषामेव॥

१८

स्वामि सप्तदशाः ● अत्र भाष्ये पृथग्वरणाभावात्सदस्यं सप्तदशमाशङ्क्य वरणस्य दृष्टार्थत्वादन्यस्यादृष्टार्थत्वादन्यस्य कर्तव्यपदार्थाभावाद् ब्रह्मैव सदसिभवत्वात्सदस्य इत्युक्तम्। तदाह भाष्ये ब्रह्मा सप्तदश इति। वार्तिके तु रूढ्या योगार्थबाधाद् ब्रह्मणश्च वरणसंज्ञान्तरवैयर्थ्यान्न तत्सहिताः सप्तदश नाप्यन्यसहिताः। द्वादशाहे दीक्षादक्षिणवाक्ययोस्तस्यासङ्कीर्तनात्, तेन स्वाम्येव सप्तदश इत्युक्तम्। तदाह—

स्वामी स्यादिति वार्तिके

१९

ते सर्वार्थाः ● ननु सर्वेषामृत्विजां सर्वकर्मसु शक्तत्वाल्लिङ्गेन प्रकरणेन च सर्वैः सर्वं कार्यम् न तु समाख्यानुरोधेन नियम इत्यत आह—

तेषां व्यवस्थित्वं कार्यम्।

नात्र समाख्यायाः लिङ्गप्रकरणाभ्यां सह विरोधः, किन्तु लिङ्गप्रकरणाभ्याम नियमेन प्राप्तौ हौत्रं होत्रेत्येवं समाख्यया नियममात्रकरणात्। तेन व्यवस्थैव॥

२०

अग्नयश्च ● 'यदाहवनीये जुहोती' ति होमार्थं विहिता अग्नयोऽपि न पर्णतादिवत्प्रकृत्यर्थाः किन्त्वनारभ्याधीतत्वेन प्रकृतिसमकालमेव विकृतावपि विधानात् सर्वार्था इत्याह—

होमाङ्गन्त्वग्नयस्समाः॥

२१

प्रैषानुवचने ● प्रत्यक्षवचनेन सिद्धे समाख्याबाधे इदानीं तद्विशेषचिन्ता। 'मैत्रावरुणः प्रेष्यति चानु चाह' इत्यत्रोद्देश्यविशेषणसाहित्याविवक्षया केवल प्रैषे अनुवाक्यायां वा मैत्रावरुणविधिमाशङ्क्य केवलप्रैषेऽध्वर्योः केवलानुवचने च होतुः प्राप्तत्वेऽपि प्रैषसहिते 'होता यक्षदग्निं सुसमिद्धा समिद्ध' मित्यनुवचने तुभयबाधेन मैत्रावरुणविधेः चकारेण च सहितयोस्तदुद्देशेन वाक्यभेदाभावात् सिद्धः प्रशास्तुर्विधिरित्याह—

प्रैषयुक्तेऽनुवचने प्रशास्तुर्विधिरिष्यते ॥

२२

चमसांश्चमसाध्वर्यवः ● ननु चमाध्वर्यवं इति विशेषसमाख्यया सामान्य समाख्याया बाधाच्चमसैश्चमसाध्वर्यूणामेव होमोऽस्त्वत आह—

चमसेऽध्वर्युरेव स्यादन्ये वा तदसम्भवे ॥

नात्र विशेषसमाख्यया सामान्यसमाख्याया बाधः। चमसेष्वध्वर्युवद् भवन्तीति सामान्यसमाख्यासापेक्षया विशेषसमाख्ययाऽध्वर्योरपि प्राप्तेः। तेनाध्वर्युर्मुख्यः, तदभावे चमसाध्वर्यूणां होमः ॥

२३

वेदोपदेशात् ● नन्वौद्गत्रे आध्वर्यवे च समाम्नातयोः श्येनवाजपेययोः ज्योतिष्टोमविकारत्वेनातिदेशान्नानाकर्तृप्राप्तावप्युपदेशेनातिदेशबाधात् प्रधानवेदसमाख्यात एवाध्वर्युरुद्गाता च साङ्गं कर्ताऽस्त्वत आह—

वाजपेयश्येनयोस्तु ऋत्विजः प्रकृताविव।

नात्रातिदेशस्य बाधः, तस्य प्रयोगविधितः पूर्वभावित्वेन प्राप्तपदार्थानां सकर्तृकाणामेव प्राप्तेः। तेन श्येनादौ प्रकृतिवन्नानैव कर्तारः ॥

तृतीयस्य सप्तमः पादः ॥

अष्टमः पादः

१

स्वामिकर्म ● द्वादशशतदक्षिणादानरूपस्य परिक्रयस्याध्वर्यवत्वेऽपि न समाख्यया तत्राध्वर्योः कर्तृत्वम्, किन्तु लिङ्गेन समाख्यां बाधित्वा स्वामिन इत्याह—

परिक्रयः स्वामिनः स्यान्नाध्वर्योस्तु समाख्यया।

२

संस्कारास्तु ● केशश्मश्रुवपनादयोऽपि संस्काराः न समाख्ययाध्वर्योः, किन्त्वात्मनेपदात् क्रियाफलस्य स्वामिगतत्वाच्च स्वामिन एवेत्याह—

श्मश्रुवापादयोऽप्येवम्,

एवं स्वामिन इत्यर्थः ॥

३

तपश्च ● एवं 'द्व्यहं नाश्नाति' इत्यादितपोऽपि नाध्वर्योः, किन्त्वधर्मनिवर्त्तकत्वेन फलापूर्वोपयोगित्वात्स्वामिन एवेत्याह—

तपोऽप्यनशनादिकम् ।

स्वामिन इत्यनुषङ्गः ॥

४

गुणत्वाच्च ● क्वचित् वचनादृत्विजामपि ।

संस्कारास्तपांसि च भवन्ति । यथा 'हिरण्यमालिनः प्रचरन्ति' 'ऋत्विज उपवसन्ती'त्यादयः । तेऽपि न समाख्ययैकस्य किन्तु पुरुषाणां संस्कार्यत्वात्सर्वेषाम् ॥

५

तथा कामोऽर्थसंयोगात् ● सोमे 'यदि कामयेत वार्षुकः पर्जन्यः स्यान्नीचैः सदो मिनुयात्' इत्यादिगुणफलमानेऽध्वर्योः कर्तृत्वेऽपि न तद्गतम्, किन्तु परस्मैपदात्स्वामिन इत्याह—

सदो मानफलञ्चैवम् ,

स्वामिगामीति शेषः । यत्र तु वचनं यथात्मने च यजमानाय चेति तत्र ऋत्विजोऽपि फलमित्याह—

वचनादृत्विजामपि ।

६

मन्त्राश्चाकर्मकरणाः ● ये 'आयुर्दाग्नेऽस्यायुर्मे देही'त्यकरणभूता मन्त्रास्तेऽपि न समाख्यया अध्वर्योः, किन्तु कर्मफलाशंसनात् स्वामिन एवेत्याह—

आयुर्दाद्याः स्वामिनः स्युः,

७

द्व्याम्नातेषु ● ये मन्त्राः याजमाने आध्वर्यवे च पठिताः 'वाजस्य मा प्रसवेने' त्यादयस्ते पाठद्वयस्य प्रयोगविधिना ग्रहणादुभयसमाख्यया द्वयोरपि भवन्तीत्याह—

वाजस्य मेत्यादयस्तु द्वयोः ॥

८

ज्ञाते च वाचनम् ● इदानीं यजमानमन्त्रप्रसङ्गाच्चिन्त्यते । ननु वाजपेये 'क्लृप्तीर्यजमानं वाचयती'त्यत्राविशेषादुभयोः, यद्वा ज्ञस्य स्वतः प्राप्तेरज्ञस्यैव वाचनमस्त्वत आह—

ज्ञत्वेऽपि वाचयेत्,

नाज्ञस्याधिकारोऽस्ति, तेन ज्ञ एव स्मारणार्थं वाच्यः ॥

९

याजमाने ● दर्शपूर्णमासयोः 'वत्समुपावसृजत्युखाञ्चाधिश्रयतो' त्येवमाध्वर्यवे विहितानां कर्मणां पुनर्याजमाने द्वन्द्वशः कीर्तनं तत्र यजमानस्य विशेष-

समाख्यया प्राप्त्यर्थम् । न च द्व्याम्नातमन्त्रवदुभयकर्तृकत्वार्थम्, एकेन कृताना-मितरेण कर्तुमशक्यत्वात् । किन्त्वाध्वर्यवे विहितानां याजमाने द्वन्द्वताविधिर्गुणा-धानार्थम् । न च द्वन्द्वानि सम्पाद्य यजेतेति क्त्वाप्रत्ययेनात्मनेपदसमानकर्तृक-त्वाद्यजमानस्यैव कर्तृत्वमिति वाच्यम् । प्रयोजकत्वेनापि तत्वोपपत्तेः । तेन वत्सोपावसर्जनादिकमध्वर्योरेवेत्याह--

अध्वर्युणैव कार्यन्तु वत्सस्योपावसर्जनम् ॥

१०

विप्रतिषेधे • नन्वग्नीषोमीये पशौ 'परिवीरसि' 'युवासुवासा' इत्येतयोः करणक्रियमाणानुवादिनोरध्वर्युणा होत्रा च युगपत्प्रयुक्तयोः कौण्डपायिनामय-नेऽतिदेशात्प्राप्तयोः मन्त्रयोः 'यो होता सोऽध्वर्युरि'ति ऋत्विक्समासवचनेन हौत्राध्वर्यवयोरेककर्तृकत्वादेकेन वोभयोः कर्तुमशक्तेरवश्यावहेयेऽन्यतरस्मिन्न नियमो, यद्वा होतुः सिद्धस्वरूपस्याध्वर्यवविधानादजहत्स्वधर्मतया हौत्रमन्त्र एव तस्यास्त्वत आह--

ऋत्विक् समासेऽध्वर्योस्स्यान्मन्त्रो हौत्रं परो वदेत् ।

यद्यपि हौत्रे होतुश्चोदकात्प्राप्तिस्तथापि मुख्यत्वात् श्रुतिवृत्तौ होता जघन्येऽध्वर्युलक्षिते कार्ये विधीयते । तेन वाक्येन चोदकबाधादाध्वर्यवमेत्र वदेत् । हौत्रन्त्वन्यः ।

११

प्रैषेषु च • ननु 'प्रोक्षणीरासादये'त्यादिप्रैषपूर्वके प्रैषार्थानुष्ठाने समाख्यया अध्वर्योः कर्तृत्वमस्त्वत आह--

प्रैषार्थकर्त्तुर्भेदः स्यात् ,

नैकस्योभयत्र कर्तृत्वम् । तथात्वे स्वस्य सम्बोधनबाधादग्नीदित्यादि सम्बोधनानुपपत्तिः स्यात् । तेन प्रैषसमाख्यानाल्लिङ्गाच्चैकः प्रैषमन्यः प्रैषार्थं कुर्यात् ॥

१२

अध्वर्युस्तु • ननु प्रैषार्थानां प्रैषं प्रति प्रधानत्वात्प्रधाने समाख्या मा बाधीति प्रैषार्थे अध्वर्योः प्रैषे वाग्नीध्रस्य कर्तृत्वमस्त्वत आह—

प्रैषश्चाध्वर्युकर्तृकः ।

न प्रैषार्थेऽध्वर्योः कर्तृत्वम्, तथात्वे प्रैषे आध्वर्यवसमाख्यया अत्यन्तं बाधः स्यात् । प्रैषे तु कर्तृत्वे प्रयोजकत्वेनापि प्रैषार्थे कर्तृत्वान्न क्वचित्समाख्या-बाधः । तेनाध्वर्युः प्रैषमन्यश्च प्रैषार्थान् कुर्यात् ॥

१३

ऋत्विक्फलम् • 'ममाग्ने वर्चं' इति करणभूतेऽध्वर्युमन्त्रे प्रकाश्यं वर्चः

प्रभृतिफलं सूक्तवाकस्थायुरादिवद्यजमानस्यैव। न च ममेति षष्ठ्यनुपपत्तिः, तस्याः यजमानव्यतिरेकजनितत्वादित्याह--

ममाग्नेऽध्वर्युमन्त्रेऽपि फलं स्वामिगतं भवेत् ॥

१४

कर्मार्थन्तु ● यत्तु 'मा मा सन्ताप्तमि'त्यसन्तापनादिकं तद्यजमानेन कर्माविघातार्थमृत्विग्गामितयेष्टमिति हेतोर्ऋत्विजामपीत्याह--

मा मासन्ताप्तमिति तु,

ऋत्विजामपीत्यग्रिमेणान्वयः ॥

१५

व्यपदेशाच्च ● यत्रापि 'तन्नौ सहे'ति द्वित्वनिर्देशस्तत्रापि द्वयोः फलमित्याह--

तथा तन्नौ सहेति च ॥

ऋत्विजामपि ॥

१६

द्रव्यसंस्कारः ● वेदिर्बर्हिस्तद्धर्माणामङ्गप्रधानसाधारण्यं पूर्वोक्तं स्मारयति--

वेदिर्बर्हिश्चाङ्गप्रधानगम्,

ननु यस्मात्प्रकृतावङ्गप्रधानार्था बर्हिर्धर्मास्तस्माद्विकृतावपि यूपावटास्तरण बर्हिषि ते सन्त्वत आह--

यूपावटेति।

लौकिकं तृणमित्याग्रिमेणान्वयः। नात्र संस्कृतग्रहणम्। कार्यमुखेनातिदिष्टानां संस्काराणां क्लृप्तकार्येष्वेव प्रवृत्तेः ॥

१७

विरोधे च ● प्रकृतावपि सर्वस्य बर्हिषः स्तरणार्थत्वाद्विधृतिपवित्रादावसंस्कृतग्रहणान्न सर्वार्थतेत्याह--

पवित्रे च विधृतौ लौकिकं तृणम् ॥

१८

अपनयः ● 'पुरोडाशशकलमैन्द्रवायवस्य पात्रेऽवदधाती'त्यत्र शकलस्यैकदेशत्वेन पुरोडाशाप्रयोजकत्वात्संस्कार्यत्वाच्च प्रकृतसवनीयपुरोडाशशकलग्रहणमाह--

ऐन्द्रवायवपात्रादौ प्रकृतं शकलादिकम्।

आदिशब्दात् 'पयस्यां मैत्रावरुणस्ये'त्यादि द्रष्टव्यम् ॥

१९

विकृतौ ● 'यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्या' इत्युपांशुत्वम

'उच्चैः प्रवर्ग्येणे'तिवत्करणत्वनिर्देशाभावान्नाङ्गप्रधानार्थं किन्तु काम्यशब्दोक्ते फलसाधने प्रधानमात्र इत्याह--

काम्येष्टिप्रधानार्थमुपांशुत्वं विधीयते ॥

२०

सन्निधान ● श्येने 'दृतिनवनीतमाज्यं भवती'त्यत्र न दृतिनवनीतत्व-विशिष्टमाज्यं प्रकरणात् प्रधानार्थं सोमप्रत्याम्नानेन विधीयते, किन्तु विशिष्ट-विधिगौरवाद्यत्र श्येनाङ्गेष्विष्टिष्वाज्यमतिदेशात् प्राप्तं तत्रैव दृतिनवनीतत्व-मात्रं विधीयत इत्याह--

दृतौ तु नवनीतं यच्छ्येनाङ्गेष्टिषु तन्मतम् ॥

२१

तत्काले वा लिङ्गदर्शनात् ● ननु यत् श्येनाङ्गत्वेन विहितं 'सह पशूनालभत' इति पशुसाहित्यं सुत्याकालिके सौत्ये दृष्टदृतिनवनीतमपि श्येन-वैशेषिकाङ्गत्वात्सुत्याकालिकेष्वेव श्येनाङ्गेष्वस्त्वत आह--

न सुत्याकालता तस्य किन्तु सर्वेष्टिगं स्मृतम् ॥

न सहालम्भस्य श्येनधर्मत्वात्पशूनां सुत्यकालता, किन्तु सवनीयस्थाने प्रधानप्रत्यासत्तिरूपन्यायान्तरात्। न चात्र सोऽस्ति। तेन वाक्यात् सर्वाङ्गेषु दृतिनवनीतम् ॥

२२

मांसन्तु सवनीयानाम् ● ननु शाक्यानामयने सत्रे 'संस्थिते संस्थितेऽहनि गृहपतिः मृगयां याति तत्र यान् मृगान् हन्ति तेषां तारसाः सवनीयाः पुरोडाशा भवन्ती'त्यत्र पुरोडाशोद्देशेन तरसमयत्वविधौ सवनीयपदस्योद्देश्यविशेषण-त्वेनाविवक्षितत्वात् सर्वपुरोडाशे तरसमस्त्वत आह--

सवनीयहविः सर्वं तारसन्तु विधीयते ।

न पुरोडाशोद्देशेन तरसमयत्वविधानम्। तथात्वे मुख्ये सवनीयपदे छत्रिन्यायेन लक्षणा स्यात्। सवनीयोद्देशेन तु मांसविधौ जघन्ये पुरोडापदे लक्षणा। दृष्टा च सा पुरोडाशानलङ्कुर्वित्यादौ। तस्माद् सवनीयेष्वेव तरसविधिः ॥

इति श्री महामहोपाध्याय श्रीरामकृष्णभट्टसूरिसुनु कमलाकरभट्टात्मजा-नन्तभट्टकृतायां शास्त्रमालावृत्तौ तृतीयस्याष्टमः पादः ॥

तृतीयश्शेषाध्यायस्समाप्तः
पादाः ८, अधिकरणानि १४७

●

चतुर्थः प्रयुक्त्यध्यायः

प्रथमः पादः

१

अथातः क्रत्वर्थ • इदानीं प्रयोजकाप्रयोजकत्वमुच्यते। यद्यपि प्रयोजकत्वं प्रवर्त्तकत्वं विधेरेव, तथापि स कस्मै प्रयोजनाय किमनुष्ठापयति कस्मै नेति चिन्ताशरीरम्। ननु विधेः फलस्य वाऽचेतनत्वान्न साक्षात्प्रयोजकत्वं किन्तु परम्परया। तत्तु क्रत्वर्थेऽपि तुल्यम्। अतो द्वयोः प्रयोजकत्वमस्त्वत आह—

मुख्यं प्रयोजकं शेषी नानुषङ्गिकमिष्यते।

नोभयोः प्रयोजकत्वम्। क्रत्वर्थस्य साध्याधीनानुष्ठानत्वेनाप्रयोजकत्वात्। यदप्यन्यतः सिद्धं साधनमुपजीवति यथा तुषोपवापः कपालं तदप्यप्रयोजकम्। यद्यप्यत्र सर्वे शेषिणः शेषाणां प्रयोजका इति न नियमः तुषोपवापादावभावात्। नापि ये प्रयोजकास्ते शेषिण एवेत्यपि नियमः। निमित्तादेः शेषिणोऽपि तत्वात्, तथाप्युद्देश्यत्वे सति यः शेषी स प्रयोजक इति ध्येयम्॥

२

यस्मिन् प्रीतिरिति द्वितीये लिप्सा सूत्रे चत्वारि वर्णकानीत्याह—

लिप्सासूत्रेऽथ चत्वारि वर्णकानि क्रमेण तु॥

तत्र क्रत्वर्थपुरुषार्थयोर्लक्षणमेकं वर्णकमाह—

पुरुषार्थः प्रीतिहेतुः क्रत्वर्थमितरत्स्मृतम्।

प्रीतिहेतुर्यागः फलञ्च पुरुषार्थम् अन्यत्क्रत्वर्थम्॥

एवं वा। ननु करणादिवत्फलांशस्यापि विधेयभावनाविशेषणत्वाद्विधेयत्वमस्त्वत आह—

रागात्प्रवृत्तिर्न फले विधिः,

न फले विधिः निसर्गसुन्दरे तस्मिन् गतप्रवृत्तेः। न चैतावताऽविवक्षा, भाव्यं विना भावनाभावात्॥

यद्वा गोदोहनादेः क्रतुफलोपकारकत्वेनोभयाङ्गत्वमाशङ्क्योपकारलक्षणशेषत्वाभावात् 'पशुकामस्ये'ति षष्ठीश्रुत्या पुरुषार्थत्वमेवेत्याह—

क्रत्वर्थता न च गोदोहनस्य।

यद्वा ननु द्रव्यार्जनं पुरुषार्थं तत्कार्यस्य क्षुत्प्रतिघातादेर्नियमं विनापि सिध्या तदर्थत्वे नियमवैय्यर्थ्यात्। द्रव्यस्वरूपे चानुपयोगात्। तेन सर्वस्य द्रव्यस्य

क्रत्वर्थत्वे तदाश्रितनियमोऽप्यव्यभिचारात्पर्णतादिवत्क्रत्वर्थोऽस्तु। एवञ्च क्षामवत्यादीनां क्रत्वर्थहिरण्यादिद्वारा क्रत्वर्थत्वान्न फलार्थत्वं भविष्यति इत्यत आह—

द्रव्यस्याप्यर्जने नियमस्य च।

क्रत्वर्थता नेत्यनुषङ्गः। न सर्वस्य द्रव्यस्य क्रत्वर्थत्वं तथात्वे तस्यान्यत्राविनियोगाज्जीवनासम्भवात्क्रतुरेव न स्यात्। किञ्च जीवन्तं प्रत्येव क्रतुप्रवृत्या अवश्यं पुरुषार्थद्रव्यमङ्गीकर्तव्यम्। ततश्च पुरुषार्थेनैव क्रतोः सिद्धौ न क्रतुविधिभिस्तदर्जनाक्षेपः। अर्जनेन च सर्वक्रतूपक्रमाद् 'अपवा एष सुवर्गाल्लोकाच्च्यवते' इत्यनुपक्रमदर्शनञ्च न स्यात्। तेन पुरुषार्थमेव द्रव्यार्जनम्। प्रयोजनं म्लेच्छसेवार्जितेन क्रत्वनुष्ठाने क्रतोर्वैगुण्यम्। सिद्धान्ते तु पुरुषस्यैव प्रत्यवायो न क्रतोर्वैगुण्यमिति॥

३

तदुत्सर्गे ● ननु 'नेक्षेतोद्यन्तमादित्य' मित्यादौ पर्युदासत्वे नञीक्षितिभ्यां सङ्कल्पलक्षणापत्तेर्निषेधे च तदभावान्निषेधत्वमवश्यमङ्गीकर्त्तव्यम्। ततश्च निषेधस्य वैदिकत्वात्प्राप्तिरपि वैदिक्येवेति यत्र कर्माङ्गत्वेनादित्येक्षणं विहितं तत्रैवोद्यतोऽस्तंयतश्च निषेधः कर्माङ्गमस्त्वत आह—

नोद्यन्तं न क्रतोरङ्गम्।

नायं निषेधः। तथात्वे 'तस्य व्रतमि'त्युपक्रमे श्रुतभावरूपव्रतोपक्रमबाधापत्तेः। तेनोपक्रमैकवाक्यतावशात् सामान्यस्य विशेषं विनाऽपर्यवसानाच्चानीक्षणसङ्कल्प एव 'एतावता हैनसा वियुक्तो भवती'त्याद्यार्थवादिकफलकः पुरुषार्थो विधीयते॥

४

द्रव्याणि तु ● इष्टौ 'स्फ्यश्च कपालानि चे'त्युपक्रम्य'एतानि वै दश यज्ञायुधानी'त्यत्राव्यवस्था तृतीये निराकृता। इह तु यज्ञशब्देन प्रकरणादाग्नेयादियागोक्तेस्तत् साधनत्वेन स्फ्यादीत्यायुधशब्देन द्रव्याणि विधीयन्त इत्याशङ्क्य विध्यभावाद्वैशब्दादनन्तरश्रुतासादनविधिशेषत्वाच्चोद्धननादिवाक्यप्राप्तानुवादोऽयं न द्रव्यविधिरित्याह—

तथा यज्ञायुधानि च॥

न क्रतोरङ्गमिति पूर्वेणान्वयः॥

५

तत्रैकत्वं ● ननु 'पशुना येजेते' त्युपादेयश्रुतपश्वादिगतविभक्त्यभिहितैकत्वादिसङ्ख्यायाः पदश्रुत्या पश्वङ्गत्वमेव। ततश्च श्रुत्या वाक्यगम्ययागाङ्गत्वबाधात्सङ्ख्याभावेऽपि क्रत्ववैगुण्यात्सङ्ख्याऽविवक्षितास्त्वत आह—

पशुनेति श्रुता सङ्ख्या न द्रव्याङ्गं क्रतोस्तु सा ।

न द्रव्याङ्गं सङ्ख्या शुद्धस्य तस्याविधेयत्वात् । तेन कारकस्य विधेयत्वात्तदावेशेन सङ्ख्यादीनां विधेर्विधेयत्वेन ग्रहवन्निर्ज्ञातसङ्ख्यत्वाभावाच्च सङ्ख्या विवक्षतैव ॥

६

लिङ्गन्तु ● सङ्ख्यावत्सिंहः सिंहीत्यादिलिङ्गविवक्षामाह—

संख्यावत्तु पशोर्लिङ्गं क्रतोरङ्गं विवक्षितम् ॥

७

आश्रयिष्वविशेषेण ● ननु स्विष्टकृत्पशुपुरोडाशोत्तमप्रयाजादीनां परकीयद्रव्यदेवतासंस्कारद्वारा दृष्टार्थत्वमेव न त्वदृष्टार्थत्वम् । तेनादृष्टार्थत्वाभावाद्द्रव्यनाशे लोप इत्यत आह—

त्यागांशेनाप्यदृष्टर्था मताः स्विष्टकृदादयः ।

द्रव्यदेवतासंस्कारकत्वेऽपि यागस्यादृष्टार्थत्वादुभयार्थत्वम् । तेन द्रव्यनाशे न्यायालोपेऽपि वचनादाज्येनैषामनुष्ठानम् । यद्यपि प्रधानयागेऽपि प्रक्षेपः प्रतिपत्तिकर्म, तथाप्युपयुक्तत्वाभावादुत्तरार्धादिशब्दाभावाच्च नाश्रयित्वम् । प्रक्षेपसमय एवावत्तानवत्तयोर्युगपत्त्यागादित्युक्तं तन्त्ररत्ने ॥

८

अर्थे समवैषम्यं ● एवं क्रत्वर्थपुरुषार्थविचारद्वारा प्रयोजकाप्रयोजकत्वमुक्तम् । इदानीन्तु साक्षात्तदेवोच्यते । प्रतिज्ञासूत्रमिदम् ॥

९

एकनिष्पत्तेः ● 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्रामिक्षावाजिनयोर्दध्यानयनजन्यत्वाविशेषादानयतिवाक्ये च द्वयोरश्रवणादुभयोर्दध्यानयनप्रयोजकत्वमित्याशङ्क्यामिक्षायाः प्रधानभूतपयःपरामर्शितच्छब्दसामर्थ्येन 'जुषन्तां युज्यं पय' इति मन्त्रवर्णेन च प्रदेयपयोरूपत्वात्तस्य च नयतेर्द्विकर्मकत्वेन द्विकर्मकानयतिं प्रति प्रधानत्वात्पयोरूपामिक्षायाग एव दध्यानयनप्रयोजको न वाजिनयागोऽनुनिष्पादिद्रव्यकत्वादित्याह—

न दध्यानयनस्यापि वाजिनं स्यात्प्रयोजकम् ।

वाजिनं तद्यागः ॥

१०

पदकर्माप्रयोजकं ● सोमे क्रयार्थं नीयमानाया गोः 'सप्तमं पदं गृह्णाति यर्हि हविर्धाने प्राची प्रवर्त्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्यादि'त्यत्र दध्यानयनस्य पयोरूपयाऽऽमिक्षयेव नयनस्य क्रयसंयुक्तत्वाभावादेकस्माच्चैकहायनीनयनादक्षा-

भ्यञ्जनस्य क्रयस्य च सिद्धेरुभयं प्रयोजकमित्याशङ्क्य एकहायन्यास्तृतीयया क्रयार्थत्वेन तत्संस्काररूपस्य नयनस्यापि तदर्थत्वात्तेनेत्यन्यप्रयुक्तग्रहणाच्च नाक्षाभ्यञ्जनं प्रयोजकमित्याह—

नाक्षाभ्यञ्जनमप्येकहायनीनयनस्य च ॥

प्रयोजकमित्यनुषङ्गः ।

११

अर्थाभिधान ● 'कपालेषु श्रपयति' 'पुरोडाशकपालेन तुषानुपवपती'त्यत्र कपालस्य तृतीयाश्रुत्या एकहायनीवत्तुषोपवापार्थत्वाच्छ्रपणवत्तुषोपवापोऽपि कपालस्य प्रयोजक इत्याशङ्क्य पुरोडाशार्थमुपात्तस्यान्यत्र विनियोगेन परप्रयुक्तोपजीवित्वान्न तुषोपवापः कपालस्य प्रयोजक इत्याह—

कपाले न तुषोपवापः ।

प्रयोजक इति शेषः ॥

१२

पशावनालम्भात् ● दैक्षे पशौ 'शकृत्सम्प्रविध्यति लोहितं निरस्यती'त्यत्र हृदयादिवाक्ये शकृदादिवाक्ये च पशोरश्रवणात्प्रकृतग्रहणे चोभयोस्समत्वादुभयं पश्वालम्भप्रयोजकमित्याशङ्क्य पशोर्हृदयादिवाक्येऽश्रवणेऽपि विशसनाम्नानेन हृदयादिप्रकृतित्वेनैव यागार्थत्वात् हृदयादीनां वाऽवदानदर्शनेन हविष्ट्वाच्छकृदादीनान्त्वनुनिष्पादित्वात् हविष्ट्वात्प्रतिपत्तित्वाच्च न पश्वालम्भप्रयोजकत्व मित्याह—

न पशोः शकृदादि च ।

पश्वालम्भप्रयोजकमिति शेषः ॥

१३

एकदेशद्रव्यं ● 'उत्तरार्धात्स्विष्टकृते समवद्यती'त्यत्रान्यार्थस्य हविषो देवतान्तरसंयोगायोगात्स्विष्टकृदुत्तरार्धपुरोडाशयोः प्रयोजक इत्याशङ्क्योत्तरार्धादिशब्दानां साकाङ्क्षत्वाच्छेषादिति श्रुत्यन्तराच्चान्यप्रयुक्तद्रव्योपजीवित्वावगमाद्वचनाच्चान्यस्यैवोपादानात्स्विष्टकृद्यागो न प्रयोजक इत्याह—

स्विष्टकृन्नोत्तरार्धस्य द्रव्यस्यापि प्रयोजकः ।

१४

अभिधारणे ● इष्टौ 'प्रयाजशेषेण हवींष्यभिधारयती'त्यत्रोपयोक्ष्यमाणसंस्कारप्राबल्याद्धविस्संस्कारोऽभिधारणं प्रयाजशेषस्य प्रयोजकम् । ततश्च माध्यन्दिने सवने पक्षे वाजपेये ब्रह्मसाम्नि आलप्स्यमानप्राजापत्यपशुवपाभिघारणाय प्रातः सवनानुष्ठितप्रयाजशेषः पात्रान्तरे धारयितव्यः जुह्वा व्यापृततत्वादित्याशङ्क्य प्रयाजशेषेणेति परप्रयुक्तद्रव्यग्रहणादपेक्षितप्रतिपत्तेर्दृष्टार्थ

त्वाच्च नाभिघारणं शेषस्य प्रयोजकम्, किन्तु प्रयाजशेषप्रतिपत्यर्थम्। हविराधारनियमाद्धविस्संकारकमपि। तेन न प्राजापत्यवपाभिघारणार्थं धारणम्। सन्निहितक्रतुपशुवपास्वेव क्षारणेन प्रतिपत्तेर्हविः संस्कारस्य च सिद्धेरिति प्राञ्चः। अस्मत्पितृचरणास्तु नात्र सशेषं होतव्यमिति न्यायो वचनं वास्ति। तथात्वे उपांशुयाजे शेषकार्यापत्तेः। न च शेषासत्वे दृष्टार्थत्वं प्रतिपत्यपेक्षा वा। प्रत्युतानुयाजादौ निःशेष एव होमो दृष्टः तेन शेषाभावात्कथं तस्य संस्कार्यत्वम्, कथञ्च श्रुतिद्वयबाधश्च ? तेनेदं चिन्त्यमित्याहुः। तेनैवं द्रष्टव्यम्-प्रयाजशेषेणेति परप्रयुक्तग्रहणात्तुषोपवापः कपालस्येव नाभिधारणं शेषस्य प्रयोजकम्, स्विष्टकृदिवोत्तरार्धस्य। अतएवाप्रयाजास्ता इत्युपसत्सु हविरर्थत्वेन नोत्पत्तिः। लिङ्गमपि 'सव्या वा एतर्हि वपा यदनभिधारिता यद्ब्रह्मसाम्न्यालभते तेनाभिधारिता' इति। अत्र ह्यनभिघारणानुवादः प्रतिपत्तित्व एव युज्यते। तेनार्धित्वानुवादवद्विकृतावभिधारणाभावं वदन् प्रकृतौ तस्याप्रयोजकतां शेषप्रतिपत्तिताञ्च गमयतीति नाभिधारणं शेषस्य प्रयोजकमित्याह—

न प्रयाजाज्यशेषस्याप्यभिधारः प्रयोजकः ॥

१५

समानयं तु ● इष्टौ 'यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तद्गृह्णाति यदुपभृति प्रयाजानुयाजेभ्यस्तदि'ति श्रुतम्। तत्र वाक्यद्वयेन जौहवौपभृतयोर्विकल्पेन सर्वप्रयाजार्थत्वात्तत्र चौपभृताज्यस्य सर्वप्रयाजादौ जुह्वां समानीतत्वेन चतुर्थप्रयाजकाले उपभृति प्रयाजार्थस्याज्यस्याभावादनुयाजार्थस्यैवाज्यस्य'अतिहायेडो बर्हिः प्रति समानयती'त्यनेन समानयनं संस्कारो विधीयते। तेनेदं समानयनं नान्यस्य तद्धर्माणां वा प्रयोजकमित्याशङ्क्य यदौपभृतं समानयति जुह्वां तदतिहायेड इति कालमात्रनियमेन वाक्यस्योपपत्तौ विशिष्टविधानादृष्टार्थत्वयोरयोगात्तस्मिंश्च काले समानीतेनाज्येन पूर्वेषां कर्त्तुमशक्त्या भिन्नविषयत्वेन विकल्पायोगादातिथ्यायां चतुर्गृहीतान्याज्यानीति लिङ्गाच्चान्त्यप्रयाजद्वयार्थमेवौपभृताज्यस्य समानयनम् तदाज्यस्य प्रयोजकमेवेत्याह—

बर्हिर्यागे त्वानयनमाज्यस्य स्यात्प्रयोजकम्।

१६

तत्रोत्पत्तिरविभक्ता स्यात् ● ननु 'चतुर्जुह्वां गृह्णाति अष्टावुपभृति चतुर्ध्रुवायामि'त्यसंयुक्तोत्पन्नाज्यानां प्रकरणेन सर्वार्थत्वम्। वाक्यानाञ्चानुवादत्वमस्तु अन्यथा 'यदुपभृति गृह्णाति अनूयाजेभ्यस्तदि'ति वचनात्तदपि केवलानूयाजार्थं स्यात्। तच्चानिष्टम्। अथ तस्यानुवादत्वं तथा सतीतरेषामपि तदस्त्वत आह—

व्यवस्था जौहवादीनां प्रयाजेष्वितरेषु च।

न वाक्यानां विधायकत्वे सम्भवत्यनुवादत्वं सम्भवति। यत्तु'अनुयाजेभ्य-

स्तदि'ति तदुभयार्थत्वेनैकार्थत्वसिद्धेरनुवादमात्रम् । न च वैपरीत्यम् । एकार्थत्वेनोभयार्थत्वासिद्धेः । परिशिष्टं ध्रौवन्तु सर्वार्थम् । तेन सिद्धा व्यवस्था ॥

१७

तदष्टसंख्यम् ● 'अष्टावुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तदि'त्यत्र श्रुत्या अष्टसङ्ख्याकं ग्रहणं प्रयाजानुयाजाङ्गत्वेन विधीयते । अन्यथा चतुर्गृहीतद्वये लक्षणापत्तेरित्याशङ्क्य 'चतुर्गृहीतं जुहोती'ति होमरूपप्रधानाङ्गभूतचतुस्सङ्ख्यायाः ग्रहणनिष्ठाष्टत्वसङ्ख्यया बाधायोगाद्ग्रहणमात्राङ्गत्वे चानर्थक्यादातिथ्यायां 'चतुर्ग्रहीतान्याज्यानि भवन्ति न ह्यत्रानुयाजानि'त्यनूयाजाभावस्य हेतुत्वोक्तेश्च चतुर्गृहीतद्वयलक्षणेत्याह—

चतुः सङ्ख्याद्वयं लक्ष्यमष्टावुपभृत्यपि ॥

चतुर्थस्याद्यः पादः ॥

द्वितीयः पादः

१

स्वरुस्त्वनेकनिष्पत्तिः ● 'यूपस्य स्वरुं करोती'त्यत्र श्रुत्या स्वरुसाध्यकभावनोक्तेस्तस्याश्च करणाद्यपेक्षायां यूपशब्देन लक्षणया खादिरत्वच्छेदनादिसमर्पणात्स्वरुः छेदनादेः प्रयोजकः अन्यथा करोतावुपादानलक्षणा यूपादिति वाक्यार्थविधानञ्च स्यादित्याशङ्क्य 'स्वरुणा पशुमनक्ती'त्यत्र स्वर्वपेक्षायां 'यः प्रथमः शकल' इति वाक्येन प्रथमशकलस्य स्वरुत्वोक्तेः कस्य प्रथमः शकल इत्यपेक्षायां यूपस्येति यूपसम्बन्धमात्रबोधनान्न मुख्ये यूपशब्दे लक्षणा, किन्तु जघन्ये करोतावेव । तेनानुनिष्पादी स्वरुर्न छेदनादिप्रयोजक इत्याह—

न स्वर्वर्था यूपधर्माः ॥

२

शाखायां ● 'प्राचीमाहरती'त्यत्र दिश आहरणायोगाद्दिशं प्रत्याहरतीत्युक्तौ तु आहर्त्तव्यस्यानुक्तेः प्रतिशब्दाध्याहारापत्तेश्च नायं दिग्वादः किन्तु वृक्षस्य या शाखा तामाहरतोति शाखावाद एवेत्याह—

न प्राचीदिग्वचस्तथा ॥

३

शाखायां ● 'मूलतः शाखां परिवास्योपवेषं करोती'त्यत्र शाखाशब्देन समूलाग्रोक्तेरग्रमूलयोश्च वत्सापाकरणकपालोपधानादिभिन्नप्रयोजनत्वात्परिवासनेन चोभयोर्विभागमात्रकरणात्'छाखां छिनती'ति छेदनाद्युभयप्रयुक्तमित्याशङ्क्य परिवासनवाक्ये मूलापादानकपरिवासनोक्त्या मूलल्य मूलापादानक-

परिवासनं सर्वमग्रार्थम् मूलन्त्वग्रप्रयुक्तछेदनानुनिष्पन्नं कपालोपधानार्थमुपादीयतं इति न छेदनादिप्रयोजकं मूलम् । तेन करोतौ प्राग्वदुपादानलक्षणेत्याह—

शाखाधर्मा न मूलार्थाः ।।

४

हरणे तु ● 'सूक्तवाकेन प्रस्तरं प्रहरति' इति हरतेर्यागलक्षकत्वोक्तेः 'सह शाखया प्रस्तरं प्रहरती'त्यत्रापि यत्प्रस्तरं प्रहरति तत्सह शाखयेति सहभावात्प्रस्तरवच्छाखापि यागाङ्गम् तत्प्रयुक्तेत्याशङ्क्य सह शाखयेति वाक्ये यागकल्पकस्य सूक्तवाककरणत्वस्याश्रवणात् करणत्ववाक्ये च शाखाया अश्रवणात्सहभावेनाप्राधान्याच्च न शाखायाः यजौ साहित्यम् किन्तु हरण एव । तेन शाखाप्रहरणं प्रतिपत्तिरेवेत्याह—

न शाखाहरणं यजौ ।

प्रयोजकमित्यन्वयः ।

५

उत्पत्त्यसंयोगात् ● इष्टौ 'अपः प्रणयती'ति श्रुतम् । तत्राप्प्रयोजनमपां 'प्रणीताभिर्हवींषि संयौति' 'अन्तर्वेदि प्रणीता निनयति' इति वाक्येनोभयत्र विनियोगादुभयं प्रयोजकमित्याशङ्क्य तृतीयया संयवनार्थत्वात्तदेव प्रयोजकम् । निनयनन्तु द्वितीयासंयोगात्प्रतिपत्तिः । तेन तन्न प्रयोजकमित्याह—

प्रणीतानां निनयनं न प्रयोजकमिष्यते ।।

६

प्रासनवत ● 'मैत्रावरुणाय दण्डं प्रयच्छती'त्यत्र यजमानधारणेन कृतार्थस्य दण्डस्य द्वितीयासंयोगान्मैत्रावरुणाय दानं प्रतिपत्तिरित्याशङ्क्य द्वितीयया दण्डस्य दानकर्मत्वेऽपि दानकर्मणाभिप्रेयमाणस्य ततोऽपि प्राधान्याद् 'दण्डो प्रैषानन्वाहे'ति दण्डस्याग्रे विनियोगाद् दृष्टार्थत्वाच्च मैत्रावरुणार्थदण्डदानं दण्डस्य प्रयोजकमित्याह—

प्रशास्त्रे दण्डदानन्तु दण्डस्य स्यात्प्रयोजकम् ।।

७

उत्पत्तौ ● 'कृष्णविषाणया कण्डूयति चात्वाले कृष्णविषाणां प्रास्यती'त्यत्र क्रत्वन्तःपातिसकलकण्डूयनस्य विषाणाकार्यत्वात् क्रतुसमाप्तेः प्रागकृतार्था विषाणा न प्रतिपत्त्यर्हा । तेन चात्वाले प्रासनमदृष्टार्थं न प्रतिपत्तिरित्याशङ्क्य द्वितीयासंयोगात्प्रागपि कण्डवपनयसत्वेन कृतार्थत्वाच्च प्रतिपत्तिरेव । एवमिडाप्राशित्रभक्षणादिकमपीत्याह—

विषाणाप्रासनेडादिः प्रतिपत्तिरुदाहृता ।

तृतीये तु इह सिद्धं प्रतिपत्तित्वं सर्वप्रदानाधिकरणप्रयोजनत्वेनोक्तमिति भेदः ।।

८

सौमिके च ● सोमे 'वारुणेनैककपालेनावभृथमभ्यवयन्ती'त्युक्त्वा 'यत्किञ्चित्सोमलिप्तं तेनावभृथं यन्ती'ति श्रुतम् । तत्रावभृथशब्देन श्रुत्या प्रकृतकर्मोक्तेस्तस्य चार्थकर्मत्वेन सिद्धस्य संस्कारकर्मत्वानुपपत्तेर्द्वितीयया च प्राधान्यावगमाद्देशलक्षणायाश्चान्याय्यत्वात्कृतार्थमपि सोमलिप्तं तृतीयया एककपालेन विकल्पितं विधीयत इत्याशङ्क्योत्पत्तिशिष्टेन पुरोडाशेन विकल्पायोगाद्देवताभावाच्चाकीर्णकरस्य सोमलिप्तस्यावभृथदेशे नयनं प्रतिपत्तिः। अवभृथ पदन्तु देशलक्षकं तृतोया च सहार्थे तेन नयनं न प्रयोजकमित्याह—

सोमलिप्तस्य नयनं न प्रयोजकमिष्यते ।।

९

कर्त्तृदेशकालानां ● दर्शादौ कर्त्तृदेशकालद्रव्यविधीनां क्रियापेक्षात्प्राप्तेर्नापूर्वविधित्वं न वा परिसङ्ख्याविधित्वम् तस्यास्त्रिदोषत्वात्तेनानुवादत्वमेवैषामित्याशङ्क्य क्रियाविध्यन्यथानुपपत्या पक्षप्राप्तानामप्राप्तपक्षप्रापणरूपनियमविधित्वसम्भवान्नानुवादत्वमित्याह—

द्रव्यदेशादीति ।

द्रव्यदेशादिविधिर्नियमार्थ इत्यग्रेऽन्वयः ।।

१०

तथा द्रव्ये ● 'श्वेतमालभेत' 'शुक्लानां चरुमि'त्यादौ गुणस्यामूर्त्तत्वेन साक्षात्क्रियया सम्बन्धाभावान्न नियम विधित्वमित्याशङ्क्य विशिष्टस्य द्रव्यस्य क्रियाङ्गत्वात्तद्द्वारेण नियमेन प्राप्तेर्नियम एवेत्याह—

शुक्लादि गुणेति ।

अन्वयः प्राग्वत् ।।

११

संस्कारे च ● 'व्रीहीनवहन्ती'त्यादाववघातस्य देशादिवत्साक्षाद्गुणादिवत्परम्परयापि क्रियार्थत्वाप्रतीतेस्तण्डुलाक्षिप्तक्रियानुवादक एव तद्विधिरित्याशङ्क्य साक्षात्क्रियासम्बन्धाश्रवणेऽपि प्रकरणात् व्रीहिशब्देन प्रधानसाधनस्य लक्षणात् तण्डुलान्पिनष्टी'ति दर्शनाच्च तत्र विनियुक्तस्य प्रधानप्रयुक्तिरविहतेति नियम एवेत्याह—

अवनहनादिविधिर्यो नियमार्थः सः ।।

१२

यजति चोदना तदुक्ते श्रवणात् ● प्रसङ्गाद्यागादीनां लक्षणानि भाष्यकृन्मतेनाह—

यागो द्रव्यत्यजिर्मतः । स प्रक्षेपाधिको होमः । परस्वकरणं ददिः ।

देवतोद्देशपूर्वकं द्रव्यत्यागो यागः। त्यक्तस्य द्रव्यस्य प्रक्षेपो होमः। परस्वत्वापादनं दानम्। वार्तिके तु यागादीनां लोके प्रसिद्धत्वान्न लक्षणेन प्रयोजनमिति दूषयित्वा यो देवतोद्देशेन द्रव्यं त्यजति तेन यागप्रयोगोऽनुष्ठितो भवतीत्येवं प्रयोगकथनपरं सूत्रद्वयं व्याख्यातम्। यद्वा यत्र यागो न श्रुतः। यथा 'सौर्यं चौरुम्' 'आग्नेयो भवती'त्यादौ तत्र कथं यागत्वम्। यत्र च यजत्युक्ते कर्मणि जुहोति श्रवणं 'चतुरवत्तं जुहोती'ति तत्र कथं होमत्वमित्याशङ्कानिराकरणार्थं सूत्रद्वयमित्याह—

यागाश्रुतावप्याग्नेये युक्त्या स्याद्यागकल्पना।

यक्तिर्द्रव्यदेवतासम्बन्धानुपपत्तिः। जुहोतावप्राप्तप्रक्षेपांशविधानाद्धोमत्वमाह—

जुहोतिश्रवणं यागे प्रक्षेपाधिक्यताऽपि वा॥

१३

विधेः कर्मापवर्गित्वात् ● 'यदातिथ्यायां बर्हिस्तद्रुपसदान्तदग्नीषोमीयस्ये' त्यत्रातिथ्यायां विधिवैय्यर्थ्यादातिथ्यात आच्छिद्योपसत्सु बर्हिर्विधानानुपपत्तेः शिष्टाचारविरोधाच्च निरिष्टकोपदेशानुपपत्तेस्तद्बर्हिर्धर्मातिदेशे तु लक्षणापत्तेर्बर्हिषः साधारण्यार्थं एव विधिरित्याह—

आतिथ्योपसदोर्दैक्षे बर्हिस्साधारणं मतम्॥

चतुर्थस्य द्वितीयः पादः॥

तृतीयः पादः

१

द्रव्यसंस्कार ● 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' 'तीर्थे स्नाति तीर्थमेव हि सजातानां भवति' 'वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजाइज्यन्ते' इत्यत्रार्थवादत्वे सिद्धेऽपि पर्णतादीनां रात्रिसत्रवद्विपरिणतापापश्लोकश्रवणाद्यर्थत्वं क्रत्वर्थजुह्वादिद्वारा क्रत्वर्थत्वमित्युभयार्थत्वं दध्यादिवदाशङ्क्य दध्यादिवद्विधिभेदाभावादेकवाक्येन उभयार्थत्वे वाक्यभेदात्क्रत्वर्थजुह्वनुवादेन च पर्णताविधौ फलाकाङ्क्षाभावादाश्रयालाभाच्च नोभयार्थत्वं किन्तु क्रत्वङ्गत्वमेवेत्याह—

पर्णतादौ च संस्कारे प्रयाजादौ फलं न च॥

२

नैमित्तिके विकारत्वात् ● काम्यस्य गोदोहनादेर्नैमित्तिकस्य च 'बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यादि'ति बार्हद्गिरादेर्वारणाभोवर्तादि नित्यविधिमसिद्धं कृत्वा सन्निधानान्नित्ये प्रयोगेऽङ्गत्वमित्याशंक्य निमित्ते कामे च विहितस्य

नित्येऽङ्गत्वायोगान्नित्यस्य चाक्षेपात्सामान्यवाक्याद्वा साधनप्राप्तेर्निमित्तश्रुति-विरोधाच्च नित्येऽन्यदेव वारणादिसाधनमित्याह—

काम्यादन्यत्तु नित्यं स्यात्साधनं वारणादि च ।

३

एकस्य तु ● यत्र तु वाक्यद्वयं यथा 'दध्ना जुहोति' 'दध्नेन्द्रियकामस्ये'ति तत्रैकस्य वाक्यस्याश्रयसम्बन्धबोधकत्वात्केवलं फलार्थमेव दधीत्याशङ्क्य निरपेक्षेण वाक्यद्वयेन लोकसिद्धस्य दध्न उभयार्थत्वबोधनात्फलवाक्ये आश्रयापेक्षायाश्च प्रकरणलभ्यहोमेन शान्तेरुभयार्थमित्याह—

दाध्यादिकं तु क्रत्वर्थं फलार्थं विधिभेदतः ।।

४

द्रव्याणां तु ● सोमे 'पयोव्रतं ब्राह्मणस्य' इत्यादौ पयआदेरुभयार्थत्वात् पुरुषार्थत्वमाशङ्क्य रागतस्तृप्त्यर्थं प्राप्तत्वेन विधिवैय्यर्थ्यात् जञ्झभ्यमानमन्त्र-वचनवत्प्रकरणात्क्रतुयुक्तपुरुषधर्मत्वात्क्रत्वर्थत्वमित्याह—

पयोव्रतन्तु क्रत्वर्थम् ।।

५

चोदनायां ● 'विश्वजिता यजेते'त्यश्रुतफले कर्मणि यागं कुर्यादिति यागस्यैव पदश्रुत्या भाव्यत्वेन फलाध्याहारायोगाल्लिङ्ग्युक्तभावनान्यथानुपपत्त्या तत्कल्पने तु क्षणिकस्य तज्जनकत्वायोगादपूर्वकल्पनायाश्च फलं विनाऽयोगादन्योन्याश्रयाच्च न फलमित्याशङ्क्यापुरुषार्थे प्रवृत्त्ययोगाद्विधिवशादन्यशेषत्वाभावाच्चावश्यं कल्प्यं फलमित्याह—

कल्प्यं विश्वजितः फलम् ।

६

तत्सर्वार्थं ● तद्विश्वजिदाद्यविशेषात्सर्वफलार्थमित्याशङ्क्यैकेनैवाकाङ्क्षाशान्तेरेकफलार्थमित्याह—

तच्चैकम् ।

७

सः स्वर्गःस्यात् ● एकमपि न पुत्रपश्वादिकम् । तेषां दुःखमिश्रत्वेनाल्पैराकाङ्क्षणीयत्वात् । दुःखाभावस्य च प्रतियोगिगर्भत्वेन गुरुत्वात् किन्तु स्वर्ग एव सर्वाभिलषितत्वात् 'यन्न दुःखेन सम्भिन्न'मिति निरतिशयप्रीतिरूपत्वाच्च भाव्य इत्याह—

स्वर्ग एवासौ ।

८

क्रतौ फलार्थवादः ● 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती'ति वर्त्तमानापदेशात्कमिपदाभावाच्चापापश्लोकश्रवणस्याप्यर्थवादत्वाद् ज्योतिर्गौरायुरित्यादीनां रात्रिसत्राणां स्वर्गफलत्वमित्याशङ्क्यान्यफले प्रतिष्ठार्थवादासङ्गतेरुपस्थितस्य च ये प्रतितिष्ठासन्ति ते उपेयुरित्यध्याहारविपरिणामाभ्यां फलत्वमात्रकल्पने लाघवाच्चार्थवादिकमेव प्रतिष्ठादिकं रात्रीणां फलमित्याह—

रात्रिसत्रेऽर्थवादिकं फलम् ॥

९

काम्ये कर्मणि ● सौर्यं चरुमित्यादौ विधेः सर्वान्प्रत्यविशेषेण प्रवृत्तेः बह्विष्टत्वाच्च स्वर्ग एव फलम्। ब्रह्मवर्चसादिश्रवणन्तु अन्वाचयार्थमित्याशङ्क्य फलपदसमभिव्याहारादन्वाचयत्वे चान्योन्याश्रयान्न स्वर्गस्य फलत्वम् किन्तु ब्रह्मवर्चसादेरेवेत्याह—

सौर्ये न स्वर्गः ।

फलमित्यनुषङ्गः ॥

१०

सार्वकाम्यं ● 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ सर्वेभ्यो कामेभ्यो ज्योतिष्टोम' इत्यनारम्यश्रुते वाक्ये विधिभावनयोरभावाद्गोदोहनाद्यङ्गाश्रित कामानुवादकः सर्वकामशब्दः स्तुत्यर्थ इत्याशङ्क्य तादर्थ्यचतुर्थ्या फलपरत्वावमाद्यजिभावनाविध्याख्याताभावेऽपि स्वर्गकामवाक्यैकवाक्यतया स्वर्गादिसर्वकामो यजेतेत्येवमर्थात्प्रत्यक्षाख्याताभावेन च प्रकरणान्तरन्यायाविषयत्वाद् अनुवादत्वे च वैय्यर्थ्याद्विधायकमेवेदं वाक्यमित्याह—

सर्वेभ्यः स्यात् फले विधिः ।

११

तत्र सर्वे ● ते सर्वे कामा एकस्मिन्नेव प्रयोगे भवन्तीत्याशङ्क्य कामानामुद्देश्यत्वेन तद्विशेषणस्य साहित्यस्याविवक्षितत्वादेकस्मिन् प्रयोगे एकमेव फलमित्याह—

प्रयोगैक्यात्फलैक्यन्तु ।

१२

योगसिद्धिर्वा ● फलगते यौगपद्ये पौर्वापर्यविशेषे उक्ते तद्गत एवैहिकामुष्मिकत्वादिविशेषश्चिन्त्यते । तत्र पश्वादिस्वरूपस्य प्रतिग्रहाद्युपायान्तरदर्शनेनाऽदृष्टानपेक्षत्वाच्छरीरस्य च मातापितृसंयोगमात्रादनुत्पत्तेर्विशिष्टफलोपभोगार्हशरीरारम्भकत्वमेव चित्रादीनां फलजनकत्वं न तु फलस्वरूपजनकत्वम् तेन चित्रादिफलान्यपि स्वर्गवदामुष्मिकान्येवेत्याशङ्क्य प्रतिबन्धकसदसद्भावादनियममाह—

चित्राद्यामुष्मिकन्तु वा ।

१३

समवाये ● 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेते'त्यत्र प्रसिद्धस्यैव बृहस्पतिसवस्य दर्शपूर्णमासाभ्यामिष्टवेतिवद्वाजपेयोत्तरकालोऽङ्गत्वेन विधीयते । अन्यथा धर्मलक्षकत्वं बृहस्पतिसवशब्दस्य स्यादित्याशङ्क्य वाजपेयप्रकरणे दूरस्थानुवादेन कालविधानायोगात्काले कर्मविधानाङ्गीकारेण मासाग्निहोत्रवत्तद्धर्मकं कर्मान्तरं वाजपेयाङ्गत्वेन विधीयत इत्याह—

बृहस्पतिसवो वाजपेयाङ्गम् ,

१४

उभयार्थमिति चेत् ● 'संस्थाप्य पौर्णमासीं वैमृधमनु निर्वपति' इत्यत्र संस्थित स्याङ्गत्वासम्भवात्कालार्थसंयोगाश्रयणेन पौर्णमास्यनन्तरकाले विधीयमानो वैमृधः प्रकरणाद्दर्शपूर्णमासाङ्गमाशङ्क्य वैमृधस्य वाक्यान्तरेणाविहितत्वेन कालार्थसंयोगानुपपतेः । संस्थायामुभयाङ्गत्वायोगाद्वाक्यसंयुक्तस्य प्रकरणेनाग्रहणाच्च नोभयाङ्गं वैमृधः किन्तु वैमृधभिन्नस्य संस्थासम्भवादनुशब्दाच्च पौर्णमास्यङ्गमित्याह—

वैमृधोऽपि न दर्शे च,

१५

अनुत्पत्तौ तु ● 'आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ती'त्यत्र कालार्थ संयोगे परार्थापत्तेरङ्गप्रयोजनसम्बन्ध इत्याशङ्क्याग्निमारुतस्य सोमाङ्गत्वादनुयाजानाञ्च परवङ्गत्वेन फलापेक्षाभावात् कालार्थ एव संयोग इत्याह—

नानुयाजाङ्गं सोमे स्यादाग्निमारुतम् ।

१६

उत्पत्तिकालवि ● 'दर्शर्णमासाभ्यामिष्ट्वा सोमेन यजेते'त्यत्र बृहस्पतिसववत्सोमधर्मकं कर्मान्तरं वाक्येन दर्शपूर्णमासाङ्गमित्याशङ्क्य सोमप्रकरणे श्रुतस्यास्य वाक्यस्य प्रकरणात् सोमकालविधायित्वेन संनिधौ त्वविभागादि'ति न्यायेन कर्मान्तरत्वानापादकत्वात् न दर्शाङ्गं सोमः न वा दर्शपूर्णमासयोः सोमाङ्गत्वम् तयोरनुवादेन विधेयत्वाभावात्तद्धर्मककर्मान्तरस्य चानुपादेयगुणसम्बद्धाख्याताभावेन प्रयोगान्ते दर्शपूर्णमासोत्तरकाले सोमस्य विधानात्कालार्थ एव संयोग इत्याह—

दर्शेष्टयङ्गं न सोमः स्यात् ,

१७

फलसंयोगस्त्वचोदिते ● वैश्वानरीष्टेः पूतत्वादि फलमाधानगतात्मनेपदात्पितृगामित्वादित्याशङ्क्य 'यस्मिन् जाते निर्विपति स पूत'इति यच्छब्दात्पुत्रपूतत्वादेः पितुरिष्टत्वेन चात्मनेपदाविरोधात् पुत्रगाम्येव जातेष्टिफलमित्याह—

जातेष्टेः पुत्रगं फलम् ।

यद्वा ● इयमिष्टिर्जननानन्तरं कर्तव्या निमित्तस्य प्राप्तेरित्याशङ्क्य 'घृतमेवाग्रे प्रतिलेहयन्ति स्तनञ्चानुधायन्ति' इति जातकर्मानन्तरं स्तनप्राशनाम्नानात्पूर्वमिष्टिकरणे स्तनप्राशनोत्कर्षेण बालविपत्तिप्रसङ्गाज्जातकर्मानन्तरं कर्तव्येत्याह--

न जातकर्मणः प्राक् सा ,

एवं वा-इयमिष्टिः प्रयोजनवशेनोत्कृष्टाऽपि शुद्धितारूपाङ्गहानेनाशौच एव कर्तव्येत्याशङ्क्य प्रयोजनाविरोधेनाव्यवहितनिमित्तानन्तर्यस्य बाधात्कर्मणः काम्यत्वाच्च शुचितारूपाङ्गावैगुण्यायाशौचान्तरं य इष्ट्येति वचनात् पौर्णमास्यादिकाले कर्तव्येत्याह--

नाशौचे किन्तु पर्वणि ।

१८

प्रधानेनाभि * 'शरदि वाजपेयेन यजेते'ति तृतीयया साङ्गस्य वाजपेयस्य शरत्काले विधानादङ्गान्तरवद् वाजपेयाङ्गभूतो बृहस्पतिसवोऽपि तत्काले कर्त्तव्यो न त्वातिदेशिके वसन्तकाल इत्याशङ्क्य वाजपेयेनेष्ट्वेत्यत्र वाजपेयकरणकप्रयोग समाप्त्यनन्तरं बृहस्पतिसवविधानेनास्य प्रयोगबहिर्भूतत्वात् 'शरदि वाजपेने'त्यस्य च करणत्वस्यैतद्भिन्नप्रयोगपरत्वाद्वाजपेयापूर्वे उत्पन्नेऽप्येतस्य तत्स्थिरीकरणार्थत्वाद्वसन्त एव बृहस्पतिसव इत्याह--

वसन्ते स्याद्बृहस्पतिसवो न शरदि क्वचित् ।।

चतुर्थस्य तृतीयः पादः ।।

चतुर्थः पादः

१

प्रकरणशब्दः ● 'राजसूयेन स्वाराज्यकामो यजेते'त्यत्र राजसूयशब्देन यागानाञ्च विदेवनादीनाक्तेर्यजेश्च छत्रिन्यायेनानुवादत्वात्सर्वेषां फलसम्बन्धात्प्राधान्यमित्याशङ्क्य यजतिसामानाधिकरण्यादिष्टिसोमादिगानामेव फलसम्बन्धः प्राधान्यमित्याह—

सर्वे यागाः प्रधानं स्युः राजसूये महाक्रतौ ।

२

मध्यस्थं ● तत्र विदेवनादीनामभिषेचनीयाख्यसोमयागविध्यन्तरमाम्नातानां तदीयमाहेन्द्रस्तोत्रकाले 'माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते' इत्यभिषेकापकर्षेणापकृष्टानामवान्तरप्रकरणादभिषेचनीयाङ्गत्वमाशङ्क्य विधिदशायां प्रयोगस्या-

पेक्षितत्वेनापकर्षसमये भूयस्तदनपेक्षणात्तत्र च सन्निधेरभिषेचनीयाङ्गत्वबाधेन प्रकरणात्कृत्स्नराजसूयाङ्गत्वमित्याह--

विदेवनादयस्सर्वयागाङ्गम् ,

३

प्रकरणविभागे च ● तत्रैव 'सौम्यं चरुं बभ्रुर्दक्षिणे'ति विधाय 'पुरस्तादुपसदां सौम्येन प्रचरन्ति'इति श्रुतम्। तत्र षष्ठ्या सौम्यस्य प्रकरणबाधेनोप सदङ्गत्वमाशङ्क्य सौम्यस्योत्पत्तावेव परार्थ्यावगतेः षष्ठ्याश्च दिग्योगनिमित्तत्वात्कालार्थ एव संयोग इति फलार्थ एव सौम्य इत्याह--

सौम्य एव च चरुर्नोपसदङ्गम् ,

४

फलवत् ● वैश्वदेवीं साङ्ग्रहणीं निर्वपेद्ग्रामकामः' इत्यभिधाय 'आमनमस्यामनस्यदेवा इति तिस्र आहुतीर्जुहोती'त्यत्र साङ्ग्रहायण्याः प्राकृतैरङ्गै र्निराकाङ्क्षत्वादामनहोमानां ग्रामकामपदानुषङ्गेण साङ्ग्रहणीवत्फलार्थत्वमित्याशङ्क्य साङ्ग्रहण्याः प्रकरणाभावेऽप्यामनहोमानां सन्निधानात्तदङ्गत्वाद् 'यन्मध्यतो जुहोती'ति प्रयाजमध्यवर्तित्वेनाधिकाराख्यप्रकरणाद्वा तदङ्गत्वोपपत्तेरनुषङ्गस्य च परिधिमन्त्रव्यवायेनायोगादङ्गत्वमेवेत्याह—

स्युरामनास्त्वङ्गमेव तु।

५

दधिग्रहो नैमित्तिकः ● ज्योतिष्टोमे 'यामाध्वर्युर्यजमानश्च देवतामन्तरितस्तस्यावृश्च्येते प्राजापत्यं दधिग्रहं गृह्णीयादि'त्यत्र दधिग्रहस्थ निमित्ते विधानान्नैमित्तिकत्वं 'ज्येष्ठो वा एष ग्रहणामिति वाक्याच्च नित्यत्वमित्युभयार्थत्वमाशङ्क्य कर्तृसमानाधिकरणयच्छब्दाभावान्नित्यस्य चानित्यद्वारकत्वायोगेनान्तरायवचनस्यार्थवादत्वाज्ज्येष्ठत्वसंस्तवाच्च नित्यत्वमेवेत्याह--

दधिग्रहस्तु नित्यः स्यात् ,

६

वैश्वानरश्च ● चयने 'यो वै सम्वत्सरमुख्यमभृत्वा अग्निं चिनुते यथा वै सामि गर्भो विपद्यते तादृगेव तदार्तिमाच्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेदि'त्यत्र प्राग्वत्संवत्सराभरणस्यार्थवादत्वान्नित्यो वैश्वानरःस्यादित्याशङ्क्य कर्तृसामानाधिकरण्याद्यच्छब्दान्नैमित्तिक इत्याह—

नित्यो वैश्वानरो न च।

७

षट्चिति ● 'योऽग्निं चित्वा न प्रतितिष्ठति पञ्चपूर्वाश्चितयो भवन्त्यथ

षष्ठीं चितिं चिनुते प्रतिष्ठित्या' इत्यत्र पूरणप्रत्ययान्नित्याभिः चितिभिः सहितेयं षष्ठीचितिर्नित्येत्याशङ्क्य कर्त्तृपरयच्छब्दाच्चित्त्वेति चाप्रवृत्ते चोदनात्पूरणप्रत्ययस्य च पाठाभिप्रायेणोपपत्तेः नैमित्तिकीयं षष्ठीचितिर्नित्यस्तु पञ्चचितिक इत्याह—

षष्ठी चितिर्निमित्ते स्यात् ,

८

पितृयज्ञ ● 'अमावस्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ती'त्यनारभ्य श्रुतस्य पिण्डपितृयज्ञस्यामावास्याशब्दसमभिव्याहाराद्वाक्येन दर्शाङ्गत्वमित्याशङ्क्य कर्मणोऽपराह्णाभावादमावास्यायामपराह्ण इति सामानाधिकरण्याच्चामावास्याशब्दस्य कालवाचित्वाद्दर्शप्रकरणाभावाच्च तस्मिन् काले क्रियमाणोऽयं पुरुषार्थं एव न त्वङ्गमित्याह--

नेष्ट्यङ्गं पितृयज्ञकः ।

९

रशना च ● 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोती'त्यत्र रशनायाः यूपार्थत्वेऽदृष्टार्थस्य स्थाणुतुल्ये यूपेऽर्थात्प्राप्तेः यूपं परिवीयेत्यस्यानुवादत्वमित्याशङ्क्य पशोरुपाकरणक्रियाकर्मत्वेन रशनाकर्मत्वाभावादुपाकरणस्य च बर्हिरादिसाधनकस्य रशनासाधनकत्वायोगेन तद्द्वारेणापि रशनायाः पश्वर्थत्वायोगात्संन्निहितसम्बन्धसम्भवे च व्यवहितसम्बन्धानाश्रयणादेकरशनासत्वेऽपि द्वितीयया दार्ढ्यातिशयजननाद्यूपार्थैव रशनेत्याह--

सौत्ये पशौ तु यूपार्था द्वितीया रशना मता ।

१०

स्वरुश्चाप्येक ● 'यूपस्य स्वरुं करोती'त्यत्र खादिरं वीर्यकामस्ये'तिवत् चैत्रस्य गौरितिवच्च यूपार्थस्स्वरुः, अञ्जनन्तु तस्य प्रतिपत्तिरित्याशङ्क्य स्वरुं करोती'ति द्वितीयया तस्य प्राधान्यावगमात् षष्ठ्याश्चावयव्यतिरेकमात्रनिमित्तत्वान्न यूपार्थः स्वरुः किन्तु 'स्वरुणा पशुमनक्ती'ति वाक्यात्पश्वञ्जनार्थ इत्याह—

यूपार्थो न स्वरुः किन्तु तस्य पश्वञ्जनाङ्गता ॥

११

दर्शपूर्णमासयोः ● 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'त्यत्र नामधेयस्याख्यातानुसारित्वात्तस्य चाविशेषेण सर्वत्र वृत्तेः सत्यप्यनुवादेन समुदायद्वये सर्वेषां यागानां फलसम्बन्धात्प्राधान्यं राजसूयवदित्याशङ्क्याप्रसिद्धार्थस्य नाम्न आख्यातानुसारित्वेऽपि कालयोगेन प्रसिद्धार्थस्य तदयोगात्प्रसिद्धनामधेयविशेषितेन यजिना षण्णामेवाग्नेयादीनां ग्रहणाद्विकृतौ प्रयाजादिदर्शनाच्च षण्णामेव

प्राधान्यमित्याह--

दर्शेष्टौ षट्प्रधानास्स्युर्यागाः कालस्य योगतः ।

११

ज्योतिष्टोमे • 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यत्र नामधेयस्य पूर्वप्रसिध्यभावेनाख्याताधीनत्वात्तस्य च प्रकृतेषु दीक्षणीयादियागेषु सोमयागे च वृत्तेः 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोती'त्यस्य च कालार्थसम्बन्धपरत्वेनाङ्गाङ्गित्वबोधकत्वाभावात्सर्वेषां ज्योतिः सम्बन्धाविशेषात्प्राधान्यमित्याशङ्क्य कालार्थस्यापि सम्बन्धस्य सोमयाग एव सत्वाद्दीक्षणीयादौ च तदभावात्सोमयागस्यैव प्राधान्यमित्याह--

ज्योतिष्टोमे सोमयागः प्रधानं नेतरे मताः ॥

इति कमलाकरभट्टात्मजानन्तभट्टकृतायां शास्त्रमालावृत्तौ चतुर्थोऽध्यायः ॥

पादाः ४ अधिकरणानि ५१

•

पञ्चमः क्रमाध्यायः

प्रथमः पादः

१

श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात् ● इदानीं प्रयोज्यानां क्रमश्चिन्त्यते। तत्र पदार्थानां प्रयोगप्राशुतार्थमनियतः क्रमो यद्वा क्रमस्य सङ्घातविशेषणत्वेनैकैकपदार्थाश्रयत्वाभावात् सङ्घातस्य चाविधेयत्वादशाब्दत्वाच्च न क्रमोऽङ्ग-मित्याशङ्क्य सङ्घातस्यैकत्वेन क्रमाश्रयत्वाभावेऽप्येकस्य कर्त्तुरनेकपदार्थविशिष्ट-भावनाविधौ श्रुत्यादिप्रमाणषट्कोपस्थितस्य संयोगादिवद्द्वितनिरूपस्य क्रमस्य प्रयोगविधिना विधानमित्याह—

श्रुत्यर्थ पठनस्थानमुख्यप्रवृत्तिकक्रमाः।

श्रौतक्रममाह—

श्रौतो ब्रह्मादिदीक्षादी,

द्वादशाहे सत्रभूते 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयती'त्यत्र श्रुत्या दीक्षादिविधानमाशङ्क्य सर्वेषां यजमानत्वेन तत्संस्काररूपदीक्षायास्तत्कर्तुश्चाध्वर्योरतिदेशात् प्राप्तेरध्वर्युदीक्षायाञ्च 'चित्पतिस्त्वे'ति मन्त्रलिङ्गवि-रोधेनान्यकर्त्तृकत्वस्य 'न पूतः पावयेदि'ति निषेधाच्च दीक्षितभिन्नस्य तद्गण-स्थत्वेन सन्निहितस्य प्रतिप्रस्थात्रादेः 'इतरमन्यस्तेषामि'ति न्यायात्प्राप्तेर्वचनं केवलं क्रममात्रपरमिति श्रौतोऽयं क्रमः॥

२

अर्थाच्च ● 'अग्निहोत्रं जुहोति' 'यवागूं पचति इत्यत्र नानियमः। किन्तु दृष्टार्थत्वाय पूर्वं पाकः पश्चाद्धोम इत्याह—

अर्थः स्याद्धोमपाकयोः।

अनियमोऽन्यत्र 'एको मम वसन्तमृतूनां प्रीणामी'ति शाखाभेदेना-म्नातानां प्रयाजानुमन्त्रणमन्त्राणामदृष्टार्थत्वात्समुच्चितानां द्वितीयादौ प्रवृत्या नियममाशङ्क्य भिन्नशाखीयमन्त्राणां प्रयोगविधिना प्राजापत्यवत् मिथः प्रत्यासत्ति विधानाभावेन प्रवृत्तेरभावादनियममाह—

शाखान्तरीयानुमन्त्रमन्त्रेष्वनियतः क्रमः॥

३

क्रमेण वा ● 'समिधो यजती'त्यादिवाक्यविहितेषु यागेषु स्वाध्यायोपात्तस्य पाठक्रमस्यानान्तरीयकत्वेनाप्युपपन्नत्वाद्विधीनाञ्च पदार्थमात्रे पर्यवसानान्न

पाठात्क्रमः किन्त्वनियम इत्याशङ्क्यानान्तरीकत्वे प्रामाणाभावात्स्वाध्यायविधिविहितस्य पाठक्रमस्य विध्यवस्थायामनुपयुज्यमानत्वेऽपि स्मृत्यवस्थायामुपयोगात्स्मरणक्रमस्य चानुष्ठानक्रमें उपयोगात्पाठादेव क्रम इत्याह—

पाठक्रमः प्रयाजेषु ,

४

प्रवृत्या तुल्यकालानाम् ● वाजपेये 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ती'-त्येकस्मिन् काले सहालभ्यमानानां पशूनामारादुपकारकाङ्गतन्त्रत्वेऽपि सन्निपातिनामुपाकरणादीनां मध्ये प्रथमस्योपाकरणस्य यतः कुतश्चित् कृतत्वान्नियोजनादावप्यनियम इत्याशङ्क्य प्रयोगविधिनैकैकस्य पशोरङ्गानि मिथः सन्निहितानि कार्याणीति प्रत्यासत्तिबोधनाद्यत उपाकरणं तत एव नियोजने षोडशभिरन्यथा बहुभिस्तदङ्गानां व्यवधानापत्तेः प्रवृत्यैवात्र क्रम इत्याह—

प्राजापत्ये प्रवृत्तितः ।

५

स्थानाच्च ● साद्यस्क्रे 'सह पशूनालभत'इति श्रुतस्य पशुसाहित्यस्य सवनीयस्थानत्वेऽप्युपाकरणादिकमनियमेनानुष्ठातव्यम् । यद्वा प्रकृतिदर्शनादग्नीषोमीयस्यैवेत्याशङ्क्य सौत्यस्याश्विनग्रहणरूपोपस्थापकसत्वेन स्थानाबाधात्तस्यैवादौ अन्ययोस्तु पश्चाद्यथा प्रकृतीत्याह—

साद्यस्क्रे स्थानतस्सौत्ये,

क्रम इत्यनुषङ्गः ।

६

मुख्यक्रमेण ● 'सारस्वतौ भवत' इति सरस्वतीसरस्वद्देवतयोर्यागयोर्याज्यानुवाक्यापाठक्रमात्क्रमसिद्धावपि तदङ्गानां निर्वापादीनां नियतः क्रम इत्याशङ्क्य पुंदेवत्यस्य पूर्वमङ्गे द्वाभ्यां व्यवधानपत्तेर्मुख्यक्रमेण क्रम इत्याह—

मुख्यः सारस्वतादिषु ।

यद्यप्यत्र प्रवृत्या क्रमः सिध्यति तथापि दर्शेष्टौ शाखाच्छेदनादिदधिधर्माणां पूर्वं ततो निर्वापाद्याग्नेयधर्माणां प्रवृत्तिर्याज्यानुवाक्ययोस्तु विपरीता, तत्र भूतभाविप्रवृत्तिद्वयवशात्प्रयाजशेषाभिघारणादौ नानियमः किन्तु मुख्यक्रमादाग्नेयस्यैव । तेनात्र मुख्यक्रमः । मुख्यक्रमे अङ्गानां प्रधानप्रत्यासत्तिः । प्रवृत्तौत्वङ्गानां मिथ इति शेषः ॥

७

प्रकृतौ तु ● इष्टौ अग्नेयाग्नीषोमीयनिर्वापानन्तरं श्रुतानामुपांशुयाजाज्यधर्माणां मुख्यक्रमादग्नीषोमीयनिर्वापात्पूर्वमनुष्ठानमित्याशङ्क्य मुख्यक्रमेणाङ्गे तु क्रमकल्पनात्पाठतस्त्वन्यानपेक्षादङ्गानामेव क्रमप्रतीतेस्तस्य बलवत्वमित्याह—

निर्वापाज्यादिधर्मेषु मुख्यात्पाठक्रमो बली ।

८

मन्त्रतस्तु ● इष्टौ आग्नीषोमीयस्य प्रथमं विधिराग्नेयस्य पश्चात् । मन्त्राणान्तु विपरीतम् । तत्र विधिक्रमस्योत्पत्तिदशायामवगम्यमानत्वेन प्राबल्यात्तत्क्रमेणानुष्ठानमाशङ्क्य विधानेन विधीनां कृतार्थत्वान्मन्त्राणान्त्वन्तः क्रतौ प्रयोगेण स्मारकत्वात्तत्क्रमस्य बलवत्वमित्याह--

विधिपाठान्मन्त्रपाठक्रमस्तु बलवान्भवेत् ।

९

तद्वचनास्तु ● 'आग्नावैष्णवमेकादशकपालं निर्वपेत्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरि'त्यत्र मुख्यक्रमेण पूर्वमाज्यधर्मास्ततो बार्हस्पत्यचरुधर्मा इत्याशङ्क्यातिदेशस्योपजीव्यत्वेन प्रबलत्वात्तस्माच्च सक्रमकाणामेव प्राप्तेर्यथा प्रकृत्येव क्रम इत्याह--

विकृतावाज्यचर्वादौ क्रमस्तु प्राकृतो भवेत् ।

१०

विकृति प्रकृति ● 'अग्नयेऽनीकवते प्रातरष्टाकपालं निर्वपेत्' 'मरुद्भ्यः सान्तपनेभ्यो मध्यंदिने चरुम्' 'मरुद्भ्यो गृहमेधिभ्यः सायमि'त्यत्र दिनद्वये प्रातः कालसम्भवाच्च इष्ट्येतिवत्करणत्वनिर्देशाभावाच्च न सद्यस्कालत्वं किन्तु प्रकृतिवद्व्यहकालत्वमित्याशङ्क्य साङ्गस्य कर्मणः प्रातः काले विधानात्प्रातर्द्वयाश्रुतेश्च सद्यस्कालत्वमित्याह--

अनीकादौ प्रा'तरादौ न द्व्यहे सद्य इष्टयः ।

११

अङ्गानां मुख्यकालत्वात् ● अग्नीषोमीये पशौ हविरासादनोत्तरं प्राप्तानां प्रयाजानां 'तिष्ठन्तं पशुं प्रयजन्ती'त्यपकर्षः । सवनीये च पशौ'आग्निमारुतादूर्ध्व मनुयाजैश्चरन्तीत्युत्कर्षश्चान्येषां प्रधानसन्निध्यबाधाय श्रुतमात्र एव स्यादित्याशङ्क्य प्रकृतावाघारप्रयाजयोरनुयाजसूक्तवाकयोश्च क्लप्तक्रमत्वात्तन्मात्रापकर्षे क्रमलोपाद्वैगुण्यापत्तेश्च तदादीनामुत्कर्षस्तदन्तानाञ्चापकर्ष इत्याह—

तिष्ठन्तं पशुमित्यत्र तदन्तमपकर्षणम् ।
अनुयाजादिकोत्कर्षः स्यादुच्छस्त्रादाग्निमारुतात् ॥

१२

प्रकृत्या ● सोमेऽध्वर्युणा प्रातरनुवाकप्रैषं 'प्रातर्यावभ्यो देवेभ्योऽनुब्रूहीति होत्रे प्रदायानन्तरं 'प्रतिप्रस्थातः सवनीयान्निर्वपस्वे'ति प्रैषः प्रतिप्रस्थात्रे दत्तः । ततः सौमिकाः प्रचरणीहोमादयः पठिताः । प्रोक्षणादयश्च प्रकृतितोऽध्वर्युकर्तृकाः प्राप्ताः । तत्र प्रतिप्रस्थातृकर्तृकस्य निर्वापस्याध्वर्युकर्तृकप्रोक्षणोपस्थापकत्वा-

योगात्सौमिकानाञ्च निर्वापव्यवहितानामुपस्थापकाभावादनियमः। यद्वा प्रत्यक्षात्क्रमात् प्रचरणीहोमादीन् कृत्वा प्रोक्षणादीन् कुर्यादित्याशङ्क्य निर्वापेऽध्वर्योः प्रयोजककर्तृत्वात्तेन प्रोक्षणादेरुपस्थितेस्तान् कृत्वा ततः सौमिकाः कार्याः। अन्यथा निर्वापोत्तरं प्रचरणीहोमेऽनुष्ठिते कालबाधापत्तेरित्याह—

निर्वापेण प्रोक्षणादेर्बोधात्प्रागैष्टिका मताः ॥

१३

असंयोगात् ● सोमे अग्नीषोमप्रणयनोत्तरमाम्नानात्तस्य 'दीक्षासु यूपं छिनत्ती'त्यपकृष्टस्य यूपच्छेदनस्य प्रयाजवदग्नीषोमप्रणयनाद्यपकर्षकत्वमन्यथा पाठवैय्यर्थ्यापत्तेरित्याशङ्क्य पश्वङ्गभूतस्य यूपच्छेदनस्य सौमिकस्य च प्रणयनस्य भिन्नप्रयोगविधिपरिगृहीतत्वेन मिथः क्रमाभावादग्नीषोमप्रणयनोत्तरपाठस्य तु पश्ववान्तरप्रकरणादग्नीषोमीययागाङ्गत्वे सति निरुढादावतिदेशरूपप्रयोजनान्तरसत्वान्नैकापकर्षेऽन्यस्यापकर्ष इत्याह—

दीक्षायूपापकर्षेऽपि प्राचां नास्त्यपकर्षणम्।

१४

प्रासङ्गिकं च ● सवनीये पशावविद्यमानयोः सवनीयपशुपुरोडाशाङ्गयोः पिष्टलेपफलीकरणहोमयोः प्रकृतावनूयाजोत्तरं दक्षिणाग्नौ कृतत्वेन बद्धक्रमत्वादत्रानूयाजोत्कर्षेण तदुत्कर्षमाशङ्क्यानुयाजानां पुरोडाशे प्रसङ्गादुपकारकत्वेन तदङ्गत्वाभावाद्भिन्नार्थयोः क्रमाभावाच्च न तदाद्युत्कर्ष इत्याह—

प्रासङ्गिकस्तु नोत्कर्षो दाक्षिणाग्निकहोमयोः ॥

प्रकृतावग्नीषोमीये पशौ पत्नीसंयाजान्ते पुरोडाशाङ्गपिष्टलेपहोमासत्वात् न सवनीये तयोराप्तिः सम्भवति, न च श्येनविकारे इषावतिदेशात्प्राप्तिः 'समानमितरच्छ्येनेने'तिवद्वैशेषिकभिन्नाङ्गप्रापकाभावात्। तेन सवनीयपुरोडाश एवात्रोदाहरणमित्याहुः पितृचरणः ॥

१५

तथा पूर्वम् ● दर्शपूर्णमासयोर्हविरभिवासनोत्तरकाला वेदिः 'पूर्वेद्युरमावास्यायां वेदिं करोती'त्यपकृष्यमाणा एकप्रयोगवचनसम्बन्धित्वात्पाठतः क्रमक्लृप्तेश्च प्राचो हविःश्रपणादीनपकर्षतीत्याशङ्क्य दर्शपूर्णमासयोः सामान्येन हविरभिवासनोत्तरपाठस्य पौर्णमासीपरत्वात्पाठक्रमात्पूर्वं वाक्येनाक्लृप्तक्रमस्य तावन्मात्रस्यापकर्षात्तदन्तापकर्षे हविषां भस्मतापत्तेश्च न तदन्तापकर्ष इत्याह—

वेदेर्दर्शेऽपकर्षेऽपि प्राचां नैवापकर्षणम्।

१६

सान्तपनीया ● 'मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुमि'ति मध्यन्दिने प्रारब्धायां सान्तपनीयायां विघ्नवशादुत्कृष्टायामग्निहोत्रकालप्राप्तावावश्यके

पौर्वापर्ये सति चिन्त्यते, तत्रेष्टिपूर्वाङ्गेनोत्तरोपस्थितेरिष्ट्यर्थेष्वग्निषु च होमकरणे स्वार्थोद्धरणलोपापत्तेः कालस्य तु साङ्गप्रयोगावधारणोत्तरकालीनत्वेन जघन्यत्वात्तद्बाधेनाग्निहोत्रस्योत्कर्ष इत्याशङ्क्य कालस्यानुपादेयस्य निमित्तविशेषणत्वेन निमित्ते नैमित्तिकस्यावश्यकर्तव्यत्वादन्यथा तदभावेऽनधिकारात्स्वार्थोद्धरणलोपेनापि होमस्य कर्तव्यत्वमाह—

नैवाग्निहोत्रस्योत्कर्षस्त्विष्ट्या सान्तपनीयया ॥

१७

षोडशी ● ज्योतिष्टोमे 'तं पराञ्चमुक्थ्येभ्यो विगृह्णाति' इत्युक्थ्योत्तरं श्रुतस्य षोडशिनो दैवादुक्थ्योत्कर्षेऽपि 'समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोती'त्यङ्गभूतस्तोत्रकालानुग्रहार्थमुक्थ्यपरभावरूपक्रमबाधेनानुष्ठानमाशङ्क्योक्थ्यपरभावस्य प्रधानभूतयागाङ्गग्रहणाङ्गत्वादर्धास्तकालस्य च स्तोत्राङ्गभूतोपाकरणाङ्गत्वादङ्गाङ्गेन प्रधानाङ्गबाधायोगात्सूर्यार्धास्तकालबाधेन षोडशिन उत्कर्षमाह—

उक्थ्योत्कर्षे षोडशिनोऽप्युत्कर्षः परभावतः ।

न च वचनात्समयाध्युषिते स्तोत्रमुक्थ्योत्तरञ्च षोडशिग्रहणमिति वाच्यम् । 'ग्रहं वा गृहीत्वे'ति वाक्यबाधापत्तेः । न च स्तोत्रान्तरपरं तत् । इहाप्युभयोः सम्भवादबाधेनोपपत्तेः । न च विघ्नादुक्थ्योत्कर्षेऽसम्भवाद्बाधः । न हि मानुषापराधाच्छास्त्रस्य बाधः । किन्तु स्वरूपविरोधात् । तेन न्यायान्निर्णये अङ्गाङ्गस्य बाध एव ॥

पञ्चमस्याद्यः पादः ॥

द्वितीयः पादः

१

सन्निपाते ● प्राजापत्येषु दर्शपूर्णमासादिषु चैकैकेन प्रधानेन स्वाङ्गानामव्यवेतानां ग्रहणान्मध्ये अन्याङ्गे क्रमबाधापत्तेर्वाचनिकसाहित्यस्य चारादुपकारकाङ्गविषयत्वात्काण्डानुसमयमाशङ्क्य 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' 'पौर्णमास्यां पौर्णमास्ये'ति सहितानामेकस्मिन् काले प्रयोगोक्तेर्यौगपद्याशक्तेस्त्वनुमतक्षणव्यवधानेऽपि बाधकाभावात्पदार्थानुसमयमाह—

प्राजापत्ये पशुगणे पदार्थसमयः स्मृतः ।

यत्र तु पदार्थानुसमये विरोधो यथा पौण्डरीके अश्वसहस्रे सहस्रवारुणानां श्रपणे । तत्र पदार्थानुसमये हविषां भस्मीभावापत्तेः काण्डानुसमय इत्याह—

अश्वदाने सहस्रादौ काण्डानुसमयो मतः ॥

२

मुष्टिकपाल ● इष्टौ 'चतुरो मुष्टीन्निर्वपति' इत्यत्र प्रतिमुष्टियतीभावस्य पर्यवसन्नत्वेनैकैकमुष्टेः पृथक्पदार्थत्वादाग्नेयाग्नीषोमीयनिर्वापादावेकैकेन मुष्टिनानुसमयमाशङ्क्याङ्गत्वस्य विधिगम्यत्वात् चतुर्मुष्टिनिर्वापस्यैकपदार्थत्वान्मुष्टेस्त्वयवत्वात्तावता मुष्टिकाण्डेनानुसमयमाह—

मुष्ट्यादौ काण्डमेकैकम्,

आदिशब्दात्कपालोपधानादि ।

३

संयुक्ते ● इष्टौ 'द्विर्हविषोऽवद्यती'त्यत्र वचनेन द्विसङ्ख्याकावदानस्य विहितत्वेन तावतानुसमयमाशङ्क्य 'चतुरवत्तं जुहोती'त्यवदानस्य प्राप्तत्वेन द्विरिति नियमाद्विधौ वा चतुरवत्तावयवत्वेनैव विधानादवदानस्य प्रधानार्थत्वाच्च तदन्तेनानुसमय इत्याह--

प्रदानान्तमवद्यतौ ।

काण्डमित्यनुषङ्गः ।

४

वचनात्तु ● पशुगणे अञ्जनादि परिव्याणान्तं 'यजमानो यूपं नोत्सृजे'दिति प्रकृतितोऽनुत्सर्गस्याध्वर्योः साहाय्यमाचरता यजमानेनानुष्ठितत्वेनार्थिकस्य तस्यातिदेशायोगात्प्रयोगवचनावगतसाहित्याबाधार्थं अञ्जनोच्छ्रयणादीनां पदार्थानुसमय इत्याशङ्क्य नियमेनाप्राप्तौ वचनस्य विधायकत्वाद्बहुयूपेष्वञ्जनादि परिव्याणान्तेनानुसमय इत्याह--

बहुयूपेष्वञ्जनादिपरिव्याणान्तमिष्यते ॥

५

पशुगणे ● एकदेवत्येषु प्राजापत्येष्वेकस्य पशोर्दैवतसौविष्टकृतैडानि गृहीत्वापरस्य ग्राह्याणि । प्रकृतावग्नीषोमीये 'दैवतान्यवदाय न तावत्येव होतव्यं सौविष्टकृतान्यवद्यति सौविष्टकृतान्यवदाय न तावत्येव होतव्यमैडान्यवद्यति' इति त्रयाणामानन्तर्यावगतेरित्याशङ्क्य प्रकृतौ पश्वेकत्वेन त्रयाणामानन्तर्यस्यार्थिकत्वादिह त्वनेकसाहित्यानुग्रहार्थं दैवतैर्दैवतानामैडैरैडानामित्येवमनुसमय इत्याह-

देवतैक्येऽवदानेषु काण्डं नानुसमीयते ।

६

नानाबीजेष्वेकमुलूखलम् ● राजसूये'अग्नये गृहपतयेऽष्टाकपालं सोमाय वनस्पतये श्यामाकं चरुमि'त्यादिना नानाबीजेष्टौ कृष्णाजिनास्तरणादि फलीकरणान्तानां प्रकृतौ 'कृष्णाजिनमुलूखलस्याधस्तादवस्तृणाति' 'शूर्पेण विविनक्ति' इत्यादि विधिभेदेन भिन्नत्वादेकैकशोऽनुसमयस्तेनोलूखलं भिन्नमित्याशङ्क्य

विधिभेदेऽपि दृष्टार्थत्वाय तेषां तण्डुलभावनावयवत्वेनैव विधानात्तदन्तेनानुसमयादेकमुलूखलं फलमित्याह—

नानाबीजेषु काण्डं स्यात्तेनोलूखलमेककम् ।

७

विकारे ● पशौ 'पृषदाज्येनानूयाजान् यजती'त्यत्र प्रयाजार्थं चतुर्गृहीतं गृहीत्वा तेषु हुतेषु पश्चात्तस्यामेवोपभृति असङ्करार्थं क्रमबाधेन कालान्तरे पृषदाज्यं ग्राह्यम् । 'अष्टावुपभृति गृह्णाती'त्युपादेयगतस्यैकत्वस्य विवक्षितत्वात्पात्रान्तरे मानाभावाच्चेत्याशङ्क्य क्रमस्य पात्रैक्यस्य च ग्रहणाङ्गत्वेनाविशेषेऽपि मन्त्रपाठक्रमात्प्रयाजाज्यग्रहणेनोपस्थितस्यानूयाजाज्यग्रहणस्याबाधाय तस्मिन्नेव काले पात्रान्तरे पृषदाज्यं ग्राह्यमित्याह—

पृषदाज्येऽनुयाजार्थे कालैक्यात्पात्रभिन्नता ॥

८

प्रकृतेः ● 'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेदि'ति नक्षत्रेष्टावग्नये स्वाहेत्याद्युपहोमानां प्रधानोत्तरं प्रत्यक्षपाठात्तान् कृत्वा पश्चादानुमानिकाः नारिष्ठहोमाः कार्या इत्याशङ्क्य साकाङ्क्षाया विकृतेः प्रथमतः क्लृप्तोपकारकप्राकृताङ्गग्राहित्वेन वैकृतस्य पश्चादुत्थाप्याकाङ्क्षया ग्रहणान्नारिष्ठान् पूर्वं कृत्वोपहोमाः कार्या इत्याह—

नक्षत्रेष्टावुपहोमा नारिष्ठेभ्यः परा मताः ।

९

कृतदेशात्तु ● राजसूये अभिषेचनीयाख्यसोमयागानन्तरं विदेवनाद्यभिषेकान्ताः पदार्थाः पठिताः । अभिषेकश्चाभिषेचनीयाङ्गभूतमाहेन्द्रस्तोत्रकाले 'माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते' इति वचनादपकृष्टः । सोऽपकृष्यमाणोऽपि न प्राग्भाविनो विदेवनादीनपकर्षति 'पूर्वद्युरमावास्यायामि'तिवत्तावन्मात्रापकर्षादित्याशङ्क्य विदेवनादीनामभिषेकतः पूर्वं पाठस्य प्रत्यक्षत्वेन पाठतः क्रमक्लृप्तेस्तत्र पौर्णमास्यामिवात्र पाठस्यान्यत्र सावकाशत्वाभावाच्च तदन्तापकर्ष इत्याह—

विदेवनादेराकर्षोऽभिषेकस्यापकर्षणात् ।

१०

प्राकृताच्च ● अग्नौ सावित्रहोमाद्यपूर्वपदार्थानुक्त्वा पश्चाद्दीक्षणीयादयः सगुणाः श्रुताः । तत्र प्राकृतानां दीक्षणीयादीनां क्लृप्तोपकारत्वात्तान् कृत्वा पश्चात्सावित्रहोमाः कार्या इत्याशङ्क्य गुणार्थस्यापि पाठस्य प्रत्यक्षत्वाद्गुणगणिनोः समानस्थानत्वाच्च सावित्रादीन् कृत्वा दीक्षणीयादयः कार्या इत्याह—

अग्नौ सावित्रहोमादेर्दीक्षणीया परा भवेत् ।

११

सन्निपातश्चेत् ● तत्रैव दीक्षणीयानन्तरं रुक्मप्रतिमोचनादीनां प्रत्यक्षपाठात्तान् कृत्वा पश्चाद्दीक्षितसंस्काराः कार्या इत्याशङ्क्य प्रकृतौ क्लृप्तक्रमत्वादनन्तरपाठस्य चावश्यपठितव्यतयाप्युपपत्तेरादौ संस्कारास्ततो रुक्ममोकादय इत्याह--

दीक्षेष्टिः कर्तृसंस्कारा रुक्ममोकादयस्ततः ॥

पञ्चमस्य द्वितीयः पादः ॥

तृतीयः पादः

१

विवृद्धिः ● विकृतौ'एकादश प्रयाजान् यजति' 'षडुपसद' इत्यत्रोद्देश्य साहित्यस्याविवक्षणात् प्रतिप्रयाजमेकादशत्वसङ्ख्येत्याशङ्क्य एकस्य पञ्चानां वैकादशत्वासम्भवेनैकैकशः समुदायेन वा प्रयाजादिस्वरूपे सङ्ख्यासम्बन्धाभावादश्रुतसंख्यान्तरापत्तेश्च तन्त्राभिहितैः प्रयाजैः स्वप्रयोगलक्षणात्तद्गता सङ्ख्याभ्यासान्नेया। अभ्यासोऽपि लिङ्गाच्चतुर्थपञ्चमयोरेव नाद्यत्रयाणाम्, पशौ प्रयाजेषु प्रैषाणामाप्रीणाञ्च तथैवोक्तेः। होता यक्षद्बर्हिः सुष्टुरीमो होता यक्षदग्नि स्वाहे'ति चतुर्थोत्तमप्रैषयोर्मध्ये 'होतायक्षदुरोदिशा' इति षट् प्रैषा उक्ताः। एवं 'प्राचीनं बर्हिः सद्यो जात' इति चतुर्थोत्तमयोर्मध्ये 'व्यवस्वतीरुर्वियेति षड्याज्या उक्ताः। तत्र चागन्तूनां द्वेधाविभागादन्त्ययोरेवाभ्यास इति सर्वसम्पादिनीसङ्ख्येत्याह--

विकृतौ या प्रयाजादिसङ्ख्या सर्वगता तु सा।

२

स्वस्थानात्तु ● 'षडुपसद' इत्यत्र त्रिरनुवाकः पठ्यतामितिवदुपसत्त्रयं क्रमेण कृत्वा पुनस्तथैव कर्तव्यमिति दण्डकलितवदावृत्तिमाशङ्क्य तृतीयोत्तरं प्रथमोपस्थित्यभावात्स्वस्थान एव द्विर्द्विरभ्यास इत्याह--

षण्णामुपसदां स्व-स्वस्थाने वृद्धिर्न दण्डवत् ॥

३

समिध्यमानवतीं ● 'एकविंशतिमनुब्रूयात्' इति सामिधेनीवृद्धावागन्तूनां न्यायात्सर्वान्ते निवेशः, यद्वा 'इयं वै समिध्यमानवती असौ समिद्धवती यदन्तरा तद्धाय्या' इति सर्वासां निधीयमानत्वेन धाय्यात्वात्समिध्यमानवतीसमिद्धवत्योर्मध्ये निवेश इत्याशङ्क्य स्तोत्रादौ धीयमानास्वपि धाय्याशब्द प्रयोगाभावेन धाय्याशब्दस्य निधीयमानमात्रवाचित्वाभावाद्यासु वेदे 'पृथुपाजवत्यौ धाय्ये' इति धाय्याशब्दस्तासामेव मध्ये निवेशोऽन्यासामागन्तूनान्त्वन्ते

निवेशः। एवञ्च त्रैधातव्यायां 'अग्नेत्रीते इति त्रिष्टुभा परिदधाती'त्यधाय्याया-अन्ते दर्शनं युक्तमन्यथा तन्न स्यादित्याह--

धाय्या मध्ये तु तद्भिन्नाङ्गं चान्ते निवेशयेत्।

४

स्तोमविद्धौ • 'एकविंशः षोडशी'त्यादिस्तोमविवृद्धौ बहिष्पवमाने आगम्यमानानामृचां बहिष्पवमानस्यान्त्यतृचात्प्राकृतात्पर्यासान्निवेशः पर्यास-समाख्यानाद्द्वादशाहे वृषण्वतीनां तथा दर्शनाच्चेत्याशङ्क्य समाख्यायाः प्रकृता वेवोपपन्नत्वात्सामान्यतो दृष्टस्य चाप्रमाणत्वादागन्तूनामन्ते निवेश इत्याह–

आगन्तूनां स्तोमवृद्धौ पर्यासान्ते निवेशनम्॥

५

अन्तेत्तूतेरयोदघ्यात् • विवृद्धस्तोमकेष्वेव माध्यन्दिनार्भवपवमानयोरा-गन्तूनां साम्नामप्यन्ते निवेश इत्याशङ्क्य 'त्रीणि ह वै यज्ञस्योदराणी'ति वचनाद् गायत्र्यादावेव निवेश इत्याह--

सामागमोऽन्त्ययोर्गायत्र्यादौ स्यात पवमानयोः॥

६

ग्रहेष्टकः • 'अंशुं गृह्णाति' 'अदाभ्यं गृह्णाति' 'चित्रिणीरुपदधाती'त्य-नारभ्याधीतं ग्रहेष्टकं प्रतिसवनं प्रति च कार्यं तैस्तेषामारम्भादित्याशङ्क्य 'गुणानाञ्च परार्थत्वादि'ति न्यायेन परस्परमङ्गाङ्गित्वायोगात् 'इष्टकाभिरग्निं चिनुते' 'अदाभ्यं गृहीत्वा यजत' इति यागाग्न्यङ्गत्वावगमाच्च सकृदेव कर्तव्य-मित्याह--

अंश्वादि चित्रिण्यादीनि क्रत्वग्न्यङ्गं सकृद्भवेत्।

७

अन्ते स्युरव्यवायात् • चित्रिण्यादीनां क्लृप्तक्रमाव्यवायार्थमुत्तमायां चितावुपधानमित्याशङ्क्य 'यां वै काञ्चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादि'ति वचनात्प्रत्यक्षविधिविहितानां मध्यमायां चितावुप-धानमाह--

मध्यमायां चितौ ज्ञेयाः प्रत्यक्षब्राह्मणेष्टकाः॥

८

प्राग्लोकम्पृणायाः • तत्रापि लोकम्पृणायाः 'यदेवास्योनं यच्छिद्रं तदेतया पूरयती'ति पूरणार्थत्वस्य चित्यन्तरे सावकाशत्वान्मध्यमैकचितिविषयाणां चित्रिण्यादीनां न्यायादन्त एव निवेश इत्याशङ्क्याविशेषश्रुतस्य न्यायेन बाधा-योगात्ततः प्रागेव निवेश इत्याह--

लोकम्पृणातः पूर्वन्तु तत्रापि स्यान्निवेशनम्।

९

संस्कृते * यदा पवमानेष्टय आधानोत्तरं द्वादशसु रात्रीषूत्कृष्टाः तदाग्निहोत्रादीनि पूर्वमपि कार्याणि। आधानमात्रादग्निसिद्धेरित्याशङ्क्य पवमानहविषामपि वाक्येनाग्न्यर्थत्वादधानोत्तरं विहितत्वेन विकल्पायोगादाधानाङ्गत्वेऽपि तेन विना अग्नेरसिद्धेरिष्ट्यनन्तरमेव होमादीनि। आहिताग्निव्रतानि तु पूर्वमित्याह--

व्रतानि पूर्वं होमादि पवमानेष्ट्यनन्तरम् ॥

१०

संचिते तु • आहिताग्निव्रतवदग्निचिद्व्रतानां भूतचयनरूपधात्वर्थनिमित्तत्वाच्च चयनानन्तर्यमाशङ्क्य चयनकरणिकाया अग्निभावनाया निमित्तत्वाच्च क्रतुनिवृत्तौ निवत्तेः क्रत्वन्त एव धर्मा इत्याह—

क्रत्वन्तेऽग्निचितो धर्माः,

११

परेण वेदनात् • 'आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण' इत्याग्नावैष्णवस्य 'दण्डेन दीक्षयती'ति दण्डादीनाञ्चादृष्टार्थानां समुच्चितानां दीक्षार्थत्वात्सर्वान्ते दीक्षितधर्मा इत्याशङ्क्य क्रियार्थायां क्रियायां विहितेन लृटा इष्टेरेव दीक्षार्थत्वाद्दण्डादेस्तत्क्रियारूपस्याभिव्यञ्जकत्वादिष्ट्यन्त एव दीक्षितधर्मा इत्याह—

इष्ट्यन्ते दीक्षितस्य तु।

धर्मा इत्यनुषङ्गः।

१२

अङ्गवत् • काम्यानां नैमित्तिकानाञ्च कर्मणां पाठक्रमादनुष्ठानमाशङ्क्य प्रयोगविधिभेदात् कामानां निमित्तानाञ्चानियततोत्पत्तेर्न पाठक्रम इत्याह—

काम्येष्टीनां न क्रमोऽङ्गं प्रयोगविधिभेदतः।

१३

य एतेनेत्यग्नि • 'एष वा व प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः तस्मादेतेनेष्ट्वाथान्येन यजेते'त्यत्रैतच्छब्देन यागोक्तेरविशेषात्सर्वसंस्थज्योतिष्टोमस्य प्राथम्यमित्याशङ्क्यैतेनेति तृतीयया प्रकृतज्योतिष्टोमकरणकभावनोक्तेः संस्थासु तु तस्याश्रयत्वेन करणत्वाभावान्नाद्यत्वं किंत्वग्निष्टोमसंस्थस्यैव नित्यस्य रूपस्येत्याह—

य एतेनेति चाद्यत्वमग्निष्टोमगतं मतम् ॥

१४

अथान्येनेति • 'अथान्येने'त्यत्रान्यशब्देन प्रकृतत्वात्संस्थानामेव पूर्वनिषेधो

गवादीनान्तु पूर्वं पश्चाद्वानुष्ठानमित्याशङ्क्य तासां प्रकरणाभावाद्यज्ञानामित्यविशेषश्रुतेश्चान्येषां संस्थानाञ्च निषेध इत्याह—

अथान्येनेति सर्वेषां क्रतूनां प्राङ्निषेधनम् ।

१५

एकस्तोमे ● 'यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयती'ति वाक्यशेषे एकस्तोमानां संकीर्तनात्तेषामेवान्यशब्देन प्राथम्यनिषेध इत्याशङ्क्य अन्येनेत्यविशेषात् ज्योतिष्टोमेऽभ्यस्ताः त्रिवृदादयः क्रत्वन्तरे क्रियमाणास्तं दीपयन्ति प्रकाशयन्तीत्येवं वाक्यशेषोपपत्तेः सर्वेषां निषेध इत्याह—

अथान्येनेत्यत्र नैकस्तोमोक्तिः किन्तु सर्वगा ॥

पञ्चमस्य तृतीयः पादः ॥

चतुर्थः पादः

१

क्रमकोपोऽर्थशब्दाभ्याम् ● 'आश्विनो दशमो गृह्यत' इति श्रौतः क्रमो 'अग्निहोत्रं जुहोति' 'यवागूं पचती'त्यर्थक्रमश्च पाठक्रमात्प्रबल इत्याह—

श्रौतश्चार्थः पाठतस्तु बलवान्क्रम इष्यते ।

२

अवदानाभिधारणासादनेषु ● इष्टौ दधिधर्माणां पूर्वं प्रवृत्तावपि स्विष्टकृदवदानप्रयाजशेषभिधारणादौ मुख्यक्रमादेव क्रमोऽन्यथाङ्गानां व्यवधानं स्यादित्याह—

मुख्यप्रवृत्ते रङ्गानां प्रधानासन्नियोगतः ॥

मुख्यक्रमो बलवानित्यनुषङ्गः ।

३

वचनादिष्टि पूर्वत्वं ● दर्शपूर्णमासाभ्यां इष्ट्वेति वाक्येनेष्टिपूर्वत्वविधावप्याधानानन्तरमिष्टेः पूर्वं सोमः कार्य इतीदृग्वचनाभावात् 'सोमेन यक्ष्यमाणोग्नीनादधीते'त्यस्य तु श्रुत्याधानविधायित्वान्न सोमपूर्वत्वमित्याशङ्क्याधानस्य प्राप्तत्वेन विध्ययोगात्सोमस्य नित्यत्वेन चायक्ष्यमाणव्यावृत्या यक्ष्यमाण इति विशेषणायोगात्सोमपूर्वविधानार्थमेवेदं वाक्यमित्याह—

आधानानन्तरं त्विष्टिः सोमो वा प्रथमो भवेत् ॥

४

उत्कर्षात् ● 'आग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वा अग्नीषोमीयो भवति यदेवादः पौर्णमासं हविः तर्ह्यनुनिर्वपेदि'ति वाक्येन पौर्णमासस्य सोमादूर्ध्वमुत्कर्षेऽपि फलस्य सर्वसम्पाद्यत्वात्[1] कृत्स्नयोर्दर्शपूर्णमासयोरुत्कर्ष इति पक्षे

१. पाण्डुलिप्यामितः पत्रद्वयं नष्टम् । तत्रत्यविषयाः सङ्गृह्यन्ते । षष्ठाध्याय प्रथमपादनवमाधिकरणपर्यन्तं पत्राणि नष्टानि ।

प्राप्त उच्यते—'पौर्णमासं हविः' इत्यत्र तद्धितान्तः पौर्णमासशब्दो न यागवाचकः, किन्तु हविर्विशेषणम्। तस्मादेकस्यैव हविष उत्कर्षः। न दर्शपूर्णमासयोः। अतः ब्राह्मणस्यैकस्मिन्नग्नीषोमीयपुरोडाशे सोमपूर्वत्वनियमः॥

५

स्वकाले स्यात् ● 'सोमेन यक्ष्यमाणोऽग्नीनादधीत' इति वाक्येन विधीयमानमाधानं ऋतून् नक्षत्रं वाऽपरीक्ष्य कर्तव्यत्वेन प्राप्तम्। यद्यप्याधानं न सोमस्याङ्गम् किन्तु सोमाङ्गाग्निसंस्कारकत्वादाधानस्याङ्गतुल्यतास्तीति तदीय एव कालो बाध्यत इति पक्षे प्राप्त उच्यते—'नर्तून् सूर्क्षेत् न च नक्षत्रम्' इति ऋतुनक्षत्रप्रतीक्षानिषेधेन'वसन्ते वसन्त'इति विहितसोमकाल एव बाध्यते॥

६

पुरोडाशस्तु ● यथा पौर्णमासस्य हविषः पुरोडाशस्य सोमादूर्ध्वमुत्कर्षस्तथा आज्यहविषोऽप्युत्कर्षः कर्तव्यः, अग्नीषोमदेवतासम्बन्धस्य सत्त्वात् इति पक्षे प्राप्त उच्यते—नाज्यस्योत्कर्षः, विष्णुप्रजापत्ययोरपि देवतयोस्सम्बन्ध सत्त्वात्॥

७

विकृतेः ● दर्शपूर्णमासप्रकृतियागस्य यथा द्विदिनसाध्यत्वं तथा सौर्यादि विकृतीष्टेरपि द्व्यहकालसाध्यत्वप्राप्तावुच्यते—'य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत' इति वाचनिकसद्यस्कालत्वस्य सत्त्वात् तेनातिदेशप्राप्तद्व्यहकालत्वस्य बाधः।

८

सान्नाय्याग्नीषोमीय ● सान्नाय्यविकाराणाम् अग्नीषोमीयपुरोडाशविकाराणाञ्च सोमादूर्ध्वं प्राग्वानुष्ठाने नियामकं किमपि नास्ति इति चेदुच्यते—'नासोमयाजी सन्नयेत्' इत्यसोमयाजिनस्सांन्नाय्यनिषेधस्य नियामकस्य सत्वात् सोमादूर्ध्वमेवानुष्ठानम्। अग्नीषोमीयपुरोडशस्य सोमादूर्ध्वमनुष्ठनमिति पूर्वं सिद्धान्तितम्॥

९

तथा सोमविकाराः ● यथा सोमस्येष्टिपूर्वत्वं विकल्पितम् सोमविकाराणामपि इष्टिपूर्वत्वं विकल्पितमस्तु इति प्राप्त उच्यते—'सोमेन यक्ष्यमाणोऽग्नीनादधीत' इति वाक्येन सोमस्येष्टिपूर्वत्वमार्थिकम्, न साक्षाद्विहितम्। 'न ह्यार्थिकं चोदकः प्रतिदिशति इति न्यायेनार्थिकस्यातिदेशाभावात् 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति विहितस्येष्ट्यानन्तर्यस्य सोमे सत्त्वाच्च सोमविकारेषु गवादियागेषु अतिदेशेनेष्ट्यानन्तर्यस्य प्राप्तत्वाच्च सोमविकाराणामिष्ट्यानन्तर्यमेव न्याय्यम्॥

इति चतुर्थः पादः

पञ्चमः क्रमाध्यायस्समाप्तः॥

पादाः ४ अधिकरणानि ५४

षष्ठोऽधिकाराध्यायः

१

द्रव्याणां कर्म * प्रथमे द्वितीये चाध्याये उत्पत्तिविधिः, तृतीये चाध्याये विनियोगविधिः पञ्चमे प्रयोगविधिस्साङ्गोपाङ्गं विचारिताः। सम्प्रति षष्ठेऽध्यायेऽधिकारविधिर्विचार्यते। अनुष्ठानप्रकारे चिन्तितेऽनुष्ठाता क इति जिज्ञासा जायत इति क्रमाध्यायानन्तरमधिकाराध्यायः प्रवर्तते।

ननु 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादौ पुरुषस्य कर्तृत्वमात्रं प्रतीयते न फलभोक्तृत्वरूपोऽधिकारः। 'यजेत' इत्यत्राख्यातेन भावनायामभिहितायां तस्या भाव्याकाङ्क्षायां समानपदश्रुत्या धात्वर्थो यागो भाव्यत्वेनान्वेति यागं भावयेदिति, न तु स्वर्गः, तस्य भिन्नपदोपात्तत्वेनासन्निहितत्वात्। स्वर्गश्च सुखसाधनद्रव्यवाची। अतः स्वर्गेण सुखसाधनद्रव्येण स्रक्चन्दनादिना यागं भावयेदिति बोधः। तथा च पुरुषस्य यागकर्तृत्वमेवेति नाधिकाराध्यायः प्रारब्धव्य इति चेन्न, समानपदश्रुत्या यागस्योपस्थितत्वेऽपि तस्यापुरुषार्थत्वात् स्वर्गस्य भिन्नपदोपस्थितत्वेऽपि तस्य पुरुषार्थत्वात् स एव भाव्यत्वेनान्वेतीति तत्कामः पुरुषो यागेऽधिकारी इति अधिकारस्य फलभोक्तृत्वस्य विद्यमानत्वेनाधिकाराध्याय आरब्धव्यः॥

२

फलार्थत्वात्कर्मणः * नन्वधिकारे सिद्धे तत्तत्फलकामी पङ्ग्वन्धादिस्सर्वोऽपि क्रतुष्वधिकुर्यादिति पक्षे प्राप्त उच्यते—शक्त एवाधिकारी नाशक्तः। 'विष्णुक्रमान् क्रमते' 'आज्यमवेक्षते' इत्याद्यङ्गविषयः क्रत्वङ्गत्वेनाज्यावेक्षणादिकं विदधत इति तेषां लोपे क्रतुरेव न सम्पद्येत। अतः शक्तस्यैवाधिकारः। तथा च सर्वाङ्गोपसंहारसमर्थः फलाभिलाषी काम्यकर्मस्वधिकारीति सिद्धम्॥

३

लिङ्गविशेषनिर्देशात् * 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र काम इति पुंलिङ्गनिर्देशात् पुमानेव समर्थः फलकामी दर्शपूर्णमासयोरधिकारीति प्रतीयते न स्त्री। ननु पुंलिङ्गस्योद्देश्यविशेषणत्वेन ग्रहैकत्ववदविवक्षेति चेन्न, लिङ्गस्य प्रत्ययवाच्यत्वाभावेन प्रकृत्यर्थत्वेन चोद्देश्यविशेषणत्वायोगात्। अतः स्त्रिया नाधिकार इति प्राप्त उच्यते—लिङ्गं न प्रकृत्यर्थः, टाप् ङीष् आदिप्रत्ययैरभिधीयमानत्वेन स्त्रीत्वस्यापि प्रत्ययार्थत्वम्। एकत्वादिसङ्ख्याया अविवक्षितत्वे न प्रत्ययार्थत्वं निमित्तम्, किन्तूद्देश्यगतत्वम्। 'स्वर्गकाम इति पदमुद्देश्यसमर्पकम्,

तत्रैव विशेषणत्वेन पुंस्त्वं भासते । अतो ग्रहैकत्ववत्पुंस्त्वस्याप्युद्देश्यविशेषणत्वादविवक्षा । ततश्च स्त्रिया अप्यधिकारस्सिध्यति ॥

४

स्ववतोस्तु • 'यजेत' इत्यत्राख्यातोपात्ताया एकत्वसङ्ख्याया विवक्षितत्वेनैककर्तृत्वं प्रतीयते । तेन दम्पत्योः पृथक्पृथक् स्वातन्त्र्येण कर्मस्वधिकार इति प्राप्त उच्यते—दम्पत्योस्सहैवाधिकारः, न पृथक् । स्वातन्त्र्येण पृथगधिकारे स्वीकृते कर्म विगुणं भवेत् स्त्रीकर्तृकप्रयोगे पुरुषकर्तृकाङ्गानामाज्यावेक्षणादीनामभावः, एवं पुरुषकर्तृकप्रयोगे स्त्रीकर्तृकाणां तेषामभाव इत्युभयकर्तृकप्रयोगो विगुणस्स्यात् । अतो दम्पत्योर्व्यासज्यवृत्ति कर्तृत्वमग्नीषोमगतदेवतात्ववत् स्वीकर्तव्यमिति पृथगधिकारो नास्ति ॥

५

द्व्याधानम् • 'क्षौमे वसानावग्नीनादधीयेयाताम्' इति वाक्यमप्राप्तं क्षौमं विधत्ते । तत्र 'वसानौ' इति पुंलिङ्गस्य द्विवचानन्तस्य श्रवणाद्द्वौ पुमांसावग्नीनादधीयेयाताम्, न तु दम्पती इति पक्षे प्राप्त उच्यते—क्षौमेण सहाप्राप्त पुंद्वित्वस्यापि विधाने वाक्यभेदः स्यात् । अतः दम्पत्योस्सहाधिकारेण प्राप्तं द्वित्वमनूद्य वसाना च वसानश्चेति विगृह्यैकशेषाङ्गीकारे द्विवचनस्योपपत्तेः दम्पत्योरेवाधिकारः ॥

६

तस्या यावदुक्तम् • दर्शपूमासादिषु आदित्योपस्थानमन्त्राः 'अगन्म सुवस्सुवरगन्म' उद्यन्नद्य मित्रमहः' इत्यादयः । एवं 'वसन्तमृतूनां प्रीणामि' इत्यादयोऽनुमन्त्रणमन्त्राश्च विद्यन्ते । इमे याजमानाः । दम्पत्योरुभयोः स्त्रीपुरुषयोरपि यजमानत्वमस्तीति याजमानमन्त्रेषूभयोरप्यधिकार इति चेत्, अध्ययन विधिसिद्धाया विद्यायाः स्त्रीणामभावेन स्त्रीणां याजमान मन्त्रेष्वधिकारो नास्ति, पुंस एवाधिकारः ॥

७

चातुर्वर्ण्यमविशेषात् • चतुर्थवर्णस्य क्रतुष्वधिकारोऽस्ति नवेति विचारः । स्वर्गादिफलकामिनो यथा त्रैवर्णिका भवन्ति तथा चतुर्थवर्णोऽपि स्वर्गकामो भवति । अध्ययनविधिसिद्धविद्याया अभावेऽपि लिखितपाठादिना पुरोहितसाहाय्येन वा विद्यामर्जयित्वा चतुर्थोऽपि कर्मस्वधिकारीति प्राप्त उच्यते—उत्तरक्रतुविधयः अर्थज्ञानमन्तरा क्रत्वनुष्ठानासम्भवात् विद्यामाक्षिपन्तः विद्यावतस्त्रैवर्णिकान् प्राप्य कृतार्था भवन्तीति चतुर्थस्य विद्यां नाक्षिपन्तीति शूद्रस्य नाधिकारः । त्रैवर्णिकानान्तु विद्या नाक्षेप्तव्या अध्ययनविधिसिद्धविद्यायास्सत्त्वात् । शूद्रस्य तु सा कल्पनीया । विद्यावत्सु त्रैवर्णिकेषु लब्धेषु शूद्रस्य क्रतुविधयो विद्यां कुत आक्षिपेयुः । अतः शूद्रस्य न यागादावधिकारः ॥

८

त्रयाणां द्रव्यसम्पन्नः ● ननु अध्ययनविधिसिद्धविद्यावतां त्रैवर्णिकानां मध्ये ये धनिनस्तेषामेव क्रतुष्वधिकारः न धनहीनस्य क्रतुविधीनां विद्याक्षेपकत्वमिव धनाक्षेपकत्वाभावात्। अतो विद्यावन्तो धनिन एव क्रतुष्वधिकुर्युरिति पक्षे प्राप्त उच्यते—धनहीनोऽपि त्रैवर्णिको धनमर्जयित्वा क्रत्वनुष्ठानेऽधिकारी। त्रैवर्णिकानां धनार्जनं पुरुषार्थम्। पुरुषार्थेषु क्रतवोऽपि पुरुषार्थाः। यथा अर्जितेन धनेन भोजनादयो निर्वर्त्यन्ते तथा क्रतवोऽपि निर्वर्तयितव्याः। धनहीनः धनमर्जयित्वा भोजनादिकं करोति यथा, तथा क्रतूनप्यनुतिष्ठतीति धनहीनस्याप्यस्त्यधिकारः॥

९

अङ्गहीनश्च ● त्रैवर्णिकेष्वेवाङ्गहीनानामधिकारोऽस्ति न वेति संशये धनहीनोऽर्जितद्रव्य[1] वदङ्गहीनोऽपि तत्समाधानेन कर्म कुर्यादित्याह—

अङ्गहीनस्तदर्जनात्॥

१०

उत्पत्तौ ● अप्रतिसमाधेयाङ्गवैकल्यस्य तु सर्वाङ्गोपसंहारसामर्थ्याभावान्न काम्येऽधिकार इत्याह—

असमाधेयवैकल्यो नाधिक्रियेत कर्मसु॥

११

अत्र्यार्षेयस्य ● इष्टौ 'एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते न पञ्चातिवृणीते' इत्यत्र त्रित्ववदेकादीनां विधानात् सर्वेषां विधित्वम्। यद्वा 'आर्षेयं वृणीते' इति सामान्यवाक्यात् सर्वेषां प्राप्तेः सर्वेषामनुवादत्वमन्यथा चतुरादिनिषेधायोगात्, उभयथापि द्वित्वैकत्वयोः त्रित्वेनाविशेषादेकद्वित्रयाणां वार्षेयाणामधिकार इत्याशङ्क्य द्वादशकपालेऽष्टत्ववत् त्रित्वमध्ये एकादेर्नित्यप्राप्त्या तच्छ्रवणस्यानुवादत्वान्न चतुर इत्यस्य च 'नान्तरिक्षे' इतिवन्नित्यानुवादत्वादन्यथा चतुरादिनिषेधे एकादिविधौ च वाक्यभेदापत्तेः सामान्यवाक्यात्प्राप्तावपि वाक्यत्रये नित्यानुवादत्वापत्तेः निषेधद्वयापत्तेश्चैकवाक्यतया त्रित्वविशिष्टवरणोपसंहारसमर्थस्यैवाधिकार इत्याह—

अत्र्यार्षेयस्य हानम्,

१२

वचनात् ● 'वर्षासु रथकार आदधीत' इत्यत्र ब्राह्मणादीनामेव रथकरणे निमित्ते वर्षाविधिरित्याशङ्क्य योगाद्रूढेर्बलवत्त्वात् 'ऋभूणान्त्वे'ति मन्त्रवर्णाच्चा-

१. एतावत्पर्यन्तं मातृकायां पत्राणां नष्टत्वान्मया सङ्ग्रहेण विषयाः प्रतिपादिताः। इतः परं ग्रन्थकर्तुः पङ्क्तयः।

विदुषोऽपि वचनाज्जात्यन्तरस्याधिकार इत्याह—

जात्यन्तरं रथकारगोः ॥

१३

स्थपतिर्निषादः ● 'एतया निषास्थपतिं याजयेत्' इत्यत्र पक्षद्वयेऽपि यौगिकत्वात् षष्ठीतत्पुरुषस्याश्रयणेन विदुषो द्विजस्यैवाधिकार इत्याशङ्क्य षष्ठ्या अश्रुतत्वेन निषादपदे षष्ठ्यर्थसम्बन्धेलक्षणापत्तेः कर्मधारये च तदभावादज्ञस्यापि शूद्रस्य वचनादधिकार इत्याह—

स्थपतेस्तु निषादस्य स्थपतोष्टावधिक्रिया ॥

इति षष्ठस्याद्यः पादः ॥

द्वितीयः पादः

१

पुरुषार्थैक ● 'ऋद्धिकामास्सत्रमासीरन्' इत्यत्र सङ्घस्य कर्तृत्वात्तन्निष्ठं फलं प्रत्येकन्तु फलावयवः, अन्यथा एकस्मात्प्रयोगादनेकफलोत्पत्त्यापत्तेरित्याशङ्क्याख्यातेन बहूनां कर्तृत्वावगतेः ऋद्धिकामा इति द्वन्द्वापवादकैकशोऽवगतसाहित्यस्योद्देश्यविशेषणत्वेनातन्त्रत्वात्प्रयोगाणां तन्त्रत्वेन च प्राजापत्येष्वनेकापूर्ववन्नानाफलोत्पत्तौ बाधकाभावाच्च प्रत्येकं कृत्नं फलमित्याह—

एकैकस्य फलं कृत्स्नं सत्रिणां नांशतो भवेत् ॥

२

प्रयोगे ● 'यजेत स्वर्गकाम' इत्यादौ पुंस्त्वाविवक्षया स्त्रिया इवोद्देश्यगतैकत्वाविवक्षया द्वयोस्त्रयाणां वा व्यासक्तं कर्तृत्वं यजेतेत्याख्यातेनोक्तमित्यनेकेषां कर्तृत्वमित्याशङ्क्योद्देश्यविशेषणैकत्वाविवक्षयानेकेषां सहितानामधिकारे प्राप्तेऽपि 'क्षौमे वसानौ' 'पाणिग्रहणाद्धि सहत्वं कर्मसु' 'दिवि ज्योतिरजरमारभेताम्' इत्यादि लिङ्गानुसारेणैकैकस्यैवोपादेयकर्तृगतैकत्वस्याख्यातेनोक्तेर्न बहूनां कर्तृत्वमित्याह—

दर्शादौ कर्तुरेकत्वान्न बहूनामधिक्रिया ॥

३

प्रक्रमात्तु ● काम्यं प्रक्रान्तं वीतायां फलेच्छायां न समापनीयमधिकाराभावादित्याशङ्क्य 'देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते' इति वचनाच्छिष्टविगर्हणाच्च समाप्यमेवेत्याह –

समाप्यमेव प्रारब्धं काम्यं प्राप्तेऽपि तत्फले ॥

४

लोके कर्माणि ● गृहरथादि तु दृष्टार्थत्वेनाशास्त्रीयत्वान्नावश्यं समापनीयमित्याह—

गृहादि न,

५

प्रतिषेधेतु ● 'न कलञ्जम्' इत्यादौ प्रतिषेधत्वमित्याह—

तथा नित्यं कलञ्जादि निषेधानाम् ॥

६

तस्मिंस्तु ● स्मार्ताः शौचादयो धर्माः जननभारभ्य शक्तस्य प्रवर्तंत इत्याशङ्क्य 'उपनयनादिर्नियम इति स्मरणात्तदुत्तरमेवैत इत्याह—

उपनीतेः परं स्मार्तधर्माश्शौचादयो मताः ।

७

अभ्यासोऽकर्म ● 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादौ जीवने निमित्ते होमविधानात् सायं प्रातः कामबाधेन सन्ततानुष्ठानमाशङ्क्य कालस्यानुपादेयत्वेन काले कर्मविधानात् अनुपादेये काले यथाशक्तिन्यायाभावाद् भोजनाद्यसम्भवापत्तेश्च वाक्यद्वयैकवाक्यतया तत्काल एवाग्निहोत्रादिकमित्याह—

प्रदोषादौ जीवनेऽग्निहोत्राद्यं नान्यत्कालगम् ॥

८

तेषामौत्पत्तिकत्वात् ● यदि कालवशान्निमित्तस्य सङ्कोचः ततः कालस्य सकृदनुष्ठानेन सम्पादितत्वात्सकृन्नित्यानुष्ठानमाशङ्क्य सायं प्रातः कालावच्छिन्न जीवनस्य निमित्तत्वात्तदावृत्तौ नैमित्तिकावृत्तिमाह—

तदावृत्तौ तदावृत्तिः,

९

तथान्तः क्रतु ● पुरुषार्थेषु प्रत्यावृत्तिफलभेदादावृत्तावपि नैमित्तिके भेदस्कन्न होमादौ क्रतूपकारस्यैव फलत्वात् सकृत्कृतेन च तत्सिद्धेर्न निमित्तावृत्तौ नैमित्तिकावृत्तिरित्याशङ्क्य निमित्तावृत्तावावृत्तिगुणकेनैव होमेन क्रतोस्साङ्गत्वादावृत्तिमाह—

स्कान्नहोमादिके तथा ॥

१०

आचारात् ● गुर्वनुगमनादीनां गुरुप्रीत्यर्थत्वेन दृष्टार्थत्वादावृत्त्यनियममाशङ्क्य नियमादृष्टार्थभावृत्तिरित्याह—

निमित्तभेदादावृत्तिर्गुरोरनुगमादिके ॥

११

ब्राह्मणस्य ● 'सोमेन यजेत' 'स्वाध्यायोऽध्येतव्यः' 'प्रजामुत्पादयेत्' इत्येषां यावज्जीववन्निमित्ताभावेन नित्यत्वायोगात् प्रत्युत ज्योतिष्टोमवाक्ये सोमस्य फलश्रवणाद् 'वसन्ते वसन्त' इत्यस्य च कालमात्रविधायित्वेन नित्यत्व-बोधकत्वाभावाद्वीप्सया नित्यत्वे वा कालस्यानङ्गत्वेन बृहस्पतिसवादावतिदेशा-योगादुभयपरत्वे वाक्यभेदाद्विद्याप्रजयोः फलाश्रवणेऽपि विश्वजिद्वत्कल्प्यफल-त्वात्काम्यत्वमित्याशङ्क्य 'वसन्ते ज्योतिषा यजेत' इति वीप्सारहितवाक्यस्य सोमे कालविधायकस्य सत्वेन वीप्सासंयुक्तवाक्यस्य निमित्तमात्रपरत्वात् प्रजोत्पादने निमित्ताश्रवणेऽपि 'अनुत्पाद्य सुतानधो गच्छति' इति प्रत्यवाय-स्मरणादध्ययनस्य च कर्मोपयोग्यर्थज्ञानार्थत्वेन फलतो नित्यत्वात् ऋणश्रुतेश्च नित्यत्वमेषामित्याह—

नित्यं स्यात्सोमविद्यादि,

'जायमानो वै ब्राह्मणस्त्रिभिः ऋण वा जायते' इति वाक्ये ब्राह्मणग्रहणात्त-स्यैवेदं सोमादिकमावश्यकं नान्यस्येत्याशङ्क्य विधौ विशेषाश्रवणात् 'योऽनधीत्य द्विजो वेदम्' इति स्मृतेश्च ब्राह्मणपदस्योपलक्षणतया त्रयाणामपि तन्नित्य-मित्याह—

तच्च वर्णत्रये भवेत् ॥

षष्ठस्य द्वितीयः पादः ।

ततीयः पादः

१

सर्वशक्तौ ● यावज्जीविकेषु नित्येष्वग्निहोत्रादिषु प्रयोगविधिना समुच्चये नैवाङ्गानां ग्रहणात्सर्वाङ्गानुष्ठानसमर्थस्यैवाधिकार इत्याशङ्क्य निमित्ते नैमि-त्तिकस्य प्रधानस्यावश्यकत्वादगत्या भावनया यथासम्भवमङ्गानां ग्रहणान्न सर्वाङ्गानुष्ठानसमर्थस्याधिकार इत्याह—

यथाशक्ति तु नित्यं स्यात्,

२

काम्येषु ● काम्येष्वपि प्रधानविधिप्रवृत्त्याऽङ्गत्यागेनानुष्ठानमाशङ्क्य सर्वाङ्गानुष्ठानसमर्थं प्रत्येव प्रधानविधिप्रवृत्तेर्नियतनिमित्तत्वाभावाच्च न यथाशक्ति प्रयोग इत्याह—

काम्यं स्यात्साङ्गमेव तु ॥

३

क्रियाणां ● इदानीं यथाशक्तिप्रसङ्गात्प्रतिनिधिर्विचार्यते । तत्र

क्रियाद्रव्ययोस्तादात्म्यात् व्रीह्याद्यभावे च नीवारादिना क्रियमाणस्य कर्मणो भिन्नत्वान्नास्त्येव प्रतिनिधिरित्याशङ्क्य देशकालद्रव्यादिभेदेऽपि स एवायं याग इति प्रत्यभिज्ञानात् भेदाभेदवादादङ्गानुरोधेन प्रधानलोपायोगाच्चास्ति प्रतिनिधिरित्याह—

यागाद्यभेदाद्द्रव्यस्य भेदेऽपि गुणभावतः ।

अस्ति प्रतिनिधिरिति शेषः ॥

४

श्रुतिप्रमाणत्वात् ● नित्येऽशक्तिकृताङ्गत्यागोक्तावप्यङ्गान्तरागमस्यानुक्तत्वात्कर्मव्रीहिविध्योश्च तन्मात्रविधायित्वेन द्रव्यान्तराविधायकत्वात् न्यायात्प्राप्तौ पूतीकादिप्रतिनिधिविध्ययोगाच्च न प्रतिनिधिरित्याशङ्क्य व्रीहिशास्त्रस्य कर्मचोदनाक्षिप्तद्रव्यसामान्यविशेषनियामकत्वेन तदभावे कर्मचोदनाया अन्याक्षेपकत्वाविरोधात् पूतीकविधेस्तु सदृशासदृशप्राप्तावीषत्सदृशप्रतिनिधिनियमार्थत्वात् अस्ति प्रतिनिधिरित्याह—

अङ्गलोपे प्रधानस्यात्यागात्प्रतिनिधिर्मतः ॥

५

न देवताग्नि ● अग्न्यादिदेवतायाः मन्त्रस्य प्रयाजादिक्रियाया आहवनीयस्य च प्रतिनिधिः पूर्ववत्स्यादित्याशङ्क्य देवताया विधिगम्यत्वात् क्रियायाश्चादृष्टार्थत्वात् प्रक्षेपस्याधारं विनापि सिध्या आहवनीयादेरदृष्टार्थत्वेन प्रतिनिध्ययोगान्मन्त्रस्य दृष्टार्थत्वेऽपि तदर्थप्रतिपादकशब्दान्तरोपस्थितौ पूर्वं तदर्थस्यावश्योपस्थितेर्न प्रतिनिधिरित्याह—

न स्याच्चैव प्रतिनिधिर्मन्त्रदेवाग्निकर्मसु ।

६

प्रतिषिद्धम् ● 'अयज्ञिया वै माषा' इति माषादेरङ्गत्वनिषेधेऽपि तद्गतानां विकलानां व्रीह्यंशानां प्रतिनिधित्वमित्याशङ्क्य व्रीह्यवयवोपादानेऽपि निषिद्धानां माषावयवानां वर्जनीयत्वान्न प्रतिनिधित्वमित्याह—

माषादि तु निषिद्धं यत्तन्न प्रतिनिधीयते ॥

७

तथा स्वामिन ● प्रोषिते मृते वा स्वामिनि याजमानपदार्थकरणाय प्रतिनिधिमाशङ्क्य मृते प्रतिनिधातुरभावात् पत्न्यास्तु पतिहीनाया अस्वतन्त्राया अनग्नेश्च प्रतिनिधायकत्वायोगात् प्रोषिते त्वाज्यावेक्षणादीनामध्वर्य्वाद्यैस्सिद्धेः फलिसंस्काराणामन्यत्र कृतानामन्यत्र योग्यताजनकत्वाभावाच्च न स्वामिनः प्रतिनिधिरित्याह—

स्वामिनो न प्रतिनिधिः प्रोषितेऽथ मृतेऽपि वा ।

८

बहूनान्तु ● 'सप्तदशावराः सत्रमासीरन्' इत्यत्र स्वामिनः प्रतिनिध्य-भावेऽपि कर्त्रंशनिष्ठसाप्तदश्यपूरणाय एकस्मिन् मृतेऽन्यः प्रतिनिधिरुपादातव्य इत्याह—

सत्रे न स्वामिनः किन्तु कर्तृसङ्ख्यार्थमिष्यते ।

९

स स्वामी स्यात् ● आनीतस्य कर्तृत्वात्फलभागित्वमाशङ्क्य कर्ममध्ये प्रतिष्ठत्वात् अन्यैस्सङ्ख्यापूरणार्थमानीतत्वाच्च नासौ फलभागो, नापि मृतः तस्य समाप्त्यभावात् इत्याह—

कर्ममध्ये प्रतिष्ठत्वादानीतो न फलं लभेत् ॥

१०

स तद्धर्मा स्यात् ● आनीतस्य फलाभावात्फलिसंस्कारा नेत्याशङ्क्य यागस्य संस्कृतकर्तृकत्वात्संस्कारेषु कर्तृसङ्ख्याया साप्तदश्यस्य सिध्यर्थं तत्रापि ते स्युरित्याह—

तत्र स्युः फलिसंस्काराः,

११

सामान्यं ● व्रीह्यभावे सदृशमसदृशं वा प्रतिनिधातव्यमित्याशङ्क्य 'व्रीहिभिर्यजेत' इत्यत्र व्रीहित्वजातिपरिच्छिन्नावयविसम्बद्धावयवानां साधनत्वेन सदृशोपादाने विकलानां व्रीह्यवयवानां लाभेन व्रीहिशास्त्रस्य कतिपयानुग्रहात् सदृशमेव प्रतिनिधातव्यमित्याह—

सदृक् प्रतिनिधीयते ॥

१२

निर्देशात्तु ● व्रीहिभिः प्रयोगे प्रक्रान्ते सति तन्नाशे मुख्यत्वाद्यवा एव ग्राह्या न तु नीवारा इत्याशङ्क्य व्रीहिप्रयोगे यवानामनङ्गत्वाद्यवैर्यजने नानृतं वदेत्' इति निषेधातिक्रमापत्तेश्च व्रीहिसदृशमेव ग्राह्यमित्याह—

कल्पान्तरं वैकल्पिकम्,

पक्षान्तरम् यवादिनैव प्रतिनिधीयत इत्यनुषङ्गः ॥

१३

वचनाच्च ● 'यदि सोमं न विन्देत्पूतीकानभिषुणुयात्' इत्यत्र सोमाभावे पूतीकविधिः, अन्यथा न्यायात्प्राप्तौ विधिवैयर्थ्यादित्याशङ्क्य न्यायतः सदृश-प्राप्तेः पूर्वमेव चानेनेषत्सदृशानामेव पूतीकानां नियमान्नियमविधिरेवायमित्याह—

स स्यात्पूतीके नियमाद्विधेः ॥

१४

न प्रतिनिधौ ● प्रतिनिधिना प्रयोगे आरब्धे सति तन्नाशे तत्सदृशमेव ग्राह्यम्, वैकल्पिकन्यायेन प्रतिनिधिरेव तस्मिन् प्रयोगेऽङ्गत्वादित्याशङ्क्य नीवाराणामङ्गत्वे मानाभावात्तदपचारे मुख्यावयवलिप्सया मुख्यस्यैवोपादानमित्याह—

अपचारे प्रतिनिधेः मुख्यस्य सदृशो मतः ।

१५

स्याच्छ्रुतिलक्षणे ● यत्र तर्हि श्रौतः प्रतिनिधिः यथा पूतीकादौ तत्र तन्नाशे तत्सदृशग्रहणमाशङ्क्य वाक्यस्य प्रतिनिधिनियमार्थत्वात्सोमसदृशस्यैव ग्रहणमित्याह—

सोमतुल्यः प्रतिनिधिः न पूतीकलतासमः ॥

१६

मुख्याधिगमे ● प्रतिनिधिना प्रयोगे प्रकान्ते सति प्राक्सङ्कल्पान्मुख्यलाभे मुख्यमेव ग्राह्यम्, सङ्कल्पस्य यथाशक्ति शास्त्रार्थं सम्पादयिष्यामीत्येवंरूपत्वेन प्रतिनिधेरसङ्कल्पितत्वादित्याह—

प्रतिनिध्यर्थिना मुख्ये लब्धे तस्यैव सङ्ग्रहः ॥

१७

प्रवृत्तेऽपीतिचेत् ● यदापि प्रतिनिधौ कदिरादौ केचन संस्काराः कृताः तदापि संस्कृतं प्रतिनिधिं हित्वा पशुनियोजनस्य साद्गुण्यार्थं खदिर एवोपादातव्य इत्याह—

संस्कृतेऽपि प्रतिनिधौ तत्त्यागः प्राक् प्रधानतः ।

१८

नानर्थकत्वात् ● कृतेऽपि प्रतिनिधौ नियोजने न खदिर उपादातव्यः प्रयोजनाभावात् गुणानुरोधेन प्रधानावृत्त्ययोगाच्चेत्याह—

कृते प्रधाने मुख्यस्यानादरस्स्याद्गुणत्वतः ॥

१९

द्रव्यसंस्कारविरोधे ● यदा मुख्यं खदिरादि नियोजनयोग्यं तक्षणाद्ययोग्यं कदिरश्च तद्योग्यः तदा बहूनां संस्काराणां बाधापत्तेः स्थूलः कदर एव ग्राह्य इत्याशङ्क्य बहूनामपि संस्काराणां मुख्यखदिरानुरोधेन त्याग एवेत्याह—

मुख्यं संस्कारलोपेऽपि बलीयः ,

२०

अर्थद्रव्यविरोधे ● कार्याक्षमे तु खदिरादौ कदर एव ग्राह्य इत्याह—

अर्थाक्षमं न तु ॥

२१

विधिरप्येकदेशे ● इष्टौ प्रधानमात्रपर्याप्तव्रीहिलाभेऽपि पुरोडाशाङ्ग-शेषकार्याणामश्वशफमानस्य चाबाधाय प्रतिनिधिग्रहणमाशङ्क्य व्रीहीणां पुरोडाशद्वारा अङ्गत्वनिर्वाहेऽपि याग एवाङ्गत्वाच्छेषकार्याणाञ्च पुरोडाशाङ्गत्वादङ्गाङ्गानुरोधेन प्रधानाङ्गबाधायोगात् व्रीहय एव ग्राह्या इत्याह—

शेषकार्ये डाशमानेऽप्यक्षमं मुख्यमेव तु ॥

डाशः पुरोडाशः ॥

षष्ठस्य तृतीयः पादः ।

चतुर्थः पादः

१

शेषाद्व्यवदानं ● इदानीं पादद्वये प्रायश्चित्तविचारः । आग्नेयपुरोडाशादौ द्व्यवदानमात्रनाशेऽपि शिष्टस्य मध्यपूर्वार्द्धसम्भवादायतनादेव पुनरवदेयम्, न तु पुरोडाशान्तरम् । नापि 'यस्य सर्वाणि हवींषि नश्येयुः दुष्येयु' रित्याज्ययागः तस्य कृत्स्ननाश एव विधानादित्याशङ्क्याविकलस्य मध्यपूर्वार्द्धद्व्यवदानोक्तेरेव शिष्टस्यापादानत्वेन हविष्ट्वाभावात् न्यायात्पुरोडाशान्तरं वचनादाज्यं वा प्रतिनिधिः न तु शिष्टावदानमित्याह—

द्व्यवदानस्य नाशेऽपि पुरोडाशोऽन्य इष्यते ॥

आज्यं वा,

२

अपिवा शेष ● स्विष्टकृदिडाद्यर्थनाशे सति शेषस्य प्रतिपाद्यस्य सत्त्वादायतनात्पुनरवदानमाशङ्क्य स्विष्टकृत्प्रतिपाद्यस्य शेषस्य नष्टत्वादवशिष्टस्यचागामिप्रतिपत्यन्तरगृहीतत्वाल्लोपे सति स्विष्टकृतः केवलमाज्येनानुष्ठानमिडाद्यर्थस्य तु लोप एवेत्याह—

इडाद्यर्थनाशे शेषलोपोऽन्यत्र शेषतः ॥

३

निर्देशात् ● दर्शादौ शेषभक्षाः ऋत्विग्भ्योऽन्यैरेव कर्तव्याः । कर्मकरत्वेन सर्वभक्षेषु ऋत्विजां प्राप्तौ 'यजमानपञ्चमा इडां भक्षयन्ती' ति पुनः श्रवणस्य परिसङ्ख्यार्थत्वादित्याशङ्क्य वचनस्याकर्मकरत्वेनाप्राप्तयजमानप्रापकत्वात्तेषामेव भक्ष इत्याह—

ऋत्विजां शेषभक्षास्स्युरिडा तु स्वामिपञ्चमा ॥

४

अर्थसमवायात् ● कपाले 'भिन्ने जुहोति' इति श्रुतो भेदनहोमः कृत्स्नं भिन्न एव स्यात्सङ्घर्षादिकदेशभेदस्यावर्जनीयत्वात् यद्वायं होमो भेददोषनिरासार्थत्वेन भिन्नकपालसंस्कारकस्ततश्च कृत्स्नभिन्नस्य संस्कारवैयर्थ्यादेकदेश भिन्न एव होमस्स्यादित्याशङ्क्य सङ्घर्षणे सङ्घृष्टमिति बुद्धिसत्वेन भिन्नमिति बुद्धेरभावादनित्यभिन्नकपालसंस्कारकत्वे च होमस्य नित्यानित्यसंयोग विशेषादेकदेशभिन्ने कृत्स्नभिन्ने वा भग्नमिति बुद्धौ सत्यां होमः कार्य इत्याह--

भिन्नहोमः कृत्स्नभिन्नेऽप्यंशभिन्ने च सम्मतः ॥

५

क्षामे तु ● 'यस्य पुरोडाशः क्षायति तं यज्ञं निर्ऋतिर्गृह्णाति यदा तद्धविस्सन्तिष्ठते अथ तदेव निर्वपेत् यज्ञो यज्ञस्य प्रायश्चित्तिः' इत्याज्येन पूर्वयागं समाप्य विहितः पुनर्यागः कृत्स्नैकदेशक्षाणयोः पूर्ववत्स्यादित्याशङ्क्यैकदेशक्षाणस्यानिवार्यत्वात्सर्वक्षाण एव भवतीत्याह--

कृत्स्नक्षामे पुनर्यागो नाशे दाहानिवारणात् ॥

६

यथाश्रुतीति ● 'यस्योभयं हविरार्तिमार्च्छेत् ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इत्यत्रार्तहविर्वदुभयत्वस्यापि अष्टवर्षं ब्राह्मणमितिवत् निमित्तान्तर्भावाद्विशिष्टस्योद्देश्यत्वे वोभयदोहार्तौ पञ्चशराव इत्याशङ्क्येतरेतराविशेषितयोरार्तिहविषोरुभयत्वविशिष्टहविषो वानित्यत्वेन निमित्तत्वायोगादुभयविशिष्टाया आर्त्तेः आर्तिविशिष्टस्य वोभयत्वस्य निमित्तत्वे साकाङ्क्षत्वापत्तेः नामार्थानां परस्परासंयुक्तानामाख्यातसम्बन्धित्वेनोभयत्वविशिष्टहविर्विशेषितार्त्तेर्निमित्तत्वाभावाच्चोभयत्वस्य निमित्तेऽनन्तर्गतेरेकैकदोहार्तावपि पञ्चशाराव इत्याह--

एकार्त्तावपि चैन्द्रस्स्यादुभयत्वाविवक्षया ॥

७

होमाभिषव ● 'अभिषुत्य हुत्वा भक्षयन्ति' इत्यत्र निमित्तविशेषणसाहित्याविवक्षया अन्यतरस्मिन्नपि निमित्ते सोमभक्षस्स्यादित्याशङ्क्य होमाभिषवयोरर्थान्निमित्तत्वेऽपि तयोर्भक्षं प्रत्युपादेयकर्तृविशेषणत्वेन विवक्षितसाहित्यत्वादुभयकर्तुरेव भक्ष इत्याह--

द्वौ होमाभिषवौ स्यातां निमित्तं सोमभक्षणे ॥

८

पुनराधेय ● 'यस्योभावग्नी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिः' इत्यत्रोभयत्वाविवक्षया अन्यतराग्न्यनुगमेऽपि प्रायश्चित्तं स्या-

दित्याशङ्क्य नैमित्तिकाधानस्योभयाग्न्युत्पादकत्वादेकनाशे द्वयोरुत्पत्तिवैयर्थ्या-च्चोभयाग्न्यनुगमे पुनराधानमित्याह—

निमित्तं पुनराधेये त्वग्न्योरनुगमो द्वयोः ॥

९

पञ्चशरावस्तु • पूर्वोक्तः पञ्चशरावः दोहयोरार्तत्वेन कर्मणो द्रव्या-काङ्क्षायां द्रव्यप्रतिनिधिस्स्यान्न तु यागान्तरम्। न प्राप्तकामानुवादेन द्रव्य-देवताविधानाद्वाक्यभेदः, बहुव्रीहिणा पञ्चशरावशब्दस्योदनस्यैव परिमाणवि-शिष्टस्यैकस्य विधेयत्वेनैन्द्रपदस्य स्थानापत्त्या प्राप्तदेवतानुवादकत्वादित्याशङ्क्य पक्षे महेन्द्रस्यापि सत्वेन स्थानापत्त्या इन्द्रस्य नियमेन प्राप्त्यभावाद् विशिष्टकर्म विधिरित्याह—

दर्शात्कर्मान्तरन्त्वैन्द्रः,

१०

स प्रत्यामनेत् • स चायं यागः कार्यापेक्षः दोहयोश्चार्तत्वेनाभावस्या निवृत्तौ तत्कार्यसाधनापेक्षमित्युभयाकाङ्क्षया विधीयमानः पञ्चशरावः अमा-वास्यायाः प्रत्याम्नाय इत्याशङ्क्य पूर्वद्रव्यनाशेऽपि दध्यन्तरेण पयोन्तरेण वाऽमा-वास्यानुष्ठानसम्भवे तस्यानिवृत्तेः कर्मणः प्रतिनिध्यभावाच्च नैमित्तिकमिद-मङ्गं न तु दर्शबाधकमित्याह—

दर्शं नैव च बाधते ॥

११

विश्वजित्त्वप्रवृत्ते • 'यस्सत्रायागुरते स विश्वजिता यजेत' इत्यत्र प्रवृत्ता-वृत्तयोरुभयोरपि विश्वजित्, यद्वा फलकल्पनाभिप्राया प्रवृत्तस्यैव सत्राङ्गत्वेन विश्वजिदित्याशङ्क्य साधारण्येन प्रवृत्तं प्रति क्रत्वर्थत्वमप्रवृत्तं प्रति पुरुषार्थत्व-मिति वैरूप्यापत्तेः प्रवृत्तं प्रति चागुणस्य नित्यत्वेन 'यस्सत्रायागुरते' इति निमित्तश्रुतिबाधापत्तेः सत्रं सङ्कल्प्याकुर्वतो विश्वजिदित्याह—

आगूर्यं सत्राकरणे तत्स्थानी विश्वजिन्मतः ॥

१२

वत्ससंयोगे • 'बर्हिषा पौर्णमासे व्रतमुपैति वत्सैरमावास्यायाम्' इति व्रते वत्सविधिर्वत्सकरणकव्रतस्य वा विशिष्टस्य विधिरित्याशङ्क्य व्रते वत्सस्य पाण्यादिवत्करणत्वायोगात् वत्समेव व्रतयेदित्युक्तौ त्वशक्यार्थविध्यापत्तेः विशसने च वत्सत्वव्याघातापत्तेः 'पुरावत्सानपाकर्त्तोर्दम्पती आश्नीयाताम्' इति विध्यन्तरैकवाक्यत्वाच्च 'बर्हिषा पौर्णमासे' इतिवद् वत्सशब्देनोपाकरणम् तेन च व्रते कालो लक्ष्यत इत्याह—

वत्सैर्व्रते कालविधिः,

१३

कालश्चेत् ● सोऽयं कालस्सन्नयत एवासन्नयतो वत्सापाकरणाभावात् इत्याशङ्क्योपलक्षणस्य वत्सापाकरणस्याभावेऽपि शङ्खवेलावत्तदुपलक्ष्यस्यान्वाधानोत्तररूपस्य कालस्यानपायात् असोमयाजिनोऽपि स एव व्रतकाल इत्याह—

स कालः सांन्नाय्यं स्याद्विनापि सः ।

१४

प्रस्तरे ● 'सहशाखया प्रस्तरं प्रहरति' इत्यत्र यत्प्रस्तरं प्रहरति तत्सह शाखयेति तृतीयया शाखायाः प्रस्तराङ्गत्वादन्यथा प्रस्तरप्रहरणकाले शाखाप्रहरणविधौ प्रस्तरेण सह शाखां प्रहरेदित्यापत्तेश्च चतुर्थोक्तं प्रस्तरवच्छाखायाः प्रहरणक्रियाप्रतिपाद्यत्वं युक्तमित्याशङ्क्याङ्गत्वे सह पदवैयर्थ्यात्प्रस्तरस्य हरणप्रतिपाद्यत्वे शाखाया अपि प्रतिपाद्यत्वात्तत्र च निर्ज्ञातकालस्य प्रस्तरस्य शाखाकाललक्षकत्वादसन्नयतो न शाखेत्याह—

प्रस्तरे कालसंयोगश्शाखायास्सह भावतः ।।

षष्ठस्य चतुर्थः पादः ।।

पञ्चमः पादः

१

अभ्युदये ● चतुर्दश्यां भ्रान्त्या दर्शोपक्रमे सति प्रायश्चित्तमाम्नातम् 'यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात् स त्रेधा तण्डुलान् विभजेद् ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुम्' इति । अत्र प्रक्रान्तकर्मणि द्रव्यस्य देवतायास्तद्गुणानाञ्च दातृत्वादीनाञ्चरुत्वस्य शृतादेरधिकरणत्वस्य पुरोडाशस्य कपालाष्टत्वस्य च विधौ वाक्यभेदापत्तेस्तत्तद्गुणविशिष्ट कर्मत्रयविधिः पूर्वस्य तु लोप इत्याशङ्क्य यच्छब्देन पूर्वोपस्थितौ प्रकृतहानाप्रकृतकल्पनाविशिष्टविधिगौरवाणामसाध्यत्वाद् दातृत्वादिगुणविशिष्टानाञ्चैकदेवतात्वेन तद्विधिकृतवाक्यभेदाभावाच्चरुत्वस्य शृतादेरधिकरणत्वस्य च 'सह श्रपयति' इति वाक्यप्राप्तत्वात्पुरोडाशस्य कपालानां तद्गताष्टत्वस्य च प्रकृतित एव प्राप्तत्वात् पूर्ववाक्येन तण्डुलोपलक्षितप्रकृतहविषां पूर्वदेवताभ्यः विभागे यदग्नये विभजेदित्यपचये कृते सति पूर्वदेवताभ्योऽपनीतानां हविषां देवतान्तराकाङ्क्षायां मध्यमादिवाक्ये मध्यमादितण्डुलोद्देशेन प्राकाशवद्दातृत्वविशिष्टाग्न्यादिदेवतान्तरसम्बन्धकरणेन वाक्यभेदाभावान्न कर्मान्तरमभ्युदयेष्टिरित्याह—

यज्यभेदः पूर्वदेवापनयोऽभ्युदये मतः ।।

२

उपांशुयाजे ● अमावास्यायामप्युपांशुयाजोऽस्तीति कृत्वाचिन्तेयम्। तस्यामेवेष्टौ आज्ये देवतान्तरविध्यभावादुपांशुयाजाज्यापनयो नेत्याशङ्क्य तण्डुलशब्दस्य प्रकृतहविर्मात्रपरत्वादाज्यस्याप्यस्त्येवापनयः। पूर्ववद्देवतान्तरानुक्तेरुपांशुयाजस्य लोप एवेत्याह—

उपांशुयाजेऽन्याभावात्पूर्वलोपाच्च लुप्तता ॥

३

निरुप्ते स्यात् ● हविर्निरुप्तमित्युक्त्या निर्वापविशिष्टस्याभ्युदयस्य निमित्तत्वान्निर्वापात्पूर्वं चन्द्राभ्युदये नेदं प्रायश्चित्तमित्याशङ्क्य हविरभ्युदियादित्युक्तौ उदासीनस्य हविषो निमित्तत्वायोगेन प्रवृत्तस्य हविषोऽर्थान्निमित्तत्वेन निमित्तप्रतीतिशान्तेर्निर्वापो हविरुभयत्ववदविवक्षितः, तेन पूर्वमपि प्रायश्चित्तमित्याह--

अनिरुप्तेऽपि चेदं स्यात्,

४

अनिरुप्तेऽभ्युदिते ● तण्डुलग्रहणात्तदस्यैव पूर्वदेवतापनयो देवतान्तरयोगश्च। ततः पूर्वं ज्ञातेऽप्यभ्युदये प्राकृतीभ्य एव निर्वाप इत्याशङ्क्य तण्डुलपदस्य हविर्मात्रपरत्वात्पूर्वमपि वैकृतीभ्य एव निर्वाप इत्याह--

वैकृतीभ्यश्च निर्वपेत् ।।

५

विनिरुप्ते ● मुष्टिद्वयनिर्वापोत्तरं चन्द्राभ्युदये सत्यवशिष्टो निर्वापांशः प्राकृतीभ्य एव कर्तव्यः तासां प्रवृत्तत्वादित्याशङ्क्य निमित्तेन प्राकृतदेवतानां बाधाद्वैकृतीनाञ्च प्राकृतचतुर्मुष्टिनिर्वापाख्यपदार्थस्यानापतितत्वेनांशे तत्सम्बन्धायोगादवशिष्टो निर्वापस्तूष्णीमित्याह--

चन्द्रोदयोऽर्धे निरुप्तं तूष्णीं शिष्टन्तु निर्वपेत् ॥

६

सांन्नाय्यसंयोगात् ● सेयमिष्टिस्संन्नयत एव, अन्यथा दधिशृतसहित तण्डुलोद्देशेन देवतान्तरविधानस्य शृताद्यभावेऽयोगादित्याशङ्क्योद्देश्यविशेषणसाहित्याविवक्षया हविर्मात्रस्योद्देश्यत्वादसंन्नयतश्च सहश्रपणचरुत्वयोर्बाधात्पुरोडाशाभ्युदयेष्टिरित्याह—

हविर्मात्रस्य चोद्देशात्स्यादसंन्नयतोऽपि च ॥

७

साभ्युत्थाने ● 'यदि सत्राय दीक्षितानां साभ्युत्तिष्ठासेत्सोमं विभज्य विश्वजिता यजेत' इत्यत्र यद्यपि साभ्युत्थानमात्रं निमित्तं न क्रयविशिष्टम्,

वाक्यभेदात् तथापि नैमित्तिकस्य विश्वजितः सोमविभागविशिष्टत्वात्पुनराधेय-न्यायेन निमित्तमपि साम्युत्थानं सोमक्रयोत्तरकालिकमेव। ततश्च क्रीतराजक-स्यैव विश्वजिदित्याशङ्क्य क्रीतसोमस्यार्थान्तरविभागवत् सोमविभागस्यार्थ सिद्धत्वेनाविधेयत्वादक्रीतसोमस्य तु सुतरां विधेयत्वासम्भवादक्रीतराजकस्यापि साम्युत्थाने विश्वजिदित्याह--

सोमक्रयात्पूर्वमपि सत्रोत्थानेऽस्ति विश्वजित् ॥

८

दीक्षापरिमाणे ● अत्र भाष्ये 'एका दीक्षा तिस्रो दीक्षाः द्वादश दीक्षाः' इति ज्योतिष्टोमे श्रुतानां दीक्षापरिमाणानां विकल्पमाशङ्क्य 'द्वादशास्तु लिङ्गात्स्यात्' इत्यनेन 'द्वादशरात्रं दीक्षितो भृतिं वन्वीत' इति नित्यवच्छ्रुतस्य भृतिवननस्य पक्षान्तरेऽसम्भवात् द्वादाशदीक्षापरिमाणमेव प्रकृतौ, तेनैकाधिक-रण्यमित्युक्तम्। वार्तिके तु अधिकरणद्वयमुक्तम्। तत्राद्ये लिङ्गाद् द्वादश दीक्षा एव प्रकृतावित्याशङ्क्य प्रकरणाम्नातानामेकादिपक्षाणां विना कारणं लिङ्गादु-त्कर्षायोगात् 'दीक्षितो भृतिं वन्वीत' इत्येतावन्मात्रस्य विधेयत्वेन द्वादशेत्य-स्योपलक्षणत्वात्पक्षत्रयं प्रकृतावित्युक्तमाद्येऽधिकरणे तदाह—

दीक्षास्त्र्येकद्वादशकाः प्रकृतौ स्युर्विकल्पिताः ॥

द्वितीये तु द्वादशाहे प्रकृतिवद्विकल्पेन पक्षत्रयमित्याशङ्क्य 'षट्त्रिंशदहो वा एष द्वादशाहः' इति लिङ्गात् 'द्वाभ्यां लोमावद्यति द्वाभ्यां त्वचं द्वाभ्यामसृक् द्वाभ्यां मांसं द्वाभ्यां मज्जानम्' इति षट् द्विकानामनुक्रमणाद् द्वादशैव दीक्षा इत्युक्तं तदाह--

द्वादशाहे द्वादशैव दीक्षाः स्युर्नियमेन तु ॥

९

पौर्णमास्याम् ● गवामयने चित्रापौर्णमासे दीक्षेरन् मुखं वा एतत्संवत्सर-स्य यच्चित्रापौर्णमासस्तस्य न काचन निर्या भवति' इति चैत्रीं स्तुत्वा तत उक्तम्-'चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयस्सम्पद्यते' इति तत्र 'सर्वकृष्णाष्टमीषु द्वादशैकाष्टका' इति प्रयोगाच्चतुरहे पुरस्तादित्यत्र या काचि-त्पौर्णभासी ग्राह्या। द्वयोरपि वा पाक्षिकानुग्रहार्थं माघी चैत्री वा। यद्वा एक-वाक्यस्था चैत्री वाक्यान्तरस्थक्रयसम्पत्तिबलावगताया माघ्या बलीयसी। तस्मा-च्चैत्र्येव ग्राह्येत्याशङ्क्योपक्रमे 'एकाष्टकायां दीक्षेरन् एषा वै संवत्सरस्य पत्नी यदेकाष्टका' इत्युक्त्वा 'आन्तर्वा एते संवत्सरस्याभिदीक्षन्ते' इत्यादिना तत्र दोषमभिधाय 'चतुरहे पुरस्तात्पौर्णभास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयस्सम्प-द्यते' इत्युक्त्या माघपौर्णमास्यनन्तरभाविन्यामष्टभ्यामेव सोमक्रयस्यावश्यम्भा-वित्वाच्चैत्र्यां दीक्षितेन तथा कर्तुमशक्तेर्वाचनिकक्रयकालसामर्थ्यबलेन च

वाक्यशेषस्य चैत्रीस्तुतेर्माघीस्तुतिपरत्वान्माध्येव पूर्णिमा गवामयनदीक्षाया-मित्याह—

गवामयनदीक्षायां माघी स्यात्पौर्णमासिका ॥

१०

दीक्षाकालस्य • दीक्षितस्याग्निहोत्रादयो निषिद्धास्ते त्ववभृथोत्तरं प्रवर्तन्ते। तत्र शास्त्रवशेन यावन्तं कालं दीक्षाऽनुवर्तते तावन्तं कालं होमादि न कुर्यादिति शास्त्रार्थत्वात् ततः पश्चाद्दैवादवभृथोत्कर्षेऽपि अग्निहोत्रादि कर्तव्यमेवेत्याशङ्क्य लक्षणायां मानाभावाद्दीक्षाया एव प्रतिषेधनिमित्तत्वात्तस्याश्च केनापि कारणेनानुवृत्तौ न कर्तव्यान्यग्निहोत्रादीनि इत्याह—

विघ्नादवभृथोत्कर्षे नाग्निहोत्रादिकाः क्रियाः ॥

११

तत्र प्रतिहोम • अवभृथोत्कर्षकृतदीक्षानुवृत्तेः पुरुषापराधकृतत्वेनाशास्त्रीयत्वादपराधातिपन्नानामग्निहोत्रादीनां प्रतिहोमाः कार्या इत्याशङ्क्य कुतोऽपि कारणाद्दीक्षानुवृत्तौ होमानधिकारान्न कर्तव्याः। अकरणनिमित्तप्रतिहोमास्तत्र स्युरित्याह—

तल्लोपे प्रतिहोमा न ,

१२

प्रतिषेधाच्च • कृतावभृथस्योन्मुक्तदीक्षत्वादुदवसानीयोत्कर्षेऽग्निहोत्रहोमः तल्लोपे च प्रतिहोमस्स्यादित्याशङ्क्य 'एतया पुनराधेयसाम्मितयेष्ट्येष्ट्वा अग्निहोत्रं होतव्यम्' इति वचनेनोदवसानीयोद्ध्र्वमधिकारान्न पूर्वमग्निहोत्रहोमो न वा प्रतिहोम इत्याह—

नेष्ट्युत्कर्षेऽपि ते मताः ॥

१३

प्रतिहोमः • कृत्वा चिन्तेयम्। यदा प्रतिहोमाः कार्यास्तदा तेषां युगपदुपस्थितेरनियममाशङ्क्यातिपन्नसमाधानस्यातिपत्यनुसारित्वाद्यत्र ह्यग्निष्टोमादौ तत्र सायमादयः, षोडशिनि तु रात्रौ समाप्तेः प्रातरादय इत्याह—

यदा स्युस्ते तदा सायमाद्याः षोडशिभिन्नके।

१४

प्रायश्चित्त • नन्वनैमित्तिकानां वाक्याविरोधात् प्रकरणेनाङ्गत्वेऽपि नैमित्तिकानां भेदनहोमादीनां प्रकरणाबाधेन वाक्यात्सर्वार्थत्वाद्यत्र यत्र भेदनं तत्र ते स्युरित्याशङ्क्य नैमित्तिकेऽपि फलापेक्षायाः सत्वेनात्यन्ताप्रतीतफलकल्पनातः प्रकृतैकवाक्यताया लाघवात्प्रकृत्यर्था एव भेदनहोमा इत्याह—

भिन्ने स्युः प्रकृतौ होमाः।

१५

व्यापन्नस्य • प्रायश्चित्ताप्रसङ्गाद् 'व्यापन्नमप्सु प्रहरति' इत्येतदुपस्थितम्। तत्र पदार्थमाह—

व्यापन्नं स्यादभोज्यकम्।

केशकीटावपन्नमित्यर्थः॥

१६

विभागाश्रुतेः • ज्योतिष्टोमे बहिष्पवमानप्रसर्पणे 'यदि प्रस्तोताऽपच्छिन्द्यात् ब्रह्मणे वरं दद्यात्, यदि प्रतिहर्तापच्छिन्द्यात् सर्ववेदसं दद्यात् यद्युद्गातापच्छिन्द्याददक्षिणं तं यज्ञं परिसमाप्य पुनस्तेन यजेत तत्र तद्दद्यात् यत्पूर्वस्मिन् दास्यन् स्यात्' इत्यत्र यदा द्वयोर्युगपदपच्छेदः तदोभयकर्तृकस्यापच्छेदस्यैकेन व्यपदेशायोगान्निमित्तविघातान्न प्रायश्चित्तमित्याशङ्क्य स्वकीयप्रयत्नसाध्येऽपच्छेदे द्वयोस्सापेक्षकर्तृत्वाभावेन प्रत्येकं कर्तृत्वम्, निमित्तयोः कालैक्येऽपि प्रायश्चित्तं स्यादेवेत्याह—

प्रायश्चित्तमपच्छेदयौगपद्येऽपि विद्यते॥

१७

तत्र विप्रतिषेधात् • यौगपद्ये द्वयोः प्रायश्चित्तयोर्न विकल्पः, तस्याष्टदोषग्रस्तत्वात्। किन्तु 'तेन पुनर्यजेत' इत्युक्तेः पूर्ववददाक्षिण्यमन्ते चस र्वस्वमिति समुच्चय इत्याशङ्क्य प्रयोगान्तरत्वेन सर्वस्वदानेन पूर्वप्रयोगस्यानुपरमात्तस्मिन् त्वशक्यसमुच्चयत्वात्प्रायश्चित्तयोर्विकल्प इत्याह—

प्रायश्चित्ते विकल्पस्स्यात्,

१८

पौर्वापर्ये • यत्र क्रमेण द्वयोरपच्छेदः तत्र पूर्वनिमित्तकमेव प्रायश्चित्तं श्रुतिलिङ्गादिवदसञ्जातविरोधित्वाद् भवतीत्याशङ्क्य पूर्वज्ञानेनोत्तरोत्थिते निरोद्धुमशक्यत्वादुत्तरमुत्पद्यमानं पूर्वज्ञानं बाधित्वैवोत्पद्यत इत्युत्तरनिमित्तकमेव प्रायश्चित्तमित्याह—

क्रमे पूर्वन्तु दुर्बले।

१९

यद्युद्गता • यत्र प्रतिहर्त्रपच्देदोत्तरमुद्गात्रपच्छेदस्तदा पुनर्यज्ञे द्वादशतमेव देयम् 'यत्पूर्वस्मिन् दास्यन् स्यात्' इति पूर्वस्मिन् क्रतौ स्वभावतस्तस्यैव देयत्वात्, यद्वा पूर्वस्यिन् क्रतौ सर्ववेदसेन द्वादशशतस्य सर्ववेदसस्य वा दाक्षिण्येन बाधादुभयोरपि पक्षे देयत्वेन पुनर्यज्ञे विकल्प इत्याशङ्क्य पूर्वत्र प्रतिहर्त्रपच्छेदनिमित्तेन सर्वस्वेन द्वादशशतबाधात् 'अदक्षिणं तं यज्ञम्' इत्यस्यैव दक्षिणोत्कर्षपरत्वेन सर्वस्वदक्षिणाबाधकत्वाभावात्, अन्यथा 'दास्यन्' इति बाधापत्तेः सर्वस्वमेव पुनर्यज्ञे इत्याह—

उद्गातुरन्त्येऽपच्छेदे स्यात्सर्वस्वं पुनः क्रतौ ।

२०

अहर्गणे ● द्वादशाहाद्यहर्गणेषु यस्मिन् कस्मिंश्चदहनि उद्गात्रपच्छेदे सति गणस्य सहत्वसाधनत्वाद्धर्माणाञ्च साधननिवेशित्वाद् गणस्यैवादक्षिणं संस्थापनं पुनः प्रयोगश्चेत्याशङ्क्य यागानामेव स्वस्वापूर्वद्वारा फलजनकत्वेन समूहस्य साधनत्वे मानाभावाद् यस्मिन्नहन्यपच्छेदः तदेवावृत्तमन्यैस्सहितं फलं जनयतीति कल्पनात्तस्यैवान्ह आवृत्तिरित्याह—

अहर्गणे त्वपच्छेदे तस्यैवान्हः पुनः क्रिया ॥

षष्ठस्य पञ्चमः पादः ॥

षष्ठः पादः ॥

१

सन्निपाते ● इष्टौ 'राजन्यवासिष्ठानां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामि'ति कल्पभेदः सत्रेष्टिषु प्राप्तः। तत्र वासिष्ठानां नाराशंसस्याङ्गत्वादन्यथा नाराशंसस्य वाशिष्ठार्थत्वे फलकल्पनापत्तेस्तत्र च वासिष्ठावासिष्ठैः क्रियमाणस्य वासिष्ठकर्त्तृकत्वाबाधाद्भिन्नकल्पनामप्यधिकारोऽस्त्वित्याशङ्क्य वासिष्ठादीनुद्दिश्य तादर्थ्येन क्रतूपकारद्वारा नाराशंसादिविधौ धात्वर्थविधिलाभादन्यथा धात्वर्थे कर्तृ विधौ विप्रकृष्टविध्यापत्तेरन्यकरकल्पेऽन्येषां क्रतूपकारलोपाद्वैगुण्यापत्तेः समानकल्पनामेवाधिकार इत्याह—

तुल्यकल्पास्तु सत्रे स्युः,

२

वचनात् ● कुलाये 'एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र-राज्ञः पुरोहितो राजपुरोहितः। राजपुरोहितश्च राजपुरोहितश्चेत्येवं षष्ठीतत्पुरुषादेकशेषं कृत्वा राजद्वयसम्बन्धिनोर्द्वयोः पुरुषयोरधिकारः, यद्वा राज्ञः पुरोहितावित्येकराजसम्बन्धिनोर्द्वयोः पुरोहितयोः, यद्वा कर्मधारयबलीयस्त्वाद्राजात्मकयोर्द्वयोः पुरोहितयोरधिकार इत्याशङ्क्याद्यपक्षद्वये पूर्वपदे लक्षणापत्तेरन्यस्य पुरोहिताभावेन राजपदवैयर्थ्यप्रसङ्गात् 'पुरोहितं वृणीत' इत्युपादीयमानस्यैकत्वस्य विवक्षितत्वेन च राज्ञः पुरोहितावित्येवमुक्तेः राजत्वपुरोहितत्वयोर्भिन्नजातीयवृत्तित्वेन राजात्मकौ पुरोहितावित्येवं कर्मधारयस्याप्ययुक्तेः। द्वन्द्वसमासाश्रयणेन भिन्नकल्पयोरपि वचनादधिकार इत्याह—

कुलाये भिन्नकल्पकौ ।
राजा पुरोहितश्चापि द्वन्द्वस्य बलवत्वतः ॥

३

सत्राणि ● सत्रे ऋद्धिकामानामविशेषाद्वर्णत्रयस्याप्यधिकारः। ये यजमानास्त ऋत्विजः' इति तु यच्छब्दोपबद्धयजमानोद्देशेन तत्संस्कारकतया आर्त्विज्यविधानार्थम् द्वादशान्त्ये च गुणभूतकर्तृपरिच्छेदकं बाह्मण्यमुक्तं न चात्र गुणभूताः कर्त्तारः सन्तीत्यविरोधात् त्रयाणां वर्णानामधिकार इत्याशङ्क्यार्त्विज्यस्य यजमानसंस्कारकत्वे अप्राकृतकार्यत्वापत्तेर्यत्तदोर्व्यत्यासेन ये ऋत्विज इति जघन्यऋत्विक्पदलक्षितार्त्विज्यपदाथषु यजमाना विधीयन्त इत्यार्विज्याङ्गत्वेन प्रकृतितः प्राप्तयजमानान्यकर्तृकतायाः वचनेन बाधेऽपि ब्राह्मणकर्तृकत्वस्य बाधाभावात् ऋद्धिकामादिश्रुतेश्च ब्राह्मणेष्वपि चरितार्थत्वात् तेषामेव सत्रमित्याह—

सत्रे स्युः ब्राह्मणाः सर्वे ,

४

वशिष्ठानाम् ● तत्राप्यविशेषात्सर्वेषां विप्राणामधिकारः, यद्वा वाशिष्ठो ब्रह्मे'ति वचनात्तत्समानकल्पनामधिकार इत्याशङ्क्य यो वा कश्चित् स्तोमभागानधीयीत स वाशिष्ठः कस्यापि स्तोमभागविदो ब्रह्मत्वोक्तेर्न वाशिष्ठनियमः। किन्तु 'वैश्वामित्रो होते'ति वचनात्तेषां तत्समानकल्पनाञ्च सत्रेऽधिकार इत्याह—

वैश्वामित्राश्च तत्समाः ,

५

विहारस्य ● सत्रे अग्नीनां परार्थत्वात् केनचिदग्निमता सहानग्नीनामप्यधिकार इत्याशङ्क्य पञ्चमे सोमविकाराणां दर्शपूर्णमासपूर्वकत्वोक्तेरनाहिताग्नीनाञ्च तदसम्भवादादधीतेत्यात्मनेपदेनाधानफलस्याग्नीनां कर्मयोग्यत्वस्याधातृनिष्ठत्वबोधनादनाहितानाञ्चान्यत्र योग्यताजनकत्वाभावान्नानग्नीनामधिकार इत्याह—

अग्न्याहिताश्च तं ।

६

जहोतीनाम् ● अग्निवदुपग्रहविशेषाभावाद्यस्य कस्यचित्पात्राणि सत्रे स्युरित्याशङ्क्य यस्य पात्रैः प्रयोगः प्रक्रान्तःतस्यान्तरा मरणे सति 'आहिताग्निभिर्दहन्ति यज्ञपात्रैश्चे'ति प्रतिपत्तिलोपापत्तेः तत्पात्रैर्दहि च क्रतुवैगुण्यापत्तेः साधारणानि पात्राण्युत्पादनीयानीत्याह—

पात्राण्येषां सामान्यतो जगुः।

७

पुरुषकल्पेन ● दर्शपूर्णमासयोः 'सप्तदश वैश्यस्ये'त्यत्र साप्तदश्याङ्गत्वेन वैश्यकर्तृकविधानात्प्रकृतौ च साप्तदश्याभावाद्यत्राध्वरकल्पादौ साप्तदश्यमुक्तम्

तत्र वैश्यविधानादध्वरकल्पादौ वैश्यस्येति षष्ठ्या वैश्योद्देशेन साप्तदश्यविधौ तस्य नैमित्तकत्वात्तेन च नित्यपाञ्चदश्यबाधादध्वरकल्पादावनैमित्तिकं ऋत्वङ्गं साप्तदश्यं वर्णत्रयमधिकुर्यादित्याह—

प्रकृतौ साप्तदश्यं स्याद् वैश्येनोत्कर्षमर्हति ॥

षष्ठस्य षष्ठपादः

सप्तमः पादः

१

स्वदाने • विश्वजिति 'सर्वस्वं ददाती'त्यत्र धनवत्स्वशब्दवाच्यानां पित्रादिज्ञातीनां परविधेयीकरणसम्भवाद्दानमाशङ्क्य जनकपुंस्त्वरूपपितृत्वादेर्दानेनानपायात् स्वशब्दस्य चात्मात्मीयज्ञातिधनवाचिनः सकृत्प्रयुक्तस्य धनरूपैकार्थबोधकतयाप्युपपत्तौ भिन्नशक्त्या ज्ञात्यादिपरत्वायोगाद्धनस्यैव दानं न पित्रादेरित्याह—

सर्वस्वदाने देयं स्वधनम् ,

२

न भूमिः • सार्वभौमस्य महापृथिवी स्वमिति तद्दानमाशङ्क्य तस्य देशपालनकरग्रहणमात्रेऽधिकारान्न सा तेन देयेत्याह—

भूमिं विहाय तु ।

३

अकार्यत्वात् • विश्वजित्येव सर्वस्वं ददातीति'विधेः'न केसरिणो ददाती'ति निषेधाच्चाश्वदाने विकल्पमाशङ्क्य विकल्पस्य दुष्टत्वाद्दाशमिकन्यायेन केसरिव्यतिरिक्तं सर्वं देयमिति वाक्यैकवाक्यतया न केसरिण इत्यस्य पर्युदासत्वान्नाश्वो देय इत्याह—

नाश्वस्येति ,

४

नित्यत्वाच्च • 'सर्वस्वं ददाती'त्यत्र यत्सर्वस्वं शयनासनादि तद्ददाति इति सर्वोद्देशेन दानविधानाद्यस्यापि तन्नास्ति सोऽपि तदर्जयित्वा दद्यादित्याशङ्क्यातिदेशेन दानस्य प्राप्तत्वेन तत्रैव द्वादशशतव्यावृत्यर्थं सर्वतामात्रविधानात्तत्र च सिद्धस्वत्वेष्वेव सर्वत्वोपपत्तौ नासतोऽर्जयित्वा दानमित्याह—

नासतो दानम् ।

५

शूद्रश्च • धर्मार्थसेवकस्य शूद्रस्य परविधेयीकरणेन दानमाशङ्क्य स्वत्वाभावान्न दानम् । दासस्य त्वस्त्येवेत्याह—

न शूद्रे वासवर्जिते ,

६

दक्षिणाकाले ● दक्षिणाकाले यद्भूतं यच्च भवित्वेन निश्चितं तत्सर्वं देयमित्याशङ्क्य विद्यमान एव सर्वत्वोपपत्तेर्न धारणम्। भाविनस्तु स्वत्वा भावादेव न दानमित्याह—

यावत्स्याद्दक्षिणाकाले तत्सर्वं देयमेव हि।

७

अशेषत्वात् ● प्रकृतौ यजमानेन कर्मारम्भ एवात्मीयं धनं वचनात् त्रेधा विभक्तम् इदं मे भक्षार्थमिदं मे क्रत्वर्थमिदं मे दक्षिणार्थमिति तत्त्रिविधमपि वचनाद्देयम्। कर्मशेषं चोत्स्रष्टव्यम्। यद्वा दानस्याङ्गत्वेन तदनुरोधेन क्रतोर्बाधायोगात्क्रतुपर्याप्तं शिष्ट्वाप्यन्यान्यत् सर्वं देयमित्याशङ्क्य दक्षिणार्थं निर्दिष्टद्रव्यानुवादेन सर्वतामात्रविधानाद्दक्षिणार्थमेव सर्वं देयमित्याह—

क्रतुभक्षार्थवर्जं यत्तत्सर्वं देयमिष्यते।

८

अहर्गणे ● अष्टरात्रेऽहीने विश्वजित्प्रथमः तत्र 'गणेषु द्वादशाहस्ये'ति न्यायेन 'द्वादशशतं दक्षिणे'त्याशङ्क्य लैङ्गिकातिदेशतो नामातिदेशप्राबल्यात्सर्वस्वमेव दक्षिणेत्युक्तं भाष्ये तदाह—

अहीनाद्ये विश्वजिति सर्वस्वं प्राकृताधिकम्।

वार्तिके तु मुख्यादपि भूयसां जघन्यानां बलीयस्त्वात्तेषां चान्वहं द्वादशशतप्राप्तेर्विश्वजित्यपि तावदेव देयमित्युक्तम्॥

९

विकारः सन ● 'सर्वस्वं ददाती'ति श्रुत्यर्थस्य द्वादशशतान्न्यूनेऽधिके च सम्भवादूनधनस्यापि विश्वजित्यधिकार इत्याशङ्क्य प्रकृतौ द्वादशशतं विधाय 'यद्येतावता ऋत्विजो न नमेयुरपि सर्वस्वेन यजेते'ति प्राकृतस्यैव नियमादधिकमेव सर्वस्वमित्याह—

द्वादशात्तु शतादूर्ध्वं सर्वस्वं नो नमिष्यते।

१०

अधाने ● 'एका देया षड्देयाः द्वादश देयाश्चतुर्विंशतिर्देयाः शतं सहस्रमपरिमितमि'त्यत्र न परिमितमपरिमितमित्येवमेकादिपरिमाणप्रतिषेधो न तु परिमाणशून्यस्य दानमित्याशङ्क्य योगाद्रूढेर्बलीयस्त्वात्तया च बह्वर्थवाचित्वावगमात्सुज्ञानपरिमाणेष्वपरिमितशब्दोपपत्तेश्च सङ्ख्यान्तरविशिष्टदानविधिरेवायमित्याह—

रूढ्याऽपरिमितन्त्वन्यत् ,

११

अनियमो विशेषात् ● अपरिमितं सहस्रात् न्यूनमधिकं वेत्याशङ्क्या-परिमितशब्दवाच्यबहुत्वस्य पूर्वनिर्दिष्टसहस्रादनन्तरं श्रुतत्वात्तदधिकमेवा-परिमितमित्याह--

उक्तसङ्ख्यादिकं मतम् ।

१२

परकृति ● दर्शादौ इति ह स्माह वर्कुर्वार्ष्णिः माषान्मे पचत'इत्यर्थवादत्व मौदुम्बराविकरणे सिद्धम् । यदा मनुष्यधर्मो विधिस्तदा वार्ष्णिकीर्तनात्तद्गोत्र-मेव माषमाक इत्याशङ्क्य वार्ष्णिकृतत्वेन कारणेन माषपाकस्यैव स्तुत्यवगमेन तत्कर्तृकमाषपाकस्यास्तुतेः सर्वधर्मत्वम् । सिद्धान्ते त्वारण्याशनविधिस्तावकत्वे-नार्थवादत्वमित्याह--

यदा विधिस्तदा भाषपाके स्यात्सर्वधर्मता ।

१३

सहस्रसंवत्सरं ● 'पञ्चपञ्चाशत स्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चाशत एकविंशा विश्वसृजाम-मयनं सहस्रसम्वत्सरं सत्रमि'त्यत्र श्रुतिवलाद्देवादीनामधिकारः यद्वा रसायनादि लब्धसहस्रायुषां मनुष्याणाम्, यद्वा पुत्रपौत्रैः कार्यमित्येवं कुलकल्पः, यद्वा तत्स-त्रात्सहस्रायुः फलम्, यद्वा पञ्चपञ्चाशत इत्यधिकारिविशेषणम्, ततश्च सार्द्ध-शतद्वयपुरुषाणामधिकारः, वत्सरचतुष्टयेन च सत्रसमाप्तिः, यद्वा 'यो मासः स सम्वत्सर' इति वचनात्सम्वत्सरशब्दो मासपरः यद्वा 'सम्वत्सरप्रतिमो वै द्वादशरात्रय' इति वचनाद्वा दशरात्रिपर इत्याशङ्क्य देवादीनां ब्राह्मणादिकर्तृ-काधानसाध्याग्न्यभावाद्रसायनादेश्च तावदायुः सम्पादकत्वाभावात् समग्रानु-ष्ठानाभावे फलायोगेन कुलकल्पस्याप्ययोगात् तथाविधशब्दाभावेन च सत्रारम्भा-त्तादृशं फलं भवतीतित्यत्र मानाभावाच्चतुर्विंशतिपरमाः सत्रमासीरन्' इत्यु-क्तेश्च सार्द्धशतद्वयपुरुषाणामधिकारायोगादाधानादूर्ध्व तावज्जीवनासम्भवेन सम्वत्सरशब्दस्य मासपरत्वायोगात् 'सवत्सरप्रतिमा वै द्वादशरात्रय' इत्यस्य च प्रतिमोक्त्या स्तुत्यर्थत्वेन द्वादशरात्रिपरत्वायोगात त्रिवृदादिसमानाधिकरणः सम्वत्सरशब्दस्त्रिवृदादिस्तोमकस्य क्रतोरहस्सम्पाद्यत्वादहस्सु गौण इत्याह—

सहस्रवत्सरे सत्रे सम्वत्सर पदाद्दिनम् ॥

षष्ठस्य सप्तमः पादः ॥

अष्टमः पादः

१४

इष्टिपूर्वत्वात् ● 'चतुर्होतारं व्याचक्षीत चतुर्होत्रा प्रजाकामो जुहुयात्'

इति प्रकृत्य 'एषा वा अनाहिताग्नेरिष्टिरि'त्युक्तम् । तत्र वैशब्दाद् येयमनाहिताग्नेर्जपरूपा क्रिया सेष्टिरित्येवं वाक्यस्य जपस्तुतिपरत्वेनानाहिताग्न्यधिकारप्रतिपादकत्वाभावाच्चतुर्होमेष्वप्याहवनीयस्याङ्गत्वादाहिताग्नेरेवाधिकार इत्याशङ्क्य वैशब्देऽप्यप्राप्तत्वादर्थवत्त्वाच्च षष्ठीश्रुत्यानाहिताग्नेरेव ते लौकिके स्युरित्याह—

चतुर्होत्रादिभिश्च ,

होमा लौकिकेऽग्नावित्यग्नेनान्वयः ।

२

उपनयनम् • होममात्रोद्देशेनाहवनीयविधानादुपनयनाङ्गहोमाः आहवनीये कार्याः । न चाधानं बिना अहवनीयः । न च भार्यां बिना आधान मित्याहवनीयस्य पदार्थस्यानुग्रहाय 'स्नात्वा भार्यामधिगच्छेदि'ति क्रमं पदार्थधर्मं बाधित्वाऽनुपनीत एव दारानुपयम्याधाय लब्धाहवनीयः पश्चादुपनयनेऽधिक्रियत इत्याशङ्क्य विद्यां बिनाधानायोगाद्विद्यायाश्चोपनयनेन बिनाऽयोगादित्यपत्यार्थैरेव कार्यसिद्धौ प्राक् दाराक्षेपायोगाददारस्य चाधानायोगाद् लौकिकाग्नावेव होमाः स्युरित्याह—

उपनये होमाश्च लौकिके ।

३

स्थपतीष्टि • 'एतया निषादस्थपति याजयेदि'ति स्थपतीष्टिः प्रकृतितः प्राप्ताहवनीयस्योत्पत्यर्थमविहितमप्याधानमाक्षिपेदित्याशङ्क्याद‍ृष्टरूपस्याहवनयत्वस्य लौकिकेनाधानेनाजननाल्लौकिकेऽग्नौ सा स्यादित्याह—

स्थपतीष्टिश्च लौकिके

अनल इत्यग्रिमेणान्वयः ।

४

अवकर्णि • 'यो ब्रह्मचार्यवकिरेत्स गर्दभं पशुमालभेते'त्यत्र द्विजत्वाद्विद्यायोगाद् विवाहादर्द्धमाधायाहवनीये पशुः स्यादित्याशङ्क्य विच्युतब्रह्मचर्यस्य प्रायश्चित्तं बिना गार्हस्थ्येऽनधिकाराल्लौकिकेऽग्नौ पशुरित्याह—

अवकोर्णिपशुः स्याल्लौकिकेऽनले ।

५

उदगय • चौलोपनयनादीनि सदा प्राप्तानि स्मृतिवशादुदगयने कर्तव्यानीत्याह—

सौम्यायने तु चौलादि शुभम् ,

६

इतरेषु • मासिश्राद्धादीनि पित्र्याणि दक्षिणायने कर्तव्यानीत्याह—

पित्र्यन्तु दक्षिणे ॥

७

याच्ञाक्रयणां ● सोमे 'द्वादशरत्रीर्दीक्षितो भृतिं वन्वीते'ति याच्ञा 'अरुणया क्रीणातो'ति क्रयश्च द्रव्यार्थत्वाद् द्रव्यस्यैव स्यादित्याशङ्क्य द्रव्यार्थत्वे वैय्यर्थ्यादपूर्वार्थत्वेन तद्भावेऽपूर्वासिद्धेर्द्रव्यवतोऽपीत्याह—

द्रव्यसत्वेऽपि याच्ञा स्यात् क्रयणञ्च ।

८

तथा भक्षप्रैष ● 'पयोव्रतं ब्राह्मणस्ये'त्यदि भक्षान्तराभावे 'आग्नीदग्नीन्विहरे'ति प्रैषश्चान्यतो ज्ञाते प्रैषार्थे अहतं वासश्च वासोन्तराभावे 'यत्पशुमायुमकृत' इति संज्ञपनहोमो मायुकरणे 'योऽस्मान् द्वेष्टी'त्यादिवद्द्वेष्यसद्भावे अन्यथा तत्तलिङ्गविरोधे स्यादित्याशङ्क्य निमित्ताश्रुतेरेतज्जन्यादृष्टस्यान्येनासिद्धेश्चेति नित्यमित्याह—

पयोव्रतं प्रैषे बुद्धेऽपि वासश्चाप्यहतादि तथेष्यते ।

आदिशब्दात्संज्ञप्तहोमादि ॥

९

अनर्थकम् ● यदा तु रोगादिना पयो न जीर्यति तदा प्रधानभूतक्रतोरबाधाय पयोव्रतलोप इत्याह—

रोगे पयोव्रतं न स्यात् ,

१०

छागोवा ● 'अग्नीषोमीयं पशुमालभेते'त्यत्र विधेः पशुमात्रगोचरत्वात् 'छागस्य वपाया मेदस' इति मन्त्रस्थच्छागशब्दस्य च विधिस्तुत्योरिव मन्त्रविध्योरेकवाक्यत्वाभावेनाजपरत्वायोगात्पशुमात्रं ग्राह्यम् । मन्त्रस्तु प्राप्तार्थत्वायोगेन पशुमात्रपरः पाक्षिको वेत्याशङ्क्य नित्यवदप्राप्तमन्त्रगतछागशब्दस्य जातिविशेषे रूढत्वाद्विध्यविरोधाच्च छागस्यैव ग्रहणमित्याह—

मन्त्रात् छागः पशु स्मृतः ॥

इति रामकृष्णभट्टसूरिसूनुकमलाकरभट्टात्मजानन्तभट्टकृतायां
शास्त्रमालावृत्तौ अष्टमः पादः ॥
पदाः ८ अधिकरणानि १०९
षष्ठोऽध्यायस्समाप्तः

●

सप्तमः सामान्यातिदेशाध्यायः

प्रथमः पादः

१

श्रुतिप्रमाणत्वाच्छेषाणां • पूर्वषट्केनोपदेशविचारे समाप्ते सत्यधुना तद्धेतुकोऽतिदेश उच्यते। तत्रेष्टिज्योतिष्टोमादौ प्रयाजादीनां करणार्थत्वं न त्वपूर्वभावनार्थत्वम्, तथात्वे करणवदङ्गानामपि फलार्थत्वापत्तेस्ततश्च समिदादीनां प्रकरणाम्नानानुमितेन वाक्येन यागमात्रार्थत्वात्प्रकरणेन च प्रकृतत्वबोधने आत्माश्रयात्संनिधेश्च श्रुत्या बाधात्सर्वार्थत्वम्। यद्वा फलविनियोगयोः 'सर्वेभ्यः कामेभ्यो यदाग्नेय' इत्यादि वाक्यैः सिद्धत्वेन ज्योतिष्टोमादिवाक्येन तयोर्विधानायोगादुद्देश्यविशेषणदर्शपूर्णमासपदाविवक्षया सर्वयागोद्देशेनाङ्गविधिः, यद्वा अपूर्वभावनासम्बन्धेऽपि [1]वाहीकयवान्नन्यायेन क्वचिदुक्ता अपि धर्माः सर्वार्थास्तस्मादुपदेशादेव सर्वत्र धर्मप्राप्तेर्नातिदेश इत्याशङ्क्य फलवाक्येऽङ्गवाक्यैकवाक्यतयांऽशत्रयविशिष्टभावनाविधानात्तत्र च फलवत्स्वस्वरूपात्यागेनैवाङ्गानां भावनासम्बन्धेन तुल्यत्वाभावाद्यजेः लोकतो निर्ज्ञातप्रकारत्वेन चाकाङ्क्षाभावादपूर्वभावनायास्तन्निर्ज्ञातप्रकारत्वेन तत्सत्वाद्वाहीकयवान्नादौ मानान्तरात्तथावगमेऽपि शब्दैकप्रमाणके तदभावान्न धर्माः सर्वार्थाः, किन्तु प्रतिप्रकरणं व्यवस्थितास्ततश्चानुपदिष्टधर्मके सौर्यादौ सिद्धोऽतिदेश इत्याह—

प्रकृतौ तु व्यवस्थातोऽङ्गानां स्यादतिदेशनम्।

सोऽतिदेशः क्वचित् प्रत्यक्षवचनात्क्वचिन्नामधेयात् क्वचिच्चोदनालिङ्गानमित वचनाच्चेति त्रिधेत्याह—

स त्रिधा वचनान्नाम्ना लिङ्गाच्चेति क्रमाज्जगुः॥

२

समान • तत्राद्यमाह-इषुयागे ज्योतिष्टोमविकरे 'इषुं विष्टुतिं करोति- सप्ताहं भवती'ति प्राकृताङ्गविकारं विधाय 'समानमितरच्छ्येनेन' इत्युक्तम्। तत्रेतरशब्दस्य सन्निहितवचनत्वाच्छ्येनवैशेषिकाणाञ्च लोहितोष्णीषत्वादीनामसन्निहितत्वेनेतरशब्दानुपस्थाप्यत्वान्न तदुक्तिः किन्तु ज्योतिष्टोमधर्माणां श्येने इषौ च सत्वात्सादृश्यानुवादमात्रमित्याशङ्क्येतरशब्दस्य पूर्वनिर्दिष्टसदृशसन्निहितवाचित्वेन सन्निहितमात्रवाचित्वाभावात्तत्र च सौमिकाङ्गानां संन्न-

---

१. वाहीको यवान्नेन भोजयितव्य इत्युक्ते सर्ववाहीकस्य यवान्नभोजनं यथा प्राप्नोति तथा क्वचिद्धर्माम्नातस्य सर्वार्थत्वेन ग्रहणमित्यर्थः।

धावपि पूर्वोक्तविष्टुत्याद्यसादृश्यादप्राकृतत्वेन लोहितोष्णीषादेर्विष्टुत्यादि सादृश्येऽपि संन्निध्यभावाद्द्वयोरसम्भवे वचनार्थंवत्त्वाय सन्निधिं बाधित्वा श्येनविशेषधर्माणां विधिः। यद्वा प्राकृताङ्गेषु विष्टुत्यादिविकारे उक्ते तद्भिन्नाङ्गं संन्निहितमितरशब्देनोद्दिश्य श्येनवैशेषिकाङ्गसादृश्यविधानार्थं वचनमित्याह—

श्येनाङ्गानामिषावाद्यः,

३

पञ्चसञ्चरेषु ● चातुर्मास्येषु वैश्वदेवादीनां पञ्चहविषां ब्राह्मणमुत्तरेषु पर्वस्वतिदिष्टम् 'एतद् ब्राह्मणान्येव पञ्चहवीषी'ति। तत्राङ्गविधिभिरङ्गमात्रविधानेन हविषामविधानादर्थवादेन तु 'वार्त्रघ्नानि वा एतानि हवींषी'त्यादिना विधिसहितेन तद्विधानात्स्तुतिलाभायार्थवादमात्रातिदेश इत्याशङ्क्य तन्मात्रातिदेशे वैयर्थ्यादङ्गवाक्यैकवाक्यतया हविर्विधिभिरङ्गानामपि विधानाद्धर्माणां प्राप्त्यभावे वरुणप्रघासेषु त्रिंशदाहुतय इति लिङ्गदर्शनायोगाच्च साङ्गस्य सविधिकस्य नव प्रयाजा इत्यादि काण्डस्यातिदेश इत्याह—

काण्डगः पञ्चसञ्चरे।

४

एककपाले ● वैश्वदेवे 'द्यावापृथिव्य एककपालः' वरुणप्रघासेषु 'काय एककपालः' ऐन्द्राग्नो द्वादशकपालश्च। साकमेधेषु पुनः श्रूयते ऐन्द्राग्न एकादशकपालो वैश्वकर्मण एककपाल' इति। तत 'एतद् ब्राह्मण ऐन्द्राग्न एतद् ब्राह्मण एककपाल'इति श्रुतम्। तत्रापि प्राग्वत्साङ्गस्य काण्डस्यातिदेश इत्याह—

ऐन्द्राग्नैककपालेऽपि साकमेधेऽप्यसौ भवेत्।

असौ काण्डातिदेशः।।

५

एकपालानां ● 'एतद् ब्राह्मण एककपाल'ति। वैश्वदेविके द्यावापृथिवीये बहुधर्माम्नानात्तद्ब्राह्मणातिदेश इत्याशङ्क्याव्यवहितत्वादैन्द्राग्नसाहचर्याद् वैश्वदेविकैककपालातिदेशस्य 'स्वरसामैककपालामिक्षमि'त्यनेन सिद्धेश्च वारुणप्राघासिकैकपालस्यैव वैश्यकर्मण एककपाले अतिदेशस्तेन 'शमीमय्यः स्रुव' इत्याद्यङ्गानां प्राप्तिरित्याह—

काय प्राघासिकाङ्गानां प्राप्तिरेककपालके॥

सप्तमस्य प्रथमः पादः॥

द्वितीयः पादः

१

साम्नेऽभिधानशब्देन ● 'कवतीषु रथन्तरं गायती'त्यादौ ऋक्षु ऋग्गति-

वेशायोन्नागृहीतविशेषणन्यायाच्च गीतिरेव सामेति तस्या एवातिदेश इत्याह—

रथन्तरादिकं साम गीतिः सैवातिविश्यते ॥

सप्तमस्य द्वितीयः पादः ॥

तृतीयः पादः

६

द्वितीयपाद उक्तं क्रियाभिधानम् । इदानीं नामातिदेशः ।

कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोति'त्यत्र नित्याग्निहोत्रपदे तस्यापि होमस्य जुहोतिसामानाधिकरण्येनाग्निहोत्रशब्दवाच्यत्वाविशेषान्नायमग्निहोत्रशब्दो नित्याग्निहोत्रधर्मातिद्देशक इत्याशङ्क्यानेकार्थत्वस्यान्याय्यत्वात् नित्येऽग्निदेवतावेदकशास्त्रसत्वेन वैपरीत्यायोगाच्च गौणोऽयमग्निहोत्रशब्दो नित्याग्निहोत्रधर्मातिदेशक इत्याह—

सत्रेऽग्निहोत्रे नाम्ना स्यात् ,

२

अपि वा ● गवामयने 'प्रायणीयमहर्भवती'त्यत्र द्वादशाहिकस्याद्यस्यान्हः प्रायणीयस्य नाम्नातिदेश इत्याशङ्क्य प्रयन्त्यारभन्त इत्युभयत्र प्राथम्येन श्रुत्या नामत्वात् यौगिकं प्रायणीपदं गौण्या वृत्यातिदेशकमित्याह—

प्रायणीयेन यौगिके ।

नाम्नातिदेशः स्यादित्यनुषङ्गः ।

३

विश्वजित्सर्वपृष्ठे ● 'विश्वजित् सर्वपृष्ठो भवती'त्यत्र प्रकृतौ माहेन्द्रादिषु चतुर्षु 'सप्तदशानि पृष्ठानी'ति पृष्ठबहुत्वदर्शनाच्चोदकप्राप्तानुवादकः सर्वपृष्ठशब्दः, यद्वा 'बृहत्पृष्ठं रथन्तरं वे'त्ति विकल्पेन प्राप्तयोर्बृहद्रथन्तरयोः समुच्चयविधिर्वेत्याशङ्क्य प्रकृतौ माहेन्द्रस्तोत्ररूपपृष्ठस्यैकत्वेन पृष्ठबहुत्वाभावाद्द्वयोरपि च तद्द्वन्द्वबहुत्वायोगाज्ज्योतिष्टोमविकारेऽपि षाडहिकानां मुख्यानां पृष्ठानां बृहद्रथन्तर वैरूपवैराज शाक्वररैवतरूपाणाञ्च नातिदेश इत्याह—

विश्वजितः सर्वपृष्ठः स्यान्मुख्यपृष्ठातिदेशतः ।

४

तथावभृथः सोमात् ● वरुणप्रघासेषु 'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ती'त्यत्र चोचकप्राप्तेदर्शपौर्णमासिकेऽपां व्युत्सेके गौण्या वृत्या 'एष वै दर्शपूर्णमासयोरवभृथ' इत्यवभृथशब्दप्रयोगात्तदनुवादेन तुषनिष्कासविधिरन्यथा तद्धर्मककर्मान्तरविधौ गौणत्वापत्तेरित्याशङ्क्य प्राप्तानुवादेनानेकविधौ वाक्य-

भेदाद्विशिष्टकर्मान्तरविधिः अवभृथशब्दस्तु तद्धर्मातिदेशार्थः, अन्यथा 'न साम गायति' इत्यादि निषेधायोगाद् अपां व्युत्सेके कर्मान्तरे प्रयोगाद्गौणत्वस्य कल्प्यत्वेन स्वतो गौणत्वासिद्धेरित्याह—

प्रघासावभृथे सोमावभृथाद्धर्मदेशनम् ।

५

द्रव्यादेशः ● तस्मिन्कर्मान्तरे नाम्ना पुरोडाशप्राप्तेः तत्र पुनस्तुषादिविधौ गौरवात् पुरोडाश एव तत्र द्रव्यं स्यादित्याशङ्क्य नाम्ना सामान्यतोऽतिदिष्टस्य पुरोडाशस्य विशेषविहितेनोपदिष्टेन तुषादिना बाधात्तुषाद्येव तत्र द्रव्यमित्याह—

तत्र द्रव्यन्तुषादि स्यान्न तु डाशः कदाचन ॥

६

गुण विधिस्तु ● राजसूये वैष्णवस्त्रिकपालः आतिथ्यास्थवैष्णवनवकपालधर्माणामाश्ववालादीनां नाम्नाऽतिदेशक इत्याशङ्क्योभयत्र विष्णुर्देवता अस्येति श्रुत्या देवताविधेर्नामत्वाभावान्नातिदेश इत्याह—

वैष्णवे न च,

७

निर्मन्थ्यदिपु चैवं ● 'निर्मन्थ्येनेष्टकाः पचन्ति' 'बर्हिषा यूपावटमवस्तृणाति' 'आज्येन यूपमनक्ती'त्यादौ साकाङ्क्षत्वात्पाशुकनिर्मन्थ्यस्य दार्शिकयोश्च बर्हिराज्ययोर्धर्माः स्युरित्याशङ्क्य लोकतो मन्थनादिप्रकारलाभात्पाकादौ निर्मन्थ्यादिगुणविधानार्था एते शब्दा न तु नाम्नातिदेशका इत्याह—

निर्मन्थ्यबर्हिराज्यादिकेऽपि च ॥

८

सौमिकन्तु ● चातुर्मास्येषु चत्वारि पर्वाणि । तत्र 'द्वयोः प्रणयन्ति तस्माद्द्वाभ्यामेति इति श्रुतम् । अत्र भाष्यकारेण सप्तभिः सूत्रैरधिकरणद्वयमुक्तम् । तत्राद्ये द्वयोः प्रणयन्ती'ति प्राकृतप्रणयनानुवादे वैय्यर्थ्यात् सौमिकं सधर्मकं प्रणनयनं लक्षणया उपस्थापितं विधीयत इत्याशङ्क्य प्रणयतेस्तन्नामत्वाभावान्न तदुपस्थितिः किन्तु प्रकृतितः प्राप्तस्यापि प्रणयनस्य 'तस्माद्द्वाभ्यामेती'त्यर्थवादार्थं विधित्वेन कीर्तनम्, न तु परिसङ्ख्यार्थम् । तस्यास्त्रिदोषत्वात् । नापि गुणार्थम् तस्याश्रवणादित्युक्त्वा द्वितीये तु 'प्रथमोत्तमयोः प्रणयनमि'त्यादि सूत्रे कतरयोर्द्वयोरिदमिति वीक्षायामनियमः, यद्वा 'न वैश्वदेव उत्तरवेदिमुपवपन्ति न शुनासीरीये' इत्युत्तरवेदिनिषेधस्य प्राप्ति विनानुपपत्तेराद्यन्त्ययोरेवेदं प्रणयनं वैकल्पिकमित्याशङ्क्य 'ऊरूवा एतौ यज्ञस्य यद्वरुणप्रघासाश्च साकमेधाश्चेति द्वयोरूरुत्वेन संस्तवात् 'द्वाभ्यामेती'ति गत्यर्थवादाच्च

मध्यमयोरेवेदं प्रणयनम्। एवञ्च सति'उत्तरवेद्यामग्निं निदधाती'त्युत्तरवेदिरपि मध्यमयोरेव, अन्यथा चतुर्ष्वपि स्यात्। 'न वैश्वदेव' इत्युत्तरवेदिनिषेधस्तु 'उपात्र वपन्ती'ति सामान्यवाक्यप्राप्तोत्तरवदेः पर्युदासार्थ इत्युक्तं तदाह—

प्राकृतन्तु प्रणयनं भाष्ये मध्यमयोश्च तत्।

वार्तिके तु प्रणयनस्य प्राप्त्या विधिवैय्यर्थ्येनार्थवादानपेक्षणादविधिशेषस्य चानर्थक्यादग्निनिधानस्य चोदकाच्चतुर्ष्वपि सत्वेन तदनुवादेन विधीयमानोत्तरवेदेः चतुर्ष्वप्यापत्तेर्मध्यमयोरुत्तरवेद्युपसंहारायोगात् 'उपात्र वपन्ती'त्यस्य च 'न वैश्वदेव' इत्यनेन पर्युदासे मध्यमपर्वद्वयपरताया अर्थादेव सिद्धत्वेन तदर्थं द्वयोः प्रणयनानुवादवशा'दुपात्र वपन्ती'त्यस्य मध्यमपर्वद्वयपरत्वे वाद्यन्त्ययोः प्राप्त्यभावेन निषेधवैय्यर्थ्यान्नैवमधिकरणभेद इति मत्वा सप्तसूत्र्यैकमधिकरणमित्युक्तम्। किमिदं सौमिकं प्रणयनमुतापूर्वमिति तत्र। 'द्वयोः प्रणयन्ती'ति प्राकृतप्रणयनानुवादः, यद्वानुवादत्वे वैय्यर्थ्याल्लक्षणया सौमिकं प्रणयनमाद्योत्तमयोः पर्युदस्तोत्तरवेदिकं विधीयते। तथा चाद्योत्तमयोः प्रतिषेधो घटते। न च'उपात्र वपन्ती'ति वाक्यप्राप्तस्य निषेधः, तस्यावान्तरप्रकरणेन वरुणप्रघासमात्रपरत्वात्। मध्यमयोः प्रणयनविधौ तद्वशेनैवोत्तरवेद्या अपि तत्रैव सिद्धेः 'उपात्र वपन्ती'त्याद्यन्तयोः स्यात्। ततश्च तत्रैव निषेध इति न्यायतः तेनाद्योत्तमयोः सौमिकं प्रणयनं विधीयत इत्याशङ्क्य सौमिकविधौ लक्षणापत्तेः प्रणयन्तीत्यस्य सौमिकवाचकत्वाभावाच्च नेदं तत्किन्तु'आहवनीयाद्द्वावग्नी प्रणयत' इति शाखान्तरवचनैकार्थ्यायाप्राकृतमसौमिकमपूर्वं प्रणयनान्तरं पशुबन्धवद्विधीयते। तच्च गत्यर्थवादवशान्मध्यमयोरेवेत्युक्तम् तदाह—

अपूर्वन्तु प्रणयनं पूर्वाग्नेरिति वार्तिके॥

९

स्वरसामैककपालामिक्षं ● गवामयने 'त्रयः स्वर सामानः' 'सप्तदशाः स्वरसामानः' इति। अष्टरात्रे च 'पृष्ठ्यषडहो द्वौ स्वरसामानौ' इति। तथा वैश्वदेवे पर्वणि 'वैश्वदेव्यामिक्षा द्यावापृथिव्य एक कपालः' तथा 'मैत्रावरुण्यामिक्षा' 'वारुण एककपाल' इति क्वचिच्छ्रुतम्। तत्र स्वराख्यं साम यस्येति स्वरसामादिशब्दानां यौगिकत्वाद्वैष्णवादिवन्नातिदेशकत्वमित्याशङ्क्य यौगिकत्वेऽपि 'यत्तृतीयं सप्तदशमहस्तत्त्रयस्त्रिंशस्य स्थानं हरन्ती'ति पृष्ठ्यषडहस्य तृतीयस्य सप्तदशस्यान्हः षष्ठं यत् त्रयस्त्रिंशं तत्स्थानञ्च मुक्त्वा त्रयाणां सप्तदशताया इत्यन्त्ययोः स्वरसाम्नोरतिदेशात्सप्तदशस्तोमकत्वप्रायकलिङ्गादेककपाले च 'यदि हुतः पर्यावर्तेत सा त्वेका परिचक्षा 'यत्सर्वंहुतं जुहोति सान्ये'त्याज्यविधिपरे वाक्ये सिद्धवदनुवादलिङ्गान्मैत्रावरुण्यामिक्षायाञ्च 'न वाजिनस्य यजन्ति' इति लिङ्गात्स्वरसामैककपालादौ आमिक्षाधर्मातिदेश इत्याह—

स्वरसामैककपालामिक्षादौ धर्मदेशनम् ॥
गोसत्राद्वैश्वदेवाच्च लिङ्गात्,

१०

कर्मज ● कर्मनामवत्संस्कारनाम्नां यूपादीनां खलेवाल्यादावतिदेशकत्व-मित्याह—

यूपादिके तथा ,

११

'वासो ददाति' अनो ददाती'त्यादौ वासोऽनः शब्दयोर्नागृहीतविशेषाणा-न्यायेन क्रियावाचित्वाद्दानं तक्षणञ्च कृत्वा दानं कार्यमित्याशङ्क्य क्रियाभिव्य-ङ्ग्यजातिवाचित्वेन क्रियावाचित्वाभावान्न क्रियां कृत्वा दानमित्याह—

वासोऽनसोर्न क्रियाङ्गम् ,

वासोऽनसोः क्रिया नाङ्गमित्यर्थः ।

१२

विशये ● गर्गत्रिरात्रे 'अग्निमुपनिधाय स्तुवीते'त्यत्राहवनीयादेः सर्वार्थ-त्वान्निधानमाशङ्क्याग्निशब्दस्य जातिमात्रवाचित्वान् 'यदाहवनीये जुहोतीति संस्कृतानां प्रयोजनोक्तेः संस्कृतस्यान्यदेशगमने लौकिकत्वापत्तेश्च लौकिक एवाग्निरुपनिधेय इत्याह—

स्तोत्रेऽग्निर्लौकिको भवेत् ,

१३

संस्कृतं स्यात् ● यूपैकादशिन्याम् 'उपशयो यूपो भवती'त्यत्र यूपशब्द परिव्याणादिः संस्कारातिदेशार्थ इत्याशङ्क्य धर्माणां यूपकार्यपशुनियोजनार्थ त्वादत्र च तदभावान्नात्र ते स्युरित्याह—

यूपधर्मा नोपशये ।

१४

कर्मणः ● अग्नौ 'पृष्ठैरुपतितिष्ठत' इति श्रुतम् । तत्रोपतिष्ठतिधातुः समीपस्थितिवाचकः । प्रत्ययो भावनावाची । पृष्ठशब्दस्तद्धर्मातिदेशार्थः । तथा चाग्निसमीपे स्थित्वा पृष्ठसदृशैः स्तोत्रैरपूर्वं कर्तव्यमित्यर्थः । यदि तु पृष्ठशब्देन लक्षणया रथन्तरादिसाधनमभिवत्यादिकमुच्यते, ततः पृष्ठशब्दे साधनलक्षणा । समीपस्थित्या चाभिधानलक्षणेति लक्षणाद्वयं स्यात् । तद्वरं पृष्ठशब्द एवैका धर्मलक्षणेत्याशङ्क्य पृष्ठशब्दलक्षणायाः पक्षद्वयतुल्यत्वेऽपि धातुवाच्यसमीपस्थितेः उपान्मन्त्रकरण' इति स्मृत्या अर्थाभिधानार्थोपस्थानर्थत्वेनार्थाभिधानार्थत्वे लक्षणाभावान्न पृष्ठशब्दो धर्मातिदेशकः किन्त्वात्मनेपदवशात् पृष्ठसाधनैरभिव-त्यादिभिरग्नेरभिधानं चोच्यत इत्याह—

नाम्नौ पृष्ठाः सधर्मकाः ॥

सप्तमस्य तृतीयः पादः ॥

चतुर्थः पादः

१

इतिकर्तव्यताविधेः ● अथ लिङ्गातिदेशः। तत्र 'सौर्यं चरुमि'त्यादावाम्नाना भावान्नास्त्येवेत्तिकर्तव्यतेत्याशङ्क्य त्र्यंशभावनायाः अंशद्वये उक्ते सति तृतीयमित्थं भावं विना साकाङ्क्षत्वादन्यतः सिद्धेतिकर्तव्यतात्र शास्त्रेणाङ्गीकृतेति निश्चयादस्तीतिकर्तव्यतेत्याह—

लिङ्गात्सौर्यादिके धर्माः,

तत्र वैदिक्या इतिकर्तव्यतायाः शास्त्रनिबद्धत्वादन्यत्र गमने लौकिकत्वापत्तेः प्रकरणाद् व्यवस्थितत्वेन च सामानविध्ययोगात्सौर्ये प्रयाजादिदर्शनस्य च विशिष्टविधित्वात्स्मार्त्तेतिकर्तव्यतैव सर्वत्र स्यादित्याशङ्क्य वैदिकत्वसाम्यात्स्मार्तायाः प्रत्यक्षवेदमूलतया वैदिकत्वेऽप्यग्नित्रयसाध्यत्वाभावात् त्रयीकर्मणाञ्च श्रौत एव प्रवृत्तेः स्मार्तायास्त्वौपासने नियमाद्वैदिक्येवैकत्र निबद्धाप्यन्यत्र प्रकृतिवत्कुर्यादिति शब्दकल्पनया प्राप्यत इत्याह—

वैदिकास्तेऽपि साम्यतः।

२

द्वादशाहिक ● अथ लिङ्गनामधेययोर्बलाबलचिन्ता। गवामयने 'ज्योतिर्गौरायुरि'त्यादियागेषु गणत्वाद्द्वादशाहधर्माणां नामातिदेशाच्च ज्योतिराद्येकाहधर्माणामविरुद्धानां समुच्चयेऽपि विरुद्धेषु लिङ्गातिदेशस्यैव प्राबल्यम्, न तु नामातिदेशस्य, नाम्नां गौणत्वात् लिङ्गातिदेशस्य च फलसम्बन्धोत्तरकालीनत्वेन प्राबल्यात् गणधर्माणां पूर्वावगतेरबाधाच्च इत्याशङ्क्य फलवाक्ये नाम्नोऽश्रवणेऽपि तस्योत्पत्तिवाक्यमालोच्यैव प्रवृत्तेर्नाम्नः प्रत्यक्षत्वाच्चानुमानिकचोदकस्य बाध इत्याह—

ज्योतिरादौ न लिङ्गात्स्युर्नाम्ना तद्बाधनान्मताः ॥

धर्मा इत्यनुषङ्गः ॥

इति शास्त्रमालावृत्तौ सप्तमस्य चतुर्थः पादः ॥

सप्तमोऽध्यायस्समाप्तः।

पादाः ४ अधिकरणानि २२

●

अष्टमो विशेषातिदेशाध्यायः

प्रथमः पादः

१

अथ विशेषलक्षणम् • अथ विशेषातिदेशः। तत्र सौर्यादिषु नानाप्रकृतीभ्यो विकल्पेन विध्यन्तप्राप्तिमाशङ्क्यैकया नैराकाङ्क्ष्यान्न बहुभ्यो धर्मातिदेशः। अन्यथा अव्यवस्थापत्तेरित्याह—

एकस्मादेव धर्मास्स्युर्लिङ्गात्ते च व्यवस्थिताः।

२

यस्य लिङ्गं • कस्य धर्माः कुत्रेत्याकाङ्क्षायां यस्याग्नेयादेः कर्मणो लिङ्गं चिन्हं शब्दगतमर्थगतं वा तद्धितेन देवतानिर्देशौषधद्रव्यकत्वादि यत्र सौर्यादौ दृश्यते तस्य धर्मास्तत्र स्युरित्याह—

अर्थतः शब्दतो वापि सादृश्याद्धर्मदेशनम् ॥

३

प्रवृत्तत्वादिष्टेः • यद्यप्यग्निहोत्रे दर्शपूर्णमासयोः सोमे च दृष्टार्थैरङ्गैर्नैराकाङ्क्ष्यादतिदेशो नास्ति, तथापि सोमाङ्गेष्टिपशुष्वैष्टिकधर्मदर्शनात् 'तस्यै-एकशतं प्रयाजानुयाजाः' इति लिङ्गाच्चैष्टिकविध्यन्तमाशङ्क्य दृष्टार्थधर्मैर्नैराकाङ्क्ष्यात्तस्यैकशतमित्यस्य च वाजपेययूपन्यायेनामुवादत्वान्नातिदेश इत्याह—

सोमोऽपूर्वस्तु,

४

इष्टिषु • 'सौर्यं चरुमि'त्यादौ निर्वापादिलिङ्गादैष्टिको विध्यन्त इत्याह—

सौर्यादौ दर्शादेर्धर्मदेशनम्।

५

पशौ च • दैक्षे पशौ तद्धितेन देवतानिर्देशादालभतिसामान्याच्चैष्टिको विध्यन्त इत्याह—

दैक्षे पशौ च दर्शेष्टेः,

६

दैक्षस्य चेतरेषु • सवनीयनिरूढादिपशुषु प्राणिद्रव्यकत्वसामान्याद्विशसनादिसंस्काराच्च दैक्षस्य धर्मा इत्याह—

दैक्षात्सौत्ये पशौ तथा ।

७

ऐकादशिनेषु • ऐकादशिनेषु पशुषु सुत्याकालत्वसाम्याधिक्याद् 'द्वे द्वे रशने यूपमृच्छत' इति दर्शनाच्च सवनीयस्य विध्यन्त इत्याह--

द्वैरशन्यात्सौत्यधर्माः स्युरैकादशिनेषु च ।

८

तत्प्रवृत्तिर्गणेषु • सौत्रामण्यादौ पशुगणो गणत्वसाम्याधिक्यादैकादशिन विध्यन्त इत्याह—

तद्धर्माः स्युः पशुगणेषु ,

९

अव्यक्तासु तु • विश्वजिता यजेतेत्यादिषु तद्धितचतुर्थीमन्त्रवर्णैर्यागार्थंतया विनियुक्तदेवताविधानाच्च ... लक्षणाव्यक्तत्वात्सौमिको विध्यन्त इत्याह—

अव्यक्तासु तु सोमतः ।

१०

गणेषु • द्विरात्राद्यहर्गणेष्वव्यक्तत्वेऽपि गणत्वस्याधिक्याद् द्वादशाहिको विध्यन्तः । तेनोत्तमवर्जं पत्नीसंयाजान्तत्वप्राप्तिरित्याह--

अहर्गणे द्वादशाहात् ।

धर्माः स्युरित्यनुषङ्गः।

११

गव्यस्य च • संवत्सरसत्रेष्वादित्यानामयनादिषु संवत्सरसत्रत्वसामान्याद्गवामयनविध्यन्त इत्याह—

गव्यादन्यायनेषु तु ।

गव्याद्गवामयनादन्येष्वयनेषु धर्माः स्युरित्यन्वयः ।

१२

निकायिनाम् • साहस्राः साद्यस्का इत्येकसंज्ञया प्रस्तुत्य पश्चाद्विहितेषु यागेष्वेकनिकायवर्तित्वमेकनामत्वञ्चाधिकमिति प्रथमस्य धर्मवतो धर्मा उत्तरेषु भवन्तीत्याह—

आद्यधर्मास्तु साद्यस्कादिषु स्युस्तु निकायिषु ॥

१३

कर्मणस्त्वप्रवृत्तित्वात् • स्वर्गादेः फलस्य नियमस्य च यावज्जीवादेः स्वर्गकामादेश्च कर्तुः आग्नेयादिषण्णां यागानां समुदायस्य च प्रकृतिसम्बन्धाद्विकृतावतिदेशमाशङ्क्य प्रकृताविव्थम्भावेनान्वितस्यैव विकृतौ कथम्भावापेक्षायां

ग्रहणात्फलनियमयोश्च पुरुषार्थत्वात् स्वर्गकामस्य च प्रधानत्वेन कर्मार्थत्वाभावादाग्नेयादीनाञ्च षण्णां फलं प्रति करणत्वेनान्योन्यमङ्गत्वाभावात्साहित्यस्याङ्गत्वेन तदर्थं प्रधानातिदेशायोगात्समुदायस्य भिन्नत्वाभावाच्च नातिदेश इत्याह—

पुमर्थत्वान्नातिदेशः फलादेर्नियमस्य च ॥

१४

गुणकामेषु ● प्रधानफलस्य विकृतौ प्रधानाप्रवृत्या प्रवृत्यभावेऽपि प्रणयनस्य विकृतौ प्रवृत्या तदाश्रितस्य गोदोहनस्य तत्प्रवृत्या च तत्साध्यस्य फलस्यापि विकृतौ प्रवृत्तिरित्याशङ्क्य गोदोहनादीनां प्रकृतावित्थम्भावेनानन्वयात्प्रणयनातिदेशेऽप्यतिदिष्टस्य चमसस्य विना शास्त्रेण बाधायोगात्तद्बाधे च क्रतुवैगुण्यापत्तेः प्रकृत्यपूर्वसाधनभूतस्यैव प्रणयनस्याश्रयत्वाच्च न गोदोहनतत्फलयोर्विकृतौ प्रवृत्तिरित्याह—

गुणाः फलानि चानङ्गं विकृतौ नातिदिश्यते ।

१५

एककर्मणि ● सौर्य आग्नेयविकारः । आग्नेयश्च दर्शे पौर्णमास्यां चोक्तः । तत्र 'चतुर्होत्रा पौर्णमासीममिमृशेत्पञ्चहोत्रामावास्यामि'ति मन्त्रद्वयं सौर्ये प्रकृतिवत्कालद्वये व्यवस्थया प्रयोज्यमित्याशङ्क्य व्यवस्थायाः प्रकृतावार्थिकत्वेन समुदायद्वारा मन्त्रयोराग्नेयाङ्गत्वादाग्नेयेन च समुदायद्वयवर्तिना विकल्पेनैव मन्त्रयोर्ग्रहणादव्यवस्थैव मन्त्रयोर्न तु कालाद् व्यवस्थेत्याह—

सौर्यादौ पर्वणोः पञ्चहोत्रादेर्न व्यवस्थितिः ॥

१६

लिङ्गसाधारण्यात् ● सौर्ये आग्नेयादीनां मध्ये कस्यचिद् नियमेन धर्मप्रवृत्तिमाशङ्क्यैकदेवत्यत्वादाग्नेयस्य धर्मा इत्याह—

देवतैक्यात्तु सौर्ये स्यादाग्नेयाद्धर्मदेशनम् ।

एवमनेकदेवत्येष्वग्नीषोमीयैन्द्राग्नयोः । आज्यद्रव्यकेषु उपांशुयाजस्य ।

१७

विप्रतिपत्तौ ● आग्नेये पयसि ऐन्द्रे चरौ च देवतयोः प्रातिपदिकार्थत्वेन मुख्यत्वात्प्राधान्याच्च तत्सामान्यस्य बलवत्वादौषधसान्नाय्ययोर्धर्मप्रवृतिरित्याशङ्क्य देवतायाः मुख्यत्वेऽप्युद्देश्यत्वेन बहिरङ्गत्वाद् हविषस्तु त्यज्यमानत्वेनान्तरङ्गत्वादौषधे पयोधर्माणां बाधाच्चान्तरङ्गभूतहविस्सामान्यात्पयसि पयोधर्माः चरौ च पुरोडाशधर्मा इत्याह—

शृतधर्मास्स्युराग्नेये पयसि द्रव्यसाम्यतः ।

१८

हिरण्यमाज्यधर्मं ● कृष्णलचरावुज्ज्वलत्वसामान्यादाज्यधर्मप्राप्तिमा -

शङ्क्य विशदत्वादौषधवाचिचरुशब्दाच्चौषधधर्मा इत्याह—

व्रीहिधर्माः कृष्णलेषु ,

१९

मधूदके ● चित्रेष्टौ 'दधि मधु घृतं तण्डुला उदकमि'त्यत्र मधूदकयोः स्वाभाविकद्रवत्वात्पयोधर्मप्राप्तिरित्याशङ्क्याज्ये स्वाभाविकद्रवत्वाभावेऽप्यग्निसंयोगाद्द्रवत्वाद्वर्णसाम्याधिक्याद्दोहादेरसम्भवादुत्पवनादीनां सम्भवाच्चाज्यविध्यन्त इत्याह—

आज्यधर्ममधूदकम् ॥

अष्टमस्याद्यः पादः ॥

द्वितीयः पादः

१

वजिने सोमपूर्वत्वं ● वाजिनयागे सौत्रामण्यङ्गभूतेषु च सुराग्रहेषु 'सोमो वै वाजिनं सुरा सोम' इत्यसोमे सोमशब्दस्तद्धर्मातिदेशार्थ इत्याशङ्क्य सोमशब्दस्य प्रशंसार्थत्वादैष्टिको वाजिने पयोविध्यन्तः सुरायाञ्चौषधस्य हविस्सामान्यादित्याह—

सुरायां वाजिने चेष्टेः धर्मास्स्युः ,

२

पशुः पुरोग्नीडाश ● अग्निषोमीये पशौ देवतासामान्याद्घनत्वाच्चाग्नीषोमीयपुरोडाशविध्यन्तमाशङ्क्य पशुप्रभवत्वसामान्यादुखादर्शनाच्च[1] सान्नाय्यस्य विध्यन्तः । तत्रापि न घनत्वाद्दध्नो विध्यन्तः किन्तु साक्षात्पशुप्रभवत्वसाम्याद्गतिसत्वाच्च पयस इत्याह—

पयसः पशौ ।

३

आमिक्षोभयभाव्यात्वात् ● आमिक्षायाः दधिक्षीरसंसर्गजन्यत्वादुभयरसोपलम्भाच्चोभयविकारत्वम् । यद्वा 'तप्ते पयसी'ति वाक्ये दध्नः कर्मत्वेन प्राधान्याद्दध्येवामिक्षा तेन सायंदोहविकारत्वमित्याशङ्क्य व्याप्यमानत्वेन पयसः प्राधान्यात्सेति सर्वनाम्ना तस्यैव परामर्शात्पय एवामिक्षा ततः प्रातर्दोहविकारत्वमित्याह—

आमिक्षायां पयोधर्मा न तु दध्नः कदाचिन ।

---

१. पश्वङ्गानां श्रपणार्थमुखा-मृत्पात्रं पशौ दृश्यते, एवं सान्नाय्येऽप्युखा दृश्यत इति सादृश्यम् ।

४

सत्रम् ● सत्रात्मकस्याहीनात्मकस्य च द्वादशाहस्य गणेष्वनियमेन धर्मप्रवृत्तिमाशङ्क्य सौसादृश्यात्सत्रस्य सत्रेष्वहीनेषु चाहीनस्य प्रवृत्तिरित्याह—

सत्रेष्वहीने द्विविधाद्द्वादशाहसधर्मता ।

५

अन्यतरतोतिरात्रत्वात् ● पञ्चदशरात्रस्य कुण्डपायिनामयनस्य चाहीनवदुपर्यतिरात्रत्वादहीनविकारत्वमित्याशङ्क्यासनोपायिचोदनारूपाद्विधिगतलिङ्गात्सत्रकाण्डे पाठाच्च सत्रविकारत्वमित्याह—

कौण्डपाय्ययने पञ्चदशरात्रे च सत्रता ॥

अष्टमस्य द्वितीयः पादः

तृतीयः पादः

१

हविर्गणे ● 'आग्नावैष्णवमेकादशकपालं निर्वपेत्सारस्वतं चरुं बार्हस्पत्यं चरु'मित्यत्र स्थानसामान्यात्प्रथमे आग्नेयस्यान्त्ये चाग्नीषोमीयविध्यन्त इत्याशङ्क्य द्व्यैकदेवत्यरूपस्य देवतासामान्यस्योत्पत्तौ शीघ्रं गम्यमानत्वेन प्रबलत्वात् स्थानस्य त्वन्यापेक्षत्वेन विलम्बितत्वाद्दुर्बलत्वाच्चाद्येऽग्नीषोमीयस्यान्त्ये-चाग्नेयस्य धर्मा इत्याह—

नाना हविष्षु धर्मास्स्युः द्व्येकदेवत्यसाम्यतः ।

२

गणचोदनायां ● जनकसप्तरात्रे 'चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानि' इत्यत्र पूर्ववत्सङ्घातसामान्यस्यान्यापेक्षया दुर्बलत्वात् त्रिवृत्त्वसाम्येन पार्ष्टिकस्याद्यस्य त्रिवृतोऽह्नश्चतुर्ष्वंप्यावृत्तिरित्याशङ्क्य त्रिवृत्वस्य शाब्दत्वेऽपि सहचोदितानां सङ्घातस्यापि शाब्दत्वात्तत्र चाङ्गभूतस्तोत्रीयागतत्रिवृत्वापेक्षया प्रधानगतस्य सङ्घातलिङ्गस्य बलवत्वात् पार्ष्टिकानां त्रिवृदादीनाञ्चतुर्णामह्नां चतुर्षू प्रवृत्तेरेव चाग्निष्टोममुखानीति युज्यते । अन्यथा पृष्ठाद्यस्य त्रिवृतोऽग्निष्टोमस्य चतुर्षु प्रवृत्तौ सर्वेषां तत्स्यात्तथा चाग्निष्टोमो मुखे येषामित्युक्तिव्याघातः स्यादित्याह—

सप्तरात्रे सङ्घसाम्यात् पार्ष्टिकं त्रिवृदादिकम् ।

३

कालाभ्यासे च ● षड्त्रिंशद्रात्रे 'षडहा भवन्ति चत्वारो भवन्तो'त्यत्र चत्वारः षडहा इति चतुर्विंशत्यन्हां विधिः । ततश्चाहर्गणत्वसान्याद् द्वादशाह

विध्यन्त इत्याशङ्क्य चतुर्विंशतिशब्दाश्रवणान्न गणचोदनेयम्, किन्तु चतुस्सङ्ख्यषडहानां विधिः। तेन षडहधर्माणां प्रवृत्तिरित्याह—

षट्त्रिंशतसंज्ञके रात्रे षडहावृत्तिरिष्यते।

४

सङ्ख्यागणेषु • 'शतोक्थ्यं भवति शतातिरात्रं भवती'त्यत्रोक्थ्यातिरात्रशब्दो ज्योतिष्टोमनामेति मत्वा अहरनुवादेन शतावृत्तिरूपो गुणः प्रयत्नसाध्यत्वाद्विधीयत इत्याशङ्क्य संस्थावाचित्वेन क्रतुनामत्वाभावात् संस्थाविशिष्टे गणविधिः। तेन द्वादशाहविध्यन्त इत्याह—

शतोक्थ्यगणधर्माः स्युर्न ज्योतिष्टोमिका मताः।

५

गणादुपचय • शतोक्थ्ये प्रायणीयोदयनीयौ वर्जयित्वा द्वादशाहिको दशरात्रः प्रवर्तते। तस्मिंश्च दशरात्रे आद्यन्तावग्निष्टोमौ। तत्र शतोक्थ्ये प्रतिदशकमग्निष्टोमस्थाने आगम्यमानेषु उक्थ्येषु द्वादशाहस्थोक्थ्यस्तोत्रधर्माः स्युः न ज्योतिष्टोमोक्थ्यधर्माः गणस्य द्वादशाहविकारत्वादित्याशङ्क्य द्वादशाहेऽतिदेशप्राप्तानामुक्थ्यानां धर्ममात्रविधानेनोत्पत्तेरभावाज्ज्योतिष्टोमे चोत्पत्तेस्सत्वात्तद्विकारत्वमेवेत्याह—

प्राकृतोक्थ्यधर्माः स्युः शतोक्थ्ये न गणस्य ते।

६

गायत्रीषु • बृहस्पतिसवे 'गायत्रमेतदहर्भवती'त्यत्र प्राकृतीनां त्रिष्टुबादीनामक्षरलोपं कृत्वा गायत्रीत्वं सम्पादनीयम्। एवञ्च चतस्रो गायत्र्यस्तिस्रोऽनुष्टुभ इत्याद्युपपद्यत इत्याशङ्क्य सङ्ख्यामात्रवाचित्वे मन्त्रान्तरे घटादौ चातिप्रसङ्गाच्चतस्रो गायत्र्य इत्यस्य च गौणत्वात् सङ्ख्याविशिष्टऋग्वाचित्वेन दाशतयीभ्यो मुख्यगायत्र्यागम इत्याह—

बृहस्पतिसवे दाशतय्यो गायत्रिसंज्ञिताः॥

अष्टमस्य तृतीयः पादः॥

चतुर्थः पादः

१

दर्विहोमो • इदानीमतिदेशापवादः 'यदेकया जुहुयाद्दर्विहोमं कुर्यादि'त्यत्र दर्व्या होम इति गुणविधिरित्याशङ्क्य 'त्वग्बिलया नालदण्डया स्रुचा दर्व्या जुहोती'त्यनेन प्राप्तत्वात् तत्प्रख्यन्यायेन नामधेयं दर्विहोमशब्दः। तत्रापि लौकिकानां स्थालीपाकादीनां कर्तरि दार्विहोमिक इति प्रयोगात्तेषामेव नामेत्याशङ्क्य वैदि-

केऽपि वास्तुहोमे प्रयोगात्तेषामपि नाम। तत्रापि यज्युत्पत्तीनां 'चतुरवत्तं जुहोती'ति होमत्वान्न नामत्वमित्याशङ्क्य यागाद्धोमस्य भेदाज्जुहोत्युत्पत्तीनामेवाग्निहोत्रादीनां नामेत्याह—

तत्प्रख्यत्वाद्दर्विहोमस्स्यात्संज्ञा वैदिकेष्वपि।

२

जुहोतीनामेव • दर्विहोमेष्वव्यक्तत्वात् सोमधर्मातिदेश इत्याशङ्क्य यागहोमयोर्भेदान्न सोमधर्माः नाप्यग्निहोत्रनारिष्टादिधर्माः नारिष्टाङ्गेध्मादीनां त्र्यम्बकहोमेष्वभावदर्शनात्। तेन ते अपूर्वा एवेत्याह–

अपूर्वास्ते च सम्मताः॥

अष्टमस्य चतुर्थः पादः

इति शास्त्रमालावृत्तौ कमलाकरात्मजानन्तभट्टकृतायामष्टमोध्यायः॥

पादाः ४ अधिकरणानि ३२

•

नवम ऊहाध्यायः

प्रथमः पादः

१

यज्ञकर्मप्रधानं ● प्राकृतपदार्थानां द्वारान्तरसम्बन्धनिमित्तान्यथाभावात्मकोहस्यातिदिष्टपदार्थविषयत्वात्तदनन्तरमारम्भः। इह पञ्च वर्णकानि। तत्र धर्माणां सप्तमाद्यसिद्धमपूर्वार्थत्वं स्मार्यते। अन्यथा धर्माणां यज्यर्थत्वे सति पारिप्लवापत्तेरूहो न स्यादित्याह--

धर्माः सर्वे त्वपूर्वार्थाः,

यद्वा 'व्रीहीनवहन्ति' 'अग्नये जुष्टं निर्वपामी'त्यादावग्निव्रीह्यादिस्वरूपं विवक्षितम्। ततश्च सौर्ये तदभावान्नोह इत्याशङ्क्य तादर्थ्ये धर्माणां वैय्यर्थ्यादपूर्वसाधनविशेषार्थत्वेन विकृतावपि तत्सद्भावादूह इत्याह--

व्रीह्याद्यर्था न ते मताः।

यद्वा यज्यर्था धर्माः अपूर्वविशेषनिमित्ताः। एवं तुल्यन्यायत्वादवघातादयोऽपि व्रीह्याद्यर्थाः ततश्च नीवारे तदभावान्नोह इत्याशङ्क्य तदर्थत्वे वैय्यर्थ्यादपूर्वार्थास्तन्निमित्ताश्चेत्याह—

प्रयोजकं निमित्तं वाप्यपूर्वं तेषु सम्यतम्।

यद्वा आरादुपकारकाणां प्रयाजादीनां श्रुत्याद्यभावात्प्रकरणादपूर्वार्थत्वेऽपि संन्निपतिनां श्रुत्यादिभिः व्रीह्याद्यर्थत्वावगमात्तत्प्रयुक्तत्वमित्याशङ्क्य तादर्थ्ये वैय्यर्थ्यादपूर्वार्थत्वमित्याह--

नैव श्रुत्यादिभिर्व्रीह्यर्थता सन्निपातिषु।

यद्वा अपूर्वार्थानां धर्माणां यजिर्निमित्तं न त्वपूर्वम्। तस्य साध्यत्वेन निमित्तत्वायोगात्। एवं तुल्यन्यायतया यज्यर्थानामवघातादीनां व्रीहयो निमित्तम्। नीवारे च निमित्ताभावान्नावघात इत्याशङ्क्यापूर्वस्य यागस्य वा केनचिच्छब्देन निमित्तत्वानुक्तावप्यनिष्पन्नस्यापि साध्यस्य मनसि ज्ञातस्य साधनानुष्ठाने निमित्तत्वादपूर्वार्थास्तन्निमित्ताश्च धर्मा इत्याह--

साध्यं ज्ञातमपूर्वन्तु निमित्तं युक्तमेव तु॥

उपसंहरति--

पञ्चैवं वर्णकान्यत्र।

केचित्तु त्रीण्येवात्र वर्णकानि द्वितीयस्य तु व्याख्याऽनुपपन्नेत्याहुरित्याह—

केचित्त्रीणि समूचिरे।

२

संस्कारे ● पूर्वाधिकरणे सामान्यतः धर्माणामपूर्वार्थत्वे सिद्धेऽपि इह वाक्यसंयुक्तानामग्रिमाधिकरणे च लिङ्गसंयुक्तानां तदग्रिमे च श्रुतिसंयुक्तानां तत्तदर्थत्वमाशङ्क्यापूर्वार्थत्वं प्रतिपाद्यत इत्याह--

वाक्यलिङ्गश्रुतीनान्तु विरोधस्त्रिषु चिन्त्यते ।

इष्टौ 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति प्रोक्षिताभ्यां दृषदुपलाभ्यां पिनष्टी'त्यत्र विशेषणप्रधानेन प्रोक्षिताभ्यामित्यनेन प्रोक्षणं वाक्याद्धन्त्यर्थं विधीयते, न तूलूखलाद्यर्थम् । तादर्थ्ये वैय्यर्थ्याद्धन्तेः पारार्थ्यापत्तेश्च । न च तदर्थत्वे वैय्यर्थ्यम् । आधानस्य क्रतुसाधनभूताग्न्यर्थत्वेऽप्यक्रर्थत्वा द्धन्तिद्वाराऽपूर्वोप-कारात् । तेन विकृतौ यत्र हन्तिस्तत्रास्तु नाम प्रोक्षणम् । तदभावे तु नखनिर्भिन्ने चरौ न प्रोक्षणं द्वाराभावादित्याशङ्क्य प्रोक्षणं विनापि हन्तेर्निष्पत्तेस्तादर्थ्ये वैय्यर्थ्ये सति वाक्यीयहन्त्यर्थत्वत्यागेन तण्डुलनिष्पत्तिप्रणालिकयाऽपूर्वहेतुं व्यापारं प्रोक्षितेन साधनेन कुर्यादिति लक्षणया प्रोक्षणस्य प्रकरणाद पूर्वार्थत्वान्नखनिर्भिन्ने चरौ तादृशव्यापारसाधनेषु नखेषु सिद्धं प्रोक्षणमित्याह--

हन्त्यभावेऽप्यपूर्वार्थे नखेषु प्रोक्षणं मतम् ॥

यद्वा । 'यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयादि'ति श्रुतस्य स्वरविशेषस्य दीक्षणीयापूर्वलक्षणामात्रे आनर्थक्याल्लक्षितलक्षणयापि ज्योतिष्टो-मापूर्वप्रयुक्तत्वम् ततश्च तदङ्गेषु सर्वत्र स स्वरः स्यादित्याशङ्क्य दीक्षणीयापूर्व-स्याप्यनिर्ज्ञातोपायत्वाददृष्टत्वाच्च तादर्थ्ये वैय्यर्थ्याभावान्न गुरुभूतलक्षितलक्ष-णया सोमापूर्वार्थत्वम्, किन्तु दीक्षणीयाशब्देन स्वापूर्वलक्षणाद्दीक्षणीयापूर्वार्थ-त्वमित्याह--

वाग्यमो दीक्षणीयार्थः सोमापूर्वार्थता न तु ।

३

फलदेवतयोश्च ● इह लिङ्गसंयुक्तेषु विचारः । इष्टौ 'अगन्म सुवः सुवरगन्म 'अग्नेरहमुज्जितिमनूज्जेषम्' इत्यत्र फलस्य देवताप्रसादस्य चापूर्ववददृष्टत्वेन मन्त्रयोः स्वरूपार्थत्वेऽपि वैय्यर्थ्याभावादन्यथा लक्ष्यापूर्वीयार्थत्वे मुख्यार्थ एव मन्त्राणां विनियोग इति विरोधापत्तेश्च स्वर्गाग्न्यादिप्रयुक्तौ मन्त्रौ । ततश्च सौर्ये द्वाराभावान्न तयोः प्राप्तिरित्याशङ्क्य मन्त्रेण प्रकाशनमात्रात् फलसिद्धौ माना-भावेन मन्त्रस्य फलदेवतार्थत्वे वैय्यर्थ्यात् प्रकरणात्क्रत्वङ्गमाच्च । येनापूर्वीय-फलदेवतात्वादिना स्वर्गादेः प्रकाशनं प्रकृतौ कृतं तेन रूपेण सौर्ये ब्रह्मवर्चससूर्यादेः प्रकाशनार्थं 'अगन्म ब्रह्मवर्चसं' 'सूर्यस्याहमुज्जितिमि'त्याद्यूहः । न चैतावता मन्त्राणां मुख्यकार्यत्वहानिः अपूर्वीयाया अपि देवताया उहेन मुख्यवृत्त्यैवाभिधाना-दित्याह--

लिङ्गात्तत्फलदेवार्था मन्त्रा उह्यास्तदन्यके ॥

४

देवतावा ● सर्वाक्षेपोऽत्र। ननु कर्मस्विन्द्राग्न्यादिदेवतानामनुष्ठानकाले चतुर्थ्यैवोद्देशात् क्वचिच्चाग्नये जुहोतीत्यादौ चतुर्थ्यैव देवताविधेस्तस्याश्च सम्प्रदानार्थत्वात् तस्य च दानेनैवान्वेतुं योग्यत्वाद् यजदेवपूजासङ्गतिकरणे' त्यादिस्मृतेश्च यजेर्दानपूजावाचित्वमवश्यं वाच्यम्। ततश्च यागेन पूजिताया देवतायाः फलदायित्वसम्भवात् 'तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति' इत्यादिमन्त्रवर्णार्थवादैर्देवतातृप्तेर्द्वारत्वावगमाच्च शब्दगम्या देवतातृप्तिरेव धर्माणां प्रयोजिका, न त्वपूर्वम्। तस्याशब्दत्वादित्याशङ्क्याख्यातवाच्यभावनायां विधिश्रुत्या स्वर्गस्य भाव्यत्वेन, एवं श्रुत्या च यागस्य करणत्वेन देवतातः फलमित्यत्र मानाभावात्सम्प्रदानबलात्तस्याः प्राधान्ये तु फलं देवताञ्चोद्दिश्य यागविधाने वाक्यभेदात् भस्मीभूतेन हुतेन द्रव्येण देवतायाः सम्बन्धाभावेन च (पक्ष) विरुद्धसम्प्रदानत्वायोगादग्नये जुहोतीत्यादौ तद्देश्यत्वमात्रलक्षणाद्देवतायाः सिद्धत्वेन च साध्ययागार्थत्वात् तत्तृप्तेरसिद्धत्वेऽपि तस्या अश्रुतत्वाच्छ्रुतत्वेऽपि स्वर्गस्य साध्यत्वेनैकस्यां भावनायां साध्यद्वयायोगेन च तस्या अपुरुषार्थरूपायाः साध्यत्वायोगात्तत्फलदातृत्ववाक्यानाञ्च सेनापतिना ग्रामो हत इत्यादिवदर्थवादत्वान्मन्त्रार्थवादपुराणादिषु च देवानामपि यागादिदर्शनाद् अचेतनानाञ्चौषध्यादीनां चेतनानाञ्च मण्डूकादीनां देवतानां फलदातृत्वानुपपत्तेरीश्वरतृप्तेर श्रुतत्वान्निषेधेषु देवताभावेन कर्मजन्यादृष्टस्यैव फलजनकत्वाच्च तत्सामान्येन सर्वत्र कर्मण एवादृष्टद्वारा फलजनकत्वं न तु देवताया इत्याह—

न देवतायाः प्रीत्यर्थो यागः तस्या गुणत्वतः।

५

द्रव्यसंख्या ● 'व्रीहीन् प्रोक्षति' 'त्रीन् परिधीन्', तथा चातुर्मास्येषु 'शूर्पेण जुहोति' तेन ह्यन्नं क्रियते', तथा इष्टौ 'चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रामावास्यामि'ति श्रुतम्। तत्र प्रोक्षणस्य द्वितीयाश्रुत्या व्रीहिस्वरूपमात्रार्थत्वं मन्त्रस्य च त्रित्वसंख्यार्थत्वं होमस्यान्नकरणद्रव्यादिसंस्कारार्थत्वमेव न त्वपूर्वार्थत्वम् यद्यपि तेनेति तृतीयान्तं द्रव्यं न प्रधानयुक्तं तथापि हेतुत्वस्य व्याप्यत्वात् कार्यस्यैव धूमादिवद् व्याप्यत्वेन करणे तदभावाद् व्याप्यत्वादत्र करणस्य प्राधान्यम् एवभिमर्शनस्यापि समुदायप्रयुक्तत्वं न तु प्रकरणादपूर्वार्थत्वम्। ततश्च नीवारेषु वैकल्पिकपरिधिद्वयवत्यां पित्र्यायाम् समुदायाभावे च सौर्यादौ न प्रोक्षणादेरूहेन प्राप्तिरित्याशङ्क्य स्वरूपार्थत्वे वैयर्थ्याद्दुर्बलेनापि च प्रकरणेन श्रुतेः सङ्कोचरूपबाधात् तण्डुलनिष्पत्त्यादिप्रणालिकयापूर्वसाधनविशेषलक्षणायाञ्च स्रुवादावतिप्रसङ्गाभावाच्छूर्पस्य च तृतीयया साधनस्य साध्यत्वायोगेन तत्र हेतुनिर्देशास्यार्थवादत्वात्सिद्धस्तत्कार्यापन्नेषु नीवारपरिध्यादिषु प्रोक्षणादेरूह इत्याह—

न व्रीहिपरिधित्रित्वं प्रोक्षणादेः प्रयोजकम् ।

इदञ्च हेतुसमुदाययोरप्युपलक्षणम् ॥

६

देशबद्ध ● ज्योतिष्टोमे 'त्सरा वा एषा यज्ञस्य तस्माद्यत्किंचित् प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ती'त्यत्र यज्ञस्य यत्प्राचीनमिति सम्बन्धाश्रयणेन 'मन्द्रं प्रातःसवने' इतिवत् प्राग्भागमुद्दिश्य उपांशुत्वं विधेयं न पदार्थानुद्दिश्य, लक्षणापत्तेः। ततश्चाग्नीषोमीयात्पूर्वो यो यज्ञभागस्तद्धर्मं उपांशुत्वं परमापूर्वप्रयुक्तमित्याशङ्क्य यज्ञस्येत्यस्याव्यवहितत्सराशब्दविशेषणत्वेन प्राचीनशब्दविशेषणत्वायोगाद्यत्किंचिदित्यस्य च वीप्सार्थकत्वात्तस्याश्चानेकापेक्षत्वेनैकस्मिन् भागे उपपत्तेर्न तद्धर्मं उपांशुत्वं किन्तु पदार्थधर्मः। ततश्चाप्राकृते तद्भागारम्भके पदार्थे यूपावटास्तरणबर्हिषि बर्हिर्धर्मवन्नोह इत्याह—

उपांशुत्वं दैक्षपूर्वपदार्थाङ्गञ्च,

७

प्रणीतादि ● इष्टौ 'यज्ञं तनिष्यन्तावध्मर्यू यजमानौ वाचं यच्छत' इत्युपक्रम्य 'प्रणीताः प्रणेष्यन् वाचं यच्छती'ति श्रुतम्। तत्र यज्ञसंयोगाद्धविष्कृतः पूर्वो यो यज्ञभागस्तद्धर्मत्वमाशङ्क्य 'यज्ञं तनिष्यन्तावि'ति यज्ञशब्दस्य विस्तारविशेषणत्वेन भागविशेणत्वाभावाद्भागस्याश्रुतत्वाच्च पदार्थानामवैकल्यार्थं तदङ्गं वाग्यम इत्याह—

वाग्यमः ।

८

अग्निधर्मः ● चयने 'हिरण्यशकलैरग्निं प्रोक्षती'त्यत्र संहतानामिष्टकानामग्निशब्दवाच्यत्वेनेष्टकाभिन्नस्यावयविनोऽभावाद्घटादिवदेकावयवाकर्षणेऽन्यानाकर्षात्सन्धिदर्शनात् पक्वामसंयोगेन द्रव्यान्तरमिति कश्यपमतेन च चयनस्यावयवित्वाभावात्प्रतीष्टकं प्रोक्षणं भेदेन कार्यमित्याशङ्क्य इष्टकाभिरग्निं चिनुत' इतीष्टकानां प्रोक्षणस्य चाग्न्यर्थत्वेन परस्पर सम्बन्धाभावादवयवव्यतिरिक्तावयव्यनभ्युपगमे त्वापरमाणोर्धावनादिष्टकानामपि प्रोक्षणानापत्तेर्वृक्षादावयवित्वेऽपि तत्संयुक्तावयवान्तराकर्षणाभावेन सन्धिदर्शनाच्च पूर्वोक्तनियमद्वयाभावात् प्रत्यक्षेण चावयविनः प्रतीतेः सकृदेव प्रोक्षणमित्याह—

हिरण्यशकलैरग्नेः प्रोक्षणन्तु सकृद्भवेत् ॥

९

पत्नीसंयाजान्तत्वम् ● द्वादशाहे 'पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते असंस्थितो हि तर्हि यज्ञः' इत्यत्र द्वादशानामप्यन्हां पत्नीसंयान्तत्वम् असंस्थितशब्दस्य च चिरसंस्थापरत्वं 'नास्य भोजनं समाप्यत'इतिवत् शेषलोप इत्याशङ्क्य सहानुष्ठेयानां द्वादशयागानामेकादशदिनेषु कस्मिन् पदार्थेऽवस्थानमित्याकाङ्-

क्षायां पत्नीसंयाजेषु नियमादाद्यन्तयोर्नियमापूर्वविधौ वैरूप्यापत्तेर्वाक्यशेषाच्चा-न्त्यवर्जं पत्नीसंयाजान्तत्वमित्याह--

संयाजान्तत्वमह्नान्तु द्वादशाहे विनोत्तमम् ।

१०

अभ्यासः ● इष्टौ एकादश सामिधनीः पठित्वा 'त्रिः प्रथमामन्वाह त्रिरुत्तमामि'ति श्रुतम् । तत्र त्रिरभ्यासः प्राथम्यलक्षितायाः 'प्रवोवाजे'त्यस्याः धर्मः स्त्रीलिङ्गसम्बन्धात् । तेन यत्र तत्रस्था सा त्रिरभ्यसितव्या । अन्यथा प्राथम्यमात्रधर्मत्वे वर्णपदादावपि तदापत्तेरित्याशङ्क्य प्रथमशब्देन श्रुत्या प्राथम्यस्योक्तत्वेन लक्षणया ऋग्वाचित्वायोगादृच एव प्रथमं प्रयुज्यमानत्वेन स्त्रीलिङ्गस्याश्रयधर्मत्वेन च नित्यानुवादत्वाद्वर्णपदादीनां प्राथम्येऽपि वाक्यानुवचनस्यैव कार्यक्षमत्वेन तेषां तदयोग्यत्वात्ताः पञ्चदशेति वादाच्च स्थानधर्मत्वम् । ततश्चान्यापि तत्स्थानपतिता त्रिरभ्यसनीयेत्याह--

त्रिरभ्यासः स्थानधर्मो न त्वृचो धर्म इष्यते ।

११

इष्ट्यावृत्तौ ● इष्टिप्रकरणे 'दर्शपूर्णमासावारप्स्यमानोऽन्वारम्भणीयामिष्टिं निर्वपती'त्यत्र दर्शपूर्णमासारम्भोद्देशेनेष्टिविधाने वाक्यभेदाद्दर्शपूर्णमासमात्रमेवोद्देश्यम् । आरम्भस्तु प्रयोगविधिप्राप्तत्वादनुवादस्ततश्च साक्षादेवेयमङ्गं प्रयाजादिवदिति तदावृत्तावावृत्तिरित्याशङ्क्यारम्भस्यैवोद्देश्यत्वेन तद्विशेषणस्य दर्शपूर्णमासपदस्य सप्तदशारत्नित्वे वाजपेयपदवत्प्रकरणप्राप्तानुवादित्वादारम्भस्य च ममेदं कार्यमित्यध्यवसायरूपस्य सर्वयावज्जीविकप्रयोगसाधारणस्यैकत्वात्तद्द्वारकेष्टिरपि सकृदेवेति वृत्तिकारः । भाष्ये त्वारम्भशब्दस्याध्यवसायार्थत्वे तेषां प्रतिप्रयोगं भेदे वेष्ट्यावृत्यापत्तेर्यावज्जीविकैकप्रयोगाभावेनाध्यवसायैक्यायोगात् कथञ्चित् नित्यानां तदैक्येऽपि काम्यानां कामोत्पत्त्यधीनत्वेन तदभावान्नैव सिद्धान्तसिद्धिरिति मत्वाऽन्यथा व्याख्यातम् । किमियमाद्यपदार्थाङ्गं उत पुरुषाङ्गमिति । तत्राद्यपदार्थेऽन्वाधाने आरम्भशब्दे प्रयोगात्तदङ्गमिष्टिस्तदावृत्तावावर्त्तते न तु शानचा कर्तुरुक्तत्वेऽपि तद्धर्मः, फलकल्पनापत्तेः । शानचस्त्वनुवादत्वेनापि सम्भवादित्याशङ्क्य 'सोमेन यक्ष्यमाण'इतिवद्भविष्यदर्थंविहित लृटा भविष्यदारम्भाङ्गत्वेनेष्टिविधौ तद् द्वारा इष्टेः क्रत्वङ्गत्वेन फलकल्पनाभावादारम्भस्य चाद्यप्रवृत्तिरूपत्वात्तस्याश्चैकत्वादन्वाधाने तु लाक्षणिकप्रयोगात् प्रयोगाणामारम्भेऽपि दर्शपूर्णमासयागारम्भस्यैकत्वात्सकृदिष्टिरित्याह--

सकृदारम्भणीया स्यादारम्भश्चादिमा कृतिः ।

१२

अर्थाभिधानसंयोगात् ● इष्टौ'देवस्य त्वेत्याद्यग्नये जुष्टम्'इति मन्त्रस्तत्र सवित्रश्विपूषशब्दानामग्नेः पुरोडाशद्वारेव यागे निर्वापद्वारा मन्त्रवर्णाद्देवता-

भिधायकत्वसम्भवे निर्वापस्तुत्या अदृष्टार्थत्वायोगाद्योगेन वा सवित्रादेरग्नि-वाचकत्वादग्निना वा विकल्पाद्देवतावाचित्वम्। ततश्च विकृतौ तत्स्थाने ऊह इत्याशङ्क्योत्पत्तौ तद्धितोक्तेन सह मन्त्रोक्तस्य विकल्पायोगाद् रूढत्वाच्चाग्नि-वाचकत्वायोगाद्देवताभेदे च वाक्यभेदापत्तेर्जुष्टनिर्वापशब्दयोरावृत्यापत्तेश्च निर्वापस्तुत्यर्थत्वेनादृष्टार्थत्वान्नोह इत्याह—

सवित्रादिपदे नोहः,

१३

गुणशब्दम् ● तत्रैवाग्नये जुष्टमित्यत्र भूते क्तप्रत्ययेन सेवितत्वस्योक्ते र्निर्वापदशायाञ्चाग्निना सेवितत्वाभावान्निर्वापविशेषणमग्नये जुष्टमित्यस्य समवेतार्थत्वात्सवित्रादिवन्नोह्यमित्याशङ्क्य जुष्टस्य निर्वापाभावेऽपि निर्वापेण जुष्टं यथा भवति तथा करोमि इत्यर्थेन समवेतार्थत्वादूह इत्याह—

जुष्टार्थाग्निपदे तु सः॥

यद्वा 'धान्यमसि धिनुहि देवानि'ति तण्डुलेषु प्रयुक्तस्य सतुषवाचिधान्य-शब्दस्यासमवेतार्थत्वान्नोहः तेन [1]'तारसे पुरोडाशे न 'मांसमसी'त्यूह इत्याशङ्क्य धान्यशब्देन लक्षणया तण्डुलरूपविकृतिप्रकाशनात् शालयो भुज्यन्त' इति विकृतौ प्रकृतिशब्ददर्शनाच्चासमवेतार्थत्वाभावाच्छाक्यानामयने मांसपुरोडाशे कृत्वा चिन्तया सिद्ध ऊह इत्याह—

मांसडाशे धान्यशब्दे मांसशब्दोह इष्यते।

१४

चोदिते तु ● इडानिगदे'ये च यज्ञपतिं वर्धानि'त्यस्य प्रकृतौ यज्ञपतिवृद्धि-प्रकाशनेन दृष्टार्थत्वादनेकयजमानकेषु कर्मसूह इत्याशङ्क्य यज्ञपतिशब्दस्येडा-स्तुत्यर्थे वृद्धिविशेषणत्वाद्यच्छब्देन पाराार्थ्यावगतेरेकवृध्या इडास्तुतिसिद्धेश्च नोह इत्याह—

इडायान्तु परार्थत्वान्न सत्रे ऊह इष्यते॥

१५

विकार ● सूक्तवाकस्थे 'आयुराशास्ते' इति मन्त्रे पूर्वोक्तन्यायेन सत्रे तु नोह इत्याशङ्क्य श्रुतिविनियोगान्यथानुपपत्त्या आयुरादेः प्रहरणफलत्वात्सर्वेषां तत्सिध्यर्थमायुराशासत इमे यजमाना इत्यूह इत्याह—

यजमानः सूक्तवाके सत्रेषूह्यः प्रधानतः।

१६

असंयोगात् ● सोमे सुब्रह्मण्यायाम् 'इद्र आगच्छ हरिव आगच्छे'ति मन्त्रः। सोऽयमग्निष्टुत्यतिदेशेन प्राप्तस्तत्र 'आग्नेयी सुब्रह्मण्ये'ति वचनादग्निपदे ऊहः

१. तारसे मांसमये पुरोडाशे इत्यर्थः। शाक्यानामयने तरसमयाः पुरोडाशा विहिताः।

सिद्धः। हरिवदादिशब्देष्वपि तद्वदेव दृष्टार्थत्वायाग्निगुणान्वक्तुं 'रोहिताश्व धूमकेतो' इत्यूहः स्यादित्याशङ्क्येन्द्रे गुणसत्वे मानाभावात् स्तुतिमात्रत्वेनासद्भिरपि गुणैरग्नेरप्यभिधानं कर्तुं शक्यमित्यत्र नोहः। यद्वा सोमे 'तस्यै श्रृतमि'त्येकहायनीमन्त्रे श्रुतानां श्रृतादिशब्दानां प्रकृतौ क्रयसाधनस्तुत्यर्थत्वेन स्वार्थत्वादेकहायन्यवस्थायां क्षीरादेरभावेऽपि योग्यतया भावित्वाद् दृष्टार्थत्वाच्च त्रिवत्से साण्डे ऊहः स्यादित्याशङ्क्य गोर्मरणे भावित्वानिश्चयाद्यथा कथञ्चित् प्ररोचनस्यान्यगवीद्वारा साण्डेऽप्युपपत्तेर्नोह इत्याह--

त्रिवत्से वापि साण्डे तु नोह्यास्तस्यैश्शृतादयः ॥

१७

लिङ्गविशेष ● संस्थापशूनां समानविधानत्वपूर्वपक्षे पशूनां समुच्चयाभावे च कृत्वाचिन्तेयम्। तत्र 'प्रास्मा अग्निं भरते'ति पुलिङ्गस्यास्मैशब्दस्यास्मै पशव इत्येवं मेष्यामपि प्रवृत्तेस्तत्राप्यध्रिगुवचनं स्यादित्याशङ्क्य पशुशब्दाश्रवणात् पुंपशुष्वर्थवत्वाच्च न मेष्यां प्रवृत्तिरित्याह--

कृत्वा सामानविध्यन्तु मेष्यां प्रास्मेति ।

सिद्धान्ते तु मेष्यामतिदेशात् प्राप्ते प्रास्यै अग्निमित्यूहः।

१८

आम्नातात् ● अथ सामोहः। तत्रेह गिरापदगीतेरिरापदस्थानापत्त्या प्राप्तिं वक्तुं स्थानापत्तिरुच्यते। ज्योतिष्टोमे यज्ञायज्ञिये 'न गिरा गिरेति ब्रूयादैरं कृत्वोद्गेयमि'ति श्रुतम्। तत्रैरं कृत्वेत्यनेन इरापदमात्रं विधीयते न श्रुत्या गानं स्तोत्रसम्बन्धो वा। किन्तु प्रकरणात्स्तोत्राङ्गत्वे तत्साधनगानसम्बन्धः प्राप्तोऽनूद्यते। गिरापदस्य स्तोत्राङ्गत्वम्। तेन विकल्प इत्याशङ्क्येरापदस्य प्रकरणसनाथया श्रुत्या अग्निष्टोमस्तोत्रसाधनभूतोद्गानसम्बन्धात् प्रकरणाच्च स्तोत्राङ्गत्वाद्गिरापदस्य तु प्रगाथैकवाक्यतया स्तोत्रपाठक्रमेण च गानस्तोत्राङ्गत्वात्तयोश्च श्रुतिप्रकरणाभ्यां दुर्बलत्वात्सामान्यपाठस्य च 'यज्ञायज्ञियं पुच्छे गायती'त्यादौ सावकाशत्वाद्गिरापदनिषेधानुवादाच्चेरापदमेव प्रयोक्तव्यमित्याह—

इरापदं गिरा स्थाने,

१९

अप्रगाणात् ● तदिरापदमप्रगीतमेव प्रयोक्तव्यम् ऐरमिति तद्धितस्याप्रगीतादेवोत्पत्तेः। प्रगीतादुत्पत्तौ 'वृद्धं तालव्यं प्रथमस्वरमि'तीकारस्याईभावे 'वृद्धाच्छ' इति छस्येयादेशे सत्याईरीयमिति रूपं स्यात्। तेनाप्रगाणमेव स्यादित्याशङ्क्य गिरापदनिषेधानुवादबलात्प्रगाणानादरेण तत्स्थाने इरापदे विहिते गिरापदे च निवृत्ते सति तद्गीतेर्गेयापेक्षत्वादिरापदस्य च गीतिं विना स्तोत्र-

साधनत्वायोगेन सामापेक्षत्वादाकाङ्क्षया परस्परं सम्बन्धे सति प्रगीतमेव प्रयोक्तव्यमित्याह—

नियतं तत्प्रगीतकम् ॥

इति नवमस्याद्यः पादः ॥

द्वितीयः पादः

१

सामानि ● सामशब्दस्तद्विशेषरचनाश्च रथन्तरादिशब्दाः गीतिमात्रस्यैव-वाचकाः न त्वृचामिति सप्तमसिद्धमेव स्मार्यत इत्याह—

गीतिः साम,

यद्वा योऽयं छन्दोगानामूहग्रन्थः 'कयानश्चित्रे'त्यादिः स कर्तृस्मरणाभावादनध्यायाद्याचाराच्चापौरुषेय इत्याशङ्क्यऽनादेरूहसमाख्यायोगाद्योनिसम्बन्धानुवादोत्तरासम्बन्धविधिबलाच्च पौरुषेयत्वावागतेः ऋक्सामनिष्ठत्वाच्चानध्यायादरोपपत्तेरूत्तरयोर्गानस्य वाचनिकत्वाच्च कर्तृस्मृत्यभावस्याप्युपपत्तेः पौरुषेय एवोहग्रन्थ इत्याह—

तथोहश्च पौरुषेयस्तु,

७

कर्म वा ● ननु रथन्तरादिसाम्नां 'ऋच्यध्यूढं साम गायति' 'यद्योन्यां तदुत्तरयोर्गायति' इति सप्तमीश्रुत्या ऋचामधिकरणत्वेन गुणत्वावगमा'द्रथन्तरं गायती'त्यादि द्वितीयानिर्देशाच्च ऋचः प्रति प्राधान्यमवश्यं वाच्यम् नाङ्गत्वम्। तथात्वेऽक्षराभिव्यक्तेः कर्मण्युपयोगादकर्मकाले प्रयोगो न स्यात्। बहिः प्रयुक्तसाम्नो दृष्टसंस्कारार्थत्वे त्वाहवनीयादिसंस्कारकस्याधानस्येव कर्मकाले पुनः प्रयोगवैय्यर्थ्यात् तेन बहिर्गानं विश्वजिद्वत् फलार्थम्। कर्मकालीनन्तु प्रयाजादिवदारादुपकारकम्। न चैतासामृचां स्तोत्राङ्गत्वं न स्यादिति वाच्यम्। प्रयाजादीनामुपदेशात् प्रकृत्यङ्गत्वेऽपि विकृत्याकाङ्क्षया दुर्बलेनातिदेशेन तदङ्गत्वाच्छ्रुत्या सामाङ्गत्वेऽपि लिङ्गक्रमप्रकरणैः स्तोत्राङ्गत्वस्यापि स्वीकारात्। साम्नोऽर्थकर्मत्वेऽपि बृहस्पतिसववत्'यज्ञायज्ञियेन स्तुवीते'त्यादिस्तुतौ वाक्यीयविनियोगस्यापि सम्भवात् तस्मान्मुख्यमेव गुणकर्मत्याशङ्क्याक्षराभिव्यक्त्यर्थत्वे दृष्टे सम्भवत्यदृष्टार्थत्वायोगात् ऋच्यध्यूढमित्यादौ तु दृष्टार्थत्वाय प्रयाजशेषेणेतिवत् साम्ना ऋचं संस्कुर्यादिति लक्षणाङ्गीकारात् स्तोत्रक्रमेण स्तोत्रावान्तरप्रकरणेन वा तदर्थानामृचां संस्कार्यत्वयोग्यत्वादकर्मकाले प्रयोगस्य चाभ्यासार्थत्वादृक्संस्कारकमेव सामेत्याह—

साम संस्कारकमृचाम्।

८

तृचे स्यात् ● 'यद्यप्येकं साम तृचे क्रियते स्तोत्रीयमि'त्यत्र यद्योन्यामित्यतिदेशेन योनौ कृत्स्नगानानुवादावगतेस्तद्विरोधेन व्यासज्य गानशङ्का युक्ता। तथापि यद्योन्यामित्यस्य 'यदातिथ्यायां बर्हिरितिवत्साम्नः साधारण्यविधानार्थत्वेनातिदेशकत्वाभावत् 'तृचे क्रियत' इति ऋत्वनुग्रहाय व्यासज्य गानमन्यथाभ्यासलक्षणापत्तेरित्याशङ्क्य स्तोत्रीयमिति प्रवर्ग्यसामादिव्यावृत्यर्थं स्तोत्राङ्गसामोक्तेरङ्गत्वस्य च तत्साधनऋक्संस्कारद्वारत्वात् स्तोत्रसाधनत्वस्य च प्रत्येकमेकैकस्या ऋचः स्तुतिबुद्धिजनकत्वेन प्रत्येकनिष्ठत्वादृचां प्राधान्याच्च प्रतिप्रधानं सामावृत्तेरपि युक्तत्वात्स्तोत्राङ्गत्रित्वस्य च तत्साधन ऋग्द्वारैव तदङ्गत्वे निर्वाहादृचामनुवादाच्चाभ्यासलक्षणयाप्युपपत्तेरभ्यास इत्याह—

तेनाभ्यस्तं तत्प्रत्युचं भवेत् ।

९

तदभ्यासः ● यद्यपि 'यद्योन्यां तदुत्तरयोः गायती'ति वाक्ये सति समविषमसाधारण्येन ये एवोत्तरे तयोरेव क्रमप्रकरणाभ्यां स्तोत्राङ्गत्वात्तत्रैव गेयमिति व्यर्थमिदमधिकरणम् तथापि यत्र योनिमुत्तराञ्च विहाय ऋगन्तराण्येव स्तोत्रे विनियुज्यन्ते यथा त्रिवृदग्निष्टोमः रेवतीषु वारन्तीयं कृत्वेत्यादौ तत्रैकं साम तृचे क्रियत इत्यस्योभयथाप्युपपत्तेः समासु विषमासु वा गेयमित्याशङ्क्य संशरविलेशपरिहाराय समास्वेव गानमित्याह—

संशराख्यविलेशाख्यदोषात्तत्स्यात्समासु तु ।

अधिकाक्षरायामृचि गीतस्याल्पाक्षरायां गानेऽधिकस्य साम्नो लोपः संशरः, अल्पस्य बह्वक्षरायामभ्यासो विलेशः ॥

१०

नैमित्तकं ● इह किमुत्तराशब्दः सम्बन्धिशब्दः उत संज्ञाशब्द इति चिन्त्यते। सोमे रथन्तरमुत्तरयोर्गायति यद्योन्यामित्यादौ उत्तराशब्दस्य तूष्णीमुत्तरादौ गायति, प्रस्तरमुत्तरं बर्हिषा सादयतीत्यादौ सम्बन्धिशब्दत्वदर्शनादुभयत्रापि योनिसमभिव्याहारात्मकवाक्यादविशिष्टं यौन्युत्तरात्वमिति योन्युत्तरयोरुत्तराग्रन्थाधीतयोर्वोत्तरयोर्गानमित्याशङ्क्य बृहद्योन्यादिषु रथन्तरयोनितः परत्वेऽपि उतरा वर्तन्ते उतरा अध्याया इति वैदिकप्रयोगाभावादुतराशब्दात्संज्ञया रूढया तद्ग्रन्थस्थानां प्रतीतेश्च सापेक्षसम्बन्धिशब्दत्वायोगादुतरा ग्रन्थस्य प्राकरणिकत्वाच्चोतराग्रन्थाधोता एवौतरा ग्राह्या न तु योन्युतरा इत्याह—

उत्तरा ग्रन्थपठिते ज्ञेये योन्युत्तरा न तु ।

यद्वा, द्वादशाहे पार्ष्टिके चतुर्थेऽह्नि एकविंशतिस्तोमके त्रैशोकं नाम सामाति जगत्यामुत्पन्नम् तस्योतरे द्वे बृहत्यौ। तत्र श्रुतम् अतिजगतीषु स्तुवत इति।

तत्रातिजगतीबहुत्वविधिना विशेषेण यद्योन्यामिति सामान्यविधेर्बाधादुत्पत्तिजगत्योरेव गानं कर्तव्यं न बृहत्योरित्याशङ्क्य बृहत्योः प्रकरणे पाठस्य निरवकाशत्वादेकविंशस्तोमे सप्तकृत्वोऽतिजगत्यामभ्यस्यमानायामतिजगतीबहुवचनोपपत्तेश्च बृहत्योरेव गेयमित्याह—

गौणोक्तं तु बृहत्योः स्यान्न समानियमोऽत्र हि ।

११

इतश्चतुर्भिरधिकरणैः समासु गेयमित्यस्यापवादः कथ्यत इत्याह—

इतः समापवादस्तु चतुर्षु स्यात्प्रगाथतः ।

प्रागाथिकन्तु ● सोमे रथन्तरस्य बृहतश्च बृहत्यौ योनी । उत्तरे द्वे (सतोबृहती) पङ्क्ती । तत्र श्रुतम् न वै बृहद्रथन्तरमेकं छन्दो यत्तयोः पूर्वा बृहती ककुभावुत्तरे इति । सप्ताक्षरपादा ककुप् । तत्र ककुभावित्यस्य प्राथम्येनोद्देश्यत्वादसञ्जातविरोधित्वेन च मुख्यार्थत्यागायोगात्प्रगथने चैकं सामेति विहितस्य ककुप्त्रित्वस्य पृथक्त्वनिवेशबाधापत्तेर्मुख्यककुभोरागम इत्याशङ्क्य ककुभोः स्वरूपतः प्राप्तावपि कर्मसम्बन्धित्वेनाप्राप्त्या उद्देश्यत्वायोगादुत्तरयोस्तु प्रकरणात् स्त्रोत्राङ्गत्वात् तत्र च मुख्यककुप्त्वस्य विधातुमशक्त्यान्ये उत्तरे ते ककुभावित्येवमक्षरसाम्यमात्रस्य विधेयत्वात्प्रगाथसमाख्योत्तरपाठवैय्यर्थ्यानुपपत्त्या च ऋक्त्रित्वस्य पृथक्त्वनिवेशबाधात् 'पादं पुनरारभते' इति लिङ्गाच्च प्रग्रथनमित्याह—

रथन्तरं बृहच्चोभे प्रगाथात्ककुभौ मते ।

यद्वा 'रौरवयौधाजये बार्हते तृचे भवतस्तत्र पूर्वा बृहती उत्तरे विष्टारपङ्क्ती' । तत्र पूर्ववद्गौणग्रहणायोगान्मुख्यबृहत्यावानेये इत्याशङ्क्य प्रगाथसमाख्यापाठलिङ्गैः प्रग्रथनमित्याह—

यौधाजये रौरवे च बृहत्यौ ग्रथनादपि ।

यद्वा श्यावाश्वान्धीगवे आनुष्टुभे तृचे भवतः । तयोः पूर्वानुष्टुबुत्तरे गायत्र्यौ । तत्र मुख्यानुष्टुभोरागम इत्याशङ्क्य पूर्ववत्प्रगथनमित्याह—

श्यावाश्वान्धीगवे द्वे तु प्रगाथानुष्टुभोर्मते ॥

प्रगाथेनानुष्टुभोरित्यर्थः । यद्वा गवामयने 'चतुःशतमैन्द्रा बार्हताः प्रगाथा' इत्यत्र चोदकात् तिसृषु ऋक्षु गेयम् । बार्हताः प्रगाथा इत्यस्य तु प्रथमतृचे गीत्वा तस्मात्तृचादन्त्यामृचमुपादायापरे द्वे ऋचौ ग्रहीतव्ये इत्येवं ऋक्प्रगथनाभिप्रायत्वेनाप्युपपत्तेरित्याशङ्क्य 'अन्या अन्या ऋचो भवन्ति' इति वचनान्नैकस्यां द्विर्गानम्, किन्तु प्रगथनमित्याह—

चतुःशतं बार्हतेषु द्वयोः प्रग्रथना ऋचः

१२

अर्थैकत्वात् ● सामवेदे शाखाभेदेनाम्नातानां गीतिप्रकाराणामेकार्थत्वाद्विकल्प एव युक्त इत्याह—

शाखाभेदे गीतिभेदाद्विकल्पः ।

१२

अर्थैकत्वाद्विकल्पः स्यात् ● क्वचिद्विकृतिविशेषे कानिचित्स्तोत्राणि श्रुतानि। तेषाञ्च न प्रकृतितः किञ्चित्साधनं प्राप्नोति। प्राकृतानामृचां रथन्तरादिसाम्नाञ्चान्यत्र निबद्धत्वात्। तेन तानि साकाङ्क्षाणि। तत्र श्रुतम् 'यदृचा स्तुवते तदसुरा अन्ववायन्। यत्साम्ना स्तुवते तदसुरा नान्ववायन्। य एवं विद्वान्साम्ना स्तुवीतेति। ऋक्ग्रहणमप्रगीतपरम्। तत्रोपसंहारस्थलिङ्गोऽपि 'यत्साम्ना स्तुवत' इति यच्छब्दोपबन्धात्स्तुत्यैव विधिशक्तिः कल्प्या। तच्चाविशिष्टमुपक्रमेऽपि। तेन विकल्प इत्याशङ्क्योपक्रमे द्वयोरविशेषेऽप्यन्ते विद्वत्कर्तृकत्वेन पुनः सामस्तुत्या तद्विधिकल्पनादृग्निन्दया साम्नां स्तुतिः। तेन साम्नैव स्तोतव्यमित्याह—

सामभिः स्तुतिः।

यद्वा सामवेदे 'अयं सहस्रमानवः' इत्यप्रगीताञ्चर्चं पठित्वा 'अयं सहस्रमानव इत्येतया आहवनीयमुपतिष्ठते' इति श्रुतम्। तत्र शब्दसन्निधिभ्यामुभयोरपि प्रतीतेरप्रगीतपाठस्य च प्रगाणार्थत्ववत्प्रगाणस्यापि ऋगर्थत्वादुभयोरपि प्रयोजनापेक्षातौल्याद्विकल्प इत्याशङ्क्य प्रगाणस्य ऋगर्थत्वेऽपि प्रगीतपाठस्यानन्यार्थत्वात्प्रगीतयैवोपस्थानमित्याह—

अयं सहस्रोपस्थानमृचा स्यात्तु प्रगीतया।

यद्वा क्रतौ मन्त्राः त्रैस्वर्येण चातुस्स्वर्येण वा विकल्पेन प्रयोज्या इत्याशङ्क्य 'तानो यज्ञकर्मणी'ति वचनात्तानेन प्रयोक्तव्या इत्याह—

तानो यज्ञे स्मृतः।

सामप्रदेशे ● 'रथन्तरमुत्तरयोर्गायती' त्यादौ सामस्वरूपस्यैवातिदेशाद्यत्र भागे योनावायिभावः कृतस्तथैवोत्तरयोरपि तत्स्थाने सन्ध्यक्षराभावेऽपि सः स्यात्। ततश्च योनिवर्णवशेन गानमित्याशङ्क्य साम्नः दृष्टाक्षराभिव्यक्त्या स्तोत्रार्थत्वादेकारे त्वकारेकारयोः प्रत्यक्षत्वादेकारं विना आयिभावे अदृष्टार्थत्वापत्तेश्च नोत्तरयोरेकारादिसन्ध्यक्षरं विना आयिभाव इत्युत्तरावर्णवशेनैव गानमित्याह—

साम्नामूहः स्यादुत्तरावशात्।

१३

स्तोभस्यैके ● अग्निष्टपतीत्यादिस्तोभानां सामभिन्नत्वादृगक्षरवन्नातिदेश इत्याशङ्क्य गीतिकालपूरकत्वात्तदभावे गीतावंशलोपापत्तेरतिदेश इत्याह—

स्तोभाः स्युर्विकृतौ।

१४

अधिकं च ● प्रसङ्गात् स्तोभलक्षणमाह—

ऋग्भ्योऽधिकाः स्युः स्तोभसंज्ञकाः।

ये ऋगक्षरेभ्योऽधिकाः विलक्षणवर्णाश्च ते स्तोभा ज्ञेयाः।

१५

धर्मस्य • इह विकृतौ प्राकृतधर्माणां प्राप्तिं वक्तुं स्थानापत्तिरुच्यते। सा च पञ्चधेत्याह—

धर्मप्राप्तिस्तु विकृतौ स्थानापत्त्या च पञ्चधा।

पञ्चधात्वमेव वार्तिकश्लोकेनाह—

प्रत्यक्षविधिनाभावे विधानेन विकारतः।

स्वशब्दाच्च निषेधानुवादात्तत्कार्यकारितेति। प्रत्यक्षसहितो विधिः प्रत्यक्षविधिः। तत्राद्यामाह—

व्रीहिस्थाने तु नीवाराश्चरौ।

नैवारश्चरुरित्यत्र तद्धितेन नीवारसम्बन्धित्वमात्रोक्त्या कार्यापत्तिकरस्य शब्दस्याभावान्नीवारेभ्यः प्रत्यक्षतण्डुलोत्पत्तेर्व्रीहिकार्यापत्तिः। 'संस्थिते षडहे मध्वाशयेत् घृतं वे'त्यत्र संस्थया प्रतिषेधो लक्ष्यते। प्रतिषेधेन च षडहकार्यं लक्ष्यते। तस्मिन् लक्षिते कार्ये मध्वशनघृताशने षडहकार्यापत्त्वा धियीयेते इत्ययमभावे विधिरिति भाष्यकारः। वार्तिके तु षडहाङ्गत्वेन मध्वशनविधिरयं नत्वभावे। तेन 'सत्रायागूर्य विश्वजिता यजेते' त्ययमभावे विधिरित्युक्तम्। तदाह—

सत्रे च विश्वजित्।

नैऋतश्चरुर्नखावपूतानामित्यत्र निर्लुञ्चनावघातयोः प्रत्यक्षेणैक्यायोगेन प्रत्यक्षेण कार्यापत्त्यसम्भवान्निर्लुञ्चनस्यावघातवत्तुषविमोकार्थत्वात्प्रत्यक्षेण तत्कार्यापत्तिदवगम्यते। अतो निर्लुञ्चनसाधनानां नखानामवघातसाधनोलूखल-मुसलकार्यापत्तिरनुमानाद्गम्यते। सेयं विकारतः कार्यापत्तिरित्याह—

नखास्तुषविमोकार्थाः।

परिधौ पशुं नियुञ्जीतेत्यत्राप्राकृतनियोजनान्तरविधौ विशिष्टविधि-गौरवात्स्वशब्देनैव परिधिः सप्तम्या यूपकार्ये नियोजने विहितः, तत्कार्यापन्न इत्याह—

यूपार्थे परिधिस्तथा।

न गिरागिरेति ब्रूयादैरं कृत्वोद्गेयमित्यत्र वाक्यभेदाददृष्टार्थत्वापत्तेश्च नायमपूर्वो निषेधः, किन्तु 'ऐरं कृत्वोद्गेयमिति प्रकृते यज्ञायज्ञिये सर्वत्रेरापदे रथन्तरे भशब्दवद्बहिष्पवमाने ओकारवच्च विहिते सत्यन्यसर्वऋगक्षरनिषेध-प्राप्तौ गिरापदनिषेधस्याप्यर्थादेव सिद्धौ 'न गिरागिरे'ति पुनर्गिरापदनिषेधा-नुवादस्य शेषऋगक्षरप्राप्त्यर्थं गिरापदस्थान एवेरापदं नान्यवर्णेष्विति निषेधा-नुवादान्निषेध्यकार्यापत्तिरिरापदस्येत्याह—

इरापदं गिरास्थाने तन्निषेधानुवादतः।

१६

तदुत्पत्तेस्तु ● परिधौ पुनराक्षेपः। तत्र नीवारादीनां व्रीहिकार्ययागादिप्रयुक्तत्वाद्व्रीहिधर्मलाभेऽपि परिधेरग्निपरिधानार्थमुत्पन्नस्य यूपकार्यपशुनियोजनप्रयुक्तत्वाभावादतर्थं एव तस्मिन्वचनान्नियोजनमात्रकरणात्कार्यार्थिनां धर्माणां नायूपे परिधौ प्राप्तिरित्याशङ्क्यान्यार्थस्यापि परिधेः कपालस्य तुषोपवाप इव नियोजने सप्तम्या यूपवच्छेषत्वात्तत्र चासम्भवतां लोपेऽपि सम्भवतां लोपायोगात्साधनत्वमात्रस्यैव धर्मान्वये हेतुत्वेन तादर्थ्यस्य तत्र हेतुत्वाभावाच्च परिधावपि यूपधर्माः कार्या इत्याह--

नियोजनार्था यूपधर्मास्तदर्थे परिधावपि।

१७

परार्थे ● अभ्युदयेष्टौ यागार्थयोर्दधिपयसोः परिधिवत्प्रणीताकार्ये श्रपणे विनियोगाभावान्न प्रणीताधर्मा उत्पवनादयः कार्या इत्याशङ्क्य विनियोगाभावेऽपि त्वर्थात्साधनत्वमस्तीति कृत्वा तत्र धर्मा कार्याः इत्याह—

इज्यर्थयोः श्रृतदध्नोः प्रणीताधर्मता मता।

१८

एकार्थत्वात् ● सोमे पृष्ठाख्यमाहेन्द्रस्तोत्रसाधनत्वेन विहितयोः बृहद्रथन्तरयोर्ये धर्मा संमीलनसमुद्रमनोध्यानादयस्ते यवेषु व्रीहिधर्मा इवोभयत्र स्युः। न च व्रीहिस्रुवादिवच्छ्रचित्रादिऋगर्थप्रकारभेदात्स्तुतिभेद इति वाच्यम्। ऋगक्षराभिव्यक्त्या साम्नः स्तोत्रार्थत्वस्य तुल्यत्वेन शूरत्वादेरतन्त्रत्वात्। तेनाव्यवस्थेत्याशङ्क्यैकपृष्ठसाधनत्वेऽपि क्वचिद् बृहतः क्वचिद् रथन्तरस्येति निर्देशभेदादवघातादिधर्मविधिषु सर्वत्र व्रीहिनिर्देशवदत्रैकस्य धर्मविधौ निर्देशाभावाच्च स्वरूपविवक्षया धर्माणां व्यवस्थेति, सोमेश्वरः। मिश्रास्तु 'बृहत्पृष्ठं भवति रथन्तरं पृष्ठं भवतीति सामविशिष्टपृष्ठद्वयविधिः। ततश्च धर्माणां भिन्न-भिन्नस्तोत्रसाधनत्वादाज्यौषधधर्मवद् व्यवस्था। स्तोत्रयोश्चादृष्टार्थत्वात् समुच्चये प्राप्ते वचनाद्विकल्प इत्याहुः। सर्वथा तावद्धर्माणां व्यवस्थेत्याह—

रथन्तरबृहत्धर्मव्यवस्था नौषधादिवत्।

१९

अप्राकृते ● वैश्यस्तोमे 'कण्वरथन्तरं पृष्ठं भवती'त्यत्र बृहद्रथन्तर कार्ये कण्वरथन्तर विधानात् तद्धर्माणां प्रकृतिवद्विकल्प इत्याशङ्क्य कण्वरथन्तरस्य सामद्वय साध्यैकपृष्ठे विधानादुभयकार्यायत्तमिदमुभयोरपि धर्मान्समुच्चयेनैव गृह्णाति, न तु प्रकृतिवद्विकल्पेन तद्वन्निर्देशभेदाभावादिति भाष्यकृन्मतेनाह—

रथन्तरबृहद्धर्माः कण्वे भाष्ये समुच्चिताः।

वार्तिके तु पृष्ठस्यैकत्वेऽपि धर्माणां सामद्वारत्वात्साम्नोश्च विकल्पात्तयोः

कार्ये विहितमपि कण्वरथन्तरं यथाप्राप्तयोः कार्ये विधानात्कदाचिद्बृहतः कदाचिच्च रथन्तरस्य कार्यं साधयेन्न द्वयोः। ततश्च कदाचित्कस्यचित्कांश्चिदेव धर्मान् गृह्णाति न सर्वान्। स्तुतिरपि प्रकृतावन्योन्यनिरपेक्षान् धर्मान् गृह्णाति न समुच्चयेन। यदा तु स्तोत्रयोर्विकल्पस्तदा तयोः कार्यं साधनत्वेनोक्तमिदं सुतरां विकल्पेनैव तत्कार्यार्थमिति धर्माणां विकल्प एवेत्युक्तम्। तदाह—

विकल्पो वार्तिके प्रोक्तः।

२०

उभयसाम्नि ● 'संसव उभे कुर्यात् गोसव उभे कुर्यात्' इति बृहद्रथन्तरयोः समुच्चये सत्येकैककार्ये द्वयोर्विधानादुभयोर्धर्मा उभयत्र कार्या इत्याशङ्क्य पृष्ठैक्ये पृष्ठभेदेऽपि वा स्व-स्वधर्मयुक्तयोरेव साम्नोः समुच्चयाद्धर्माणां व्यवस्थेत्याह—

व्यवस्था संसवादिषु।

२१

पार्वणहोमयोः ● 'स्रुवेण पार्वणौ होमौ जुहोती'त्यत्र पर्वशब्दस्य दीयते पूर्यते अस्मिन्नित्यधिकरणव्युत्पत्त्या काले मुख्यत्वात्तद्देवत्यो होमो दृष्टार्थः। ततश्च विकृतौ स स्यादित्याशङ्क्य भावव्युत्पत्त्या कर्मण्यपि मुख्यत्वात्कर्मणाञ्च तन्त्रेणाभिहितानामग्नीषोमवद्व्यासक्तदेवतात्वेन प्रत्येकं तदभावात्प्रकरणात्सामवायिकत्वलाभाच्च समुदायदेवत्ययोर्होमयोर्नैकविकारे सौर्यादावतिदेश इत्याह—

नातिदेशः पार्वणयोर्विकृतौ होमयोर्मतः।

२२

उभयोः ● तावुभावप्युभयोः पर्वणोः प्रकरणाविशेषात्कार्यावित्याशङ्क्य संस्कार्यवशात्सूक्तवाकन्यायेन निष्कर्ष इत्याह—

विभज्य पर्वणोस्तौ।

सूक्तवाकन्यायेन गतार्थत्वेऽपि पूर्वप्रयोजनमात्रमिदम्।

२३

प्रयाजे ● 'समिधो यजती'त्यादौ समिदादिशब्दानां वेदे अग्निवाचकत्वेन प्रसिद्धेः 'विष्णुं यजती'तिवद्द्वितीयानिर्देशाच्च समिदादीनां तत्र च कर्मत्वस्य यज्यर्थविशेषणे उद्देशमात्रे अन्वयेन विशेष्यभूते त्यागे यजिधातोरकर्मकत्वेनान्वयाभावात् विष्णौ तूद्देशगतकर्मत्वस्य त्यागे उपचारात्प्रकृते च विधौ तदयोगात् समित्पदस्य मन्त्रवर्णप्राप्तदेवतानुवादितया नामधेयत्वाच्चादृष्टार्था एव प्रयाजा इत्याह—

अदृष्टार्थाः प्रयाजकाः॥

॥ इति शास्त्रमालावृत्तौ नवमस्य द्वितीयपादः॥

तृतीयः पादः

१

प्रकृतौ • अथ मन्त्रोहः। तत्र 'अग्नये जुष्टं निर्वपामि व्रीहीणां मेधे'त्यादौ चोदकादग्निव्रीहिपदयुक्तयोरेव मन्त्रयोर्यथापाठं प्राप्तेस्तत्रं' चाग्निपदेन लक्षणया गौण्या वैन्द्रीवत्सूर्यप्रकाशनसम्भवान्न सूर्यनीवारादिपदप्रक्षेपेणोह इत्याशङ्क्य प्रकृतावग्निव्रीहिपदयोरपूर्वीयदेवताऽपूर्वीयहविःप्रकृतिरूपद्रव्यपरत्वेन'स्वरूपपरत्वाभावादन्यथादृष्टार्थत्वापत्तेः कार्यद्वारा पदार्थानां प्राप्तेश्च सौर्येऽग्निपदप्राप्त्यभावे लक्षणायोगादैन्द्र्यास्तु स्वरूपेणैव विनियोगेनैतद्वैषम्यसिद्धेस्तत्कार्यापन्नेषु सूर्यनीवारादिषूह इत्याह—

ऊहोऽग्निव्रीहिपदयोः।

२

जातिनैमित्तिकम् • क्वचिच्छ्रुतं 'पौण्डरीकाणि बर्हींषि भवन्ती'ति। प्रकृतौ मन्त्रः'दर्भैस्तृणीत हरितैरि'ति। तत्र दर्भस्थाने पुण्डरीकपदं सिद्धम्। हरिताभिधानन्तु दर्भशब्देनैव द्रव्यस्य प्रकाशितत्वाददृष्टार्थम्। तेन तन्नोह्यमित्याशङ्क्य गुणद्वारा दर्भप्रकाशकत्वे सम्भवत्यदृष्टार्थत्वायोगात्पौण्डरीकेऽपि तद्गुणं वक्तुं रक्तपदेनोहः कार्य इत्याह—

पौण्डरीके च रक्तता।

ऊह्येति शेषः।

३

लौकिके • प्रसङ्गाद्विचारः। 'यद्येकं यूपमुपस्पृदेष ते वायो इति ब्रूयादि'त्यादौ विशेषाश्रवणाद्वैदिके उच्छ्रयणादौ लौकिके च स्पर्शे मन्त्र इत्याशङ्क्य वैधे निषेधायोगाद्दोषाप्रसक्तेर्लौकिक एव स्पर्शे दोषप्रतिसमाधानार्थमन्त्र इत्याह—

यूपस्य लौकिके स्पर्शे प्रायश्चित्तं न वैदिके।

४

अन्यायः • अग्नीषोमीये पशावेकवचनबहुवचनान्तौ पाशमन्त्रौ 'अदितिः पाशं प्रमुमोक्तु' 'अदितिः पाशान् प्रमुमोक्त्वेतान्' इति। तयोः प्रकृतौ निवेश उत्तराधिकरणे वक्ष्यते। तत्र प्रकृतौ बहुवचनान्तस्यैकस्मिन्नसमवेतार्थत्वाद्द्वयोः पश्वोरविकारः। एकवचनान्तस्य त्ववयविसमवेतसङ्ख्याप्रकाशनाद्विकारः। तत्र चाविकारसम्भवे विकारायोगान्नैकवचनान्तस्य प्राप्तिरन्यस्य त्वविकारेण प्राप्तिरित्याद्यः पक्षः। यद्वा एकवचनान्तेन प्रकृतौ सकलाभिधानात्तस्यैवोहेन प्रवृत्तिरन्यस्य तु विफलत्वान्निवृत्तिरित्यन्यः। यद्वा उभयोरपि प्राप्त्यनिवारणाज्जात्याख्यायामेकस्मिन्नित्येकस्मिन् बहुत्वस्य समवेतार्थत्वाच्च द्वयोरप्यहो वा विकल्पेनेत्याशङ्क्य पाशद्वये द्वयोरप्यसाधुत्वादूह इत्याह—

पाशं पाशानिति द्वावप्यूह्यौ द्विपशुके मतौ ।

वस्तुतस्तु पाशविमोचनार्थयोर्मन्त्रयोः पाशद्वये नियोजनवत्प्रत्येकमावृत्तावूहाप्रसक्तेः कृत्वा चिन्तयायं विचारः ।

५

विप्रतिपत्तौ ● बहुवचनान्तस्य पाशमन्त्रस्य प्रकृतौ पाशस्यैकत्वेनासमवेतार्थत्वाद्विकृतावुत्कर्ष इत्याशङ्क्य प्रकृत्यर्थस्य पाशस्य प्रत्ययार्थस्य च कर्मत्वस्य प्रकृतौ भावात्तयोश्च गुणभूतसङ्ख्यानुरोधेनोत्कर्षायोगाज्जात्याख्यायामिति सूत्राच्चैकस्मिन् बहुवचनस्य समवेतार्थत्वात्सामान्यसम्बन्धं बिना लिङ्गादुत्कर्षायोगाच्च प्रकृतावेव निवेश इत्याह—

पाशानिति बहुत्वस्य निवेशः प्रकृतौ भवेत् ।

६

अपूर्वे ● इष्टौ 'पत्नीं सन्नह्येति प्रैष मन्त्रः । तस्य द्विबहुपत्नीके प्रयोगे ऊहः । यद्वा यवप्रयोगे व्रीहीणां मेधेत्यस्येव लोप इत्याशङ्क्योपकारस्याक्लृप्तत्वेन सर्वप्रयोगाणां समानविधानत्वेन चोहायोगाल्लोपस्य च द्विबहुपत्नीकेषु पाशवत्प्रकृत्यर्थकर्मत्वयोः सम्भवेनायोगादेकत्वस्य तु जात्यभिप्रायत्वेन प्रत्येकाभिप्रायत्वेन वोपपत्तेर्नोह इत्याह—

पत्नी द्वित्व-बहुत्वयोः ।

नोह इति शेषः ।

७

विकृतौ चापि ● प्रकृतौ पाठवशाद् द्वयोर्बह्वीषु वा पत्नीष्वनूहेऽपि विकृतौ यथा कार्यमभिधानमित्यूह इत्याशङ्क्य प्रकृतावसमवेतार्थत्वेनादृष्टार्थत्वात्तद्वदेव विकृतावपि प्रयोग इत्याह—

विकृतौ पत्न्यनेकत्वेऽदृष्टार्थत्वादनूह्यता ।

८

अध्रिगु ● कृत्वा चिन्तेयम् । यदा संस्थापशवः समानविधानास्तदा समुच्चयाभावे मेष्यां 'प्रास्मा' इत्यस्य लोप उक्तः । अत्र तु समुच्चयेऽपि मेष्यां समानविधित्वे च 'प्रास्मा अग्निमि'त्येकत्वस्य सवनीयेषु पशुषु प्रकृतित्वात्पत्नीमन्त्रवन्नोहः । न च तत्रैकत्वस्य चानुपपत्तिरिति वाच्यम् । 'पुमान् स्त्रिये'ति पुंस्त्वस्य जात्याख्यायां वैकत्वस्य साधुत्वादित्याह—

संस्थापश्वैकविध्ये तु प्रास्मै मेष्यां न तूह्यते ।

सिद्धान्ते तु प्रैभ्यो अग्निमित्यूहः ।

९

प्रतिनिधौ ● व्रीहिप्रतिनिधिभूतेषु नीवारेषु व्रीहित्वाभावद्व्रीहीणां मेधेत्य-

स्योह इत्याशङ्क्य नीवाराणां व्रीहिसजातीयावयवबुद्ध्या उपात्तत्वेन स्वरूपत उपादानाभावादनूहः । विकृतौ तु नैवारे चरावूह इत्याह—

व्रीहीणां मेध इत्यूह्यं व्रीहिप्रतिनिधौ न तु ।

१०

संसर्गिषु ● पशौ पर्यग्निकरणानन्तरं 'सूर्यं चक्षुरि'त्यादि प्रैषः । तत्र चक्षूरूपतेजसः स्वतः सङ्ख्याभावाज्जीवति च पशौ चक्षुषोः निर्गमनाकाशाद्युपाधिकतयापि चक्षुरित्येकत्वायोगादधिष्ठानयोश्च द्वित्वात्पशूपाधिकमेकत्वं ततश्च पशुवृद्धौ ऊहः स्यादित्याशङ्क्य भाविनोऽपि संज्ञपनफलस्य पूर्वमन्त्रेण प्रकाशनात्तदाचैकाकाशाद्युपाधिकतयाधिष्ठानयोर्द्वित्वेऽपि चक्षुरित्येकत्वस्य बहिर्निर्गततेजोविषयत्वादनेकपशुष्वपि बहिर्निर्गतचाक्षुषतेजसामेकत्वान्नोह इत्याह—

अध्रिगौ पश्वनेकत्वे सूर्यं चक्षुर्न चोह्यते ।

११

एकधेत्येक संयोगात् ● तत्रैव 'एकधास्य त्वचमाच्छयतादि'ति श्रुतम् । तत्र यद्यपि प्रकृतौ त्वच एकत्वमेकधाशब्दार्थस्तथापि विकृतौ बह्वीषु त्वक्षु प्रयत्नभेदेऽपि देशतः कालतो वा साहित्यमेकधा गाः प्रापयतीतिवदेकशब्देन वक्तुं शक्यमित्यविकार इत्याशङ्क्य कार्यद्वारा मन्त्राणामतिदेशात्कार्यस्य च प्रकृतौ त्वच एकत्वेनैकप्रयत्नसाध्यत्वरूपत्वाद्विकृतौ च प्राकृतमेकप्रयत्नसाध्यत्वं प्रत्येकं वक्तुमेकधैकधैषामित्येवमूह इत्याह—

तत्रैकधा पदाभ्यासः पश्वनेकत्व इष्यते ।

१२

मेधपतित्वम् ● तत्रैव 'आशासाना मेधपतिभ्यां मेधमिति श्रुतम् । केषाञ्चित्तु 'मेधपतये मेधमि'ति ।'इह चत्वारः पक्षाः । तत्र मेधपतिशब्देन यजमानस्याग्नीषोमयोश्चाभिधानान्मन्त्रद्वयेऽपि बहुषु बहुवचनप्रसक्तौ 'व्यत्ययो बहुलमि'त्येकवचनद्विवचने इत्यसमवेतार्थत्वाद्विकृतावपि तद्वदेव व्यत्ययेन प्रयोगोपपत्तेर्नोह इत्येकः । द्वितीयस्तु उत्पत्तौ देवतायाः द्वन्द्वात् द्वित्वावगतेर्द्वित्वं देवतापरम् । तद्देवतावृद्धौ ऊह्यम् । एकत्वन्तु फलवाक्ये एकवचनान्तेन स्वामिनोऽवगतेस्तत्परम् । अतस्तत्सत्र ऊह्यम् । यद्वा प्रत्यभिज्ञया मन्त्रस्यैकत्वात्क्वचिद्देवता क्वचित्स्वामीत्यनेकार्थत्वमन्याय्यम् । तेनोभावपि स्वामिपरौ । देवतापरत्वे सत्यग्नीषोमयोर्द्वित्वादेकवन्निगदस्योत्कर्षः स्यात् । स्वामिपरत्वे तु नोत्कर्षः । आख्याते कर्त्रैकत्वस्य श्रुतत्वात् देवतात्वरूपैक्यन्तु न श्रुतम् । अग्नीषोमीयमित्यस्याग्नीषोमौ देवतेत्येतदर्थकत्वादित्याशङ्क्य स्वामिपदत्वे पशुयजमानसम्बन्धस्य लोकसिद्धत्वेनाशासानपदानर्थक्यापत्तेराख्यातेन दम्पत्योरेकत्ववत्समासादुपपत्तेर्न तद्धितेन देवतात्वरूपैकत्वावगत्या चाग्नीषोमीयमित्यस्याग्नीषोमौ देवता अस्येत्येतदर्थकत्वात्तदभिप्राय-

मेकत्वमिति देवतैव मेधपतिः ततश्चाधिष्ठानवशादद्विदेवतावशाच्चैकत्वमूह्य-मित्याह—

देवता स्यान् मेधपतिर्द्वित्वमाश्रयगामि तु ।

१३

एकत्वं देवतायोगि नियमो वा • बहुदेवत्ये वैश्वदेवे पशावेकवचनं बहुत्व-सामर्थ्यादूह्यमित्याशङ्क्य प्रकृतिदेवतात्वस्यैकत्वान्नोह इत्याह—

वैश्वदेवे तु नोह्यते ।

१४

अर्थान्तरे • भिन्नदेवत्येषु पशुगणेषु गणाभिप्रायत्वेन पूर्ववदनूह इत्या-शङ्क्य देवतात्वभेदादूह इत्याह—

देवतारूपभेदे तुएकत्वोहः प्रवर्तते ॥

इति शास्त्रमालावृत्तौ नवमस्य तृतीयः पादः

चतुर्थः पादः

१

षड्विंशतिरस्य • षड्विंशतिरस्य वङ्क्रयः' इत्यत्र पशुगणे पञ्च पक्षाः । तत्र षड्विंशतिरस्येति पदद्वयस्य पशुसम्बन्धार्थत्वादावृत्तिः । **अन्यथा कृत्स्नस्य** षड्विंशतिशब्दस्य निवृत्तिः स्यादित्येकः । अकरणकमन्त्रत्वेनादृष्टार्थत्वादविकार इत्यन्यः । अन्यूनावयवोद्धरणप्रकाशने दृष्टे सम्भवत्यदृष्टार्थत्वायोगात् षड्विंशति-शब्दः उभाभ्यामस्यवङ्क्रिपदाभ्यां विशेष्यते । ततश्च द्वयोः पश्वोर्द्वे षड्विंशती वङ्क्रयः अनयोरित्यूहः । न च सङ्ख्याप्राधान्ये विंशतिर्गवामितिवत्संख्येयेषु-वङ्क्रिषु षष्ठी स्यादिति वाच्यम् । वङ्क्रिप्राधान्ये षड्विंशतिसङ्ख्यावन्तो वङ्क्रय इत्येवं सङ्ख्यायां मत्वर्थलक्षणावत्सङ्ख्याप्राधान्येऽपि वङ्क्रिपदे आधारलक्षणा-स्वीकारादिति तृतीयः । यद्वा, पशोश्चोदितत्वात्तस्य च षष्ट्यन्तत्वाद्गुणत्वेऽपि 'द्वादशाहीनस्ये'तिवत्प्राधान्यात्संख्यावङ्क्रयोश्च तद्गुणत्वाद्भेदेन पशुं प्रकाश-यितुमस्यपदमभ्यसितव्यमित्याशङ्क्येह पशुपरत्वे ता अनुष्ठचे'ति तन्निर्देशायो-गात् षष्ठ्यन्तस्य विशसनविनाश्यस्यपशोः प्रकाशनवैय्यर्थ्याच्च प्रथमान्तानां वङ्क्रीणामेवेयत्तया प्रकाश्यत्वात् तत्रचैकधान्यायेन षड्विंशतिः षड्विंशतिरनयो-र्वङ्क्रय इत्येवं षड्विंशतिपदाभ्यासेन वङ्क्रीयत्ताप्रकाशनेऽपि प्रकृतावेकैकपार्श्वे त्रयोदशवङ्क्रीणां समस्याभिधानादत्रापि द्विपञ्चाशदनयोर्वङ्क्रय इत्येवं समस्या-भिधानमित्याह—

अनेकपशुवङ्क्रीणां समस्य वचनं भवेत् ॥

२

अश्वस्य ● अश्वमेधे अश्वस्तूपरो गोमृगश्च पशवः। तत्राश्वस्य चतुस्त्रिंशद्वङ्क्रयः। तत्र 'न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादि'ति श्रुतम्। 'न चतुस्त्रिंशदिति ब्रूयादि'त्ययमृचो निषेध इत्यग्रे वक्ष्यते। इह तु वैशेषिक्या ऋचो निषेधे प्राकृतमेव षड्विंशतिशब्दोपलक्षितमध्रिगुवचनं समासेन कार्यं गिरापदनिषेधे इरापदवदित्याशङ्क्य 'षड्विंशतिरित्येव ब्रूयादि'त्यस्यैवकारोपहतविधिशक्तित्वादिरापदविधिवद्विधित्वाभावेन 'न चतुस्त्रिंशदितिब्रूयादि'त्यस्यैव गिरापदनिषेधवदनुवादत्वायोगेनैकवाक्यतया प्रतिषेधविधित्वान्निषेधस्य च प्राप्तिं विनानुपपत्त्या प्रकरणाद्वैशेषिकमन्त्रविनियोजकविधिकल्पनादुपजीव्यविरोधाद्विकल्पः। तेन पक्षे ऋक्पक्षेणाध्रिगुरित्याह—

चतुस्त्रिंशद्वाजिनस्तु मन्त्र पक्षे तथाध्रिगुः।

३

तत्प्रतिषिध्यं ● तत्रैवाश्वे चतुस्त्रिंशद्वाजिन इति मन्त्रे गिरेरापदवच्छ्रुत्या चतुस्त्रिंशत्पदमात्रं प्रतिषिध्य षड्विंशतिपदमात्रं विधियते, न तु ऋचो निषेधः लक्षणापत्तेः। तेनाश्वे पक्षेऽपि नाध्रिगुः। तूपरगोमृगयोस्तु समासेनाध्रिगुः। यद्वा तूपरगोमृगयोः समस्यवचनं कृत्वाऽश्वस्य 'षड्विंशतिरस्य वङ्क्रय' इत्येवम् यथार्थमध्रिगुवचनं भिन्नत्वेन कार्यम्। तत्तु सर्वेषां समस्याभिधानमित्याशङ्क्य चतुस्त्रिंशन्निषेधे षड्विंशतिविधौ च वाक्यभेदात्षड्विंशतिरिति ब्रूयादि'त्यस्य च मध्यप्रतीकेन प्राकृताध्रिगुप्राप्त्यनुवादकत्वेनोपपत्तौ षड्विंशपदविधायकत्वायोगादेवकारेण विधिप्रतिबन्धाच्च 'न चतुस्त्रिंशदि'तिवाक्ये ऋच एव प्रतीकग्रहणान्निषेधस्याङ्गीकार्यत्वात्सर्वेषां पक्षे षडशीतिरेषां वङ्क्रय' इत्येव समस्याभिधानमित्याह—

समस्यवङ्क्रयः प्रैषे तूपरगोमृगे।

४

वनिष्टुः ● 'वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना'इत्यत्र रलयोरेकत्वादुलूकबुध्या वनिष्ठोर्लवनं निषिध्यत इत्याशङ्क्य पश्ववदानान्तर्गतत्वेन वनिष्टोर्लवननिषेधायोगात्सादृश्यबुद्धिनिषेधे त्वदृष्टार्थत्वापत्तेः उरु महत् ऊको मेदस्तदंशः उरूकं विस्तृतं मेदो मन्यमाना वनिष्ठ मा राविष्टेत्यवयवव्युत्पत्यावयावाभिधानात्तद्विवृद्धावूह इत्याह—

उरूकेति वपा ज्ञेपा।

५

प्रशसा ● प्रशसा बाहू कृणुतात्' इत्यत्र शासशब्दस्यासौ प्रसिद्धत्वादसिना बाहू छेत्तव्यावित्याशङ्क्य विशसने स्वधितेः साधनत्वेनासेः साधनत्वाभावादश्वमेधे " राजता हरि तत्सरवोसप ? इत्यसेर्विहितत्वेपि सामान्यसम्बन्धं

विना मन्त्रस्य तत्रोत्कर्षायोगादाकारादेशं छान्दसं तकारलोपञ्च कृत्वा प्रशस्तौ बाहू कृणुतादित्येव प्रशंसावाचित्वाद्बाहुविवृद्धावूह इत्याह—

प्रशस्तौ प्रशसेति च ।

६

श्येनशला ● 'श्येनमस्य वक्षः शलादोषणी' त्यादावमी पिष्टपिण्डाः सिंहाः क्रियन्तामितिवच्छ्येनसादृश्यं कर्तनाद्यैर्विधेयमित्याशङ्क्याऽदृष्टार्थत्वापत्तेः कर्त्तने वक्षसो वैकल्याच्च साकल्यं विधेयमित्याह—

श्येनमस्यशलेत्यादि साकल्ये तु विधीयते ।

७

प्रासङ्गिके ● अग्निहोत्रे 'अग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतो अहुतेऽग्निहोत्रे उद्वायेत्' इति श्रुतम् । तत्र वाक्यगम्याग्नि-निमित्तत्वात्यागेन पदश्रुत्योद्वानस्य निमित्तत्वात्तस्य च प्रकरणेनाविशेषणाद्द-र्शार्थाग्न्युद्वानेऽपीष्टिः स्यादित्याशङ्क्योद्वानमात्रस्य निमित्तत्वे निमेषादिना-शस्यापि निमित्तत्वापत्तेरग्नेखपवनाशस्य ? च सर्वदा सत्वेनाग्निविशिष्टस्योद्वान-स्यापि नित्यत्वेन निमित्तत्वायोगे सति वाक्यीयस्याप्युद्वानपरीताग्नेर्निमित्तत्वा-त्तत्र चाग्नेरुद्वानसम्बन्धे नित्येऽपि तद्वयाप्तेरनित्यत्वादग्निहोत्रार्थमुद्धृतस्य सर्व-स्याग्नेर्नाशे एव तदुद्वानार्थेयमिष्टिर्न दर्शार्थमुद्धृतेऽग्नौ नष्टे कर्तव्येत्याह—

दर्शार्थमुद्धृते नष्टेनैव ज्योतिष्मती भवेत् ।

८

धारणे च ● 'धार्यो गतश्रिय आहवनोय' इत्यत्र प्राप्तश्रीत्वे निमित्ते सर्वार्थंधृतस्याग्निहोत्रार्थताप्यस्तीति तत्कालोद्वाने इष्टिः स्यादित्याशङ्क्य दर्शा-द्यर्थमुद्धृतस्याग्नेर्निमित्तवशात् सर्वार्थंधृतस्य प्रसङ्गादग्निहोत्रोपकारकत्वान्न तदुद्वान इष्टिरित्याह—

गतश्रियाधृतेर्नष्टे नेष्टिः ।

९

न तूत्पन्ने ● परार्थमप्युद्धरणमग्निहोत्रस्योपकारकं भवत्येव । ततश्च यागार्थयोर्दधिपयसोः श्रपणोपकारित्वात्प्रणीताधर्मा इव दर्शार्थेऽप्युद्धरणे 'वाचा त्वा होत्रे'इत्यग्निहोत्रोद्धरणमन्त्रः गुणभूतकालमनादृत्या तत्र प्रयोक्तव्यः । यद्वा अकालेऽपि क्रियमाणमिदमुद्धरणमग्निहोत्रस्यैवाङ्गमिति वक्तव्यः तत्र मन्त्र इत्याशङ्क्य साङ्गस्य कर्मणः काले विधानादकाले चाधिकाराभावाद् तद्भावे च कृतस्यापि फलजनकत्वाभावान्न दर्शार्थोद्धरणे मन्त्र इत्याह—

दर्शार्थमुद्धृतौ न मन्त्रः ।

१०

प्रदानंदर्शनं ● आदित्यः प्रायणीयः पयसि चरुरित्यत्र चरुरादित्यः कर्तव्यः, स च पयसीति विधौ वाक्यभेदाद्द्रव्यद्वयस्य देवतासम्बन्धविधिः। सप्तमी तु शृते चरुमितिवदनुवादः। तेन पयसि वत्सापाकरणादिप्रदेयधर्माः कर्तव्या इत्याशङ्क्याधारविशिष्टचरोर्देवतासम्बन्धविधानेन वाक्यभेदाभावान्न प्रदेयधर्मा इत्याह—

नैव पयसि श्रपणार्थे प्रदेयता।

११

अभ्युदये ● अभ्युदयेष्टौ 'शृते चरुं दधनि चरुमित्यत्रापि पूर्ववत्सप्तमीनिर्देशान्न प्रदेयधर्मा इत्याशङ्क्य पूर्वस्मिन्नेव कर्मणि निमित्ते पूर्वदेवतापनयस्य देवतान्तरसंयोगस्यैवात्र विधेयत्वेन दध्यादेराधारत्वस्यात्र विधेयत्वाभावात्प्रदेयत्वेनैव प्रवृत्तयोर्दधिशृतयोर्देवतान्तरसम्बन्धाच्च प्रदेयधर्माः कार्या इत्याह—

शृतदध्नोरभ्युदये धर्मास्तु स्युः प्रदेयगाः।

१२

श्रपनयोर्वा ● 'यः पशुकामः स्यात्सोऽमावास्यामिष्ट्वा वत्सानपाकुर्याद्ये मध्यमास्तान्विष्णवे शिपिविष्टाय शृते चरुं ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुमि'त्यत्राप्यभ्युदयेष्टितुल्यश्रुतित्वात्प्रदेयधर्माः कार्या इत्याशङ्क्यादित्यचरुवदपूर्वकर्मविधेः सप्तम्याः श्रपणार्थत्वाच्च न प्रदेयधर्मा इत्याह—

न स्युस्ते पशुकामेष्टौ।

१३

श्रपणानाम् ● पयसा मैत्रावरुणं श्रीणातीत्यत्र पयोऽपि सोमवत्प्रदेयम्। अन्यथा सोमसंस्कारार्थत्वेऽदृष्टार्थत्वापत्तेस्तेन तत्र प्रदेयधर्माः कर्तव्या इत्याशङ्क्य द्वितीयातृतीयाभ्यां ग्रहसंस्कारार्थत्वान्न तत्र प्रदेयधर्माः कार्या इत्याह—

श्रयणेपि च।

१४

पर्यग्निकृतानां ● अश्वमेधे 'ईशानाय परस्वत आलभेत' इति प्रकृत्य पर्यग्निकृतानारण्यानुत्सृन्तीत्युक्तम्। तत्र पूर्ववाक्ये देवतोद्देशेनालम्भविधिः उत्तरवाक्ये तूत्सर्गशब्देन त्यागविधिः। अन्यथा पूर्वत्र यागविधित्वे सत्युत्तरवाक्यवैय्यर्थ्यापत्तेः। न हि तत्र पर्यग्निकरणं तदन्ताङ्गरीतिः उत्सर्गः क्रमो वा विधेयः, प्राप्तत्वात्। नेतरनिषेधः, प्रतिषेधकशब्दाभावात्। न च तस्मिन् काले उत्सृजति इति विधिः। कालस्याशाब्दत्वात् क्तप्रत्ययेन विशिष्टपशूक्तेश्च न पर्यग्निकरणं विधेयम्। येन प्राकृताङ्गपुनःश्रवणादपूर्वत्वं स्यात्। तेन पूर्ववाक्ये आलम्भविधिरुत्तरवाक्ये तु यागविधिरित्याशङ्क्य यागेन विना देवतात्वायोगात् पूर्ववाक्ये एव यागविधिः। उत्तरवाक्ये तु क्तप्रत्ययेन विशिष्टपशूक्तावपि पशोः

प्राप्तत्वेन पर्यग्निकरणस्यैव विधेयत्वात्तदन्ताङ्गरीतिविधिः। तेनापूर्वत्वमित्याह–

पर्यग्निकृतवाक्ये तु तदन्ताङ्गविधिर्भवेत्।

१५

आज्यासंस्था ● 'त्वाष्ट्रं पात्नीवतमालभेत पर्यग्निकृतं पात्नीवतमुत्सृजती'त्यत्र 'आज्येन शेषं संस्थापयती'ति श्रुतम्। तत्राज्येन शेषसंस्थापयतीतिशब्दात् पूर्वस्मिन्नेव कर्मणि पशोरुत्सृष्टस्य स्थाने आज्यं प्रतिनिधित्वेन विधियते, न तु कर्मान्तरं देवताभावात्तश्चोत्सृजतिवाक्येऽपि न तदन्ताङ्गरीतिविधिः। किन्तूत्सर्गमात्रं विधेयमित्याशङ्क्य पशोर्देवतां विना उत्सर्गविधौ देवताविधेरप्रामाण्यापत्तेरसति च देवतात्वे यागादसति च तस्मिन् दैक्षविध्यन्तायोगादसति च विध्यन्ते पर्यग्निकरणस्य शेषस्य संस्थाया वाऽयोगात् पशुना च सिद्धे यागे आज्यस्य प्रतिनिधित्वायोगादाज्येन शेषमित्यत्र च कर्मान्तरविधित्वेऽपि पात्नीवतपदानुषङ्गेण देवतालाभात्तदन्ताङ्गरीतिविधानाच्च शेषसंस्थापयतिशब्दयोस्तद्दैवत्ययागानन्तर्येण गौणत्वात् सिद्धं कर्मान्तरमित्याह—

आज्येन शेषकर्माऽन्यत्र तु प्रतिनिधिः पशोः।

कमलाकरभट्टात्मजानन्तभट्ट कृतायां
शास्त्रमालावृत्तौ नवमोध्यायः ॥

दशमोऽध्यायः

प्रथमः पादः

१

विधेः प्रकरणांतरे ● प्राकृतपदार्थान्यथाभावात्मकमूहमुक्त्वाऽथ तन्निवृत्तिरूपो बाधस्तदपवादत्वेन च क्वचित्समुच्चयश्चेहोच्यत इत्याह—

प्राकृताङ्गविकारोहोत्तरं तद्बाध उच्यते ।

यद्यपि बाधत्वावच्छिन्ने बाधे नोहोपयोगः, विशेषशास्त्रेण सामान्यशास्त्रबाधे तस्यानुपयोगात्, तथापि क्वचित् कृष्णलचर्वादौ संस्कारोहापेक्षा बाधस्येति तदुत्तरमारम्भः। तत्र विकृतौ सर्वप्राकृतमङ्गशास्त्रं वादृष्टादृष्टप्रयोजनं विना स्वरूपेणैवातिदिश्यते। ततश्च कृष्णलचरावबघातः दृष्टप्रयोजनाभावेऽप्यदृष्टार्थं कार्य इत्याशङ्क्य यागेन स्वर्गं कुर्यादित्यत्रापूर्वं कृत्वेतिवदङ्गविधिभिः पूर्वापरोपकारं कृत्वापूर्वं कुर्यादित्यर्थेन दृष्टादृष्टोपकारस्यैव प्रकृतौ यागाङ्गत्वात्पदार्थानाञ्च तत्पृष्ठभावेनाङ्गत्वाद्विकृतावप्यंशत्रयविशिष्टभावनोपस्थितौ फलकरणेऽनपेक्षिते परित्यज्याङ्गजन्योपकारस्य तन्मुखेन च पदार्थानां ग्रहणात् कृष्णलचरौ च प्रकृतिक्लृप्तकार्यस्यावघातस्यातिदेशायोगेन प्रकृतिवच्छब्दात् तद्भिन्नस्यैवातिदेशात्सिद्धो बाध इत्याह—

उपकारस्यातिदेशात् पदार्थानाञ्च तन्मुखः ।

यद्वा 'प्राजापत्यं घृते चरुं निर्वपेत् शतकृष्णलमायुष्कामः' इत्यत्राचरौ चरुशब्दस्य धर्मलक्षणार्थत्वाच्छूर्पणकार्याभावेऽप्यवघातः स्यादित्याशङ्क्य तत्कार्यवैतुष्याभावाद्वैशद्येन 'घृते श्रपयती'ति गौणपाकाच्च चरुत्वोपपत्तेरचरौ चरुशब्दस्य च तद्व्यतिरिक्तनिर्वापाद्यतिदेशेनाप्युपपत्तेर्नावघातस्यातिदेश इत्याह—

कृष्णलेष्ववघातो न ।

यद्वा 'वैश्वदेवं चरुं निर्वपेत् भ्रातृव्यवान् तं बर्हिषदं कृत्वा शम्ययास्फ्येन च व्यूहेदिदमहममुञ्च व्यूहामीति यं द्विष्यात्तं ध्यायेद्यदधोऽवमृज्येत यच्च स्फ्य आश्लिषेत्तद्विष्णव उरुक्रमायावद्यती'त्यत्र वैष्णवयागः औषधद्रव्यकत्वादेकदेवतात्वाच्चाग्नेय विकारः सन् प्रसङ्गात्तदङ्गानि निर्वापादीन्युपजीवति। आवाहनन्तु वैश्वदेविकदेवतावाहनकालेऽकृतत्वात्कार्यमित्याशङ्क्य नैमित्तिकविधेर्निमित्तनिश्चयोत्तरं प्रवृत्तत्वेन देवतावाहनकाले स्फयाश्लेषादेर्निमित्तस्यानिश्चयान्नावाहनं विष्णोरुरुक्रमस्य कार्यमित्याह—

विष्णोरुरुक्रमस्यापि स्फयाश्लेषावाहनं न च ।

२

इष्टिरारम्भसंयोगात् ● दर्शपूर्णमासयोः श्रुतान्वारम्भणीया आरम्भद्वारत्वाद्विकृतावपीति द्वादशे वक्ष्यते। अतः सा सोमाङ्गेष्टिष्वपि चोदकप्राप्तेः कर्तव्येत्याशङ्क्याङ्गानां पृथगारम्भाभावात्सोमस्य त्वपूर्वत्वान्न तत्रा म्भणीयेष्टिरित्याह—

नारम्भेष्टिर्मता पृथक्सोमाङ्गेष्टौ ।

३

प्रधानाच्च ● राजसूये इष्टिपशुसोमानां प्राधान्येनेष्ट्यारम्भस्य प्रासङ्गिकत्वाभावात्तत्रारम्भणीयेष्टिः स्यादित्याशङ्क्य सर्वव्यासक्तस्याग्नीषोमीयस्याग्निनेवेष्टिभिर्व्यपदेशायोगान्नाङ्गेष्टिष्विवारम्भणीयेत्याह—

राजसूये ।

न पृथगिष्टिरित्यनुषङ्गः ।

४

तस्यान्तु स्यात् ● नन्वारम्भणीयायाश्चाप्यारम्भान्तरसत्वेनारम्भणीयायामारम्भणीया कार्या। न चानवस्था। आरम्भणीयायाः पौर्णमासदिने यावच्छक्यकर्तव्यत्वेन तत्परिहारादित्याशङ्क्यारम्भणीयाविधिवेलायां दर्शपूर्णमासाङ्गत्वाज्ञानेनातिदेशायोगात् तद्व्यतिरिक्ताङ्गानामेवातिदेश इति नारम्भणीयायामारम्भणीया कार्येत्याह —

स्वस्याञ्च न पृथक् भवेत् ।

५

कर्म च ● साद्यस्के 'खलवाली यूपो भवती'त्यत्र प्राकृती यूपाहुतिरदृष्टार्थत्वादञ्जनवत्कार्येत्याशङ्क्य 'यूपमच्छेष्यतेति प्रकृतौ छेदनद्वारा यूपार्थत्वेन साक्षाद्यूपार्थत्वाभावात्खलेवाल्याञ्च छेदनाभावान्न यूपाहुतिरित्याह—

खलेवाल्यां नैव यूपाहुतिः ।

६

स्थाणौ तु ● तत्रैव 'वनस्पते शतवल्शो विरोहेत्याव्रश्चने जुहोती'ति स्थाण्वाहुतेः स्थाणौ यूपे वा दृष्टोपकाराभावेनादृष्टद्वारा प्रकृतौ यूपोपकारकत्वावगतेः खलेवाल्याञ्च द्वारालोपाद्यत्र कुत्रचित् स्थाणौ सा कार्येत्याशङ्क्यारादुपकारकात्सामवायिकस्य बलीयस्त्वाद्देवदत्तधारितायाः स्रजः शुचिदेशे निधानस्य देवदत्तार्थत्ववददृष्टार्थता स्यादित्याव्रश्चनरूपयूपापादानदेशे कृताया आहुतेः स्थाणुद्वारा यूपसंस्कारकत्वात् खलेवाल्याञ्च तदभावान्न तत्र स्थाण्वाहुतिरित्याह—

स्थाण्वाहुतिर्न च ।

७

प्रयाजे च ● इष्टौ 'स्वाहाकारं यजती'ति विहित उत्तमः प्रयाजः किमारादुपकारकः उत देवतासंस्कारक इति चिन्त्यते । तत्रोत्तमप्रयाजे क्रमप्राप्तमन्त्रवर्णात्स्वाहाशब्दप्राप्तावपि स्वाहाकारशब्दाप्राप्त्या तत्प्रख्यन्यायेन स्वाहाकारशब्दस्य कर्मनामत्वायोगाद्वचनाद्देवतालाभे च मन्त्रात्तत्कल्पनायोगाद्यागस्य तद्देवत्यत्वाज्ञाने च लिङ्गान्मन्त्रस्य तत्र विनियोगायोगात्सूक्तवाकवच्च श्रुतिविनियोयाभावेन मान्त्रवर्णिकदेवतायोगात्स्वाहाकारदेवत्योऽयं याग आरादुपकारक इत्याशङ्क्य विशिष्टविधौ गौरवाद्द्वितीयान्ते च देवताविध्ययोगत्क्रमादिकप्य श्रुत्या चाग्न्यादिदेवताप्राप्तेः स्वाहाकारशब्दाप्राप्तावपि तदर्थप्राप्त्या उपांशुयाजवन्नामत्वसिद्धेराज्यभागादौ यक्ष्यमाणानां देवतानां प्रत्यभिज्ञानाच्च देवतासंस्कारक एवायं यागः, ततश्च सौर्यादावग्न्यादेर्बाधादूह इत्याह—

इष्टावन्त्यः प्रयाजस्तु देवतासंस्कृतिर्मतः ।

८

तेष्वाज्य भागा ● इष्टौ 'अग्नीषोमाभ्यां यजतो'त्याग्नेयाज्यभागः प्रधानयागीयाग्नेः पूर्ववत्संस्कारक इत्याशङ्क्याग्निमावह सोममावह अग्निावह अग्नीषोमावावहे'त्येवं निगदेष्वग्नेर्द्विः पाठाद्विधिवाक्ये चाग्नीषोमाभ्यामित्येकपदेन द्वयोर्गुणत्वावगतेराग्न्युद्देशेनाज्यभागविधौ आज्यभागोद्देशेन सोमविधौ वैरूप्यापत्तेश्व द्वयोः समत्वायाग्नेयोऽप्यारादुपकारक इत्याह—

नाग्नेय आज्यभागस्तु देवतासंस्कृतिर्मतः ।

९

पशावपीति चेत् ● दैक्षे पशौ 'वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनु निर्वपती'त्यत्र पशुयागपुरोडाशयागयोरेकदेवताकत्वेन संस्कारकत्वे नियामकाभावादारादुपकारकत्वमित्याशङ्क्य पश्वङ्गमध्यपाठेनास्य तदङ्गत्वावगतेस्तत्र च दृष्टार्थत्वे सम्भवत्यदृष्टार्थत्वायोगात् 'यद्देवत्य'इति वचनाच्च देवतासंस्कारक एवायं याग इत्याह—

पशौ पशुपुरोडाशः पशुदैवतसंस्कृतिः ।

१०

चरुहविर्विकारः ● 'सौर्यं चरुं निर्वपेदि'त्यत्र चरुशब्दस्य स्थाल्यां लोके प्रसिद्धेर्याज्ञिकानामोदने प्रयोगस्य च लाक्षणिकत्वाद्वैपरीत्यस्य च कपाले कटाहे वा श्रुते ओदनशब्दप्रयोगाभावेनायोगाच्चरुशब्दवाच्या स्थाल्येव देवतासंयोगाद्धविरित्याशङ्क्य 'आदित्यः प्रायणीयः पयसि चरुरित्युक्त्वा 'अदितिमोदनेने'ति वाक्यशेषादोदनवादित्वनिर्णयात्स्थाल्यां प्रयोगस्य च लाक्षणिकत्वात् सर्वत्रौदन एव चरुशब्दार्थो न तु स्थालीत्याह—

ओदनश्चरुशब्दार्थः ।

११

स कपाले ● सौर्ये चरौ स्थाल्या अविधानादष्टसु कपालेषु चर्वसम्भवेनाष्टत्वबाधेऽपि महति कपाले चरुः कार्यः । यदि तु प्रकृतौ कपालोष्मणा हविःपाकात्तद्गतोदकोष्मणा च चरुपाकादप्राकृतकार्यत्वमिति मतम्, तर्हि यत्र क्वचित्पाक इत्याशङ्क्य चरुत्वहेतोः पाकविशेषस्य स्थाल्यामेव सम्भवात्तत्रैव पाक इत्याह—

स स्थाल्यामेव पच्यते ।

१२

तस्मिन् पेषणं ● इदं प्रयोजनसूत्रम् । यदा चरुशब्दः स्थालीवचनस्तदा चोदकात्पुरोडाशानिवृत्तेः स एव स्थालीपक्वो हविरिति पेषणादीनि कार्याणि । ओदनवाचित्वे तु तेषां कार्यार्थत्वाच्चरौ च तदभवान्निवृत्तिरित्याह—

चरौ [1]पेषणसंवापसैयावतपनोपधाः ।
प्रथनं श्लक्ष्णताध्यूहज्वलनासादनादिकम् ।
अर्थलोपान्न कर्तव्यमिति बाधप्रयोजनम् ॥

दशमस्याद्यः पादः ।

द्वितीयः पादः

१

कृष्णलेष्वर्थ ● कृष्णलचरौ विक्लृत्यसम्भवान्न पाकः कार्य इत्याशङ्क्य 'घृते श्रपयती'ति वचनान्मुख्यपाकाभावेऽपि गौणमुष्णीकरणं कार्यमित्याह—

पाकः श्रुतः कृष्णलेषु स्यात् ।

२

उपस्तरणाभिधारणयोः ● इह किं कृष्णलचरौ उपस्तरणाभिधारणे कार्ये न वेति चिन्त्यते । यद्यपि 'यदुपस्तृणात्यभिघारत्यमृताहुतिमेवैनां करोती'ति तयोः स्वादुत्वार्थत्वात् कृष्णले च तदभावा'च्चत्वारि चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्यै' इति कृष्णलचतुष्ट्वेन चतुरवत्तसम्पत्युक्तेश्च न ते तत्र कार्ये,

1. 'दृषदुपलाभ्यां पिनष्टि' इति विहितं पेषणं, चूर्णनम् 'संवपति' इति पिष्टस्य पात्रे पृथक्करणं संवापः, 'संयौति' इतिविहितं संयवनं संयावः, अङ्गारैस्तापनम्, उपधा उपहृतिःअङ्गारेषु कपालस्थापनं, प्रथनं कपालेषु स्थापितस्य पुरेडाशस्य हस्तेन संघट्टनेन प्रसारणम्, श्लक्ष्णीकरणं हस्तेन मार्जनम्, अध्यूहनं भस्मनाच्छादनम्, दूर्वापिञ्जूलैः प्रज्वालनम्, वेद्यां हविरासादनं निक्षेपणम् इमानि प्रयोजनलोपाल्लुप्यन्ते ।

तथाप्यमृताहुतिवचनस्य चतुरवत्तावाप्तिवचनस्य चार्थवादत्वादन्यथा कृष्णलचतुष्केण चतुरवत्तावाप्तौ सकृत्तदवदानापत्या चत्वारीति वीप्साबाधापत्तेरवदानानुवादेन वीप्साकृष्णलचतुष्ट्वयोर्विधौ वाक्यभेदाच्चावदानवदुपस्तरणादि कार्यमेवेत्याशङ्क्य प्रकृतावुपस्तरणाभिघारणयोः स्रुच्यसंसर्गार्थत्वात्कृष्णलेषु च तदभावान्नोपस्तरणभिघारणमित्याह—

नोपस्ताराभिघारणम् ।

३

भक्षाणान्तु ● प्रकृतौ भक्षाः पुरुषप्रीत्यर्था इति कृत्वा चिन्त्यते । तत्र कृष्णलभक्षणेन पुरुषप्रीत्ययोगात् 'चुश्चुषाकारं भक्षयन्'तीत्यस्य च तत्संसृष्टाज्यभक्षपरत्वान्न कृष्णलेष्विडादिभक्षा इत्याशङ्क्य 'घृते श्रपयती'त्याज्यस्य गुणत्वेन कृष्णलानां प्राधान्यात्तस्यैवादनीयस्यापि हविषो वचनाद्भक्षणमित्याह—

बचनात्कृष्णले भक्षाः ।

४

एकधोपहारे ● तत्रैव'एकधा ब्रह्मण उपहरती'त्यत्रैकधाशब्दस्य सकृत्वे प्रयोगादिडादिभक्षेष्वेकः कार्योऽन्येषान्तु लोप इत्याशङ्क्य सहत्वेऽपि प्रयोगादतिदेशप्राप्तभक्षाणामबाधाय सहत्वमात्रमेवैकधाशब्दार्थ इति भिन्नकालत्वमात्रस्यैवात्र बाधो न तु भक्षाणामित्याह—

तेषामुपहृतिः सह ।

५

सर्वत्वञ्च तेषां ● तत्रैव 'सर्वं ब्रह्मणे परिहरति'इत्यत्र प्राप्तपुरुषान्तराबाधाय यद्ब्रह्मणे परिहरति तत्सर्वमथवा यद्ब्रह्मणे सर्वं तत्परिहरतीति विधेयमित्याशङ्क्योभयस्याप्यर्थस्य प्रकृतित एव प्राप्तत्वेन वचनवैय्यर्थ्याद्यत्प्रकृतौ होत्रादिभ्यो भक्षार्थं हरति तद्ब्रह्मण इति ब्रह्मसम्बन्धविधेरन्येषां भक्षबाध इत्याह—

ब्रह्मणस्ते तु नान्येषाम् ।

६

पुरुषापनयात् ● तत्रैवोपहारस्य भक्षार्थत्वात्सहोपहृतानां ब्रह्मभक्षाणां युगपद्भक्षणमाशङ्क्य सहोपहारेऽपि स्वस्वकाले भक्षणाविरोधाच्चोदकाबाधाय नानाकालं भक्षणमित्याह—

नानाकालाश्च ते मताः ।

७

एकार्थत्वादविभागः ● कृष्णलचरौ सर्वस्य ब्रह्मसम्बन्धाच्चोदकप्राप्तं चतुर्धाकरणमिदं ब्रह्मण इति व्यादेशश्च नेत्याह—

कृष्णले ब्रह्मसम्बन्धाच्चतुर्धाकरणं न च ।

८

ऋत्विक्दानं ● प्रकृतौ 'ऋत्विग्भ्यो दक्षिणां ददाती'त्यत्र संख्यानियममन्त्रादिवैयर्थ्यप्रसङ्गाददृष्टार्था दक्षिणा । अतस्सत्रेऽपि सा स्यादित्याशङ्क्य दृष्टानत्यर्थत्वे सम्भवति अदृष्टार्थत्वायोगान्नियमस्यादृष्टार्थत्वेऽपि दानस्य दृष्टार्थत्वान्न सत्रे दक्षिणेत्याह—

सत्रे न दक्षिणा ।

९

शेषभक्षाश्च ● इष्टौ सोमे च शेषभक्षास्तृप्तिद्वारा आनत्यर्थाः । अतस्तेषां सत्रे बाध इत्याशङ्क्य देवतायै त्यक्तत्वेन ऋत्विग्भ्यो दानासम्भवात्प्रतिपत्त्यर्थत्वेऽपि दृष्टार्थत्वानपायाच्चोदकाबाधाय सत्रेऽपि ते स्युरित्याह—

शेषभक्षाः सोमेष्टिगा मताः ।

सत्रे इत्यनुषङ्गः । तृतीये चतुर्धाकरणादौ भक्षाश्रवणाद्भक्षाभावो निरस्तः । इह तु (लक्षंयति ?) स किं परिक्रयार्थः प्रीत्यर्थो वेति चिन्त्यत इत्यपौनरुक्त्यम् ।

१०

वरणमृत्विजां ● सत्रे 'ये यजमानास्त ऋत्विज' इति वचनावगतऋत्विक्त्वसम्पत्यर्थं'अग्निर्महोते'त्यादि प्राकृतं वरणं कर्तव्यमित्याशङ्क्य स्वयं प्रवृत्तसत्रिषु आनत्यर्थस्य प्राकृतवरणस्य लुप्तद्वारत्वादृत्विक्त्वस्य तु तत्कार्यकरत्वेन गौणत्वान्न सत्रे वरणमित्याह—

सत्रिणां वरणं नैव ।

११

परिक्रयश्च ● सत्रे 'नात्र गौर्दीयते न वासो न हिरण्यमि'ति निषेधस्य प्राप्तिं विनाऽयोगाद्दक्षिणा देयेत्याशङ्क्य स्वयं प्रवृत्तत्वेन परिक्रयाभावान्निषेधस्य च 'अदक्षिणानि सत्राण्याहुरि'त्येकवाक्यतया सत्रस्तुतिपरत्वान्न सत्रे दक्षिणेत्याह—

दक्षिणा च न दीयते ।

१२

उदवसानीयः ● 'सत्रादुदवसाय पृष्ठशमनीयेन सहस्रदक्षिणेन यजेरन्नि'त्यत्र क्त्वाप्रत्ययेनोदवसानसमानकर्तृकत्वात्सत्रसन्निधेः फलाश्रवणाच्च बृहस्पतिसवो वाजपेयस्येव सत्रस्याङ्गं पृष्ठशमनीयः । ततश्चात्रेयदानवददृष्टार्था दक्षिणेत्याशङ्क्यनिःशेषत्यागस्योदवसानशब्दार्थत्वादङ्गं च सति त्यागायोगाद् 'वाजपेयेनेष्ट्वे'त्यत्र तु वाजपेयकरणकप्रयोगं समाप्येत्यर्थेन वाजपेयसमाप्त्युक्तेः तस्याश्च

वाजपेयान्तर्गतत्वाद्बृहस्पतिसवस्य तदङ्गत्वेऽपि सात्रदुवसायेत्यत्र त्यागोक्त्या पृष्ठशमनीयस्य तदङ्गत्वाभावात् सत्रावसाने निमित्तं विहितस्य पृष्ठशमनीयस्य विश्वजिद्वत् फलार्थत्वमेव नत्वङ्गत्वमित्याह—

न पृष्ठशमनीयोऽङ्गं सत्रे ।

एवन्तु सोमेऽप्युदवसानीया नाङ्गं स्यात् । तनेदं चिन्त्यमिति तातचरणाः ।

१३

तेषान्तु ● पृष्ठशमनीये 'सत्रादुदवसाय यजेरन्नि'ति कर्तृबहुत्वश्रुतेः बहूनां कर्तृत्वमाशङ्क्योदवसाने चार्थप्राप्ते प्रत्येकं कर्तृत्वात् प्रत्येकमेव कर्त्तृत्वमित्याह—

कुर्युः पृथक् च तम् ।

१४

तत्रान्यान् ● पृष्ठशमनीये संहृत्य यजमानानां कर्तृत्वं सिद्धं कृत्वा चिन्त्यते । तत्रोच्चैः प्रवर्ग्येणेतिवत्तृतीयया साङ्गस्य पृष्ठशमनीयस्य क्त्वाप्रत्ययेनोदवसानसमानकर्तृकत्वावगतेरुदवसाने च यजमानानां कर्तृकत्वात्तेषामेव कर्तृत्वम् । दक्षिणा तु क्त्वाश्रुतिविरोधाददृष्टार्थत्याशङ्क्याङ्गेष्टिषु ऋत्विजां कर्तृत्वेऽपि यजमानानामृत्विक्प्रेरकत्वेनाङ्गकर्तृत्वात्पृष्ठशमनोयस्य साङ्गस्योदवसानसमानकर्तृकत्वाक्षतेर्दक्षिणावशाच्चान्ये ऋत्विजः स्युरित्याह—

सहत्वेऽप्यृत्विजा स स्यात् ।

सः पृष्ठशमनीयः ऋत्विजां स्यादित्यर्थः ।

१५

कामेष्टौ ● सारस्वतसत्रे प्लाक्षं प्रस्रवणं प्राप्याग्नये कामायाष्टाकपालं निर्वपति तस्यामश्वाञ्च पुरुषीञ्च धेनुके दद्यरि'त्यत्र सत्रिकर्तृत्वस्य प्राकृताङ्गविषयत्वेन यूपावटास्तरणबर्हिषि बर्हिर्धर्मवत्कामेष्टावप्राप्तेः प्राप्तावपि सामान्यरूपस्य तस्य वैशेषिकेष्टिधर्मातिदेशेन बाधाद्दक्षिणाशब्दाभावेऽपि परिक्रयार्थं दानं तेन तत्र ऋत्विजः स्युः । यद्वा प्लाक्षप्रस्रवणस्य सत्रदेशत्वेन तत्प्राप्तौ सत्रिणां संहृत्य कर्तृत्वेन पृष्ठशमनीयन्यायाभावाद्बर्हिषस्तु उपदिष्टेष्वङ्गत्वादपूर्वलोपेऽपि यजमानानां कर्तॄणां साङ्गप्रयोगाङ्गत्वेनेष्टावपि तेषामेव कर्तृत्वाददृष्टार्थं दानमित्याह—

कामेष्टावृत्विजो न हि ।

अदृष्टार्थं तत्र दानम् ।

१६

द्वेष्ये चोदना ● इष्टौ गार्हपत्ये हविःश्रपणपक्षे 'यदि पत्नीः संयाजयन् कपालमभिजुहुयाद्वैश्वानरं द्वादशकपालं निर्वपेदेकहायनी गौर्दक्षिणा तां द्वेष्याय

दद्यादि'ति श्रुतम् । कपालमभि कपाले इत्यर्थः । तत्रेष्टिदक्षिणाया प्रसङ्गसिद्धावपि वचनाद्दक्षिणान्तरं परिक्रयार्थं विधीयत इत्याशङ्क्य 'ऋत्विगाचार्यौ नातिचरितव्यावि'ति निषेधेन ऋत्विजो द्वेष्यस्यासम्भवाददृष्टार्थमनृत्विजे दानम् । दक्षिणाशब्दस्तु गौण इत्याह—

द्वैष्ये दानं तथैव च ।

१७

अस्थियज्ञः ● 'यदि सत्राय दीक्षितानां प्रमीयेत तं दग्ध्वा कृणाजिनेऽस्थीन्युपनह्य यो नेदिष्ठः स्यात्तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरंस्ततः सम्वत्सरे अस्थिनि याजयेयुरि'त्यत्र जीवत्सत्रिणां यागविधौ तेषां-यष्टृत्वेन 'याजयेयुरि'ति णिचो बाधापत्तेरस्थिसहकारिणां बहिरङ्गानां लक्षणापेक्षयाऽस्थिमतोऽन्तरङ्गस्य लक्षणाया युक्तत्वाच्चावयवाभेदेनास्थिशब्दलक्षितस्य मृतस्यायं यागः फलार्थं विधेयः । अन्येषान्तु याजयितृत्वेन ऋत्विक्त्वमित्याशङ्क्य मृतस्य साक्षादृत्विक् प्रेरणया वा कर्तृत्वायोगादकर्तृश्च फलायोगेन बहिरङ्गानामपि सहकारिणां लक्षणात्तत्सहायानां जीवतामयं यागः । याजयतिस्तु जीवतामस्थिसहकारिणां ये याजकास्तत्पर इत्याह—

अस्थियागो जीवतां स्यात् ।

१८

यदि तु वचनात् ● कृत्वाचिन्तया पञ्चाधिकरणानि । यदापि मृतस्याधिकारस्तदापि वपनादयः संस्काराः जपादयश्चासम्भवान्न स्युरित्याह—

मृतस्याधिक्रियायद्विलुप्यन्ते जपसंस्काराः ।

१९

ऋत्वर्थे तु ● शुक्रान्वारम्भणादावचेतनानामस्थ्नामस्वातन्त्र्यान्न कर्तृत्वमित्याशङ्क्य'यस्य व्यापारं धातुः प्राधान्येनाह स कर्ते'ति कर्त्रधिकरणवार्तिकोक्तन्यायेनाचेतनेऽपि स्थाल्यादौ स्थाली पचतीतिवत्प्रत्ययप्रयोगात् कर्तव्यमस्थिभिः शुक्रान्वारम्भणादिकमित्याह—

ऋत्वर्थं क्रियतेऽत्र तु शुक्रारम्भादिकम् ।

२०

काम्यानि तु ● गुणकामानां विकृतौ प्रवृत्तिपक्षेऽपि मृतस्य कामाज्ञानान्न तेषामस्थियागे प्रवृत्तिरित्याह—

नास्थ्नां गुणकामेति (मना ?) ।

२१

इहार्थाः ● सूक्तवाकगतानामायुराशास्त इत्यादीनामस्थियागाङ्गेष्टौ प्रवृत्तिरित्याशङ्क्याशासनाभावान्न प्रवृत्तिरित्याह—

आयुरादि च।

नेत्यनुषङ्गः।

२२

स्युर्वा होतृकामाः ● 'यं कामयेत पापीयान्स्यादिति नीचैस्तरां तस्य याज्याद्या च वषट्कुर्यादिति श्रुताः। पापीयान् दरिद्रः। मे शत्रुः पापीयान्स्यादिति मृतस्य कामनाभावेऽपि होतुः कामनासम्भवादस्थियागे कामानां प्रवृत्तिः इत्याशङ्क्य'यां वै काञ्चन यज्ञे ऋत्विज आशिषमाशासते यजमानस्यैव से'ति वचनान्मृते न स्युरित्याह—

न होतृकामाः स्युः।

२३

सर्वस्वारस्य ● सर्वस्वारो नाम यज्ञः स्वर्गार्थः। तत्रार्भवस्तोत्रकाले 'ब्राह्मणाः समापयत मे यज्ञमिति सम्प्रेष्य अग्नि प्रविशतीति श्रुतम्। तत्र 'मरणकामो ह्येतेन यजेते'ति श्रुतेरवाप्ते फले शिष्टमसमाप्यं मृतस्य कर्तृत्वायोगाच्चेत्याशङ्क्यैकस्यां भावनायां मरणस्य स्वर्गस्य च साध्यत्वायोगेन मरणकाम इत्यस्याङ्गीकृतमरण इत्यर्थात्प्रैषेण चाप्राप्तार्थत्वाद्विधायकेन शिष्टे कर्तृत्वादन्यथा प्रैषानर्थक्यापत्तेः शिष्टं स्वर्गार्थं समाप्यमित्याह—

समाप्यः सर्वस्वारो मृतेऽपि तु।

२४

मृते कर्मास्थियज्ञवत् ● मृते कथमनुष्ठानमित्याकाङ्क्षायां अस्थियज्ञवदित्याह—

मृतेऽस्थियज्ञवत्कर्म।

२५

जीवत्यवचनम् ● तत्रैव जीवद्दशायामायुराशास्त इति न वाच्यम् मरणाङ्गीकारादित्याशङ्क्य प्रागार्भवान्मरणप्रसक्तौ क्रतुवैगुण्यापत्तेर्वक्तव्यं तदित्याह—

आर्भवान्तं चायुरादिकम्।

२६

क्रियास्याद्धर्ममात्राणां ● सत्रे वरणं दक्षिणादानञ्च नेत्युक्तम्। यत्वदृष्टार्थमृतुयाज्यावरणमात्रेयहिरण्यदानञ्च तत्तु स्यादेवेत्याह—

ऋतुयाज्यावृतिः सत्रेऽप्यात्रेये दानमेव च।

२७

गुणलोपे च ● इष्टौ'अग्निहोत्रहवण्या हवींषि निर्वपती'त्युक्तम्। पवमा-

नैष्टिषु तदतिदेशात्प्राप्तम् । तत्र प्रकृतावग्निहोत्रहवण्येत्यत्राग्निहोत्रं हुतं होष्यते हूयते चेति भूतभविष्यद्वर्तमानसम्बन्धसम्भवेऽपि पवमानेष्टौ निर्वापकालेऽग्निहोत्राभावेन वर्तमानसम्बन्धायोगाद्यजमानपात्रयोर्नाशसम्भवेन च भविष्यत्सम्बन्धायोगात्पुरोडाशकपालादौ त्वन्यथानुपपत्या भविष्यत्सम्बन्धाश्रयणात्पवमानेष्टौ भविष्यत्सम्बन्धाश्रयणे वा प्रकृतिविकृत्योः शास्त्रार्थान्यथात्वापत्तेर्भूतसम्बन्ध एवाश्रयणीयः । ततश्चाधानान्ते तूष्णीमग्निहोत्रं जुहोतीति गौणाग्निहोत्रविधानेऽपि तत्र जुह्वाः साधनत्वेन तदभिप्रायेणापि पवमानेष्टौ भूतसम्बन्धाग्निहोत्रहवण्यभावाद् विगुणो निर्वापो न कर्तव्य इत्याशङ्क्य हविस्संस्कारकत्वेन प्रकृतितः प्राप्तस्य निर्वापस्य गुणभूताग्निहोत्रहवण्यनुरोधेन बाधायोगाद्येन केनचित् पवमानेष्टौ निर्वापः कार्य इत्याह—

हवणीगुणलोपेऽपि निर्वापः पवमानगः ।

तत्त्वतस्तु पुरोडाशार्थमुपात्तकपालवदग्निहोत्रार्थमुपात्तैवाग्निहोत्रहवणीति तुषोपवापोत्तरं कपालनाशेऽपि तदर्थमुपात्तत्वेन तत्सम्बन्धवदग्निहोत्रार्थमुपात्तत्वेनैवतत्सम्बन्धोस्तीऽति तयैव निर्वाप इति तातचरणाः ।

२८

मुष्टिलोपात्तु ● वाजपेये 'बार्हस्पत्यो नैवारः सप्तदशशरावः क्षीरे चरुर्भवती'त्युक्तम् । तत्र 'चतुरो मुष्टीनि'ति प्राकृतचतुष्ट्वसंख्यामुष्टयोरबाधे सप्तदशशरावपरिमितौदनायोगाच्छरावेण मुष्टेर्बाधः । सङ्ख्यया च सङ्ख्यायाः बाध इत्येकःपक्षः । यद्यपि सप्तदशशरावपरिमाणस्य यागद्रव्यविषयत्वाच्चतुर्मुष्टिपरिमाणस्य च निर्वपविषयत्वादविरोधस्तथापि निरुप्तस्यैव यागद्रव्यत्वादर्थादेकविषयत्वमापाद्य बाधः । तत्र चैकबाधसम्भवे उभयबाधायोगादनियम इत्यन्यः । यद्वा सङ्ख्याया मुष्टयङ्गत्वाद्बाधोन मुष्टेः-तेन चतुरधिकमुष्टिभिर्निर्वाप इत्याशङ्क्यारुण्यन्यायेन संख्यामुष्ट्योः कारकद्वारा क्रियाङ्गत्वा (न्नल्पत्व ?) सति मुख्यत्वाच्चतुष्ट्वस्यानुग्रहो मुष्टेर्बाध इत्याह—

चरौ स्यात्सप्तदशसु शरावेषु चतुर्ग्रहः ।

तत्र कथं चतुष्ट्वस्यानुग्रह इत्याकाङ्क्षायां प्राकृते निर्वापेऽत्र सप्तदशसंख्ये त्रियंजुषा तूष्णीं चतुर्थमिति मन्त्रवशाच्चतुर्धा विभक्ते सति 'द्वादशमन्त्रैः चत्वारः तूष्णीं पञ्चमश्चान्वावाप' इत्येवं पञ्च तूष्णीमित्याह—

मुष्टिलोपे द्वादश स्युर्मन्त्रैः ।

तूष्णीञ्च पञ्चमम् ।

२९

औत्पत्तिके ● 'द्यावापृथिव्यां धेनुमालभेत वायव्यं वत्सं ऐन्द्रमृषभमि'ति श्रुतम् । तत्र धेन्वादिशब्दानां शोणादिवद्गवादिगुणवाचित्वेन गोरुपदेशातिदेशाभ्यामप्राप्तेरजस्य त्वतिदेशात् प्राप्तेरजमृषभमित्यजेऽपि प्रयोगाच्चाजजातेर-

बाध इत्याशङ्क्य गोरशाब्दत्वेऽपि श्रुत्युक्तगुणविशेषाणामधिष्ठानं विना नास्तीत्यजप्रापकचोदकबाध इत्याह—

धेनुवत्सर्षभादौ स्याद्गोजात्या छागबाधनम् ।

३०

नैमित्तिके ● 'वायव्यं श्वेतमि'त्यादौ श्वेतादिगुणस्याजेऽपि सम्भवान्नाजबाध इत्याह--

श्वेते पशौ नाजबाधो ह्यजे श्वेतादिसम्भवात् ।

३१

विप्रतिषेधे ● साद्यस्क्रे 'खलेवाली यूपो भवती'ति श्रुतम् । तथा चित्रेष्टौ 'दधि मधु घृतं धाना उदकं तण्डुला इति श्रुतम् । तत्र खलेवालीशब्दस्य यौगिकस्य खले वारणक्रियां निमित्तीकृत्य काष्ठे वृत्तेस्तत्र च 'दण्डी प्रैषानि'तिवद्विशेष्यस्य काष्ठस्य प्राप्तत्वेनाप्राप्तं विशेषणं वारणमेव यूपसंस्कारकत्वेन विधेयम् । ततश्च यूपं खले निखाय स्वदेशे निखनेदित्यर्थः । एवं व्रीहीणां तण्डुलत्वं विधीयते । अन्यथा यथासिद्धखलेवालीतण्डुलग्रहणे खादिरत्वादीनामवघातादीनाञ्च बाधापत्तिः यूपशब्दे च कार्यलक्षणापत्तेरित्याशङ्क्य यूपस्य खलेवारणसंस्कारविधावदृष्टकल्पनापत्तेः । खलेवाल्या यूपत्वविधौ तु पश्वनपक्रमणरूपदृष्टार्थत्वात्सिद्धैव खलेवाली तण्डुलाश्च व्रैहयवा ग्राह्याः । प्रकृतौ हि सिद्धपुरोडाशग्रहे प्राप्ते 'कपालेषु श्रपयती'ति पुरोडाशश्रपणविध्याक्षिप्तहविरुत्पादनार्थत्वेन व्रीह्यादिविधानात् प्रकृतिद्रव्यग्रहः तण्डुलेषु त्वर्थाभावेन श्रपणनिवृत्या न व्रीहिनियमः । न हि सिद्धपुरोडाशग्रहे प्रकृतिद्रव्याक्षेपः प्राप्तः, येन तण्डुलेषु स स्यात् । तेन लोकसिद्धा एव तण्डुलाः खलेवाली च खादिर्यखादिरी वा ग्राह्या । परेषां प्रतिषेधः स्यात् । सिद्धखलेवालीग्रहणादेव छेदनतक्षणादीनां लोप इत्याह--

खलेवाल्यां खादिरत्वछेदनादि तु लुप्यते ।

३२

अर्थाभावे संस्कारत्वं ● यथा सिद्धोपादानात् खलेवाल्यां सम्भवतोऽपि दृष्टार्थस्य पर्यूहणपरिषिञ्चनादेरदृष्टार्थस्य चाञ्जनप्रोक्षणादेर्बाधस्तेषां यूपार्थत्वादित्याशङ्क्य संस्काराणां यूपकार्यपशुनियोजनार्थत्वेन खलेवाल्यामपि प्राप्तेस्तत्र च केषां चिदर्थलोपाल्लोपेऽप्यलुप्तार्थानां न लोप इत्याह--

पर्यूहणाभ्यञ्जनादि स्यात् ।

पर्यूहणं मैत्रावरुणदण्डेन भूमिसमतापादनन् ।

३३

अर्थेन च ● महापितृयज्ञे श्रुतम् 'पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थमि'ति । अभिवान्या वत्सान्तरेण सन्धीय-

माना। अत्र भाष्ये धानास्ववघातकरणे सक्तुत्वापत्त्या धानात्वविघातान्न कर्तव्योऽवघात इत्याशङ्क्य श्रपणोत्तरं विघातेऽपि तत्पूर्वं हन्तौ क्रमबाधेऽपि पदार्थस्याबाधात्कर्तव्योऽवघात इत्युक्तम्। वार्तिके तु प्रकृतावप्यवघातस्य पुरोडाशपाकात्पूर्वमेव करणेन क्रमविपर्यासाभावाद्'गुणलोपेऽपि मुख्यस्ये'त्यनेन पौनरुक्त्यापत्तेश्चायुक्तमिदमिति मत्वान्यथा व्याख्यातम्। न धाना उदाहरणं किन्तु मन्थः। इह मन्थे श्रपणोत्तरकालं पेषणं सक्तुत्वार्थं प्राकृतमुताप्राकृतं इति संशयः। तत्र प्रकृतौ पेषणेन विना पुरोडाशपाकायोगेन पेषणस्य पाकार्थत्वान्मन्थे च तण्डुलानां भर्जनात्पेषणस्य च पाकोत्तरभावित्वेनाप्राकृतत्वान्न तत्र धर्माः कार्या इत्याशङ्क्य 'तण्डुलान्पिनष्टी'ति द्वितीयया प्रकृतौ हविरर्थस्य पेषणस्य पाकार्थत्वाभावादिह च क्रमान्यत्वेऽपि हविरर्थत्वेन प्राकृतत्वानपायात्पेषणधर्माः कार्या इत्याह—

क्रमान्यत्वेऽपि नान्यथा।
पदार्थे प्राकृते तेन मन्थे पेषः सधर्मकः॥

दशमस्य द्वितीयः पादः।

तृतीयः पादः

१

विकृतौ ● पशौ 'एकादश प्रयाजान्यजति'तथा 'नव प्रयाजान्यजति'इत्यादौ कार्यमात्रातिदेशेन प्रयाजादीनामप्राप्त्या तदनुवादेन गुणविधानायोगाद्विशिष्टधात्वर्थविधिः। ततश्च तैरेव प्रयाजादिभिर्निराकाङ्क्षत्वाद्गृहमेधीयवदपूर्वतेत्याशङ्क्य कार्यद्वारा पदार्थानामप्यतिदेशाद्विशिष्टविध्यपेक्षया गुणमात्रविधौ लाघवाच्च नापूर्वमित्याह—

प्राकृताङ्गे गुणविधेर्नापूर्वा विकृतिर्भवेत्।

२

हिरण्यगर्भ ● वायव्ये पशौ'हिरण्यगर्भःसमवर्तताग्र इत्याघारमाघारयती'ति श्रुतम्। तत्र 'इत इन्द्र ऊर्ध्वोऽध्वर इत्याघारमाघारयती'ति मन्त्रविधिना उत्तराघारस्येन्द्रदेवत्यत्वावगत्याऽस्य मन्त्रस्य तत्र विनियोगायोगात्पूर्वाघारस्य तु प्राजापत्यत्वात् 'प्रजापतिर्वै हिरण्यगर्भ' इति वाक्यशेषाच्च पूर्वाघारे मन्त्रविनियोगमाशङ्क्य पूर्वाघारे मन्त्रनिषेधाद्धिरण्यगर्भशब्दस्य गौण्या वृत्त्येन्द्रपरत्वाच्चोत्तराघार एव विनियोग इत्याह[1]—

३

संस्कारे तु ● 'उत्करे वाजिनमासादयति' 'परिधौ पशुं नियुञ्जीते' त्यत्रोत्करस्य तीक्ष्णाग्रत्वात्परिधेश्चाणीयस्त्वेन हविरासादनपश्वनपक्रमणायोग्यत्वादा-

१. मातृकालेखकेन प्रमादात्यक्तं पद्यमुतेनैवं स्यात्—हिरण्यगर्भमन्त्रोऽङ्गमुत्तराघारकर्मणः॥

सादनानुवादेन वाजिनोत्करयोर्नियोजनानुवादेन च पशुपरिध्योर्विधौ च शिष्टोद्देशेनोत्करपरिधिविधौ वा वाक्यभेदाद्विशिष्टधात्वर्थविधिरवश्यं वाच्यः। तेन प्राकृतं कृत्वाऽदृष्टार्थमासादनं नियोजनं च कार्यमित्याशङ्क्य विशिष्टविधौ गौरवाद्दानानुवादेन प्राकाशाध्वर्युसम्बन्धविधिवदासादनानुवादेन वाजिनोत्करयोः नियोजने च पशुपरिधिसम्बन्धस्यविधौ वाक्यभेदाभावाद्दृष्टकार्यार्थमुत्करस्य पृथ्वग्रतां परिधेश्च दृढत्वं सम्पाद्य तत्र प्राकृतमेवासादनादिकार्यमित्याह—

उत्करादौ वाजिनादेः प्राकृतासादनादिकम्।

४

षड्भिर्दीक्षयतीति ● अग्नौ प्रकृतितः 'आकूत्यै प्रयुजे' इति षड् दीक्षाहुतयः प्राप्ताः। अग्नौ च आकूतिमग्निमि'त्यादयः अपरे षण्मन्त्राः समाम्नाताः। ते च वैकृताः मन्त्रा 'षड्भिर्दीक्षयती'ति वाक्येन दीक्षार्थतया विनियुक्ता अपि स्वाहाकारलिङ्गत्वेन होमार्थत्वावगमाद्धोमद्वारा दीक्षार्थाः। दीक्षाहुतीनाञ्चाभ्यासः श्रूयते 'द्वादश जुहोती'ति। तत्र होमाङ्गैः कृतैरेककार्यत्वेन प्राकृतानां मन्त्राणां बाधात्तैरेवाभ्यस्तैर्होम इत्याशङ्क्याभ्यासेऽपि प्राकृतबाधे मानाभावात्'षट्पूर्वान् जुहोति षडुत्तरान् ता उभयीर्जुहोत्याग्निकीश्चाध्वरिकीश्च' इति निर्देशभेदाच्च प्राकृतवैकृताहुतीनां तन्मन्त्राणाञ्च समुच्चय इत्याह—

आग्निक्यः प्राकृतीभिस्स्युर्दीक्षाहुत्यः समुच्चिताः।

५

अग्न्याधेयस्य ● पुनराधेये 'पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः' इति श्रुतम्। तत्र 'उभयीर्ददाति' इति वचनादाधानदक्षिणानां पुनराधेयदक्षिणानाञ्च समुच्चय इत्याशङ्क्य वसन्तादौ विहितस्यैवाधानस्य निमित्ते पुनःश्रवणेन कर्मैक्यात्प्रयोगभेदाच्चागत्या वचनस्य पूर्वदत्तदक्षिणाभिप्रायत्वात् 'यद्वैकृतीर्ददात्युभय्योऽपि तेन प्रत्ता भवन्ती'ति लिङ्गाच्चैककार्यत्वेनाधान दक्षिणाया बाध इत्याह—

दक्षिणा पुनराधेये प्राकृत्या बाधिका मता।

६

वासोवत्सञ्च ● आग्रयणे वासो वत्सश्च दक्षिणा। तत्र क्रयन्यायेनानत्यतिरेकात्कार्यान्तरत्वेन प्राकृतदक्षिणासमुच्चय इत्याशङ्क्य दक्षिणाशब्देन प्राकृतीमेवानतिमनूद्य वासोवत्सविधानेनानत्यतिरेककल्पनायोगात्प्राकृतस्यान्वाहार्यस्य निवृत्तिरित्याह—

वासोवत्सावाग्रयणे प्राकृत्या बाधकौ मतौ।

७

अर्थापत्तेः ● अन्वाहार्यकार्यापत्त्या वासोवत्सं तद्धर्मांल्लभेतेत्याह—

तत्रान्वाहार्यधर्माः स्युः ।

८

दानेपाकोर्थे ● प्रकृतौ पक्वस्यैव दक्षिणात्वेन वत्से पाकं कृत्वा पक्वं मांसं देयम्, वत्सश्रुतेस्तु व्रीहिवत्प्रकृतितयापि सम्भवात् । तेन वत्से न पाकबाध इत्याशङ्क्य दक्षिणाशब्देन भृतित्वेन देयस्यैवोक्तेः श्रुतहान्यश्रुतकल्पनाप्रसङ्गा-द्वाससि त्वर्थाभावान्न पाक इत्याह—

वासोवत्सं न पच्यते ।

९

तथाभिघारणस्य ● अभिघारणस्यादृष्टार्थत्वाद्वासोवत्सयोरभिधारणं कार्य-मित्याशङ्क्य तयोर्दृष्टस्वादिमार्थत्वान्नेत्याह—

नाभिधार्यम् ।

१०

द्रव्यसन्निधौ ● ज्योतिष्टोमे 'गौश्चाश्वश्चाश्वतरश्च गर्दभाश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणे'ति श्रुतम् । तत्र तस्येति षष्ट्यन्तेन गवादेरुद्देशात्तद्गुणभूता सङ्ख्या विधीयमाना प्रति प्रधानमावृत्या प्रत्येकं सर्वेषु स्यादित्याद्यः पक्षः । यद्वा दक्षिणोद्देशेन गवादि विधौ गवाद्युद्देशेन च सङ्ख्याविधौ वैरूप्यात्सङ्ख्यायाः बहुभिः सम्बन्धे तेषा-मिति बहुत्वापत्तेः द्वादशशतानां बहुत्वापत्तेश्च द्रव्यसङ्ख्याविशिष्टदक्षिणा-विधिः । तत्र चैकस्मिन् द्रव्ये सङ्ख्यानिवेशे सति तद्विशिष्टदक्षिणासिद्धेरनियमः । न च 'ऋत्विग्भ्यो दक्षिणां ददाती'ति प्राप्तदक्षिणानुवादेनानेकविधौ वाक्य-भेदः । दक्षिणानुवादेन चार्थसमुच्चयविधानात् । यद्वा 'मैत्रावरुणाय दण्डं प्रयच्छ-ती'त्यस्य दण्डदानेन मैत्रावरुणं संस्कुर्यादितिवत् ऋत्विग्भ्यो दक्षिणां ददाती'-त्यस्य 'गौश्चाश्वश्चे'त्यादिवाक्यविहितदक्षिणाकरणकदानेन ऋत्विजः संस्कुर्या-दित्यर्थादिति द्वितीयः । आनन्तर्यान्माषगता सङ्ख्येति तृतीयः । माषादेः प्रस्थादि-परिमाणं विना स्वतः सङ्ख्याभावाच्चशब्देनान्यसहितानां माषाणां निर्देशा-द्बहुषु बहुत्वापत्तेस्तस्येत्येकत्वायोगाच्च क्रतुपरस्तस्येतिशब्द इति चतुर्थः । क्रत्व-न्वयस्य प्रकरणादेव सिद्धेस्तस्येत्यानर्थक्यात्समाहारपरस्तस्येति शब्द इति पञ्चमः । समाहारस्याशाब्दत्वात्सर्वसम्पाद्या सङ्ख्येति षष्ठः । सर्वसम्पाद्यत्वे तस्येत्येकत्वायोगाज्जात्यभिप्रायमेकवचनम् । तत्रापि विशेषाश्रुतेरनियम इति सप्तमः । तच्छब्दस्य व्यक्तिवाचित्वेन जातिवाचित्वाभावाच्च माषादीनाम-जादीनाञ्च बहुवचनान्तत्वेन तदभिप्रायणैकत्वायोगादेकवचनान्तेषु गवादिषु चतुर्षु सङ्ख्यान्वय इत्यष्टमः । सर्वथा न गोमात्रगतं द्वादशशतमित्याशङ्क्य गवां सान्नाय्यामिक्षानित्यहोमीयपयोजनकत्वेन महोपकारकत्वादप्रतिषिद्धत्वा-न्मुख्यत्वाच्च तच्छब्दस्यतत्परत्वात्तद्गतमेव द्वादशशतमित्याह—

तथा सोमे गोगतं द्वादशं शतम् दक्षिणा ।

११

तत्र दानं ● सा दक्षिणा विभज्याविभज्य वा देया। अविभज्यदाने चर्त्विग्भिः प्रतिग्रहोत्तरं विभागः कार्यः। यद्वा ऋत्विग्भ्यो दक्षिणां ददाती'ति ऋत्विजां सम्प्रदानत्वात्सम्प्रदानेगुणभावाद्गुणभूतानाञ्च तेषां विवक्षितबहुसङ्ख्यत्वा-त्सर्वसम्प्रदानमेकं दानमित्यविभज्यैव देयेत्याशङ्क्य दानस्य ऋत्विक्परिक्रयार्थ-त्वात्तेषां चतुर्थ्या कर्मणोऽपि प्राधान्यात्प्रधानानां चोद्देश्यानां बहुत्वाविवक्षया प्रतिप्रधानमावृत्तेरविभज्य दाने चाविभक्तभ्रातॄणामिवर्त्विजां दक्षिणाया यथेष्ट-विनियोगासम्भवेन दक्षिणादानविध्यर्थासिद्धेः 'तुथो वो विश्ववेदा विभजत्विति लिङ्गाच्च विभज्यैव दक्षिणेत्याह—

सा विभज्यैव ।

१२

समं स्यात् श्रुतित्वात् ● स विभागो विशेषाश्रुतेः समः प्रयासानुरूपो वेत्याशङ्क्य द्वादशाहे दीक्षाक्रमे प्रशास्त्रादीनामर्धित्वाद्यनुवादस्य प्रकृतौ मुख्यार्ध-दक्षिणानिमित्तत्वाद्विकृतिगतयार्धादिसंज्ञया प्रकृतौ विभाग इत्याह—

विभागोऽर्धादिसंज्ञया ।

१३

तस्य धेनुः ● अथैष भूर्वैश्वदेवस्तस्य धेनुर्दक्षिणे'ति श्रुतम्। तत्र 'गौश्चा-श्वश्चे'तिवाक्ये यच्छब्दयोगः प्राथम्यमिति न्यायेन प्रथमाम्नातानां गवादीना-मुद्देश्यत्वावगतेः दक्षिणाशब्दवाच्यभृतिगुणस्य च द्रव्यविशेषणत्वेन प्रत्येकं गौर्दक्षिणा अश्वो दक्षिणेत्येवं द्रव्यस्य दक्षिणात्वावगतेः धेनुः गोद्रव्यस्यैव बाधिका नाश्वादीनामित्याशाङ्क्य—गवादीनां माषान्तानां समुच्चित्यदक्षिणात्वात् समु-च्चयस्यैकत्वादेकैव दक्षिणेति तस्या धेनुर्बाधिका न तु गोमात्रस्येत्याह—

धेनुः सर्वनिर्वर्तिका ।

१४

एकांपञ्चेति ● 'यस्य सोममपहरेयुरेकां गां दक्षिणां दद्यात्' इति श्रुतम्। अत्र सङ्ख्याविशिष्टद्रव्यस्य विधीयमानत्वात् पूर्ववत्कृत्स्नदक्षिणाया निवृत्तिरित्याशङ्क्य—गवादीनां प्राप्तत्वात् विशिष्टविधौ च गौरवात् सङ्ख्याया एव विधेयत्वात् अतिदेशतः प्राप्तसङ्ख्याया एव निवृत्तिः न कृत्स्नदक्षिणाया इत्याह ॥

एकसंख्या द्वादशेति संख्याया बाधिका मता ।

---

१. इतो मातृकायां चत्वारि पृष्ठानि नष्टानि दशमाध्याये चतुर्थपादस्य पञ्चदशाधिकरण-पर्यन्तो भागो नष्टः। तत्रत्या विषया सङ्ग्रहेण प्रदर्श्यन्ते ।

१५

त्रिवत्सश्च ● साद्यस्क्रे वर्षत्रयोपेतेन साण्डेन गोद्रव्येण सोमक्रयणं विहितम् – त्रिवत्सस्साण्डस्सोमक्रयण:' इति । प्रकृतौ च सोमक्रयसाधनानि अजा-हिरण्यवृषभादीनि आम्नातानि । तानि विकृतावतिदिष्टानि साद्यस्क्रे । तत्र किं प्रकृतितस्समागतानां साधनानां सर्वेषां बाधकस्साण्ड: ? उत वृषभस्यैवेति चिन्तायां तत्र पुंगवत्वसाम्याद्वृषभस्यैव बाधक: साण्ड इत्याशङ्क्य क्रयोद्देशेन त्रिवत्सस्यैव विधानात् साण्डत्वोद्देशेन विधानाभावाच्च कृत्स्नानि क्रयसाधनानि साण्डेन बाध्यन्त इत्याह—

साण्ड: सर्वनिवर्तक: ।

१६

प्राकाशौ तथा ● अश्वमेधे 'हिरण्मयौ प्राकाशावध्वर्यवे ददाति' इति श्रुतम् । हिरण्यदीपस्तम्भ: हिरण्यदर्पणो वा प्राकाशशब्दवाच्य: । तस्य दानक्रिय-या साक्षात्सम्बन्धस्य प्रतीयमानत्वात् देयान्तरद्रव्यस्य बाधकत्वं प्राकाशयोरित्या शङ्क्य—'अध्वर्यवे ददाति'' इत्यध्वर्यो: सम्प्रदानविशिष्टदानक्रियया सम्बन्धेन प्राकाशाविति द्वितीयाश्रुतेरविरोधात् अध्वर्युभागस्यैव निवृत्ति: न कृत्स्नस्येत्याह-

प्रकाशौ बाधकौ स्यातां भागस्याध्वर्यवस्य च ।।

१७

धेनुवच्चाश्व ● उपहव्यसंज्ञकैकाहे अश्व: श्यामो रुक्मललाटो दक्षिणा, स ब्रह्मणे देय:' इति श्रुतम् । दक्षिणाशब्देनाश्वस्य सम्बन्धात् धेनुन्यायेन कृत्स्नदक्षिणाबाध:, न तु प्राकाशन्यायेन ब्रह्मभागस्यैव । 'ब्रह्मणे देय:' इति अश्वस्य पुरुषान्तरसम्बन्धो बाध्यते । तेन पुरुषान्तराणामुपदिष्टातिदिष्टदक्षिणा-बाध: । पुरुषान्तराणामानतिश्च लौकिकोपायेन साधनीया ।।

१८

तथा च सोमचमस: ● ऋतपेये श्रुतस्य सोमचमसस्य पूर्वन्यायेनात्रापि सर्वदा-नबाधकत्वम् । 'यत्पशून् दद्यात् सोऽनृतं कुर्यात्' इति पशुनिन्दार्थं न प्रवृतम्, किन्तु विधेयसोमचमसस्तुत्यर्थं प्रवृत्तम् । तेन सर्वदानप्रसक्तिशङ्काया अनवसर इति सोमचमसस्सर्वदानबाधक: ।।

क्त्वाचिन्तया विचार्यते—

'सोमचमसो दक्षिणा' 'स प्रियाय सगोत्राय ब्रह्मणे देय:' इत्यनयोर्वाक्य-योभ्रन्त्या एकवाक्यत्वेऽङ्गीकृते चमसशब्दस्य दक्षिणाशब्देन ब्रह्मशब्देन च सम्बन्धस्सिध्यति । तथा सति कृत्स्नदक्षिणाया निवृत्ति: पुरुषान्तरस्य च निवृत्ति-रिति पूर्वाधिकरणसिद्धान्त एव पूर्वपक्ष: । भ्रमादेकवाक्यत्वे सत्यपि चमस: ब्रह्म-सम्बन्धश्चेति विधेयद्वयार्थभेदाद्वाक्यभेदो भवेदेव । अतो दक्षिणाशब्दस्य तदंशे

लक्षणां स्वीकृत्य तदुद्देशेन चमसमात्रविधाने ब्रह्मभागस्यैव निवृत्तिस्स्यात् ।

दक्षिणायाः प्रायेण सर्वत्र क्रत्वर्थत्वेनैव श्रवणात् पुरुषार्थत्वेन श्रवणाभावात् क्रत्वर्थश्चमसः क्रतुदक्षिणां सर्वां निवर्तयेत् । स्पष्टं भासमानो वाक्यभेदो निवारयितुं न शक्य इति कृत्स्नदक्षिणापुरुषान्तरयोर्निवृत्तिस्सिध्यति ॥

६

यजुर्युक्ते तु ● वाजपेये रथशकटदासीनिष्कादीनि प्रत्येकं सप्तदशसङ्ख्याकानि प्राकृतदक्षिणाद्रव्यबाधकानि विहितानि । तेषु 'यजुर्युक्तं रथमध्वर्यवे दद्यात्' इति श्रुतम् । तत्र प्राकाशन्यायेनाध्वर्युभागस्यैव बाधः । न च सप्तदशद्रव्यविधानेनैव प्राकृतद्रव्यबाधसिद्धेः वाक्यस्यास्य का गतिरिति वाच्यम् । अर्धीत्यादिसमाख्याप्रापितविषमविभागविशेषक्लृप्तिरनेन बाध्यत इत्यङ्गीकारात् । तेनाध्वर्योर्नान्यो भाग इति फलति । सिद्धान्तस्तु प्राकाशन्यायोऽत्यन्ताप्राप्तस्थले प्रवर्तते । इहतु पक्षे प्राप्तस्य यो यजुर्युक्तो रथः सोऽध्वर्यवेऽवश्यं देय इति नियमार्थं 'यजुर्युक्तमध्वर्यवे दद्यात्' इति वाक्यं प्रवृत्तम् । तेन न कस्याप्यनेन बाधः इति ।

इति दशमस्य तृतीयः पादः ॥

चतुर्थः पादः

१

प्रकृतिलिङ्ग ● पूर्वं त्रिषु पादेषु बाधश्चिन्तितः । अथेदानीं चतुर्थपादेऽभ्युच्चयो विचार्यते । नक्षत्रेष्टौ 'सोऽत्र जुहोति, अग्नये स्वाहा, कृत्तिकाभ्यस्स्वाहा' इत्यादिना उपहोमा विहिताः । प्रकृतौ दर्शपूर्णमासयोः 'नारिष्ठान् होमान् जुहोति' इति नारिष्ठहोमाः प्राकृता विहिताः । परिधिन्यायेन प्राकृतनारिष्ठहोमस्थानापन्नतया वैकृतोपहोमानां विहितत्वात्त उपहोमाः नारिष्ठहोमान् बाधन्त इति पक्षे प्राप्त उच्यते—'परिधौ पशुं नियुञ्जीत' इति नियोजनस्य प्राकृतकार्यस्य निर्देशात् प्रकृतवाक्ये च तादृशनिर्देशाभावाच्च परिधिन्यायेन नारिष्ठहोमानां न बाधः किन्तु समुच्चय इति ॥

२

चोदनालिङ्ग ● सौमारौद्रचरौ 'शरमयं बर्हिः' इति श्रुतम् । तत्र मयट्प्रत्ययस्य प्राचुर्यार्थकत्वमाश्रित्य कुशबर्हिषा सह समुच्चयमाशङ्क्य विकारार्थेऽपि 'नित्यं वृद्धशरादिभ्यः' इत्यनुशासनेन मयटो विशिष्य विधानात् प्राचुर्यार्थग्रहणं न समुचितमिति शरेण कुशबर्हिषो बाध एवेति सिद्धान्तः कृतः ।

यद्वा—वाजपेये 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति' 'दुन्दुभिघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति' इति श्रुतम् । प्रकृतौ स्तोत्रोपाकरणं 'उपावर्तध्वम्'

इति मन्त्रेण बर्हिर्भ्याञ्च क्रियते। तत्र रथद्रव्यं दुन्दुभिद्रव्यञ्च बर्हिर्द्रव्यस्य, घोषश्च मन्त्रस्य बाधकमिति पक्षे प्राप्त उच्यते—रथघोषेणेत्यस्य रथसम्बन्धिघोषेणेत्यर्थकत्वात् तेन मन्त्रस्य बर्हिषोश्च बाधः। द्वन्द्वसमासाश्रयणे रथघोषाभ्यामिति स्यात्, समाहारद्वन्द्वाश्रयणे तु पदद्वयस्य लक्षणा स्यात्। पदद्वयलक्षणापेक्षया पूर्वपदमात्रे लक्षणां स्वीकृत्य तत्पुरुषस्वीकार एव उचित इति रथसम्बन्धिघोषेण मन्त्रदर्भयोर्बाधः ॥

३

सर्वत्रग्रहाम्नानं ● वैकृतसोमयागेषु बृहस्पतिसव-गवामयनादिषु वैकृताः बार्हस्पत्यार्कादयो ग्रहाः चोदकप्राप्तप्राकृतैन्द्रवायवादिग्रहाणां बाधकाः तेषामैन्द्रवायवादिस्थानापन्नत्वादेककार्यकरत्वात् इति पक्षे प्राप्त उच्यते—पात्रविशेषैः सोमरसग्रहणं न यागः, किन्तु ग्रहणं नाम पृथक्करणमेव। देवतानिर्देशमुखेन ग्रहणमात्रं न यागो भवति, यागस्य देवतोद्देशेन त्यागात्मकत्वात्। ग्रहणानि चापूर्वार्थानि। एकेन ग्रहणेन सम्पद्यमानमपूर्वं नान्येन सम्पन्नं भवति ग्रहणानां निरपेक्षतया विधानात्। अतः यागनिर्वृत्तिरूपकार्यापन्नत्वाभावाद् ग्रहणानां वैकृतग्रहणैः प्राकृतग्रहणानां समुच्चयस्सिध्यति ॥

४

प्राजापत्येषु च ● 'सप्तदश प्राजापत्यान् पशूनालभेत' इति वाजपेये क्रत्वर्थत्वेन पशवो विहिताः। पशूनां यागनिर्वर्तकत्वं सिद्धम्। प्रकृतितोऽतिदेशेन क्रतुपशव आगताः। तेषामपि यागनिर्वर्तकत्वमविशिष्टम्। अतः पशूनामेकप्रयोजनजनकत्वेन प्राजापत्यपशुभिः प्राकृतपशूनां बाध इति पक्षे प्राप्ते सिद्धान्त उच्यते पूर्वन्यायेन समुच्चय इति। नात्र प्राकृतपश्वनुवादेन गुणविधिस्सम्भवति, सप्तदशसङ्ख्याया देवतायाश्च विधाने वाक्यभेदात्। अतो विशिष्टकर्मान्तरविधानमेवाङ्गीकर्तव्यमिति समुच्चयः ॥

५

आमने ● साङ्ग्रहण्यामिष्टौ 'आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति' इति विहिता आमनहोमाः त्रित्वसंख्यासाम्येन प्रकृततः प्राप्तानां त्रयाणामनुयाजानां बाधकाः। यद्वा प्राप्तानुयाजोद्देशेन मन्त्रविधिरित्याशङ्कायां त्रित्वसङ्ख्यासाम्यमग्न्यादिष्वपिसत्त्वात् अनुयाजबाधकत्वं होमानां न युक्तम्, मन्त्रविधिपक्षोऽपि न युक्तः, विशेष्यविशेषणयोर्भेदात्। अत आमनहोमानां समुच्चयः ॥

६

उपगेषुशरवत् ● गवामयने महाव्रते 'पत्न्य उपगायन्ति' इति पत्नीकर्तृकमुपगानं विहितम्। गानस्योपचयार्थं क्रियमाणं गानमुपगानं भवति। प्रकृतावुपगानकर्तारः ऋत्विजः। तत्स्थाने पत्नीनां विहितत्वात् शरन्यायेन ऋत्विग्बाधकत्वं

पत्नीनामिति शङ्कायां, सिद्धान्तः समुच्चय इति । कण्ठगानमेवोपगानं न भवति, वंशीवीणादिगानमप्युपगानं भवति । अत्रैव 'दिक्षु दुन्दुभयो नदन्ति' इति दुन्दुभिनादोऽपि विहितः । अतः पत्न्यो वीणादिवादनं कुर्युरिति पत्न्यः ऋत्विङ्निर्वर्तिका न भवन्तीति समुच्चयः ।

७

संस्कारे च ● अञ्जनाभ्यञ्जननामके सत्रे सुगन्धिद्रव्येण गौग्गुलवादिनाऽभ्यञ्जनं विहितम् । प्रकृतौ ज्योतिष्टोमे नवनीतेन तद्विहितम् । वैकृतं गौग्गुलवाञ्जनं प्राकृतनवनीताञ्जनस्य न बाधकम्, एककार्यकरत्वाभावात् । नवनीताञ्जनं स्नेहाय, गौग्गुलवाञ्जनञ्च शैत्यायेति कार्यभेदात्समुच्चयः ॥

८

आच्छादने तु ● महाव्रते 'तार्प्यं यजमानः परिधत्ते दर्भमयं पत्नी' इति परिधानं विहितम् । तार्प्यं घृताक्तकम्बलवाचि । प्रकृतौ चाहतं वासो विहितम् । अत्र तार्प्येण वाससो न बाधः, कार्यैकत्वाभावात्, गुह्यस्थानाच्छादनाय वासः, न हि कम्बलेन दर्भैर्वा तदाच्छादनं सम्भवतीति समुच्चयः ॥

९

सामस्वर्थान्तर ● महाव्रते श्लोकानुश्लोकादिसामानि स्तोत्रसाधनान्याम्नातानि । तानि प्राकृतगायत्र्यादिसाम्नां न बाधकानि । 'श्लोकेन पुरस्तात्सदसः अनुश्लोकेन पश्चात्' इति वाक्यं देशविशेषसामगुणविशिष्टस्तोत्रं कार्यभेदेन विधत्त इति न बाधः किन्तु समुच्चयः ॥

१०

अर्थैत्वश्रूयमाणे ● 'कौत्सं भवति काण्वं भवति' इति विकृतौ विहितानां कौत्सादिसाम्नां प्राकृतसामनिवर्तकत्वं, न समुच्चयः, प्रकरणात्क्रत्वर्थत्वावगमात् प्राकृतकार्यैक्याच्च ॥

११

सर्वेषामविशेषात् ● कौत्सादीनि सामानि एकद्विबहुवचनान्तानि विकृतौ श्रूयन्ते । कौत्सादीनां प्राकृतसामनिवर्तकत्वं पूर्वाधिकरणे स्थितम् । तत्र एकद्विबहुवचनान्तानि अविशेषेण सर्वेषां निवर्तकानि उत एकवचनान्तं सामैकवचनान्तस्य द्विवचनान्तञ्च द्विवचनान्तस्य इत्येवं व्यवस्थया निवर्तकमिति चिन्तायां व्यवस्थायां नियामकाभावेन सर्वनिवर्तकत्वमिति पक्षे प्राप्त उच्यते व्यवस्थया निवर्तकत्वमिति । 'कौत्सं भवति, जनित्रे भवतः, क्रौञ्चानि भवन्ति' इति एकद्विबहुवचनश्रुतेरेव व्यवस्थापकत्वात् । तेन न सर्वबाधः ॥

१२

स्तोमविवृद्धौ ● स्तुतिपरिमाणं स्तोमः । स च प्रकृतौ त्रिवृत्पञ्चदशसप्तदशैकविंशात्मकः । विकृतौ तु क्वचित् 'द्वात्रिंशाः पवमानाः' इति स्तोम-

विवृद्धिः श्रूयते । स्तोत्रार्थं सामराजादीनि सामान्यपि विकृतौ विहितानि । विवृद्धस्तोमकेषु साम्नामागमो दशमपञ्चमषष्ठाधिकरणे 'आगमेन वाभ्यासस्याश्रुतित्वात् 'इत्यत्र वक्ष्यते । अस्यां स्थितौ विचारः प्रवर्तते किं विकृतावुपदिष्टसामराजसामादिभिः प्राकृतगायत्रादिसामानि बाध्यन्ते, आगन्तुकसामसाहाय्येन सङ्ख्यापूरणं क्रियते ? उतागन्तुकसामान्युपेक्ष्य प्राकृतसामभिः वैकृतसामानि समुच्चीयन्त इति । प्राकृतसामभिरधिकसङ्ख्यापूरणानुपपत्तौ आगन्तुकसाम्नां ग्रहणं भवति । सङ्ख्यापूरणञ्च प्रत्यक्षोपदिष्टसामराजादिसामभिरेव सिध्यतोति प्राकृतसाम्नां वैकृतसाम्नाञ्च समुच्चयः ।।

१३

पवमानेस्यातां ● यत्र स्तोमविवृद्धिस्तत्रोपदिष्टस्यातिदिष्टनिवर्तकत्वं नास्ति, यत्र चाविवृद्धस्तोमः तत्र निवर्तकत्वमिति प्रकारान्तरेणावापोद्वापौ प्रतिपादितौ पूर्वाधिकरणे । तौ चावापोद्वापौ कुत्र कस्माच्च भवत इत्यस्मिन्नधिकरणे निर्णीयते । प्राकृते पवमानस्तोत्रे 'त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्च अत्र ह्येवावपन्ति अत एवोद्वपन्ति' इत्यावापोद्वापयोः श्रवणात् वैशेषिकसाम्नामावापः पवमानस्तोत्रगतासु गायत्रीबृहत्यनुष्टुप्स्वेव उद्वापश्च तत एव, 'अत्र ह्येव' 'अत एव' इत्येवकारेण स्तोत्रान्तरेषु ऋगन्तरेषु चावापोद्वापयोः परिसङ्ख्यातत्वात् ।।

१४

विधिशब्दस्य ● निगमोद्देशत्यागादिमन्त्रेषु विधिगतदेवताशब्द एव प्रयोक्तव्यः, न तु पर्यायशब्दः । यद्यप्यर्थप्रत्यायनार्थः शब्दो भवति तथापि यत्र ह्यर्थैः कार्यमासाद्यते तत्र शब्दोऽर्थप्रत्यायनार्थः, यत्र च शब्द एव कार्यम्, तत्र कार्यसम्बन्धार्थंशब्द एव प्रत्याययितव्यः । तस्माद्विधिगतपदैरेव तत्तद्देवताभिधानम् ।।

१५

तथोत्तरस्यां ● 'सौर्यं चरुं निर्वपेत्' इत्यादिष विकृतिषु पूर्वाधिकरणन्यायेन हविस्त्यागादौ विधिबलाद् विधिगतशब्दनियमस्सिद्ध एव । आवाहनादिमन्त्रेषु चोदकेन प्राप्तेषु सूर्यादिपदानां प्रत्यक्षापठितत्वात् अग्न्यादिशब्दस्थाने सूर्यादिशब्द आगमयितव्यः । तत्र विनिगमनाविरहात् अर्थप्रत्यायनार्थं यः कश्चन पर्यायशब्द आगमयितुं शक्यत इति[1]न शब्दनियम इत्याशङ्क्य पर्यायशब्दोच्चारणे श्रुतहानाश्रुतकल्पनापत्तेः प्रकृतावाग्नेयशब्दस्य भावनायामिव सूर्यशब्दस्यापि भावनायां विधानात्प्रकृतौ मन्त्रेषु देवताशब्दपाठस्य दृष्टार्थत्वाद्विकृतावपि सूर्यादिनियम इति विधिशब्दनियम इत्याह—

१. एतावत्पर्यन्तं मातृकायां पृष्ठानि नष्टानि । 'शब्दनियम' इत्यारभ्य ग्रन्थकारस्य ग्रन्थ उपलभ्यते ।

२४

एवं सौर्यादिके ।

१६

प्राकृतस्य गुणश्रुतौ ● 'अग्नये पवमानायाग्नये शुचये' इत्यादौ पर्याययोरन्यतरेण देवतानिर्देशसिद्धेः विधिशब्दमात्रनियमेन सर्वो विधिशब्दः प्रयोक्तव्य इत्यत्र मानाभावाच्च न द्वयोरुच्चारणमित्याशङ्क्याग्नये दात्रे इत्यादिवत्पावकशब्दस्य पुनातीति व्युत्पत्त्या शुचिशब्दस्य च शुचिशौचोज्वल इति व्युत्पत्त्या अग्निगुणवाचित्वेन पर्यायत्वाभावाद् द्वयोरभिधानं कर्तव्यमित्याह—

अग्निस्तु पावकः सगुणो भवेत् ।

१७

बुधन्वान् पवमानेष्टौ ● 'बुधन्वानाग्नेयः पावकवान्सौम्यः' इति श्रुतम् । तत्राग्नेयाज्यभागस्य न स्वतो बुधन्वता सम्भवतीत्यानर्थक्यतदङ्गन्यायेन देवताया बुधन्वत्वाद्बुधन्वद्गुणकोऽग्निः सर्वत्र निगमेषु वाच्य इत्याशङ्क्य बहूनामग्निसोमलिङ्गकमन्त्राणां सत्वेन वचनस्य बुधन्वच्छब्दयुक्तमन्त्रनियमार्थत्वाच्चोदकाबाधाय केवलाग्नेरभिधानमित्याह—

बुधन्वत्ता नैव गुणः पवमानेष्टिषु स्मृतः ।

१८

विधिनिगमभेदात् ● सोमे 'गौरनुबन्ध्य' इति श्रुतम् । तत्राग्नीषोमीयात्पशोः 'छागस्य वपाया मेदसः' इति मन्त्रश्चोदकात्प्राप्तः । तत्र मन्त्रान्तरं पठितं 'उस्राया वपाया मेदस' इति । तथा पशौ 'पृषदाज्येन वनस्पतिं यजती'ति श्रुतम् । स्विष्टकृद्विकारश्च वनस्पतिः । तत्रानुबन्ध्यपशुप्रकृतिभूते दैक्षे पशुशब्देन विधिः छागशब्देन च निगम इत्येवं विधिनिगमभेदात् प्रकृतिवद्विकृतावपि गोशब्दादन्येन येन केनचिद्वनस्पतौ तु द्रुमवृक्षादिशब्देन निगमाः कार्याः । 'उस्राया वपाया' इति तु मन्त्रपाठमात्रं न त्वनेन कर्तव्यतया किञ्चिद्विधीयत इत्याशङ्क्य विधिनिगमभेदस्य प्रकृतावार्थिकत्वेन तस्य विकृतावतिदेशायोगाद् द्रव्येषु विधिशब्दनियमाभावेन प्रकरणपठितेनोस्राशब्देन नियममात्रकरणाद्वनस्पतौ तु देवतात्वेनैव विधिशब्दनियमादाद्ये उस्रापदेनान्त्ये तु वनस्पतिपदेन निगमाः कार्या इत्याह—

अनुबन्ध्ये न गोशब्दो न द्रुमादिर्वनस्पतौ ।
किन्तूस्रापदमाद्ये तु वाच्यमन्त्ये वनस्पतिः ॥

२०

स्विष्टकृद्देवतान्यत्वे ● अवभृथे अग्नीवरुणौ स्विष्टकृतौ यजती'ति श्रुतम् । तत्र स्विष्टकरणस्य भूतस्याग्नावभावद्रूढोऽयं शब्दः कार्यलक्षणार्थः । ततश्च स्विष्टकृत्कार्येऽग्नीवरुणयोर्निर्गुणयोर्विधानादस्विष्टकृच्छब्दकं निगमेषु

वचनं कार्यमित्याशङ्क्य भूतकालत्वमात्रासम्भवेऽपि स्विष्टकरणयोग्यतासम्भवात्पूर्वकृतयागापेक्षया च भूतकालतयाऽपि सम्भवेन रूढ्ययोगाद्यत्स्विष्टकृद्गुणकां देवतां यजति तदग्नीवरुणावित्येवं वाक्यार्थमङ्गीकृत्य सगुणं वचनं निगमेषु कार्यमित्याह—

अवभृथेऽग्नीवरुणौ स्विष्टकृद्गुणकौ मतौ ।

२१

सगुणस्य • दैक्षे पशौ पशुपुरोडाशः। तत्रातिदेशप्राप्तस्य स्विष्टकृतो गुणलोपःश्रुतः। स प्रधानमात्रे 'अग्निं यजती'ति श्रवणात् तत्रैव स्यादित्याशङ्क्य प्रयोग एव निर्गुणविधानात्सर्वगुणलोप इत्याह—

अग्निः पशुपुरोडाशे निर्गुणः स्विष्टकृन्मतः ।

२२

स्विष्टकृदावापिकः • इष्टौ त्रयोऽनूयाजाः तत्रान्त्यः स्विष्टकृद्दैवतः। तत्र द्वयोरिष्ट्यङ्गत्वेन मिथोऽङ्गत्वे नियामकाभावादारादुपकारकोऽयं तृतीयोऽनुयाजो न तु पूर्वस्य स्विष्टकृतः संस्कारक इत्याशङ्क्य देवतास्मरण दृष्टे सत्यदृष्टार्थत्वायोगात्पूर्वस्य च द्रव्यप्रतिपत्त्येष्टदेवतास्मरणेन कृतार्थस्यानूयाजिकस्विष्टकृद्देवतासंस्कारकत्वायोगात् तृतीयस्यानूयाजस्य स्विष्टकृद्देवतासंस्कारकत्वमित्याह—

तृतीयः स्यादनूयाजः स्विष्टकृत्संस्कृतिर्मता ।

२३

अन्वाहेति • इष्टौ 'तिष्ठन्याज्यामन्वाह आसीनः पुरोऽनुवाक्यामि'ति श्रुतम्। तत्रार्थप्रतिपत्यर्थं याज्यादेः पाठस्य प्राप्तत्वेन विधिवैयर्थ्याददृष्टार्थः पाठ इत्याशङ्क्य पाठानुवादेन तिष्ठत्वादिगुणमात्रविधानेनादृष्टार्थत्वाभावान्न विधिवैय्यर्थ्यमित्याह—

याज्यानुवाक्ये दृष्टार्थे ।

२४

मनोतायां तु • दैक्षे पशौ त्वं ह्यग्ने प्रथमो मनोते'ति मन्त्रः। स वायव्यादिपशुषु यथादेवतमूहितव्यः यत्तु वचनं 'यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्ये'ति तद्दैक्षक्रमबाधेन ज्योतिष्टोमप्रकरणादाग्नेये सवनीये उत्कर्षे प्राप्ते तन्निषेधार्थं न तु विकृतावूहनिषेधार्थम्। ततश्च प्रकृतौ लक्षणया अग्नीषोमयोः प्रकाशनेन मन्त्रस्य दृष्टार्थत्वाद्विकृतावूहस्स्यादित्याशङ्क्य लक्षणया अग्नीषोमप्रकाशने वचनं विनाप्यनुत्कर्षसिध्या वचनवैय्यर्थ्यादेवकारस्य च प्रकृतावनाग्नेयीप्राप्त्यभावेन वैय्यर्थ्याद् विकृतौ त्वनाग्नेय्या मनोतायाः ऊहेन प्राप्तावेवकारस्यातन्निवृत्यर्थत्वेनार्थवत्वादूहनिषेधार्थमेवेदं वचनमित्याह—

मनोतोहो न विद्यते ।

इदञ्चाधिकरणं 'तस्मादचमि'ति निषेधमसिद्धं कृत्वा द्रष्टव्यम्।

२५

पृष्टार्थे • वैश्यस्तोमे 'कण्वरथन्तरं पृष्ठं भवती'ति श्रुतम्। तत्र बृहद्रथन्तरयोः साम्नोः स्थाने कण्वरथन्तरस्य विधानत्तद्योनिभूतयोस्तृचयोः चोदकप्राप्तयोरबाधाय कण्वरथन्तरं बृहद्योनौ रथन्तरयोनौ वा गेयम्। यद्वा कण्वस्य रथन्तरमिति योगेन रथन्तरे तद्धर्मातिदेशाद्रथन्तरयोनावेव गेयमित्याशङ्क्य कण्वसम्बन्धे मानाभावेनास्य शब्दस्य रूढत्वात्क्रत्वर्थोत्तराग्रन्थे कण्वरथन्तरयोनेस्तदुत्तरयोश्च पठितत्वादन्यथा तद्वैय्यर्थ्यापत्तेः स्वयोनावेव गेयमित्याह—

स्वयोनौ कण्वपूर्वकंरथन्तन्रतु गेयं स्यात्।

कौत्सादेस्तु नोत्तराग्रन्थे पाठ इति प्राकृतीष्वेव गानम्।

२६

कार्यत्वात् • तत्रैव कण्वरथन्तरस्य स्वयोन्युत्तरयोरपि गाने पाठसिद्धेः ऋक्परित्यागऋगन्तरसञ्चारयोरनिवार्यत्वादतिदेशाबाधाय प्राकृत्योर्बृहद्रथन्तरोत्तरयोर्गानमित्याशङ्क्य योनिवत्प्रकरणाम्नातस्य स्वयोन्युत्तरयोरपि तुल्यत्वात् स्वयोन्युत्तरयोर्गानमित्याह—

स्वयोन्युत्तरयोश्च तत्।

२७

ग्रहाणां • प्रकृतौ स्तोत्रशस्त्राणामदृष्टार्थत्वात् 'आग्नेया ग्रहा भवन्ति' इत्यादावविकार इत्याह—

अग्निष्टुति ग्रहान्यत्वेऽप्यबाधः स्तोत्रशस्त्रयोः।

२८

उभयपानात् • इष्टौ देवानाज्यपानावह स्वाहा देवा आज्यपा आज्यपानां प्रियाधामानी'त्यादिनिगमे आज्यपशब्देन प्रयाजानुयाजदेवता उक्ताः। चातुर्मास्यादौ तु 'पषदाज्येनानूयाजान्यजतो'ति श्रुतम्। तत्र 'पृषदाज्यं गृह्णाति द्वयं वा इदं सर्पिश्च [दधि चे'ति वचनेन द्वयोर्हविष्ट्वादुभयोपलक्षणम्। याद्वा[1] "द्विरुपस्तृणाति, द्विरभिघारयति, बर्हिषो अन्तर्धाय दधि गृह्णाति' इति दध्नस्संकारविधानात् दध्येव हविरिति पृषदाज्यशब्देन दध्न एवोपलक्षणम्, इत्याशङ्कायामुत्तरं भवति—'पृषदाज्येनानूयाजान् यजति' इत्यात्राज्योद्देशेनपृषत्तामात्रं विधीयते। एकप्रसरताभङ्गभिया वा पृषत्ताविशिष्टाज्स्यैव चोदकप्रवृत्तेः पूर्वं विधाने सति प्राप्ताप्राप्तविवेकेन पृषत्तामात्रफलको विधिः पर्यवस्यति। आज्यस्य पृषत्ता चोक्तवाक्यशेषेण दध्नेति सिध्यति। अतो न लक्षणा, उपस्तरणाभिघारणदर्शनञ्च दध्नः प्रमाणान्तरेण विधाने सम्भवति अवधातादिवत्। नात्र तादृशमस्ति प्रमाणम्। अतो लौकिकस्यैव दध्नस्संस्कारकत्वेनोपपन्नम्। तस्मादाज्यमेव हविः नात्र कस्यापि बाध ऊहो वा॥

इति चतुर्थः पादः॥

---

१. अत्र पृष्ठद्वयं नष्टं मातृकायाम्। तत्संग्रहेण पूर्यते।

पञ्चम पादः

१

आनुपूर्व्यवताम् ● चतुर्षु पादेषु बाधोऽभ्युच्चयश्च विचारितौ। सम्प्रति विकृतौ प्रकृतितः प्राप्तेषु पदार्थेष्वेकदेशग्रहणे प्रसक्ते तत्प्रकारश्चिन्त्यते। प्रकृतावष्टाकपालपुरोडाशः, कपालोपधानप्रकारः, तन्मन्त्राश्चाम्नाताः। ते विकृतौ चोदकेन प्राप्यन्ते। यथा–विकृतौ–'द्यावापृथिव्य एककपालः,' 'आश्विनो द्विकपालः 'वैष्णवस्त्रिकपालः' इत्येवमेकद्वित्रिकपालाः श्रुताः। तदिह एकादिकपालं प्राकृतस्य प्रथमादिकस्य कपालस्य विकारः ? उतान्यतमस्य यस्य कस्य चिदित्यनियम इति संशये विशेषाग्रहणादनियम इति पक्षे प्राप्त उच्यते—उत्तरपदार्थानुष्ठाने पूर्वतनपदार्थस्योपस्थापकत्वात् कपालोपधानावसरे तत्पूर्वतने पदार्थेऽनुष्ठिते प्रथमस्य कपालस्योपधानमन्त्रावुपस्थितौ भवत इति तत्परित्यागे न किञ्चित्कारणमस्ति। तथा तेनापि द्वितीयः तेन च तृतीय इत्येवं क्रमेणोपस्थापितेषु अवशिष्टानां प्रयोजनाभावाल्लोपः। एवं सामिधेनोष्वपि न्यायोऽयं योजनीयः॥

२

एकत्रिके ● एकत्रिको नाम सोमयागः। स च ज्योतिष्टोमविकारः। एका च तिस्रश्चेति ऋचां विनियोगादेकत्रिक इति संज्ञा। तत्र 'अथैष एकत्रिकः तस्यैकस्यां बहिष्पवमानम्, तिसृषु होतुराज्यम्, एकस्यां मैत्रावरुणस्य तिसृषु-ब्राह्मणाच्छंसिनः, एकस्यामच्छावाकस्य तिसृषु माध्यन्दिनः पवमानः' इति श्रुतम्। प्रकृतौ च माध्यन्दिनपवमानस्य त्रयस्तृचास्सन्ति—प्रथमो गायत्रच्छन्दस्कः, द्वितीयो बृहतीच्छन्दस्कः, तृतीयश्च त्रिष्टुप्छन्दस्कः। अत एव माध्यन्दिनः पवमानः त्रिच्छदस्को भवति 'त्रिच्छन्दा आवापो माध्यन्दिनः पवमानः' इति। तदत्रैकत्रिके माध्यन्दिने 'तिसृषु' इति यदुक्तम् तत्र त्रयाणां तृचानामाद्याः तिस्र ऋचो ग्राह्या उत प्रथमतृचस्य क्रमेण पठितास्तिस्र ऋचो ग्राह्या इति चिन्तायां 'त्रिच्छन्दा' इति त्रिच्छन्दस्त्वश्रुतेः पाठक्रमात्प्रबलत्वेन पाठक्रमं बाधित्वा त्रयाणां तृचानामाद्यास्तिस्र ऋचो ग्राह्या इति पक्षे प्राप्त उच्यते—त्रिच्छन्दस्त्वस्य प्राकृतत्वात् यथा तृचत्रयमतिदिश्यते तथा पाठक्रमस्याप्यतिदिष्टत्वात् प्रथमस्य तृचस्य समाप्तौ सत्यां पश्चाद्द्वितीयबृहतीच्छन्दस्कस्य तृचस्य प्रथमाया ऋच उपस्थितिरिति आद्य तृच एव समग्रो ग्रह्यः॥

३

त्रिकस्तृचे धुर्यै ● एकत्रिकक्रतावेव धूर्गानसम्पाद्यानि स्तोत्राणि। तेषु यत् त्रिकं तत्किं ऋक्त्रये उतैकस्यामृचि अभ्यासेन त्रिकं सम्पाद्यमिति सन्देहे 'एकं साम तृचे क्रियते स्तोत्रीयम्' इति विधानात् तृचगानं प्रकृतौ यथा सम्पादितं तथा चोदकानुग्रहाय तिसृषु ऋक्ष्वेव धूर्गानमिति पक्षे प्राप्त उच्यते—'आवृत्तं

धूर्षु स्तुवते' इतिवचनात्स्तोत्रावृत्तिविधानात् धूर्गानानि त्रिकस्तोमकान्येकस्यामेवर्चि आवर्तनीयानि ॥

४

चोदनासुतु ● अहीनात्मकद्वादशाहस्य विकृतयो द्विरात्रादयः क्रतवः। तत्र द्वादशाप्यहान्यादितः अहर्गणेषु प्रवर्तन्ते उत प्रायणीयोदयनीयौ परित्यज्य मध्यमो दशरात्रः प्रवर्तत इति संशये नियामकाभावादनियम इति पक्षे प्राप्त उच्यते—'द्विरात्रे यत्प्रथममहः तत् द्वादशाहस्य द्वितीयम् द्विरात्रे यद् द्वितीयं तद् द्वादशाहस्य तृतीयम्' इति दर्शनात् दशरात्रस्यैव प्रवृत्तिः ॥

५

अपूर्वासुतु ● अग्निचयने उखापचनाय आधूननार्था मन्त्राः कृष्टक्षेत्रेषु वपनार्थं वपनार्था मन्त्राश्च बहवः पठिताः तेषां प्रयोगावसरे सङ्ख्यानियमः श्रूयते 'सप्तभिराधूनोति, चतुर्दशभिर्वपति' इति। कपालन्यायेनादितः सप्त, आदितश्च चतुर्दश इति पक्षे प्राप्त उच्यते उक्तसङ्ख्यातिरिक्तानां प्रकरणपाठवैय्यर्थ्यप्रसङ्गात् प्रकरणेन क्रमं बाधित्वा यथेच्छं मन्त्रा ग्राह्याः ॥

६

स्तोमविवृद्धौ ● विवृद्धस्तोमकेषु क्रतुषु स्तोमविवृद्धिरभ्यासेन न कर्तव्या, किन्तु साम्नामागमेन एकविंशतित्रिणवादिसङ्ख्या सम्पादनीया। पृथक्त्वनिवेशिनी हि सङ्ख्या स्तोत्रीयपृथक्त्वसिध्यर्थं सामान्तरमेवाक्षिपेत् न त्वभ्यासम् अभ्यासे क्रियमाणे पृथक्त्वं न सिध्येदिति साम्नामागमः।

७

बहिष्पवमाने तु ● ज्यौतिष्टोमे बहिष्पवमानं त्रिवृत्स्तोमकम् एकेन साम्ना गायत्रेण साध्यम्। विकृतौ विवृद्धस्तोमके पवमाने न साम्नामागमः किन्तु ऋचामेव। अभ्यासेन सङ्ख्यापूरणन्तु 'पराग्बहिष्पवमानेन स्तुवन्ति' इति निषिद्धम्।

८

अभ्यासेन तु ● दर्शपूर्णमासयोः पञ्चदश सामिधेन्यः। तदर्थमेकादश ऋच आम्नाताः। तासां प्रथमान्तिमयोस्त्रिस्त्रिरभ्यासेन पञ्चदश सङ्ख्या सम्पाद्यते। काम्यसामिधेनीषु सङ्ख्यावृद्धिः श्रूयते—'एकत्रिंशतिमनुब्रूयात्प्रतिष्ठाकामस्य' इति। तदियं सङ्ख्या पूर्ववदावृत्या पूरणीया? उत ऋचामागमेन? इति सन्देहे 'त्रिः प्रथमाम्' इत्यत्र सङ्ख्यापूरणाय त्रित्वं न विधीयते, किन्तु त्रित्वं विवक्षितम्। यद्यभ्यासः क्रियेत तर्हि त्रित्वं बाधितं स्यात्। तदबाधाय ऋच आगमयितव्याः। तथा च त्रिरभ्यस्यावशिष्टाः षड् च आगमयितव्याः ॥

९

षोडशिनो वैकृतत्वम् ● षोडशिग्रहः क्रत्वर्थोऽप्यस्ति पुरुषार्थोऽपि।

तत्र क्रत्वर्थे षोडशिग्रहे विचारः। किमयं प्रकृतौ नविशते उत विकृतावुत्कृष्टव्य इति। यद्यपि उत्तरेऽहन् द्विरात्रस्य गृह्यत' इत्यादिवचनैर्विकृतिसम्बन्धः प्रतीयते तथापि 'अप्यग्निष्टोमे राजन्यस्य गृह्णीयात्' इति वचनेन राजन्यनिमित्तेन विहितत्वात् असन्निहितविकृतिसम्बन्धस्वीकारापेक्षया सन्निहितप्रकृतिसम्बन्ध एवोचितः। 'उत्तरेऽहन्' इति वाक्यन्तु अनैमित्तिकविषयत्वेन नेयमिति प्रकृतावेव निवेशः॥

१०

तस्याग्रयणात् ● षोडशिग्रह एव विचारः। यद्यपि षोडशिग्रहस्य उक्थ्यपात्रादाग्रयणपात्राच्च ग्रहणं विभिन्नवाक्यद्वयेन प्रतीयते, तथापि तं पराञ्चमुक्थ्यान्निगृह्णाति' इति वाक्ये पराक्छब्देनोर्द्ध्वकालस्य प्रयोगात् नोभयस्माद् ग्रहणम्, किन्त्वेकस्मादेवाग्रयणात्॥

११

तृतीयसवने ● पूर्वाधिकरणशेषविचारः। षोडशिग्रहः त्रिष्वपि सवनेषु ग्राह्य इति श्रूयते। तत्र वाक्यशेषेण सवनद्वयनिन्दाद्वारा तृतीयसवन एवषोडशीग्राह्य इत्याह—

सवने च तृतीयके।

ग्राह्य इत्यनुषङ्गः।

१२

उकथ्याग्निष्टोम ● स षोडशी यदा 'अप्यग्निष्टोमे राजन्यस्याप्युक्थ्ये ग्राह्य' इति वचनादग्निष्टोमे उक्थ्ये च गृह्यते तदा षोडशिस्तोत्रे शस्त्रे च सत्यग्निष्टोमोक्थ्यसंस्थाबाधापत्तेरस्तुतशस्त्रः स्यादित्याशङ्क्य राजन्यप्रयोगेऽग्निष्टोमोक्थ्यसंस्थाबाधेन वचनस्य षोडशिसंस्थाविधानार्थत्वात् अन्यथा वैय्यर्थ्यापत्तेः सस्तुतशस्त्रः षोडशीत्याह—

स राजप्रयोगेऽपि स्तोत्रशस्त्रयुतो भवेत्।

१३

अभावादतिरात्रेषु ● अङ्गिरसां द्विरात्रे वैखानसं पूर्वेऽहन् साम भवति षोडश्युत्तर' इति श्रुतम्। तत्र कल्प्यचोदका'दुत्तरेऽहन द्विरात्रस्ये'ति सामान्यवाक्यापेक्षयास्य प्रत्यक्षत्वेन विशेषत्वेन च शीघ्रं प्रवृत्तेः 'षोडश्युत्तर' इत्ययमपूर्वविधिः यद्वातिरात्रत्वादेव तत्र षोडशिनो विकल्पेन ग्रहणप्राप्तौ नियमार्थोऽयं विधिरित्याशङ्क्य 'उत्तरेऽहन् द्विरात्रस्य गृह्यत' इति सामान्यवाक्यस्य प्राकृतविकल्पापवादेन नियमविधितया षोडश्युत्तर' इत्यस्य नियमविधित्वायोगादनारभ्यविधेः शीघ्रत्वेन च मन्थरेण प्राकरणिकेनोपसंहारायोगात् परिसङ्ख्या-

१. एतत्पर्यन्तं पत्राणि नष्टानि। इतः परं ग्रन्थकारग्रन्थोऽनुवर्तते।

विधिरयमत्रैव द्विरात्रे षोडशी नान्यत्र इति नान्येषु द्विरात्रेषु प्राकृत एव विकल्प इत्याह वृत्तिकारः। भाष्ये तु परिसङ्ख्येति पूर्वपक्षं कृत्वा तस्यास्त्रिदोषत्वाद्वै-खानसविधिशेषोऽयमर्थवादः, ततश्चोत्तरेऽहन्निति सामान्यवचनविधिनियमस्य नापवाद इत्युक्तम्। तदाह—

सर्वेषां तु द्विरात्राणामुत्तरेहन्ययं मतः।

१४

चतुर्थेऽहन्यहीनस्य ● 'चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्यते' इति श्रुतम्। तत्रा-हीनस्येत्येकत्वान्नानाहीनपरत्वे वीप्सावैयर्थ्यापत्तेश्चैकस्मिन्नप्यहीने प्रतिचतुर्थम-भ्यासेन षोडशी ग्राह्य इत्याशङ्क्य 'अहीनस्य चतुर्थे ग्राह्य' इत्येकाहीनसम्बन्धिन एकस्य चतुर्थस्योक्त्या चतुर्थाच्चतुर्थस्याहीनस्याष्टमदिनत्वेन चतुर्थत्वाभावा-देकत्वस्य च जात्यभिप्रायत्वाद्वीप्सायाश्च नानाहीनाभिप्रायत्वात्प्रथम एव चतुर्थेऽयं ग्राह्य इत्याह—

चतुर्थेऽहन्यहीनस्य प्रथमे तु भवेदसौ।

१५

जगत्साम्नि ● सोमे बृहद्रथन्तरयोर्ग्रहाग्रताविशेषं विधाय श्रुतम् यदि जगत्सामा आग्रयणाग्रानि'ति। तत्र प्रकृतावार्भवे पवमाने 'कावमन्त्यं जगतीषु' इति विहितम्। तद्योगाज्ज्योतिष्टोम एव ऋग्द्वारेण शक्यते सिद्धान्तवज्जगत्सामेति वक्तुमिति तत्रैवाग्रयणाग्रताया निवेशः। यद्वा जगच्छब्दस्य कृत्स्नार्थत्वात्साम्नो-श्चादृष्टार्थत्वेन समुच्चयादुभयसामा जगत्सामा। यद्वा 'ईशानमस्य जगतः' इति रथन्तरयोनौ जगच्छब्दसत्वात्केवलरथन्तरसामा जगत्सामेति सर्वथा आग्रयणा-ग्रतायाः प्रकृतावेव निवेश इत्याशङ्क्याद्यपक्षे 'कावमन्त्यं जगती'ष्वित्यस्य नित्यत्वेन यदिशब्दबाधापत्तेर्द्वितीयपक्षे चान्यतरसामकत्वपक्षयोः पूर्वाभ्याम-ग्रताभ्यामवरुद्धत्वेनाग्रयणाग्रत्वस्य समुच्चयपक्ष एव सिध्या जगत्सामशब्दवैय्य-र्थ्यापत्तेस्तृतीयपक्षे च जगत्पदादृग्लक्षणा ऋचा च सामलक्षणेति लक्षितलक्षणा-पत्तेः साम्नोर्विकल्पेनोभयसामत्वाभावाच्च यत्र विषुवति जगत्यामुत्पन्नं साम तत्रोत्कर्ष आग्रयणाग्रताया इत्याह—

जगत्सामा तु विषुवान् तत्रैवाग्रयणाग्रता।

१६

उभयसाम्नि ● 'संसव उभे कुर्यादि'त्यादौ यत्र बृहद्रथन्तरयोः समुच्चय-स्तत्र 'उपवतीं रथन्तरस्य प्रतिपदं कुर्यादग्रियवतीं बृहतः' इत्यादि विरुद्धधर्माणां समुच्चयासम्भवाद्विशेषाग्रहणाद्विकल्पः, यद्वा मुख्यत्वादुपवती स्यादित्याशङ्क्य प्रकृतावितरेतरव्यवच्छेदेन तयोर्निमित्तत्वात् समुच्चये च निमित्तविघातादुभय-निवृत्तिरित्याह—

रथन्तरबृहद्धर्मा विरुद्धाः संसवे न तु।

१७

ऐन्द्रवायवस्याग्रवचनात् ● सोमे उपांश्वन्तर्यामावधाराग्रहौ विधाय 'वाग्वा एषा यदैन्द्रवायवं गृह्णाती'त्यादिभिरेव ग्रहणस्य विहितत्वेनाग्रतैवात्र विधेया। सा च सर्वग्रहानुवादेन विधीयमानोपांश्वादेरप्यङ्गत्वं मा विलोपीति सर्वादावैन्द्रवायवस्य ग्रहणमित्याशङ्क्याण्व्या धारया गृह्णाती'ति धारासंयोगेन धाराग्रहाणामैन्द्रवायवाग्रत्वं पाठसिद्धम्। तद्ग्रहणानन्तरमेवानन्तरप्राप्तानामपि सङ्क्षेपेण विधानात् संक्षेपेण विधानास्य च 'ऐन्द्रवायवाग्रान् ग्रहान्गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्प्येरन्नि'ति वाक्यात्फलार्थतया विहितानां क्रत्वङ्गत्वाप्रसक्त्यातदर्थत्वादुपांश्वादेश्च धाराग्रहत्वाभावात्स्वस्थान एव ग्रहणमित्याह—

धाराग्रहाणां पूर्वः स्यात्स्वस्थाने ह्यैन्द्रवायवः।

१८

कामसंयोगे तु ● तत्रैव सङ्क्षेपेणोपक्रम्य प्रातिस्विकविधिभ्यः पूर्वम् 'ऐन्द्रवायवाग्रान् ग्रहान्गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्प्येरन्नि'ति श्रुतम्। तत्राग्रतायाः फले विधेः सर्वादावाकर्ष इत्याशङ्क्य धाराग्रहाधिकारेण तेषामैन्द्रवायवाग्रत्वं पाठसिद्धमनूद्य धात्वर्थविधिलिप्सया ग्रहणस्यैव वाक्यद्वयेन क्रत्वर्थत्वेन पुरुषार्थत्वेन च प्रतिपादनात् कामसंयोगेऽपि स्वस्थान एवैन्द्रवायव इत्याह—

धाराग्रहेभ्यः पूर्वं स्याद्गुणकामेऽपि नित्यवत्।

१९

परेषु वाग्शब्दः ● तत्रैव 'शुक्राग्रान् गृह्णीयात् प्रतिष्ठाकामः' इत्यत्रापि पूर्ववद् ग्रहणानां फले विधानात् स्वस्थान एव ग्रहणमित्याशङ्क्य पूर्ववच्छुक्राग्रत्वादेः पाठादप्राप्तत्वादनुवादायोगाद्ग्रहाणां कामे ग्रहणेषु च शुक्राग्रतेत्येवमुभयविधाने वाक्यभेदापत्तेश्च प्रकृतग्रहणाश्रिता अग्रता फलार्थेति प्रतिकर्ष इत्याह—

शुक्राग्रादौ फलार्थे तु विधित्वात्प्रतिकर्षणम्।

२०

पुरस्तस्तादैन्द्रवायवस्य ● तत्रैवाविशेषात् सर्वादौ प्रतिकर्ष इत्याशङ्क्य धाराग्रहाणां प्रक्रमेण तेषामेवाश्रयत्वेनानुवाद इति पुरस्तादैन्द्रवायवस्य शुक्रादेः प्रतिकर्ष इत्याह—

धाराग्रहेभ्यः पूर्वन्तु।

२१

सादनञ्चापि ● काम्ये शुक्राग्रत्वे उभयोरपि ग्रहणासादनयोः क्रत्वङ्गत्वेन परस्परमङ्गत्वाभावान्नान्यतरापकर्षे अन्यतरापकर्ष इति यावदुक्ता-

पकर्षः। सादनन्तु स्वस्थान एव पाठक्रमादित्याशङ्क्याऽनासाद्योत्तरग्रहणाशक्त्या सादनस्य ग्रहणाङ्गत्वान्सादनस्यापकर्ष इत्याह—

सादनञ्च तदा मतम्।

२२

प्रदानञ्चापि ● ग्रहणस्य प्रदानोपक्रमत्वात्प्रदानस्यापि प्रतिकर्ष इत्याशङ्क्य नित्येऽपि प्रयोगे सर्वग्रहणोत्तरमेव प्रदानान्मध्ये आसादनविधानाच्च अवदानग्रहणस्य प्रदानोपक्रमत्वाभावाद्गुणभूतग्रहणानुरोधेन प्रधानभूतस्य प्रदानस्यापकर्षायोगाच्च न प्रदानस्यापकर्ष इत्याह—

प्रदानन्तु स्वकाले स्यात्सादनान्नापकृष्यते।

२३

त्र्यनीकायां ● द्वादशाहे 'ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमञ्चाहः, अथेतरेषां नवानह्नामैन्द्रवायवाग्रं प्रथममहरथ शुक्राग्रमथाग्रयणाग्रमि'त्येवं त्रिः श्रुतम्। अत्राद्ययोरह्नोः रथन्तरसामत्वाद्बृहत्सामत्वाच्च तयोः ऐन्द्रवायवशुक्राग्रतयोः प्रकृतितः प्राप्तत्वेन वचनवैयर्थ्यादनुवादमात्रमिदं वचनद्वयम् अथवाङ्गान्तरपरिसङ्ख्यार्थम् अथवाग्रयणाग्रतायाः स्तुत्यर्थञ्चेत्याशङ्क्यैषां सदोषत्वात्प्रकृतितः तत्तत्समनिमित्तत्वेन प्राप्तयोरनैमित्तिकत्वार्थं वचनम्। तत्फलन्तु गर्गत्रिरात्रे द्वितीयेऽह्नि वामदेव्यवति बृहत्सामाभावेऽप्यतिदेशाच्छुक्राग्रत्वसिद्धिरित्याह—

अनिमित्ता त्र्यनीकायामग्रतात्वाद्ययोर्द्वयोः।

२४

द्वादशाहस्य ● द्वादशाहो द्विविधः—समूढो व्यूढश्च। समूढः पूर्वमुक्तः। व्यूढस्त्वैन्द्रवायवाग्रौ प्रायणीयोदयनीयौ। अथेतरेषां दशानामह्नामैन्द्रवायवाग्रं प्रथममथ शुक्राग्रमथद्वे आग्रयणाग्रे अथैन्द्रवायवाग्रमथ द्वे शुक्राग्रे अथाग्रयणाग्रमथ द्वे ऐन्द्रवायवाग्रे' इति। तत्र व्यूढस्याकामसंयुक्तवाक्येनोत्पन्नस्य 'व्यूढेन प्रजाकामं याजयेदि'ति वाक्येन फलार्थत्वेऽपि संयोगश्चक्त्वेन क्रत्वर्थत्वं पुरुषार्थत्वञ्च। तेन समूढवत्व्यूढोऽपि क्रत्वर्थ इत्याशङ्क्य दध्नेन्द्रियकामस्येत्यादौ दध्नो लोकतः प्रकरणाच्चाश्रयस्य लाभेन 'दध्ना जुहोती'ति वाक्यान्तरापेक्षाभावादुभयार्थत्वेऽपि व्यूढस्य लोकाप्रसिध्या वाक्यान्तरादेव रूपं लब्ध्वा फले विधानात्तत्र च वाक्यसंयुक्तस्य प्रकरणेनाग्रहणात्समूढविकारो व्यूढः काम्य एव न तु क्रत्वर्थ इत्याह—

व्यूढः समूढविकृतिर्गवामयनसत्रगः।

२५

एकादशिनीवत् ● गवामयने एकषष्ट्यधिकानि त्रीणि शतान्यहानि। अशीत्युत्तरं शतं पूर्वं पक्षः। तथोत्तरम्। मध्ये विषुवान्नामैकाहः। तत्र ताण्ड्यकी-

नामहःक्लृप्तिः—प्रथमं प्रायणीयमहः द्वितीयं चतुर्विशम्। ततश्चत्वारोऽभिप्लवषडहाः। एकः पृष्ठ्यः षडहः। स एको मासः। तादृशाः पञ्च मासाः। ततस्त्रयोऽमिप्लवाः षडहाः। एकः पृष्ठयः षडहः। अभिजिन्नामैकाहः। त्रयः स्वरसामानः इत्यष्टाविंशतिरहानि। आद्ये द्वे अहनीति षण्मासाः। इदं पूर्वं पक्षः। ततो विषुवान्। अथोत्तरं पक्षः। त्रयः स्वरसामानः विश्वजिदेकाहः। पृष्ठ्यः षडहः स्त्रयस्त्रिंशारम्भणः। ततस्त्रयोऽभिप्लवाः इत्यष्टाविंशतिरहानि। एकः पृष्ठयः षडहः त्रयस्त्रिंशारम्भणः चत्वारोऽभिप्लवा इति स मासः। एवं चत्वारो मासाः। ततस्त्रयोऽभिप्लवाः। आयुर्गौरिति द्वे अहनी। द्वादशाहस्य दश अहानीति मासः। महाव्रतं चातिरात्रश्च। आद्यैरष्टाविंशतिभिः सह षण्मासाः। अत्र भाष्ये द्वादशाहिकीं चोदकप्राप्तां त्र्यनीकामाश्रित्य विचारितम्—दण्डकलितवदावृत्तिरुत स्वस्थानविवृद्धिरिति। तत्रैन्द्रवायवाग्रं प्रथममहरित्यहर्ग्रहणस्य विवक्षया अग्रत्वादेरहरपूर्वप्रयुक्तत्वात्तद्धर्मत्वम्। ततश्च गवामयनेऽपि नवभिरनीकैर्नवस्वहस्स्वनुष्ठितेषु पुनरैन्द्रवायवाग्रमित्युपस्थितया दण्डकलितवदावृत्तिरित्याशङ्क्य प्रकृतावुद्दिश्यमानस्य प्रथमादेरह्ना विशेषणायोगेन प्रथममैन्द्रवायवाग्रमित्यर्थेन प्रथमयज्ञभागस्यैवोद्देश्यत्वात्तस्य चाहरात्मकत्वेनाहरित्यनुवादाद्गवामयनेऽपि प्रथमं पक्षो विंशतिदिनान्येको भाग इति नवधा विभज्याद्यभागे ऐन्द्रवायवाग्रत्वम्। द्वितीये शुक्राग्रत्वमित्येवं स्वस्थानविवृद्धिपरः। एवञ्च नवभागेष्वग्रतानिवेशेन नवमेऽन्त्यभागे आग्रयणाग्रत्वे कृते उत्तरपक्षे तत्प्रातिलोम्ये आद्यभागे पञ्चमे षाडहिके त्रयस्त्रिंशेऽहन्याग्रयणाग्रतादर्शनमुपपन्नम्। दण्डकलितेत्वाद्ययोरह्नोरैन्द्रवायवाग्रत्वं वचनादुक्तम्। ते विहाय नवाहसंधे एकोनविंशतित्र्यनीकावृत्तौ सप्ताहानि परिशिष्यन्ते। पूर्वपक्षान्ते सप्तमे ह्यैन्द्रवायवाग्रता। अष्टमो विषुवान् शुक्राग्रः। अन्त्यपक्षस्याद्यभागमाग्रयणाग्रम्। तथा चोत्तरपक्षस्यैकमहर्व्याप्य त्र्यनीकासमाप्तेः पुनः तत्करणे त्र्यनीकायाः चतुर्थं त्रयस्त्रिंशमैन्द्रवायवाग्रं स्यादित्युक्तम्। वार्तिके तु चोदकान्नामातिदेशस्य प्राबल्यादभिप्लवे ज्योतिगौरायुरित्येवमेकाहधर्मप्राप्तेरन्येष्वहस्सु रथन्तरबृहत्सामभ्यामैन्द्रवायवशुक्राग्रतयोः सिद्धत्वेन त्र्यनीकाप्राप्त्यभावादष्टमे दशरात्रधर्मप्रवृत्तेरुक्तत्वाच्च नवभागानामप्ययोगादेवं व्याख्येयमित्युक्तम्—नात्रातिदेशात् त्र्यनीकाप्राप्तिः, किन्तु गवामयने प्रत्यक्षत एव त्र्यनीका उक्ता। ऐन्द्रवायवाग्रं प्रथममित्यादि। तत्राहर्ग्रहणात्तद्धर्मत्वमग्रतानामिति दण्डकलितवदावृत्तिमाशङ्क्याहर्मात्रोद्देशे प्रथमपदवैयर्थ्यादथेति निर्देशायोगाच्च प्राथम्याद्युद्दिश्याग्रताविधेरहर्ग्रहणस्य च तत्संङ्घे गौणत्वात्स्वस्थानविवृद्धिः। एवञ्चान्त्ये पक्षे प्रातिलोम्ये सत्याद्यभागे आग्रयणाग्रतानिवेशात्पञ्चमे त्रयस्त्रिंशे आग्रयणाग्रतादर्शनमपि युक्तमाग्रयणं गृह्णीयादिति स्वस्थानविवृद्धिरित्याह—

स्वस्थानाद्वर्धतेऽनीका न दण्डकलितं मतम्।

६

छन्दोव्यतिक्रमात् । व्यूढे द्वादशाहे छन्दोव्यतिक्रमः श्रुतः 'छन्दांसि वा अन्यो-

न्यस्य लोकमभ्यध्यायन् गायत्री त्रिष्टुभस्त्रिष्टु जगत्याः जगती गायत्र्या' इति। तत्र भक्षाणां पवमानानां परिधीनां कपालानाञ्च मन्त्रार्थवादेषु गायत्र्यादिशब्देन उक्तत्वात्प्रातःसवनिको गायच्छन्दस इतिभक्षमन्त्रो माध्यन्दिने त्रैष्टुभशब्दिते सवने प्रयोक्तव्यः। तदीयस्तृतीयसवने जागतशब्दिते। तृतीयसवनिक आद्ये। एवं बहिष्पवमानो माध्यन्दिने। माध्यन्दिन पवमानस्तृतीये तृतीय आद्ये। तथा मध्यमः परिधिर्दक्षिणस्थाने। दक्षिण उत्तरे। उत्तरो मध्यमस्थाने। एवमष्टाकपालो माध्यन्दिने एकादशकपालस्तृतीये द्वादशकपाल आद्ये तथा श्येनोसि गायत्रं छन्द इति प्रातःसवनिको मन्त्रः सुपर्णोऽसित्रिष्टुप् छन्दा इत्यस्य स्थाने प्रयोक्तव्य इत्याशङ्क्यार्थे गायत्र्यादिशब्दानां गौणत्वेन तद्ग्रहे मानाभावान्मन्त्रगतानामेव शब्दानां सुपर्णोऽसि त्रिष्टुप् छन्दा इत्यादौ सुपर्णोऽसि गायत्रच्छन्दा इत्येवं व्यत्यास इत्याह--

छन्दोव्यतिक्रमो व्यूढे नार्थगो मन्त्रगस्तु सः ॥

इति शास्त्रमालावृत्तौ दशमस्य पञ्चमः पादः ॥

षष्ठः पादः

१

एकर्चस्थानि • रथन्तरादिसामानि स्वाध्यायवेलायामेकस्यामृचि गीतत्वात्क्रतावप्येकस्यां गेयानि। 'तृचे क्रियत' इति तु वर्तमानापदेशान्न विधिक्षममित्याशङ्क्य 'तत्तिसृभिः समभवदिति स्तुत्यन्यथानुपपत्या वर्तमानापदेशयुक्तस्यापि 'तृचे क्रियत' इत्यस्य लेट्परिग्रहेण विधित्वात्तृचे गानमित्याह--

तृचे सामानि गेयानि।

२

स्वर्दृशं प्रति • 'रथन्तरे प्रस्तूयमाने संमीलेदि'त्युक्त्वा 'स्वर्दृशं प्रति वीक्षेते'ति श्रुतम्। तत्र कालार्थसंयोगे लक्षणापत्तेः स्वर्दृशशब्दो वीक्षणाङ्गं वीक्षणं वा तदङ्गमित्याशङ्क्य रथन्तरे संमीलयेदास्वर्दृशमित्येवमवधिप्रतिपादकतयैकवाक्यत्वे सम्भवति वाक्यभेदायोगात्तत्र च रागप्राप्तस्येक्षणस्य स्वर्दृक्पदापेक्षाभावात्स्वर्दृक्पदस्यापि स्तावकपदैरेकवाक्यतया निराकाङ्क्षस्य वीक्षणाङ्गत्वायोगात्प्रतिशब्देन श्रुत्या उपलक्षणत्वोक्तेश्च कालार्थ एव संयोग इत्याह—

कालार्थं स्वर्दृशं प्रति।

३

पृष्ठ्यस्य युगपद्विधेः • द्वादशाहे पृष्ठ्यषडहे बृहद्रथन्तरवैरूपवैराजशाक्वररैवतानि सामानि पृष्ठस्तोत्राङ्गत्वेनोक्तानि। गवामयने तु पृष्ठ्यः षडहो

बृहद्रथन्तरसामा कार्यः' इति श्रुतम् । तत्र द्वयोर्विधानाद्वैरूपादेः निवृत्तौ बृहच्च रथन्तरञ्च वृहद्रथन्तरे ते सामनी अस्येत्येवं द्वन्द्वगर्भबहुव्रीहिणा सहितयोरभिप्ल वयोः (साम्नोः) षडहसम्बन्धाद्द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमास इति कात्यायनवचनाच्च द्वन्द्वगर्भबहुव्रीहेर्नियमाद्द्वे द्वे सामनी प्रत्यहं कार्ये इत्याशङ्क्य चोदकेनैकैकस्य निरपेक्षस्य स्तोत्रसाधनत्वावगत्या द्वन्द्वगम्यसाहित्यस्य षडहापेक्षया उपपत्तेः । अन्यथा तयोः षडहसम्बन्धे मिथः साहित्यविधाने च वाक्यभेदापत्तेः । द्वन्द्वस्य तु विभाषावचनेनानित्यत्वात्कातीयस्य तु यत्र 'वाक्त्वचप्रियः पञ्चगवधन' इत्यादौ द्वन्द्वतत्पुरुषाभावे 'वाक्त्वक्प्रियः पञ्चगोधन' इत्यापत्त्या तन्मा भूदित्येतदर्थं तत्र समासनियमार्थत्वादिह तु द्वन्द्वे तदभावे वा रूपभेदाभावाच्चोदकानुरोधेन बृहच्च रथन्तरञ्च सामास्मिन्निति त्रिपदबहुव्रीह्यङ्गीकारेण प्रत्यहमेकैकं सामेत्याह--

बृहद्रन्तरं पृष्ठ्ये एकं स्यात्षडहेऽन्वहम् ।

४

समासस्वैकादशिनेषु ● द्वादशाहे 'एकादशिनान् प्रायणीयोदयनीययोरनिरात्रयरालभेरन्नि'ति श्रुतम् । तत्र प्रायणीयोदयनीययोरुद्देश्यत्वेन तद्विशेषणस्य द्वन्द्वावगतसाहित्यस्य विवक्षितत्वात्प्रत्येकं कृत्स्नावृत्तिरित्याशङ्क्येह वाक्यान्तरोक्तैकादशिन्याः प्राधान्येनाह्नोः प्राधान्याभावात्तस्याश्च प्रकरणद्वारा द्वादशाहाङ्गत्वेनावगतायाः कुत्रानुष्ठानमित्येवं देशविशेषापेक्षायां प्रायणीयोदयनीयदेशे नियमाद्देशस्याङ्गत्वेन तद्वशादावृत्त्ययोगाच्च विभागेनानुष्ठानमित्याह—

द्वादशाहे विभज्यैकादशिनाः प्रथमान्त्ययोः ।

अनुष्ठेया इत्यध्याहारः ।

५

सर्वपृष्ठः ● 'विश्वजित् सर्वपृष्ठः' इत्यत्र षाडहिकानां रथन्तरादिपृष्ठसाम्नां विधिरिति सप्तमे उक्तम् । इहेदं चिन्त्यते । किं सर्वेषां पृष्ठदेशे निवेश उत स्तोत्रान्तर इति । तत्र षडहे तेषां पृष्ठदेशे माहेन्द्रस्तोत्रे दर्शनादिहापि पृष्ठदेशे स्युरित्याशङ्क्य, 'रथन्तरं पवमाने कुर्यादार्भवे बृहन्मध्यत इतराणि वैरूपं होतुः पृष्ठे इति । वचनात्पृष्ठे प्रयुक्तानां पुनः स्तोत्रान्तरे विधौ वैरूपस्य पृष्ठाङ्गत्वेन विधेरानर्थक्याद्वैरूपमेव माहेन्द्रे होतुः पृष्ठे (निविशते) अन्येषान्तु स्तोत्रान्तरे निवेशइत्याह—

विश्वजित्सर्वपृष्ठे स्युः पृष्ठानि स्तोत्रभेदतः ।

६

वैरूपसामा ● 'उक्थ्यो वैरूपसामे'त्यादौ विशेषाभावात्सर्वसामकार्ये साम्नोर्निवेश इत्याशङ्क्य प्रकृतावेवंविधस्य निर्देशस्य रथन्तरसामा बृहत्सामा चेति पृष्ठस्तोत्रे दृष्टत्वादिहापि तथैवावगतेः तत्रैव निवेशो नान्यत्रेत्याह—

उक्थ्यो वैरूपसामेति पृष्ठस्तोत्रे तु तद्भवेत् ।

७

त्रिवृतिसङ्ख्यात्वात् ● पूर्वं 'त्रिवृद्बहिष्पवमानमि'त्यत्र वाक्यशेषात् स्तोत्रीयानवकवाचित्वं स्थापितम् । तथापि यत्र 'त्रिवृदग्निष्टुदि'त्यादौ न वाक्यशेषस्तत्र त्रिवृच्छब्दस्य'त्रिवृद्भवति त्रिवृन्मणिरिति लोके वेदे च प्रयोगाच्छास्त्रस्य महाविषयत्वलिप्सया त्रैगुण्यवाचित्वमङ्गीकृत्य प्राकृतसर्वसङ्ख्याबाध इत्याशङ्क्य रूढ्या स्तोत्रीयानवकवाचित्वावगतेस्तया च योगबाधान्न त्रैगुण्यमर्थः । किन्तु स्तोत्रीयानवकमिति न प्राकृतसर्वसङ्ख्याबाध इत्याह—

स्तोत्रीयानवकन्त्वेव त्रिवृदग्निष्टुदादिके ॥

८

उभयसाम्नि ● यत्र संसवादौ बृहद्रथन्तरयोः समुच्चयस्तत्र चोदकवशादेकस्यैव पृष्ठार्थत्वमन्यस्य तु स्तोत्रान्तरे निवेशः सर्वपृष्ठवदित्याशङ्क्य विश्वजिति वचनादन्यत्र निवेशोऽपि तद्वदिह वचनाभावात्पृष्ठसाधनत्वेन विकल्पेन प्राप्तयोः तत्रैव समुच्चयो नान्यत्रेति चोदकबाध इत्याह—

संसवादौ द्वयोः साम्नोः पृष्ठस्तोत्रे समुच्चयः ।

९

पृष्ठये रसभोजनः ● द्वादशाहे 'त्रिवृत्पञ्चदशः सप्तदश एकविंशस्त्रिणवस्त्रयस्त्रिंश' इति विधाय श्रुतम् 'संस्थिते पृष्ठ्यषडहे मध्वाशयेद् घृतं वे'ति । गवामयने तु प्रातिलोम्येन षडह उक्तः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भणस्त्रिवृदुत्तम' इति । तत्रानुष्ठानसादेश्यलक्षणक्रमेण मध्वशनस्य त्रयस्त्रिंशाङ्गत्वात्तस्मिन्नहनि समाप्ते सति ततो मध्वशनकार्यमित्याशङ्क्य वाक्येन षडहाङ्गस्य क्रमात् त्रयस्त्रिंशाङ्गत्वायोगात्षडहान्त एव मधुभक्षणमित्याह—

प्रातिलोम्येऽपि षडहे तदन्ते मधुभोजनम् ।

१०

अभ्यासे च ● यत्र षडहस्य पुनः पुनरावृत्तिः तत्र मध्वशनस्यापि प्रतिनिमित्तमावृत्तिरित्याशङ्क्य संस्थाशब्देन व्यापारोपरमस्योक्तेः पुनः पुनः प्रवर्तमानस्य तु व्यापारोपरमाभावान्निमित्ताभावान्नावृत्तिरित्याह—

संस्थाभावान्न षडहावृत्तौ तस्य पुनः क्रिया ॥

११

आवृत्तिस्तु ● यत्र गवामयनादावभिप्लवाद्यैर्व्यवेतः पृष्ठ्यषडहस्तत्र निमित्तभूतसंस्थावृत्तेर्नैमित्तिकस्य मध्वशनस्याप्यावृत्तिरित्याह—

कालभेदाद्व्यवेते तु षडहे तत्पुनः क्रिया ।

१२

मधु न ● सत्रमहीनश्च द्वादशाहः। तत्र सत्रात्मके द्वादशाहे मध्वशनं न कार्यम्। दीक्षितानां ब्रह्मचर्यविधानात् ब्रह्मचारिणश्च मधुनिषेधात् घृताशनेन सिद्धेर्मध्वशनस्याहीनविषयत्वेनोपपत्तेश्चेत्याशङ्क्य क्रत्वर्थस्य पुरुषार्थनिषेधेन बाधायोगात्सत्रे मध्वशनं कार्यमित्याह—

क्रत्वङ्गत्वाद्दीक्षितानां सत्रेऽपि मधुभोजनम् ॥

१३

मानसमहरन्तरं ● द्वादशाहे दशमेऽह्नि मानसो ग्रहः 'अनया त्वा पृथिव्या पात्रेण समुद्रंरसया प्रजापतये त्वा जुष्टं गृह्णामी'ति। तत्र 'वाग्वै द्वादशाहो मनो मानसमि'ति द्वादशाहभेदेन व्यपदेशाद्द्वादशाहाद्भिन्नं यागान्तरमहरन्तरं चेत्याशङ्क्याङ्गभेदेन व्यपदेशभेदोपपत्तेर्ग्रहणस्य च संस्कारमात्रत्वेन यागान्तर-कल्पकत्वाभावाद्दशमेऽहनि 'मानसाय प्रसर्पन्तीति दर्शनादहरन्तरत्वे द्वादशाहत्व-बाधापत्तेश्च तस्यैव ग्रहाभ्यासोऽङ्गं न यागान्तरमिति विकृतौ तस्य प्रवृत्तिरित्याह—

दशमाहे मानसः स्यात् ग्रहोऽतो विकृतावपि ॥

१४

सत्रमेकः प्रकृतिवत् ● सत्रे प्राकृतकर्त्रेकत्वाबाधाय 'प्रत्येकमधिकारः बहुवचनन्तु बहवः कामिनः सत्रं कुर्वन्तीत्यनेनाभिप्रायेण भिन्नप्रयोगगतनाना-कर्त्रनुवादत्वेनाप्युपपन्नमित्याशङ्क्यासीरन्नित्युपादेयकर्तृसङ्ख्यया प्राकृतैकत्व-बाधाद् बहूनां कर्तृत्वमित्याह—

सत्रे कर्तृबहुत्वं स्यात्।

१५

अन्ये स्युः ● सत्रे चोदकानुग्रहाय ऋत्विजोऽन्ये स्युः 'ये यजमानास्त ऋत्विज' इति वचनन्तु यच्छब्दाद्यजमानोद्देशेनार्त्विज्यसंस्कारविधानार्थम्, न त्वार्त्विज्ये यजमानविधानार्थम्। यद्वा 'अध्वर्युर्गृहपतिं दीक्षयित्वे'त्यनेन ऋत्विजां संस्कारकत्वेन दीक्षा विधीयते। तद्योगात् ऋत्विजामेव 'येयजमाना' इत्यनुवाद इत्याशङ्क्य यजमानसंस्कारकत्वेनार्त्विज्यविधौ ऋत्विजां वा दीक्षाविधाव-प्राकृतकार्यत्वापत्तेरनुवादे च वैय्यर्थ्याद् दीक्षायां प्राप्तत्वेन च वचनस्य क्रममात्र-परत्वात्तदन्य ऋत्विक्शब्दलक्षिते कार्ये यजमानविधेः ऋत्विजां बाध इत्याह—

ऋत्विक्कार्ये च तद्विधिः।

१६

द्वादशाहस्य सत्रत्वं ● द्वादशाहस्यासनोपायिचोदनात्सत्रत्वं यजतिचोद-नाच्चाहीनत्वमिति द्वैविध्यमाह—

सत्राहीनतया द्वेधा द्वादशाहादिकं मतम्[1]।

१. द्वादशाहोऽत्र सम्मतः इति पाठः साधुः।

१६

अहीने ● एकादशरात्रे पौण्डरीके 'अयुतं दक्षिणा अश्वसहस्रमेकादशमि'ति श्रुतम्। तत्र प्रकृतौ 'द्वादशाहेऽन्वहं द्वादशशतं ददाती'ति वचनात्प्रत्यहं द्वादश शतं दत्तमितीहापि द्वादशशतस्य स्थाने सङ्ख्यासामान्यादयुतमश्वसहस्रञ्च प्रत्यहं देयम्। किञ्चाहरङ्गं दक्षिणेति प्रधानमावर्त्तते। तस्याश्च सवनीयादिवत्सुत्याकालत्वेन गृह्यमाणविशेषत्वान्न तन्त्रता सम्भवतीति प्रत्यहमेतावद्देयमित्याशङ्क्य प्रकृतावपि दक्षिणायाः कर्त्रानतिद्वारत्वात्कर्तॄणाञ्च साङ्गप्रयोगार्थमुपात्तत्वेन तदानतेरेकत्वं दक्षिणायाश्च तत्सिध्यर्थत्वेन तस्याप्येकत्वादन्वहं द्वादशशतमित्यनेन तु दक्षिणासंस्कारकत्वेन प्रत्यहं विभज्य दानमात्रविधानात्सुत्याकालत्वस्य चाप्रयोजकत्वात्तद्विकारे पौण्डरीकेऽप्ययुतमश्वसहस्रं चैकं विभज्य देयमित्याह—

पौण्डरीकेऽयुतमश्वसहस्रम्।

१७

प्रत्यहम् ● न तु सा दक्षिणा 'सर्वेषामाह्नमेके'ति सर्वाः प्रत्यहं माध्यन्दिने सवने नेया नयनस्य संस्कारकत्वात् यद्वा यस्मिन् कस्मिंश्चिद्दिने नेयेत्याशङ्क्य द्वादशाहे वचनाद्विभज्य नयनादत्रापि विभज्य नेयेत्याह—

नयनं प्रत्यहं तस्य विभज्य द्वादशाहवत्।

१८

लिङ्गेन ● विकृतौ 'मनोऋ्चः सामिधेन्यो भवन्ती'ति श्रुतम्। तत्राविशेषात्सर्वासामृचां प्राकृतपाञ्चदश्यसङ्ख्याबाधेन निवेश इत्याशङ्क्य ऋचां गुणत्वेन यावल्लिङ्गोपादाने हेत्वभावात्तत्र चाग्निसमिन्धनार्थमृचामुपात्तत्वेन त्रित्वे प्राप्ते चोदकवशात्पञ्चदश स्युर्नाधिका इत्याह—

मनोः ऋचः सामिधेन्यो न सर्वाः प्रकृतेः समाः।

१९

वाससा ● सोमे 'वाससि मिनोति वाससोपावहरती'ति वचनाद्वासस्साध्ये मानोपावहरणे इति प्राप्तिसूत्रमिदमित्याह—

मानोपावहरणे वासः।

२०

तत्राहर्गणे ● तद्वासोऽहर्गणेऽप्येकमेव तन्त्रेणेत्याशङ्क्य शकटेऽवस्थितस्य सोमस्य प्रत्यहमेकसुत्यापर्याप्तस्य वाससयुपावहरणभेदान्माध्यन्दिने सवने ग्रावस्तुते वासोदनाच्चार्थाद्वासोभेद इत्याह—

अहीने च तद्भिदा।

२१

मानं प्रति ● तान्युपावहरणवासांसि क्रये मानकाले ग्राह्याणि। प्रकृतौ मानवाससोपावहणदर्शनादित्याशङ्क्य प्रकृतौ शकटे स्थाप्यसोमाभावादर्थान् मानवाससोपावहरणम्, इह तु न तथेत्यभिषवकालेऽन्यद् ग्राह्यमित्याह—

तेषामुपावहरणकाले ग्रहणमिष्यते ॥

इति दशमस्य षष्ठः पादः।

सप्तमः पादः

१

पशोरेकहविष्ट्वा ● 'अग्नीषोमीयं पशुमालभेते'त्यत्र तद्धितेन पशोः देवतासम्बन्धाद्धृदयादीनां देवतासम्बन्धे तु जात्या व्यक्तिस्तया च हृदयादीत्येवं लक्षितलक्षणापत्तेः कृत्स्नः पशुः पुरोडाशवद्दैवतायै त्याज्यः। हृदयादिवाक्यानि त्ववदानदेशनियमार्थानि। ततश्च प्राकृतद्व्यवदानबाधेनैकादश प्रदेशेभ्योऽवदाय प्रक्षेपकालेऽवत्तानवत्तसमुदायरूपोऽवयवी देवतायै त्याज्य इत्याशङ्क्यावदानस्य प्रकृतौ हविः संस्कारकत्वेनेहापि हृदयादाववदानदर्शनेन तेषाञ्च हविष्ट्वादन्यथा हृदयादीनां देशलक्षकत्वापत्तेरवदानोद्देशेन देशक्रमयोर्विधौ वाक्यभेदापत्तेश्च विशिष्टावदानविधानादथशब्दस्य च पाठप्राप्तक्रमानुवादित्वादुत्पत्तौ देवतासंयोगस्य तु पशोर्विशसनेन नाशात्प्रदेयप्रकृतितयाप्युपपत्तेर्लक्षितलक्षणाभावात् हृदयाद्येव हविर्न तु पशुरित्याह—

न पशुर्हृदयादीनि हवींषि,

२

हविर्भेदात् ● हृदयादीनां हविष्ट्वेऽप्येकेनापि पशोर्यागसाधनत्वसिद्धेरेकं हविः, यद्वा पशुत्वजतेर्द्रव्यद्वारा देवतायोगादवयविनः तत्प्राप्तौ विशसनाम्नानादवयवद्वारा तद्योगः, अवयवी चावयवेषु व्यासज्यास्तीति सर्वैर्यागः। हृदयादि वाक्यन्तूपलक्षणम्। 'एकादश वै पशोरवदानानि तानि द्विर्द्विरवद्यती'ति तु द्व्यदाननियमार्थम्—यान्येकादश तानि द्विर्द्विरेवावदेयानि न त्रिरिति। अङ्गान्तरेषु तु वपायाः पञ्चावत्तविधानात्सकृदवदानमिति सर्वावयवसाधनको याग इत्याशङ्क्य हृदयादिवाक्यानि दृष्ट्वा पशुशब्देन तेषामेव लक्षणादन्यथा पशुशब्देन सर्वेषां लक्षणे द्वित्वविधौ तान्येव द्विर्नान्यानीत्येवं परिसङ्ख्यापत्तेरन्येषामूवध्यगोहे प्रतिपत्युक्तेश्चान्येषां हविष्ट्वायोगात्तानि द्विर्द्विरवद्यतीत्यस्य तु प्रकृतितो हृदयादौ ह्यवदाने प्राप्तेऽपि च यावत्सकृन्निवृत्यर्थं द्विरिति विधानार्थत्वान्नाङ्गान्तराणां हविष्ट्वमित्याह—

एकादशैव च।

३

इज्याशेषात् ● पशौ स्विष्टकृद्यागः प्रकृतिवत्प्रधानयागशेषेभ्यो हृदयादिभ्यः कार्यः 'त्र्यङ्गैः स्विष्टकृतं यजती'ति तु तेष्वेवानियमेन त्रयाणां नियमार्थमित्याशङ्क्येकपदेऽङ्गानुवादेन त्रित्वविधौ वैरूप्यापत्तेः 'सप्तदशारत्निरि'त्यत्र तदङ्गीकारेऽपि 'दोः पूर्वार्धस्य गुदं वै मध्यतः श्रोणिं जघनार्धस्ये'ति वाक्यशेषादेवानिज्याशेषैर्यागोक्तेस्तत्र च त्र्यङ्गैः स्विष्टकृद्यागाङ्गैः प्रतिपाद्यानां शेषाणां विषयभेदाद्बाधायोगे यागनिर्वर्तकत्वमस्तीति कृत्वाऽनिज्याशेषैरिज्याशेषाणां बाधादिज्याशेषणाञ्च यावत्सर्वावदानेन प्रतिपाद्यशेषाभावाल्लोपे प्राप्ते आज्यवदङ्गविधानमित्यनिज्याशेषैरेव याग इत्याह--

त्र्यङ्गैरिज्या शेषबाधः,

४

अध्यूध्नी ● पशावध्यूध्नीं होत्रे हरन्ती'ति श्रुतम्। तत्र 'अनस्थिभिरिडां वर्द्धयन्तीति वचनात्सर्वेषामनस्थ्नामिडायामन्तर्भावेण ऋत्विक्ष्वनियमप्राप्तौ होतुर्नियमाद्यजुर्युक्तरथवन्नेडाभक्षस्य बाध इत्याशङ्क्य 'यत्परिशिष्टं तत्समवत्तधान्यां प्रास्यति। हृदयं जिह्वा वक्षस्तन्नियमतस्तस्यै वनिष्टुमि'ति परिगणितानामिडायां प्राप्त्यानस्थिभिरित्यस्यानुवादत्वेनाध्यूघ्निप्रापकत्वाभावान्न तद्धरणानुवादेन होतृसम्बन्धविधिः किन्तु यद्धोत्रे हरन्ति तदध्युध्नीमिति भक्षार्थहोतृभागानुवादेनाध्यूघ्नेर्भक्षविधानात् त्र्यङ्गैरिज्याशेषबाधवदिडानिवृतिरित्याह—

अध्यूध्न्या होत्रैडबाधनम्।

५

अग्नीधश्च ● 'वनिष्ठुमग्नीधे हरन्ती'त्यत्र 'वनिष्ठुं प्रास्यती'ति वचनेन वनिष्ठोरिडायां प्राप्तेःयद्वनिष्ठुं हरन्ति तदग्नीधे इत्येवं नियम इत्याशङ्क्य प्रासनेऽप्यनिज्याशेषस्य वनिष्ठोरुपस्तरणादिवदिडासंस्कारकत्वेनेडात्वाभावात् पूर्ववत्प्राकृतेडाभक्षनिवृत्तिरित्याह—

वनिष्टुनाग्नीदैडस्य,

न बाधनमित्यग्रेतनेनान्वयः॥

६

अप्राकृतत्वात् ● मैत्रावरुणस्य प्रकृतावभावात्पशौ न तस्य भक्ष इत्याशङ्क्य प्रैषानुवचनयोरध्वर्युहोतृकार्ययोरनेन करणाद् भक्षाणां प्रतिपत्तित्वेऽपि कर्तृप्रीत्यर्थत्वाद्भक्षः स्यादित्याह –

न प्रशास्तुश्च बाधनम्।

७

भक्षस्य द्विभाग ● तस्य द्वयोः कर्म कुर्वतो द्वौ भागावित्याशङ्क्यैकभागेन तन्त्रेण तृप्तिद्वयसिद्धेरेको भाग इत्याह—

न द्विभागः स तन्त्रेणोभयसिद्धितः ।

८

प्रतिप्रस्थातुश्च ● वपाया हविषः श्रपणमध्वर्योः कार्यं प्रतिप्रस्थाता करोतीति सोऽपीडां भक्षयेदित्याशङ्क्य भक्षस्य तद्द्रव्यसाध्यापूर्वार्थत्वेन वपाया निःशेषहुतायाः शेषाभावात्पदार्थान्तरे तु कर्तृत्वाभावान्न भक्ष इत्याह—

वपाश्रपणकर्तापि स्थाता भक्षं न भक्षयेत् ।

एषान्तु दक्षिणतो निधाय प्रतिप्रस्थातावद्यतीति वचनं तेषामङ्गावदान-कर्तृत्वाद्भवत्येव भक्षः । इदन्त्वधिकरणं यस्यां शाखायामध्वर्योरेवावदानं तद्विषय-मिति द्रष्टव्यम् ।।

९

विकृतौ ● चातुर्मास्येषु गृहमेधीयेष्टौ 'आज्यभागौ यजती'ति श्रुतम् । तत्राष्टौ पक्षाः । प्रकृततः आज्यभागयोः प्राप्तेर्गुणान्तराभावादनुवादत्वमित्येकः । आनर्थक्यात्तु नेदम् । तेनाज्यभागौ निर्वापवत्सादृश्योपस्थित्या ऐष्टिकविधन्ते निमित्तमित्युभाभ्यामैष्टिकविध्यन्तविधिरित्यन्यः । औषधद्रव्यकत्त्वादेवैष्टिका-तिदेशसिद्धेर्नेदमपि । तेनैष्टिकविध्यन्तस्तुत्यर्थमिदमित्यन्यः । विध्येकवाक्यत्वा-भावान्नेदमपि । तेनाभ्यासात्कर्मान्तरविधिरित्यपरः । प्रसिद्धाज्यभागप्रत्यभिज्ञा-नाल्लक्षणापत्तेश्चैतदपि न युक्तम् । तेन सर्वाङ्गप्राप्तावङ्गान्तरपरिसङ्ख्यार्थं श्रवणमिति पञ्चमः । सोऽपि न, परिसङ्ख्यायांस्त्रिदोषत्वात् । तेनाज्यभागयोः श्रुतत्वात्तद्वर्जमन्यान्यङ्गानि चोदकः प्रापयति । तदपि न युक्तम्, उपकारपृष्ठ-भावेन सर्वेषां युगपत्प्राप्तौ फलतो वैय्यर्थ्यात् । तस्माच्चोदकस्योपसंहारोऽयं प्रकृतिवत्कुर्यात्किं सादृश्यमाज्यभागौ यजतीति । तदपि न, अतिदेशस्य कल्प्यत्वात् । प्रत्यक्षवचनेनैव सिद्धेश्चोदकवैय्यर्थ्याच्च सर्वथा नापूर्वो गृहमेधीय इत्याशङ्क्याज्यभागयोः प्रकृतौ श्रुतयागरूपव्यतिरेकेण प्रकरणपाठान्यथानु-पपत्या स्वापूर्वद्वारेण यागगतव्यापारस्यात्राज्यभागपदेन लक्षणयोक्तेरन्यथानर्थ-क्यापत्तेःअतश्च तदुपकारेण विकृतेर्नैराकाङ्क्ष्याच्चोदकलोपः । आमनहोमे तूप-कारस्य कल्प्यत्वादादौ क्लृप्तोपकारप्राकृताङ्गग्रहणम् । तेन क्लृप्तोपकारप्राकृ-ताङ्गानामनन्यपरपुनः श्रवणस्यापूर्वतागमकत्वादपूर्वो गृहमेधीय इत्याह—

गृहमेधीयस्त्वपूर्व आज्यभागपुनर्विधेः ।

१०

ततोऽपि यावदुक्तं स्यात् ● गृहमेधीय एवाज्यभागयोः स्विष्टकृदिडस्य च क्लृप्तोपकारस्यैकैकस्य प्रधानेन ग्रहणाद् विकल्प इत्याशङ्क्य प्रत्यक्षश्रुतत्वा-विशेषादपर्यायग्रहणात्समुच्चय इत्याह—

यावदुक्तं प्राकृतं स्यादिडास्विष्टकृदादिकम् ।

११

स्वष्टिकति ● कृत्वा चिन्तेयम् । यदाज्यभागश्रवणं परिसङ्ख्यार्थं तदाज्यभागाभ्यां सजातीयानि यागान्तराण्येव परिसङ्ख्यायन्ते न शेषकार्याणि । स्विष्टकृत्तु शेषकार्यस्य प्राशित्रादेर्निवर्तको नेति सन्देहे इडोपाह्वानदर्शनान्नेत्याशङ्क्य शेषकार्यत्वसाम्येन स्विष्टकृत् प्राशित्रादेः निवर्तकः । इडादर्शनन्तु वाचनिकमित्याह—

परिसङ्ख्यापदात्तत्र प्राशित्रादेर्निवर्तनम् ॥

१२

शंय्विडान्तत्वे ● सोमे 'शंय्वन्ता प्रायणीया सन्तिष्टते न पत्नीः संयाजयन्ती'ति श्रुतम् । तथा 'इडान्तातिथ्या सन्तिष्ठते नात्रानूयाजान् यजती'ति । तत्र शंय्विडान्तवचनेन पराङ्गनिषेधात्पुनः पत्नीसंयाजानूयाजानां निषेधद्वयं परिसङ्ख्यारूपेण लक्षणया तद्वर्जाङ्गकर्तव्यतार्थं पत्नीसंयाजान् न कुर्यादन्यानि तु कुर्यादेव । ततश्च कृत्स्नसंस्था शंय्विडान्तता च पूर्ववाक्यादिति द्वयोर्विकल्प इत्याशङ्क्य विधौ निषेधे च वाक्यभेदाद्विषमशिष्टयोः विकल्पायोगात्परिसङ्क्यापत्तेश्च स्तुतिमात्रं पत्नीसंयाजानुयाजानां निषेधद्वयमिति नित्यं शंय्विडान्तत्वमित्याह—

आतिथ्याप्रायणीयेष्ट्योरिडाशंय्वन्तमेव तु ॥

१३

प्रतिषेध ● प्रकृतौ द्वौ शंयू द्वे चेडे स्तः । तत्र शंय्विडान्तता पराभ्यां शंय्विडाभ्यां स्यात् पर्यग्निकृतोत्सर्गवचनवत् शंय्विडान्ताङ्गरीतिविधानेन परेडाप्राचामपि कर्तव्यत्वावगतेरन्यथा तेषां बाधापत्तेः । एवञ्च पत्नीसंयाजानुयाज निषेधोऽप्यर्थवान् भवति वादमत्रन्त्वनर्थकमित्याशङ्क्य सन्तिष्ठतिना व्यापारोपरमस्योक्तत्वेन तदन्ताङ्गरीतेरत्र विधेयत्वाभावाद् व्यापारोपरमरूपायाश्च नैमित्तिक्याः संस्थाया आद्ययोरुपपत्तेः पूर्वाभ्यामेव तदन्ततेत्याह—

पूर्वाभ्यां शंय्विडाभ्यान्तु तत्समाप्तिरुदीरिता ।

१४

उपसत्सु ● सोमे उपसत्सु 'अप्रयाजास्ता अननूयाजास्ता' इत्युक्त्वा 'स्रुवेणाघारमाघारयाती'ति श्रुतम् । तत्र 'स्रुवेणाघारमाघारयती'त्यस्य 'नान्यामाहुतिं पुरस्ताज्जुहुयादि'ति निषिद्धप्रतिप्रसवार्थत्वेनापूर्वार्थत्वाभावादाघारोक्तेश्चोदकप्राप्तानुवादित्वात्प्रतिषिद्धवर्जमन्यत्सर्वं कार्यमित्याशङ्क्य 'नान्यामाहुति'मित्यस्याग्निभिन्ना मुख्याहुतिर्न कार्येत्येवं प्रधानाहुतिशेषस्याघाराद्यभावबोधकत्वाभावेनाघारविधेः प्रतिप्रसवार्थत्वाभावाद् 'यज्ञस्य प्रज्ञात्या' इति च स्तुतिसम्बन्धेनाघारवाक्यस्य विधित्वादप्रयाजानुयाजवचनस्य त्वाख्याताभावेनानुवादत्वादपूर्वत्वमित्याह—

अपूर्वास्स्युश्चौपसदः स्रौवाघारपुनर्विधेः ।

१५

अवभृथे ● अवभृथे 'अप्सुमन्तावाज्यभागौ यजती'ति श्रुतम् । तथा 'अप बर्हिषः प्रयाजान् यजति अपबर्हिषावनुयाजौ यजती'ति । तत्राज्यभागविधेरप्सुमत्तागुणविधानार्थत्वेनापूर्वतागमकत्वाभावाद्बर्हिः संज्ञकं प्रयाजं बर्हिः संज्ञकं चानूयाजं वर्जयित्वाऽन्यत्सर्वं कार्यमित्याशङ्क्य 'अप्स्वग्ने सधिष्ठव' इति मन्त्रलिङ्गादेवाप्सुमत्तायाः सिद्धत्वेनापूर्वतार्थं यागयोरेवात्र विधेयत्वाद् 'अप बर्हिष' इत्यस्यापि बर्हिर्व्यतिरिक्तप्रयाजविधानार्थतेति वाक्यभेदेन बर्हिः प्रतिषेधार्थत्वाभावादपूर्वा औपसद इत्याह—

अपूर्वास्युश्चौपसद स्रौवाघारपुनर्विधेः ॥

१६

विरोधिनामेकश्रुतौ ● यत्र प्राकृतवैकल्पिकानां मध्ये विकृतावेकं श्रूयते यथा 'खादिरो यूपः यवमयः पुरोडाशः' इत्यादौ तत्र खादिरादेरतिदेशप्राप्तत्वेन वचनस्य तद्विधायकत्वाभावात् पालाशादिनिवृत्यर्थत्वे तु त्रिदोषपरिसङ्ख्यापत्तेरनुवादमात्रं वचनमिति यथाचोदकं विकल्प इत्याशङ्क्य प्रकृतिवद्विकृतावपि वचनं नियमार्थम् । ततश्चान्यबाध इत्याह—

वैकल्पिकयवादेऽस्तु नियमार्थः पुनर्विधिः ।

१७

सर्वासाञ्च ● श्यामाकादौ व्रीह्यादेः शास्त्रप्राप्तस्य बाधायोगात्तिद्वर्जंप्राप्तिनिराकरणाच्च 'न तौ पशौ करोती'तिवद्विकल्पः समुच्चयो वेत्याशङ्क्योपकारद्वाराङ्गानां युगपत्प्राप्तावपि प्रत्यक्षश्यामाकादिविध्यालोचनेन चोदकस्य तद्व्यतिरिक्ताङ्गपरत्वात् अन्यथा श्रुतस्य पाक्षिकत्वापत्तेः विकल्पस्य सामान्यस्य च प्राकृतस्य प्रत्यक्षेण विशेषेण च तुल्यबलत्वाभावेन विकल्पायोगान्नैरपेक्षश्रुतेरेकेन कार्यसिद्धेश्च समुच्चयायोगाद्बाध इत्याह—

विकल्पाभ्युच्चयौ न स्तः श्यामाकादि श्रुतं यदा ।

१८

तथैवार्थ विकारे ● विकृतौ 'औदुम्बरो यूपो भवति' इत्यत्र द्वयोरपि सह नियोजनसम्भवादविरोधान्न युक्तो बाधस्तेन समुच्चय इत्याशङ्क्य समुच्चये नैरपेक्ष्यबाधाद्यूपानुवादेनौदुम्बरत्वविधानाच्च बाध इत्याह—

खादिरस्याभ्युच्चयश्च यूपे नौदुम्बरे भवेत् ।

१९

विकृतौ त्वनियमः स्यात् ● यत्र प्राकृतं वैकल्पिकं विकृतौ गुणान्तरसहित-

मुत्पत्तिवाक्ये श्रुतम् यथा 'सोमारौद्रं चरुं शुक्लानां व्रीहीणामि'ति तत्र व्रीहि ग्रहणस्य शुक्लादिगुणसम्बन्धार्थत्वेनाविधायकत्वान्नैव बाधस्तस्माद् विकल्प इत्याशङ्क्यैकवाक्ये यागस्य व्रीह्युद्देशेन गुणस्य च विध्ययोगाद्द्रव्यगुणविशिष्ट-कर्मविधानाद्यवबाध इत्याह—

शुक्लव्रीहिश्रुतौ बाधो यवानां न विकल्पनम् ।

२०

यथा श्रुतीति चेत् ● दैक्षे पशौ 'यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्ये'ति श्रुतम् । तत्र पञ्चावत्तस्य वपोद्देशेन विधानाद्वपापूर्वस्य चाङ्गा-पूर्वेभ्यो भिन्नत्वाच्चमसन्यायेन वपायामेव पञ्चावदानमित्याशङ्क्य वपामुद्दिश्य पञ्चत्वावदानविधौ वाक्यभेदादवत्तोद्देशेनैव पञ्चत्वं विधेयं नावदानम्, अति-देशात्प्राप्तेः । ततश्च सर्वावत्तोद्देशेन पञ्चसङ्ख्याविधानादुद्दिश्यमानस्य च वपाविशेणत्वासम्भवात् हृदयाद्यवदाने सर्वत्र पञ्चावत्तमिति भाष्यकारः । वार्तिके तु पञ्चावत्तेत्येकपदे त्र्यङ्गन्यायेनोद्देश्यविधेयभावायोगात्पञ्चावदानमेव सकृत् चतुरवदानस्थानापन्नमपूर्वं विधीयते । ततश्च वपामेवोद्दिश्य विधेयमुद्दे-श्यान्तराभावात् । ततश्चमसन्यायेनोद्देश्या वपा विवक्षिता । तदपूर्वञ्चाङ्गा-पूर्वाद्भिन्नमिति मैत्रावरुणादिश्रयणवद्वपायामेव पञ्चावदानमित्याशङ्क्यापूर्वा-वदानान्तरविधावपि तस्य वपामात्रपरत्वे हृदयादौ 'द्विर्हविषोऽवद्यती'त्यवदानस्य चोदकात्प्राप्तत्वेन 'तानि द्विर्द्विरवद्यती'ति वाक्यवैय्यर्थ्यापत्तेः सर्वविषयमेव पञ्चावदानम् । न च पशोरेकहविष्ट्वमित्यप्राकृतावदानसम्बन्धेन हृदयादेर्ह-विष्ट्वस्य सिद्धान्तितत्वादपूर्वावदानसम्बन्धे तद्भङ्गापत्तिः । तत्र प्राकृतशब्दस्य प्राकृततुल्यकार्यपरत्वेन व्याख्यानात् । तेन वपाग्रहणस्याविवक्षया तस्य शकला-द्युपेतं पञ्चावत्तं सर्वेषु पश्वङ्गेष्वित्याह—

पञ्चावत्तं वपास्थं यत्सर्वपश्वङ्गगामि तत् ।।

इति दशमस्य सप्तमः पादः

अष्टमः पादः

१

प्रतिषेधे प्रदेश ● पितृयज्ञे 'नार्षेयं वृणीते' 'न होतारमि'ति श्रुतम् । तथा न्यत् श्रुतं 'यजतिषु ये यजामहं करोति नानूयाजेष्वि'ति । तत्र 'नानूयाजेषु न होतरमि'त्यत्र श्रुत्यर्थलाभाय प्रतिषेधत्वमवश्यं वाच्यम् । अन्यथा पर्युदासत्वे नञनूयाजशब्दाभ्यां यागान्तराणि नञ्वृणातिभ्याञ्च वरणव्यतिरिक्तचोदक-प्राप्ताङ्गातराणि लक्ष्येरन् । किञ्च नञोऽनूयाजशब्दसम्बन्धे नञ् समासप्रसङ्गः । 'नित्यो ह्यस्य सुबन्तसङ्गे समास' इति वार्तिकात् । तेनाख्यातसम्बन्धो सन् नञ-

निषेधार्थः। किञ्च यथा 'अब्राह्मणमानयेति समास एव पर्युदासेन क्षत्रियादि रवगम्यते न तु ब्राह्मणं नानयेति वाक्ये। तेन तु प्रतिषेध एव गम्यते। एवमिहाप्यननूयाजेष्विति समास एव सति पर्युदासोऽवगम्यते न तु वाक्ये। ततश्चातिदेशतोऽनारभ्यवाक्याच्च प्राप्तेरुपजीव्यत्वाद्वरणयेयजामहयोर्विकल्पः। ननु प्रतिषेधत्वेऽपि विधेः सामान्यविषयत्वान्निषेधस्य च विशेषविषयत्वात् प्रत्यक्षत्वाच्चातुल्यबलत्वेनैकार्थत्वाभावे सति बाध एव युक्तो न विकल्पः, यदाहवनीयवत्। तथा कल्प्यस्य चोदकस्य प्रत्यक्षस्य च सुतरामयुक्तो विकल्पः। किन्तु शरवद्बाध एवोचित इति चेत्—मैवम्, यत्र विशेषस्य प्रत्यक्षस्य च शास्त्रस्य सामान्यशास्त्रेण कल्प्यचोदकेन च विना यत्रात्मलाभः यथा शरपदादिषु। शरा हि कुशकार्यमपेक्षन्ते न तु कुशान्। पदविधिरपि होममात्रापेक्षो नाहवनीयप्राप्त्यपेक्षः। तेन तत्र कुशाहवनीयप्राप्तेः प्रागेव शरे पदे च विहिते सति न कल्प्यचोदकात्सामान्याद् विशेषलक्षणया प्राप्तिररिति बाधः। इह तु निषेधस्य प्राप्त्यपेक्षत्वादवश्यं निषेध्येन प्राप्तिः प्रतीक्षणीया, सा च शास्त्रीयेति 'न तौ पशौ करोति' इतिवद्विकल्प इत्याशङ्क्य प्रतिषेधत्वेऽष्टदोषदुष्टविकल्पापत्तेः विकल्पापक्षेयात्यन्ताविद्यमानमिथ्यात्वकल्पनात्करणाकरणाभ्यामदृष्टद्वयापत्तेश्चैकया लक्षणया पर्युदासत्वमेव ज्यायः। न च नञ्समासापत्तिः, विभाषावचनात्। यत्तु वावचनानर्थक्यं तद्व्याससमासयोरैकार्थ्यादयुक्तम्। तेनासपिण्डां परिणयेदित्यादौ समासेऽपि निषेध इव वृत्तिवाक्ययोरैकार्थ्यात् समासलभ्यः पर्युदासोऽसमासेऽपि गम्यत इति नानुपत्तिः। एवञ्च चोदकानारभ्यवादयोरेवायं शेषः। होतृवरणभिन्नं प्रकृतिवत्कुर्यात्, अनुयाजभिन्नेषु यज्ञेषु ये यजामहं कुर्यादिति। पूर्वत्र विधेयाङ्गविशेणं पर्यदासः। उत्तरत्र तूद्देश्ययज्ञविशेषणमिति होत्रार्षेयवरणयोर्न विधिर्न वा निषेधः। एवमनुयाजेषु ये यजामहस्य। ततश्च विध्यभावादेवाननुष्ठाननिषेधाभावाच्च विकल्प इति सिद्धमिति पर्युदासत्वमित्याह—

न होतारं पर्युदासो नानूयाजेषु च स्मृतः।

२

अपूर्वे चार्थवादः ● दर्शपूर्णमासयोराज्यभागौ विधाय श्रुतं 'न तौ पशौ करोति न सोम' इति। तत्र समासाभावान्न सोम इत्ययं प्रतिषेधः। विकल्पभयाद्वा पर्युदासः। यद्यपि सोमस्यापूर्वत्वेनाज्यभागप्राप्त्यभावात्प्रतिषेधः पर्युदासो वा न सम्भवति, तथाप्यङ्गेष्टिद्वारा सोमस्याज्यभागाभ्यां सम्बन्धोऽस्तीति निषेधः पर्युदासो वेत्याशङ्क्य निषेधत्वे सोमाङ्गेषु निषेधादग्नीषोमीयेऽपि निषेधसिद्धेस्तत एव तद्विकारेषु निरूढादिषु प्राप्त्यभावान्नतौ पशावि'ति निषेधानर्थक्यापत्तेः सोमशब्दे लक्षणापत्तेर्वाजपेयवत्षष्ठ्यभावादाधारत्वबाधाच्चार्थवादोऽयं 'न सोम' इति। 'न तौ पशा'वित्यत्र तु प्रकृतौ पशुस्थार्थवादनुपस्थित्या एकवाक्यतायोगेनाज्यभागावर्जं प्रकृतिवत्कुर्यादित्येवं शेषविषयस्य पर्युदासस्य दर्शपूर्णमासयोस्तु नित्यमपशुत्वेन तदव्यभिचारेऽनर्थकं विशेषणमिति रीत्या

अपशावाज्यभागौ कार्याविर्त्यवं शेषिविषयस्यापि पर्युदासस्यायोगात्प्रतिषेधत्वम् । तत्र चोपजीव्यत्वेनातिदेशस्य प्रबलत्वमुपजीवकत्वेन तु निषेधस्य दुर्बलत्वम्, कल्प्यत्वाच्चातिदेशस्य दुर्बलत्वम् । प्रत्यक्षत्वाच्च निषेधस्य प्रबलत्वमिति तुल्यबलत्वाद्विकल्प इत्यभिप्रेत्याह—

न तौ पशौ निषेधः स्यान्न सोमे तु स्तुतिर्मता ।

३

शिष्ट्वा तु ● यत्रैकमर्थं शिष्ट्वा तद्विषय एव यत्र निषेधः श्रूयते-यथा 'अतिरात्रे षोडशिनं गृह्णाति नातिरात्र' इति तत्र नात्र यानमितिवत् सामान्य-विध्यभावेन पर्युदासत्वायोगान्न सोम इतिवच्चार्थवत्वायोगान्निषेधत्वमवश्यं वाच्यम् । ततश्च करणाकरणयोर्विकल्पः । अकरणेऽपि क्रतुसिद्धौ विध्यर्थवत्वा-यानुष्ठाने फलभूयस्त्वमित्युभयोरुपपत्तिरित्याह—

निषेधो नातिरात्रे स्यात्,

४

न चेदन्यं ● क्वचिन्नञो विध्येकवाक्यत्वेऽर्थवादार्थत्वम् । यथाग्निहोत्रे 'जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा दे'त्युक्त्वा 'अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चे'त्युक्तम् । ततः पुनः'पयसाग्निहोत्रं जुहुयादि'ति श्रुतम् । तत्रानाहुतिरित्यनेन जर्तिलयवाग्वाः निषेधात्षोडशिवद्विकल्पः । पयोविधिस्तु वाक्यान्तरमित्याशङ्क्य पयोविधिनैव विकल्पसिद्धेस्तदर्थमनाहुतिरिति निषेधवैय्यर्थ्याद्वाक्यभेदायोगाच्च जर्तिलादिनिन्दाद्वारेण पयःस्तुत्यर्थोऽयमनाहुतिवादः । यदाचैवं तदा जर्तिलादि-विधिरपि तन्निन्दाद्वारेण पयसः प्रशस्ततरत्वं ज्ञापयन्नेकवाक्यत्वादर्थवाद एव न विधिः । तेन पयो मात्रं विधीयते अन्यस्तु सर्वोऽर्थवाद इत्याह—

अर्थवादस्त्वनाहुतिः ।

५

पूर्वेश्च तुल्य ● आधाने 'होतव्यमग्निहोत्रं न होतव्यमिति मीमांसत' इति । तथा चातुर्मास्येषु 'अभिघार्यास्त्रैयम्बका नाभिधार्या इति मीमांसत' इति श्रुतम् । तत्र होमाभिघारणयोर्विधेयत्वात्प्रतिषेधाच्च विकल्पः । न हि निषेधो मीमांसाविशेषणम् । विधिर्हि प्रथमातिक्रमे कारणाभावादाद्य एव ततश्चैकविषय-त्वापत्तेर्मीमांसानुपपन्ना स्यात् । विकल्पे त्वन्यतरपक्षपरिग्रहायानुष्ठानदशायां विचार इति तदभिप्रायेणानुवादो मीमांसाशब्दः । यद्वा 'यस्योभयमि'त्यादौ यच्छब्दादेर्विधिप्रतिबन्धकत्वमुक्तं न मीमांसान्वयस्य, तेन तदन्वयेऽपि विधित्वं भविष्यति । अन्ते च 'तूष्णीं होतव्य'मिति तूष्णीम्भावगुणविधानार्थं वचनम् । किञ्च 'रुद्रायास्ये पशूनि'त्यभिघारणनिन्दा कथं स्तुतिः स्यात्, विपरीतत्वात् तस्मात् प्रतिषेधशेष एवायं अन्तेऽभिधार्या इत्यनुवादः । तेन विकल्प इत्याशङ्क्य इतिकरणश्रुत्या परामृष्टयोर्विधिनिषेधयोः मीमांसाविशेषणत्वस्य श्रौतत्वेन

स्वातन्त्र्यायोगात्स्वतन्त्रस्यैव च विध्यन्वयार्हत्वाद् विधिशक्ति प्रतिबन्धकत्वं मीमांसान्वयस्यावश्यं वाच्यम् । मीमांसा च स्तुत्यर्था निन्दाप्यभिधारणस्तुतिः इत्थमिदमभिधारणं प्रशस्तं यत्समस्तमपि दोषमनादृत्य हविष्ट्वाय कर्तव्यमिति । तेन उपक्रमे होमाहोमयोरभिधारणानभिधारणयोर्मीमांसाविशेषणत्वेन स्तुत्यर्थत्वेऽप्यन्तेऽनन्यपरश्रवणस्य विध्यर्थत्वेन सर्वस्य तच्छेषत्वान्नित्यमनुष्ठानं न तु विकल्प इत्याह—

त्रैयम्बका नाभिधार्या अभिचार्या स्तुतिर्मता ।

६

उपवादश्च तद्वत् ● आधाने 'वारवन्तीयं गायती'त्यादि सामगानं विधाय 'न ब्रह्मा समानि गायेदिति श्रुतम् । तत्र ब्रह्मणो गानाप्राप्तेर्निषेधोऽनुवादः स्तुत्यर्थः । तेन नित्यं सामगानमित्याशङ्क्यानुवादत्वे वैय्यर्थ्याद्गाननिषेध एवायम् ब्रह्मशब्दस्तु ब्राह्मणोद्गातृपरस्तेन निषेधाद् विकल्प इत्याह —

न ब्रह्मेति निषेधः स्यादाधाने साम पाक्षिकम् ।

७

दीक्षितस्य दानहोम ● सोमे 'दीक्षितो न ददाति न जुहोति न पचती'ति श्रुतम् । तत्र जुहोतिददातिश्रुत्या सन्निधिबाधेन प्रकृतस्यातिदेशिकस्य पुरुषार्थस्य च होमादेरुक्तेः सर्वेषामेव पुरुषार्थानां क्रत्वर्थानाञ्च निषेधः, यद्वा आहृत्य विहितानां 'ग्रहैर्जुहोती'त्यादीनां बलवत्वात्तद्वर्जमातिदेशिकानां चतुरवत्तहोमाग्निहोत्रादीनां निषेधः इत्याशङ्क्य विकल्पप्रसङ्गेन क्रत्वर्थनिषेधायोगात्पुरुषार्थानां निषेधेऽपि विकल्पस्यापरिहार्यत्वादग्निहोत्रादिविधिशेषोऽयं पर्युदास अदीक्षितोऽग्नि-होत्रादि कुर्यादग्निहोत्रादिभिन्नं दीक्षितः कुर्यादिति वा । न च पर्युदासत्वे तत्तद्विधीनामसन्निधानात्कथं तदेकवाक्यता 'द्वादशाहीनस्ये'त्यादि दूरस्थाङ्गविधीनामिव वाक्यैकवाक्यतासम्भवादिति भाष्यकारः । वार्तिके तु 'न तौ पशा'वित्यत्र वाक्यैकवाक्यतादूषणेन पदैकवाक्यताप्रतिपादनात् पर्युदासेन दूरस्थैकवाक्यता सम्भवतीति निषेध एवायमित्युक्तम् । न च विकल्पः, ऐकार्थ्याभावात् । नह्यभावपि विधिप्रतिषेधौ पुरुषार्थौ । किन्तु पुरुषार्थतया विहितानामग्निहोत्रादीनां जीवने निमित्ते क्रतुमध्येऽपि प्राप्तौ तदर्थो निषेधः । क्रतोस्त्र्युपगमनिषेधस्य क्रत्वर्थत्ववत् । अन्यथा पर्युदासे लक्षणया श्रुतिबाधः प्रकरणबाधश्च स्यात् । नन्वेवमपि नाग्निहोत्रहोमादिनिषेधः सम्भवति । निषेध्यं हि दीक्षितं प्रति शास्त्रतः प्राप्तं न वा । आद्ये प्राप्तेःशास्त्रीयत्वात्कुतो न विकल्पः अन्त्ये तु प्राप्त्यभावे निषेधायोगात् । तत्र केचित् । नायं क्रियानिषेधः उक्तदूषणादेव, किन्तु पुरुषार्थमग्निहोत्रं विहितं तत्र दीक्षितोऽदीक्षितश्च कर्ता प्राप्नोति । तत्र दीक्षितः कर्तृत्वेन निषिध्यते यज्जुहुयात्तद्दीक्षितो नेति । तेन न विकल्पादिदोषापत्तिः । एवं श्राद्धे 'मांसं न दद्यादि'त्यादावपि द्रव्यनिषेध

एवेत्याहुः। तत्र कर्तुरपि प्राप्तस्य निषेधः अप्राप्तस्य वा। आद्ये तथैव विकल्पापत्तिः। अन्त्ये तु प्राप्त्यभावे निषेधायोगात्। तेन तर्कितप्रतियोगिकां प्राप्तिमालोच्य सामान्यविशेषयोरिव सामान्यतो जातं ज्ञानं बाध्यते न शास्त्रम् विधेः सावकाशत्वाच्च न विकल्पः। अतो निषेध एवायमित्याह—

दीक्षितो न जुहोतीति क्रत्वर्थं स्यान्निषेधनम्।

८

अविशेषेण ● इदानीं सामान्यविशेषयोर्बाधश्चिन्त्यते। तत्र 'यदाहवनीये जुहोती'ति सामान्यशास्त्रस्यापि विशेषशास्त्रवत् प्रत्यक्षत्वेन 'पदे जुहोती'त्यादौ प्रवृत्तेर्विकल्पः। न ह्यत्र श्रुतिलिङ्गादिवदाकाङ्क्षोच्छेदेन बाधः न वातिदेशवद्बाधः। तस्य ह्यानुमानिकत्वात्प्रत्यक्षेण शरादिशास्त्रेण विरोधे सति तद्विषयं परिहृत्य विषयान्तरकल्पनाद्युक्तः शरैः कुशानां बाधः। इह तु शास्त्रद्वयेऽपि जुहोतेर्जातिवाचित्वस्य व्यक्तिलक्षणायाश्च तुल्यत्वाद्विकल्प इत्याशङ्क्य सामान्येन श्रुतस्याहवनीयस्य यावत्पदहोमादौ लक्षणया प्राप्तिस्तावद्विशेषशिष्टस्य पदस्य श्रुत्या शीघ्रं विधानात्सामान्यशास्त्रस्य विशेषशास्त्रानाक्रान्तविषयपरत्वेन षोडशिवदैकार्थ्याभावाच्च न विकल्प इत्याह—

सामान्याहवनीस्य विशेषाद्बाधकं पदम्।

एवं अग्नीषोमीयं पशुमालभेत इत्यनेन 'न हिंस्यात्' इति सामान्यस्य बाधो द्रष्टव्यः। यत्तु साङ्ख्यतत्त्वकौमुद्यामुक्तं पशुहिंसायाः क्रत्वङ्गत्वान्निषेधस्य च पुरुषार्थत्वाद्भिन्नविषयत्वान्न बाधो युक्तः समानविषयत्वाभावेन बाधायोगात्। निषेधातिक्रमाद्दोषो नरकञ्च भविष्यति। क्रतुफलं स्वर्गश्चेति द्वयोरविरोधादिति। तत्र क्रतोरपि पुरुषार्थत्वेन तद्द्वारा समानविषयत्वेन विरोधात्। न हि पुरुषोपकारं विना क्रतुरस्ति। तेन विना प्रवृत्त्ययोगात्॥

९

अप्रकरणे तु ● 'सप्तदश सामिधेनीरनुब्रूयादि'त्यनारभ्य श्रुतं साप्तदश्यं प्रकृतौ पाञ्चदश्येन बाधितं विकृत्यर्थमिति स्थितं तृतीये। विकृतिष्वपि पशुमित्रविन्दादौ पुनः श्रुतं साप्तदश्यम्। तत्र तत्तद्विकृतिप्राकरणिकं क्लृप्तोपकारसामिधेनीनां पुनः श्रवणं गृहमेधीयवदपूर्वतापरम्। साप्तदश्यन्त्वनारभ्यप्राप्तानुवादस्तेनान्याङ्गबाध इत्याशङ्क्य साप्तदश्यस्यैवात्र विधेयत्वेन सामिधेनीनां विधेयत्वाभावात्तत्र चानारभ्यवादेन साप्तदश्यप्राप्तावपि तस्य सामिधेनीमात्रसम्बन्धेन क्रतुसम्बन्धाभावाद्यावत्सामिधेनीसम्बन्धबलेन क्रत्वङ्गत्वं कल्प्यते तावत् प्राकरणिकैर्वाक्यैः क्रतुविशेषसम्बन्धे कृते सति नैराकाङ्क्ष्यान्नान्यक्रतुसम्बन्ध इति साप्तदश्योपसंहारार्थानि तत्तद्विकृतिस्थप्राकरणिकानि वाक्यानि नापूर्वत्वं गमयन्तीत्याह—

पश्वादौ सामिधेनीस्थ साप्तदश्योपसंहृतिः।

१०

मन्त्रेष्ववाक्यशेषत्वम् ● 'स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविः प्रदीयते' इत्यनारभ्याधीतस्य स्वाहाकारस्य दर्विहोमेषु 'पृथिव्यै स्वाहान्तरिक्षाय स्वाहे'ति पुनः श्रवणं पूर्ववदुपसंहारार्थम् तेनान्यहोमे स्वाहाकारबाध इत्याशङ्क्य पुनः श्रवणस्य वैकल्पिकवषट्कारनिवृत्या नियमार्थत्वान्नान्यहोमे स्वाहाकारबाध इत्याह—

स्वाहाकारो दर्विहोमे नोपसंहारमर्हति ।

११

अग्न्यति ग्राह्य ● 'य एवं विद्वानग्निं चिनुते' इत्यनारभ्याधीतोऽग्निः 'अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थेन तमतिरात्रेणे'त्यादिना प्रकृतौ विकृतौ च क्रत्वङ्गत्वेनोक्तः । तथातिग्राह्या नाम ग्रहाः प्रकृतौ श्रुताः । विकृतिष्वप्युक्थ्ये गृह्णीयाद्विश्वजिति सर्वपृष्ठे ग्रहीतव्या' इति श्रुताः । तत्र यस्यामेव वेलायां प्रकृतावग्निर्विधीयते तस्यामेव विकृतावपीत्यक्लृप्तोपकारत्वान्नाज्यभागवदपूर्वपरत्वं वैकृतविधौ सम्भवति तेन चोदकादग्न्यतिग्राह्यस्य विकृतौ प्राप्तौ क्वचित्पुनः श्रुतिवैय्यर्थ्यात्तदर्थवत्वायोपसंहारोऽयं साप्तदश्यवत् । तेन यत्र षोडशिवाजपेयादावग्न्यतिग्राह्यं नोक्तं तत्र तन्न स्यादित्याशङ्क्य चोदकस्यैकत्वेनाङ्गान्तरवदस्यापि चोदकतः क्वचित्पुन. श्रुतेस्तु सामानविध्यसिध्यर्थं तेनातिदेशानिवारकत्वात्समानविधानस्य च 'श्येनचितं चिन्वीत स्वर्गकाम'इत्यादिगुणकामप्राप्त्यर्थत्वाद्विकृत्यन्तरे तु पुनः श्रवणाभावेन सामानविध्याभावाद्गुणप्रवृत्तावप्यङ्गभूताग्नेश्चोदकात्प्राप्तेरस्त्यतिदेशः । नन्वनारभ्य विहितोऽग्निः प्राकरणिकोत्तरवेदिविरोधात्प्रकृतौ न निवेशं लभते । अतः प्रकृतावभावात्कथं तस्य विकृतावतिदेशः । तेनोपदेशेनैवास्य विकृत्यर्थत्वमिति यत्र वाजपेयादौ नोपदेशस्तत्र नाग्निः चेतव्यः, यद्वा प्राकृतोत्तरवेदिविकल्पनिवृत्यर्थो विकृतावग्निनियमः पशौ जाघनीनियमवदिति चेत् । नैवम्, 'अथातोऽग्निमि'ति वाक्येन प्रकृतावप्यग्निविधानात् । न च प्रकृतेः प्राकरणिकोत्तरवेद्यवरुद्धत्वात्तत्राग्निष्टोमपदं विकृत्यग्निष्टोमाभिप्रायमिति वाच्यम् । प्रकृत्यन्तरे चाग्निष्टोमत्वस्यानन्यापेक्षस्यानेनोक्तेः विकृतीनान्त्वतिदेशापेक्षमग्निष्टोमत्वमिति नानेन वाक्येन तस्याभिधानम् । नापि प्राकृतोत्तरवेदिविकल्पनिवृत्यर्थो नियमः । जाघनीवत्प्रकरणे विधानाभावात् । यदि त्वग्निर्द्विरात्रादीनां प्रकरण आम्नायेत तत इदं वचनं नियमार्थं भवेत् । इदन्त्वनारभ्याधीतम् । तेन प्रकृतिसमकालमेव विकृतावप्यग्निविधानात् समानविधानस्य च गुणकामप्राप्तिप्रयोजनत्वात्षोडशिवाजपेयादावतिदेशप्राप्तस्याग्नेरुत्तरवेद्या सह विकल्प इत्याह—

विकृतावग्न्यतिग्राह्यमतिदेशात्प्रवर्तते ।
तच्छ्रुतिर्गुणकामार्था तेन वेद्यादि कल्प्यते ।।

१३

उत्पत्तितादर्थ्यात् ● इष्टौ 'उपस्तृणाति द्विर्हविषोऽवद्यति अभिघारयती'ति विधाय श्रुतं 'चतुरवत्तं जुहोती'ति। तत्र द्वितीयानिर्देशेन होतव्यस्यैव चतुःखण्डनसंस्कृतस्य हविष्ट्वावगमादुपस्तरणाभिधारणयोस्त्वधिकत्वाद्व्यवदानचतुरवदानयोर्विकल्प इत्याशङ्क्योत्पत्तौ यागस्य प्राप्तत्वेऽपि होमाप्राप्त्या तदनुवादेन चतुरवत्तविधानायोगाद्विशिष्टहोमान्तरविधाने तु गौरवान्न होमोद्देशेन चतुष्ट्वविधिः किन्तूपस्तरणादिवाक्यप्राप्तचतुरवत्तानुवादेन होमस्तदङ्गत्वेन विधीयते प्राप्तिश्च उपस्तृणाति द्विर्हविषोऽवद्यती'त्यादिवाक्यैरिति हविषो द्विरेवावदानमित्याह—

हविर्द्विरवदानाच्च चतुष्ट्वं नाङ्गमिष्यते।

१४

साप्तदश्यवन्नियम्येत ● कृत्वा चिन्तेयम्। यदा चतुष्ट्वं होमाङ्गं तदोपस्तरणाभिधारणयोर्द्व्यवदानस्य चौषधे सान्नाय्ये च साप्तदश्यवदुपसंहारादन्यथा सान्नाय्यौषधयोरुपस्तरणादिविधिसिद्धस्यैव चतुष्ट्वस्यानुवादः। उपांशुयाजादौ च विधिरिति विध्यनुवादविरोधान्नोपांशुयाजे चतुरवदानमित्याशङ्क्य विशेषविहितस्य चतुरवत्तस्य सर्वहोमाङ्गत्वाद्धविःसंस्कारकयोस्तूपस्तरणाभिधारणयोः चतुरवत्तार्थत्वाभावेनाज्यादौ हविष एव चतुरवदानादुपांशुयाजेऽपि चतुरवादानसिद्धिरित्याह—

चतुर्गृहीतमाज्यस्योपांशुयाजे भवेद्धविः।

परमार्थतस्त्ववत्तानुवादेन होमस्य विधिः नानवत्तस्य। तथा चोपांशुयागे 'चतुर्गृहीतं जुहोती'ति वाक्याच्चतुर्गृहीतसिद्धिरिति केचित्। तत्रोपांशुयाजे होमाप्राप्तौ तदनुवादेन चतुर्गृहीतविधानायोगात् तेन 'चतुर्जुह्वां गृह्णाति चतुर्ध्रुवायां सर्वस्मै वा एतद्यज्ञाय गृह्यते' इत्यादि वाक्यैरुपांशुयाजेऽपि चतुर्ग्रहीत सिद्धौ तत्संस्कारकत्वेन चतुर्गृहीतवाक्ये होमविधिः। न च वाक्यद्वयवैय्यर्थ्यम्। चतुरवत्तवाक्यसन्निधानेन पुरोडाशपरत्वादेतस्य त्वनारभ्याधीतत्वेनाज्यहोम परत्वात्॥

१५

पुरोडाशाभ्यां ● इष्टौ 'पुरोडाशाभ्यमेवासोमयाजिनं याजयेद्यावेतावाग्नेयश्चैन्द्राग्नश्च सान्नाय्येन तु सोमयाजिनमि'ति श्रुतम्। किमयं पुरोडाशयोर्विधिरुतानुवाद इति सन्देहः। विधित्वे च पञ्च पक्षाः। अधिकृतोपदेशोऽयं पुरोडाशाभ्यां सोमयाज्येवाधिक्रियते, न सान्नाय्येनेति। तत्रैव सोऽधिकारी न सान्नाय्ये इति वा। कर्मान्तरविधिरित्यन्यः। याजनविधिरित्यपरः। असोमयागकाले पुरोडाशावित्येककालोपदेशोऽयमित्यपरः। यद्वाग्नेयस्य द्वयोः पर्वणोर्विहितत्वादनुवाद ऐन्द्राग्नस्य तु पौर्णमास्यामप्राप्तत्वाद्विधिः इति सर्वथा

नायमर्थवाद इत्याशङ्क्य षड्भ्यो यागेभ्यः श्रुतस्य फलस्य पुरोडाशद्वयेनोत्पत्त्ययोगेन नित्ययोः पुरोडाशयोरसोमयाजिन्यनित्ये विधानायोगेन चाधिकृतोपदेशायोगात्प्रकृतप्रत्यभिज्ञानादेवकारानर्थक्याच्च कर्मान्तरत्वायोगात्फलाश्रुतेः परस्मैपदनिर्देशाच्च ऋत्विजां फलार्थो याजनविधिरित्ययोगात् 'नासोमयाजी सन्नयेदि'ति वचनादूर्ध्वं सोमात्साान्नाय्ये नियते सत्यर्थादैवैन्द्राग्नस्य पूर्वभावित्वेनासोमयागकाले पुरोडाशावित्येव कालोपदेशायोगात् 'तदु समेव नयेदि'ति सोमात्प्रागूर्ध्वंञ्चेत् सान्नाय्यसत्वेन तद्वैकल्पिकस्यैन्द्राग्नस्योभयोः प्राप्तौ प्राक्काल एव नियम्यत इत्येवं कालनियमस्याप्यसोमयाजिवदेव काललक्षणापत्तेरयोगात्समुच्चितयोश्च पुरोडाशयोरेकेन लिङ्शब्देन कस्यचिदनुवादः कस्यचिद्विधिरिति वैषम्यायोगेन च पञ्चमपक्षायोगात् 'सान्नाय्येन सोमयाजिनमि'त्यस्यायमर्थवाद इत्याह—

आग्नेयैन्द्राग्नयोरुक्तिः सान्नाय्यस्तुतिरिष्यते ।

१५

उपांशुयाज ● उपांशुपौर्णमास्यामि'त्यस्य कालविधिपरत्वेन द्रव्यविधावसामर्थ्यात् 'सर्वस्मै वा एतदि'त्यस्य तु वैशब्देन वर्त्तमाननिर्देशेन, वाविधायकत्वादुपांशुयाजे द्रव्यनियम इत्याशङ्क्य 'चतुर्ध्रुवायां गृह्णाती'त्यसंयुक्तोत्पन्नस्य ध्रौवाज्यस्य द्रव्याकाङ्क्षयैव यागाङ्गत्वस्य वचनाभावेऽपि सिद्धत्वेन सर्वस्मै वे'ति तादर्थ्यचतुर्थीसंयुक्ते विपरिणामभवविधिसामर्थ्ये च विधौ सत्युपांशुयाजाङ्गत्वस्य कैमुतिकन्यायसिद्धत्वादुपांशुयाजे ध्रौवमाज्यमित्याह—

हविस्तूपांशुयाजाज्यं सर्वस्मा इति वाक्यतः ।

१६

तद्वच्च देवतायां ● उपांशुयाजे विष्णरुपांशु इत्यादेरर्थवादत्वाद्वचनान्तराभावाच्च देवतायामनियम इत्याशङ्क्य प्रकरणगतकाचिद्देवता स्यादित्याह—

नानियमः,

१७

धर्माद्वा स्यात् ● सम्प्रतिपन्नधर्मकत्वात्प्रजापतिर्देवता स्यात् । स हि 'यत्किञ्चित्प्राजात्यमि'ति वचनादुपांशुत्वधर्मकः । उपांशुयाजोऽपि तथा । तस्मात्प्राजापत्यः । नैवम् । न ह्युपांशुत्वधर्मा प्रजापतिः । किन्तु तूष्णीम्भावधर्मा 'प्रजापतिं मनसाध्यायेदि'ति विधेर्वादोऽयं 'यत्किञ्चित्प्राजापत्यमि'ति । तेन सम्प्रतिपत्त्यभावान्न प्रजापतिः । किन्तु 'अग्निमुखा वै देवा' इति वाक्यशेषेणाग्नेर्मुख्यत्वादग्निदेवता स्यात्, नैवम् । आग्नेयैन्द्राग्नयोर्मध्ये वैष्णवं याज्यानुवाक्यायुगलमुक्तं क्रमात्तदङ्गम् । तेन विष्णुः ऐन्द्राग्नश्च दर्शे इत्ययमपि दर्श एव । पौर्णमास्यास्तु आग्नेयाग्नीषोमीययाज्यानुवाक्यामध्ये प्राजापत्ययाज्यानुवाक्याम्नानात्प्रजापतिः स्यादित्याशङ्क्य उपांशु पौर्णमास्यां यजन्नित्यनेन प्रत्यक्षवचनेन

पौर्णमासीविधानेनामावास्यायामुपांशुयाजाभावात् तत्रैव विष्ण्वादिदेवत्यानां याज्यानुवाक्यानां विकल्पादुपांशुयाजे देवताविकल्प इत्याह—

विष्ण्वादि देवतास्तत्र शाखाभेदाद्विकल्पिताः ।

१८

उपांशुयाज एव किमुभयत्र स्यादुत पौर्णमास्यामेवेति चिन्त्यते । तत्र 'उपांशु याजमन्तरा यजती'ति विशेषेण पुरोडाशद्वयलक्षिते काले विधानादुभयोःपर्वणोः पुरोडाशद्वयसत्वादुभयत्रोपांशुयाजः स्यात् । एवञ्च आग्नेयैन्द्राग्नयाज्यानुवाक्या-युगलयोर्मध्ये वैष्णवं याज्यानुवाक्यायुगलमप्यर्थवद्भवति । नन्वमावास्याया मैन्द्राग्नस्य पाक्षिकापाक्षिकमन्तरालं तुल्यं पौर्णमास्यामपि । सोमात्प्राग-ग्नीषोमीयाभावात् तेन पाक्षिकेनैवाजामित्वायेत्यनेनोभयत्रार्थवाद इत्युभयत्रा-प्युपांशुयाजः स्यादित्याशङ्क्य तावब्रूतामग्नीषोमावाज्यस्यैव नायुपांशु पौर्णमास्यां यजन्नि'तिवाक्ये यागतदपेक्षिताग्नीषोमदेवताज्यद्रव्योपांशुत्वगुणपौर्णमासीकलानां मध्ये कालव्यतिरिक्तानामन्यतः सिद्धत्वेन कालस्यैव विधेयत्वात्तत्र चान्तराल-विधिनैवोपलक्ष्यनयन्यायतः पौर्णमासीकालसिद्धावपि प्राधान्यार्थं कालविधेः स्वीकार्यत्वाद्दर्शनिवृत्यर्थत्वे तु परिसङ्ख्यापत्तेः पौर्णमास्यामेवोपांशुयाज इत्याह—

तावब्रूतां कालविधेः पौर्णमास्यां भवेत्तु सः ।

१९

द्विपुरोडाशाया • पौर्णमास्यामेवोपांशुयाज इति स्थिते चिन्त्यते । तत्रैकपुरोडाशायामन्तरालगुणालाभेन वैगुण्याद्द्विपुरोडाशायामेवोपांशुयाज इत्या-शङ्क्यान्तराशब्देन पुरोडाशद्वयोपलक्षित कालोक्त्या पुरोडाशद्वयाभावेऽपि शङ्ख-वेलायामागन्तव्यमितिवत्तदुपलक्षण कालानपायादसोमयाजिनोऽप्युपांशुयाजः पौर्णमास्यां स्यादित्याह—

उपलक्ष्यानपायाच्च सोमात्प्रागपि स स्मृतः ।।

इति भट्टकमलाकरात्मजानन्तभट्ट कृतायां
शास्त्रमालवृत्तौ दशमोऽध्यायः ।।
पादाः ८ अधिकरणानि १७८

एकादशस्तन्त्राध्यायः

प्रथमः पादः

१

प्रयोजनाभिसम्बन्धात् • एवं बाधाभ्युच्चयचिन्तया विकृतिष्वङ्गपरिमाणं चिन्तितम् । सम्प्रत्युपदेशातिदेशसाधारण्येन प्रयोगपरिमाणं तन्त्रावापाभ्यामुच्यते । प्रथमं तावदिदं चिन्त्यते—किमाग्नेयादयः प्रत्येकं फलं साधयन्ति उत संहत्येति । तत्रोत्पत्तिवाक्यप्राप्तानामपि कर्मणां यथा फलोद्देशेन विधिस्तथा रागप्राप्तस्यापि फलस्य कर्मोद्देशेन विधिः सम्भवत्येव । ततश्च फलवाक्ये उत्पत्तिवाक्यप्राप्तानां कर्मणामुद्देश्यत्वात्तद्विशेषणसाहित्याविवक्षया प्रत्येकं फलमित्याशङ्क्य कर्मणामुत्पत्तिवाक्यप्राप्तत्वेऽपि काल इव तेषामेवानुष्ठेयत्वाद्विधेयत्वेन तद्विशेषणस्य यजेतेत्येकशब्दोक्तस्य द्वन्द्वावगतस्य च साहित्यस्य विवक्षितत्वात्तन्त्रं फलमित्याह—

तन्त्रं फलं यागषट्के,

२

अङ्गानान्तु शब्दभेदात् • अत्र भाष्ये पञ्चदशसूत्राणामधिकरणद्वयमुक्तम् । तत्राद्ये षड्भिस्सूत्रैरङ्गानां कार्यभेदमाशङ्क्यैककार्यत्वं सिद्धान्तितम् । द्वितीये तु नवभिस्सूत्रैस्तस्मिन्नेकस्मिन् कार्येऽङ्गानां विकल्पमाशङ्क्य समुच्चय इति सिद्धान्ततम् । तदाह—

अङ्गानां कार्यैक्यमेव च ।
तस्मिन्समुच्चयोऽङ्गानां भाष्ये प्रोक्तं द्वयोरिह ॥

३

द्वयोः अधिकरणयोः । वार्तिके त्ववान्तरकार्यभेदेऽप्यङ्गानां कारकवदपर्यायविधानात्समुच्चयात्कार्यैक्येऽप्यपर्यायविधानात् समुच्चयेनानुष्ठानानुपयोगिन्याः कार्यभेदाभेदचिन्तायाः प्रयोजनवत्वाभावादखण्डोपकारापूर्वस्य तु निर्मूलत्वेन तत्र विकल्पसमुच्चयचिन्तायोगान्नैवमधिकरणभेदः किन्तु पञ्चदशसूत्राणामेकमधिकरणमित्युक्तम् । तत्र प्रधानानामेकशब्देन तन्त्रेणाभिहितानां युगपत्फलेविधानात् समुच्चयेऽप्यङ्गानामेकशब्दोपादानाभावेन साहित्यायोगात्स्वविधिप्रयुक्तौ पृथक् फलापेक्षया विकल्प एव युक्तः । न च प्रधानविध्येकवाक्यतयाङ्गानां तद्विधिना विधानात्समुच्चयः स्वविध्यभावे अङ्गत्वासिद्धौ तदग्रहणादन्यो-

न्याश्रयापत्तेः। नापि प्रधानवत्तन्त्राभिधानमङ्गेष्वस्ति येन साहित्यं स्यात्। तथैकफलानां चित्रोद्भिदादीनां विकल्पस्तथाङ्गानामपि इत्याद्यः पक्षः। यद्वा विकल्पस्यान्याय्यत्वाद् बह्वङ्गाम्नानसामर्थ्यादेव द्वयोस्त्रयाणां वानुष्ठानात्फल भूयस्त्वमिति सम्भवति समुच्चय इत्याशङ्क्य चित्रादिवदङ्गविधिषु प्रत्येकं फला-श्रुतेर्विधितः फलापेक्षायामपि तद्विशेषस्य प्रधाने वाक्यान्तरादिवाङ्गेषु प्रकरणा-ल्लभ्यत्वेन विश्वजिद्वत् तत्कल्पनायोगात् तत्र चाङ्गानामवान्तरकार्यभेदाददृष्टा-र्थत्वाद्विकल्पायोगाद्वाक्यैकवाक्यतया सर्वाङ्गविशिष्टाया भावनायाः प्रयोगविधिना युगपद्विधानाद्विशिष्टविधानाच्च विशेषणविधिकल्पनापत्तौ विशेषणाङ्गविधिभिः सोमेन यागमितिवत्समिद्यागेनाग्नेयमुपकुर्यादित्यङ्गविधीनामनुवादकत्वात् सिद्धः समुच्चय इत्याह—

समुच्चित्येति वार्तिके,

४

कर्माण्यामभाव्यत्वात् ● काम्यस्यैन्द्राग्नादेः फलोत्पत्तौ द्वारापेक्षायाम-श्रुतादृष्टापूर्वं तस्य च कर्मजन्यत्वं फलहेतुत्वं स्थायित्वञ्चेति कल्पनीयम्। ततो वरं कृतयागादात्मनः फलम्। शतक्रत्वः सकृच्च प्रयोगे कृतयागत्वाविशेषान्न पुनः प्रयुञ्जानस्य फलातिशयः। अतः सकृदेव प्रयोग इत्याशङ्क्यात्मस्वरूपस्य फलं प्रति हेतुत्वे कृतयागाकृतयागयोरविशेषेणकर्त्तुरपि तदापत्तेः कर्मजन्यस्याति-शयस्यापूर्वरूपस्यावश्यं वाच्यत्वात् फलभूमार्थिना भूयः प्रयोक्तव्यमित्याह—

काम्यावृत्तौ फलावृत्तिः।

५

क्रियाणामर्थशेषत्वात् ● व्रीहीनवहन्ती'त्यत्रोद्यमननिपतनमात्रस्य शास्त्रा-र्थत्वात्सकृदवघातेन च तत्सिद्धेर्विध्युत्तरकालं प्रयोजनकल्पनाच्च सत्यपि दृष्टेऽ-वघातमात्रं कर्तव्यं सर्वौषधावहन्तिवदित्याशङ्क्य व्रीहीनिति द्वितीयया व्रीहीणां भाव्यत्वावगमेऽपि स्वरूपेण तेषां भाव्यत्वायोगेन क्रत्वपेक्षितदृष्टवितुषीभाव-विशिष्टानां भाव्यत्वात्तत्र च विशेषणे तात्पर्येण सिद्धोऽभ्यासः। यत्र तु सकृत्वेऽपि दृष्टार्थसिद्धिर्यथोपस्तरणादौ यत्र वा अदृष्टार्थत्वं यथा सर्वौषधावघाते तत्र नैवाभ्यास इत्याह—

हन्त्यावृत्तिश्च दृष्टतः, सर्वौषधे सकृद्धन्तिः।

६

क्रतुवद्वा ● काम्यप्रधानाभ्यासवत्फलभूमार्थिता अङ्गान्यप्येकस्मिन् प्रयोगे-ऽभ्यसितव्यानीत्याशङ्क्य शास्त्रीये एव षोडशिग्रहणादौ प्रयासगौरवेण फलगौरवा-ङ्गीकारात्साङ्गप्रधानस्य फलसामग्रीत्वेनैकैकस्य तदभावाच्च नाशास्त्रीयेण प्रयासभूम्ना फलभूयस्त्वमित्याह—

अङ्गानाञ्च सकृत् कृतिः ,

७

बहुवचनेन ● 'वसन्ताय कपिञ्जलानालभेते'त्यत्र बहुत्वस्य द्वित्वाधिकसर्वसङ्ख्यावाचित्वेन चतुष्ट्वादेरपि शास्त्रीयत्वाच्छास्त्रीयप्रयासाधिक्येन फलभूयस्त्वमित्याशङ्क्यैका देया षट्देया इतिवद्विशेषाणामशाब्दत्वेन बहुत्वस्य सामान्यवाचित्वात्तत्र च लक्षणया विशेषग्रहणे त्रीननुपादाय चतुर्णामुपादानासम्भवात् त्रिभिः सिद्धे शास्त्रार्थेऽधिकेषु 'न हिंस्यादिति' निषेधप्रवृत्तेश्च नाधिकानामालम्भ इत्याह—

कपिञ्जलेषु त्रित्वं स्यात् ।

८

उत्तरासु तु ● सान्नाय्यदोहे 'वाग्यतः तिस्रो दोहयित्वा विसृष्टवागनन्वारम्य तूष्णीमुत्तरा दोहयती'ति श्रुतम् । तत्र 'उत्तरा दोहयती'ति पूर्ववद्बहुत्वविधेस्त्रित्वे पर्यवसानात्तिसृणामेव गवां दोह इत्याशङ्क्य 'नास्यैतां रात्रिं पयसाग्निहोत्रं जुहुयात् कुमारा अपि पयो न लभेरन्नि'त्यस्य पयोदानमात्रनिषेधे अदृष्टार्थत्वापत्तेरपिशब्दानर्थक्यान्निषेधद्वये वाक्यभेदाच्च लक्षणया यावत्स्वं सर्वदोहविधायित्वात्तत्र चोत्तरावाक्ये तिसृणामेव दोहने वाग्यमस्य विहितत्वेन तस्यान्यत्राविधानादेवाप्राप्तौ विसृष्टवाक्त्वस्यानुवादत्वात् 'बहुदुग्धीन्द्राय देवेभ्यो हविरि'ति वाचं विसृजत' इति मन्त्रस्य वाग्विसर्गे विनियोगेन चोत्तरकाले मन्त्राभावेन तूष्णींभावस्यापि प्राप्तत्वादनन्वारम्भार्थ एव विधिर्न तूत्तराविध्यर्थो येन त्रित्वे पर्यवसानं स्यादित्याह—

यावत्स्वं चोत्तरा दुहिः ,

९

प्रधानकर्मत्वात् ● दर्शादौ प्रधानानां प्रयोगवाक्ये फलं प्रत्युपादेयत्वात्साहित्यविवक्षायामप्यङ्गसम्बन्धे तेषामुद्देश्यत्वेन तत्साहित्यस्याविवक्षितत्वादुत्पत्तिवाक्येषु षण्णां भावनानां भेदेनाङ्गापेक्षया कथम्भावभेदाच्चैकैकत्र त्रयाणां प्रधानानां प्रयाजाद्यङ्गानि भेदेन कार्याणीत्याशङ्क्याङ्गानां भावनात्रये विनियोगभेदे सत्यपि, विध्यैक्यवदनुष्ठानस्यापि तन्त्रत्वात् 'पौर्णमास्यामि'ति वत्करणत्वेन साङ्गस्य त्रिकस्य युगपदनुष्ठानबोधनाद्भेदे तद्बाधापत्तेश्च सकृत्कृतान्येव सर्वं गृह्यन्त इति सिद्धं तन्त्रत्वमित्याह—

दर्शाङ्गानान्तु तन्त्रत्वम् ।

१०

व्याख्यातन्तुल्य ● 'आग्नेयं कृष्णग्रीवं सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवमि'त्यत्र यौगपद्येन प्रधानानां पाठक्रमस्याप्रयोजकत्वाद्देवतैक्यात्सान्नाय्यवदाग्नेययोस्तन्त्र-

त्वमित्याशङ्क्य द्वयोराग्नेययोः सौम्यात्पूर्वापरभावविरोधान्न तन्त्रतेत्याह—

न कृष्णग्रीवयोस्तु तत् ॥

एकादशस्य प्रथमः पादः

द्वितीयः पादः

१

एकदेशकालकर्तृत्वम् ● इष्टौ समादिदेशस्य पौर्णमास्यादिकालस्याध्वर्वादिऋत्विजाञ्चोत्पत्तिवाक्यावगताग्नेयादिभावनाभिः प्रत्येकं सम्बन्धात्फलस्याप्युत्पत्तिवाक्यविहितभावनयैव सम्बन्धेन तन्त्राभिधानावगतस्यापि साहित्यस्याविवक्षितत्वात्प्रत्येकं कालान्वयावगतेर्यथा 'य इष्टया' इत्यत्र तन्त्राभिहिताभिरपीष्टिभिः प्रत्येकमेव कालः सम्बध्यत इति नैकस्यां पौणमास्यां सर्वाः तथा ऽऽग्नेयादिभिः प्रत्येकमेव कालादीनां सम्बन्धात्षट्सु पर्वसु षड्यागाः कार्याः। न चैवं फलवाक्यावगतसाहित्यत्यागः। सिद्धान्ते त्रिकस्य प्रयोगभेदेऽपि फले साहित्यवत् षण्णामपि निष्कर्षे तस्याबाधोपपत्तेः। यदा चोत्पत्तिवाक्ये कालादिविधिस्तदोत्पत्तिवाक्ये प्रधानमात्राणां निरङ्गानां श्रवणादङ्गानां भिन्नकालेऽनुष्ठानमिति सर्वथा न देशकालकर्त्रैक्ये तन्त्रत्वमित्याशङ्क्य पृथगुत्पन्नानामपि यागानां प्रथमं साध्यापेक्षया सहितानां फलसम्बन्धे सति तदुत्तरं कथम्भावापेक्षया सहितानामङ्गसम्बन्धे जाते पश्चात्साङ्गप्रयोगद्वये देशकालाद्यपेक्षायां देशादयः सम्बध्यमानास्तन्त्रेणैव सम्बध्यन्त इत्येककालोत्पन्ना एकस्यामेव पौर्णमास्याममावास्यायां वानुष्ठेयाः। तेन यद्यपि विधिबलादुत्पत्तिवाक्ये प्रत्येकमवगतं करणत्वं समे दर्शपूर्णमासाभ्यामित्यत्र चोद्देश्यविशेषणत्वात्साहित्यमतन्त्रम्, तथाप्यनिवृत्तायां फलविशेषाकाङ्क्षायामनिर्द्धारिताप्रतियोगिकं करणत्वं नानुवादार्हमिति फलवाक्यावगतस्यैव करणत्वस्यानुवादात्फलवाक्ये च परस्परसहितानामेव करणत्वात् तादृशेष्वेव देशकालाद्यन्वयः। 'य इष्ट्ये'त्यत्र तु तत्तत्फलकरणोद्देशेन कालविधानान्न सहितानां कालयोग इति सिद्धं देशकालकर्त्रैक्ये तन्त्रत्वमित्याह—

आग्नेयादेरेकदेशकर्तृकालं तथाङ्गम् ।

२

इष्टिराजसूयेषु ● दर्शपूर्णमासयोरेकफलत्वेन प्रयोगैक्यात्पर्वद्वयेऽङ्गानां तन्त्रत्वम्। 'पौर्णमास्यां पौर्णमास्ये'ति कालस्तु 'वपया प्रातः सवन' इतिवत्प्रधानमात्रे। तेन सप्तदशदिनरूपः साङ्गः प्रधानकाल इत्यङ्गानां तन्त्रत्वमित्याशङ्क्य षण्णां यागानामेकफलत्वादेककालत्वे प्राप्तेऽपि 'पौर्णमास्यां पौर्णमास्ये'ति वाक्येन प्रयोगद्वयबाधनात्पौर्णमास्यङ्गापूर्वाणां तत्समुदायापूर्वप्रयुक्त-

त्वेन तदपवर्गेऽपवर्गाच्च पृथगङ्गानि कार्याणि । पशौ तु वपावाक्ये द्रव्यस्यैव करणत्वं श्रुतं न कर्मणां येन साङ्गत्वाक्षेपः स्यात् । यद्यपि 'मारुतीमेव प्रतिप्रस्थाता दक्षिणास्मिन्नि'ति करणत्वाभावेऽपि साङ्गतास्ति तथापि देशकालयोः साङ्गप्रयोगान्वयनियमात्तत्र साङ्गता लक्ष्येत्याद्याकरे स्पष्टम् । सर्वथा इष्टौ कालभेदान्न तन्त्रतेत्याह—

इष्टौ पर्वद्वये कालभेदान्नैवास्ति तन्त्रता ।

३

तथा स्यादध्वर ● अस्त्यध्वरकल्पा नामेष्टिः 'आग्नावैष्णवमष्टाकपालं निर्वपेत्पूर्वाह्णे सरस्वतीमाज्यस्य यजेत बार्हस्पत्यश्चरुः' एवं 'मध्यन्दिने आग्नावैष्णव एकादशकपालः सरस्वत्याज्यस्य बार्हस्पत्यश्चरुः' । एवं 'आग्नवैष्णवं द्वादशकपालं निर्वपेदपराह्णे सरस्वत्याज्यस्य बार्हस्पत्यश्चरुरिति । तत्र श्रुतम् 'पुरा वाचोऽप्रवदितोर्निर्वपेदि'ति । तत्र सूर्योदयोद्ध्वर्वकालस्यैव पूर्वाह्णशब्दवाच्यत्वेन सूर्योदयप्राक्काले आद्यत्रिकनिर्वापस्य सामान्यतः प्राप्त्यभावेन विशेषविध्ययोगात्कालान्तरविधिरेव वाच्यः ततश्चोत्तरयोरपि निर्वापयोः कालान्तरविधिरेव । एवञ्च तदन्तापकर्षन्यायेन सर्वेषामङ्गकाण्डस्यापकर्षात्तन्त्रेणोपक्रमे तथैव समाप्तिरिति तन्त्रत्वमित्याशङ्क्याद्यत्रिके पौर्णमासीविकारत्वेनातिदेशादेव सूर्योदयोद्ध्वर्वकालप्राप्तौ पूर्वाह्णपदस्य कृत्स्नानुवादकस्य वैय्यर्थ्यान्यथानुपपत्या सूर्योदयप्राक्कालेऽपि प्रवृत्तौ 'पुरावाच' इत्यनेन नियममात्रकरणादाद्यत्रिक एव तादृशकालनियमः इत्याह—

अन्येषान्तूत्पत्तिवाक्ये कालभेदान्न तन्त्रता ॥

४

वसाहोमश्च ● दैक्षे पशौ याज्यार्धर्चान्ते वसाहोमः श्रुतः । स प्राजापत्येषु वसैक्याच्चैक इत्याह—

प्राजापत्येषु पशुषु तन्त्रञ्चैव वसाहुतिः ।

५

कालभेदात् ● भिन्नदेवत्येषु सजातीयेषु सहश्रपणाद्वसैक्येऽपि याज्यार्धभेदाद्भिन्नो वसाहोम इत्याह—

भिन्नदेवत्येषु भिन्ना याज्यार्धस्य विभेदतः ॥

६

अन्ते यूपाहुतिः ● दैक्षे पशौ 'यूपस्यान्तिकेऽग्निं मथित्वा यूपाहुतिं जहोतीति यूपाहुतिः यूपैकादशिन्यामन्तिकदेशभेदाद्भिन्नेत्याशङ्क्य दृग्गोचरत्वस्यापेक्षिकस्यैक्यसम्भवात्तन्त्रमित्याह—

यूपाहुतिस्तु यूपैकादशिन्यां तन्त्रमेव तु ।

७

अवभृथे ● 'अप्स्ववभृथेन चरन्ती'त्यत्र 'यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्याः' इतिवद्वैकृतविशेषस्य प्रधानमात्रार्थत्वात्प्रधानमात्र एवापः अङ्गानि त्वाहवनीय इत्याशङ्क्यावभृथेनेति तृतीयया साङ्गस्य करणत्वोक्तेस्तत्र च श्रपणासादनाद्यसम्भवादग्नौ स्थले च तेषां करणेऽपि तद्भिन्नसाङ्गप्रयोगाङ्गमाप इत्याह—

आप एवावभृथाङ्गेषु तु स्युः करणत्वतः ।

८

दक्षिणेऽग्नौ ● वरुणप्रघासेषु श्रुत 'अष्टावध्वर्युरुत्तरे विहारे हवींष्यासादयति मारुतीमेव प्रतिपस्थाता दक्षिणस्मिन्नि'ति । तत्र प्राकृतासादने प्रतिप्रस्थाता कर्ता दक्षिणदेशश्चेत्यनेकार्थविधौ वाक्यभेदादुभयविशिष्टमिदमासादनान्तरमदृष्टार्थं विधीयते । होमार्थासादनपूर्वको होमस्तूत्तरे विहारे इति नवानां देशैक्यात्तन्त्रमङ्गानीत्याशङ्क्य पूर्ववाक्ये अध्वर्योरुपात्तत्वेनाष्टव्यतिरिक्ते प्रतिप्रस्थातुः इतरमन्यस्तेषामित्यनेन न्यायेन प्राप्तेः पूर्वोत्तरविहारोपादानाच्चाष्टव्यतिरिक्ते दक्षिणविहारस्याप्यर्थादेव प्राप्तत्वेन यत्प्रतिप्रस्थाता दक्षिणस्मिन्नासादयति तन्मारुतीमेवेति प्राकृतस्यैवासादनस्य नियमात्तस्य च होमार्थत्वेनैव प्राप्तेस्तन्त्रभेद इत्याह—

प्रघासेषु त्वङ्गभेदो देशभेदाद् विहारयोः ॥

ननु तन्त्राभावेऽप्युत्तरविहारेऽध्वर्युकर्तृकाण्यङ्गानि मारुतीयागे प्रसङ्गादुपजीवन्तु । नैवम्, 'प्रावृड्ढि वरुणप्रघासैर्यजेते'त्ति नवानां युगपद्विधानेनान्यतन्त्रे अन्यस्य विध्यभावेन प्रसङ्गायोगात् । तन्त्रत्वन्तु देशभेदान्नेत्युक्तम् ॥

९

कर्तृभेदस्तथेति ● तत्रैव देशभेदेन प्रयोगभेदात्तदङ्गब्रह्महोत्रादिकर्तृभेद इत्याशङ्क्य सर्वदक्षिणे सर्वोत्तरेऽवस्थितेन ब्रह्मणा अग्नीधा एकेन च होत्रा कार्यसिद्धेश्चातुर्मास्यानां पञ्चर्त्विज इति वचनाच्च तन्त्रमित्याह—

ब्रह्म होत्रादयस्तन्त्रम् ,

१०

एकाग्नित्वात् ● तत्रैवापराग्निकपत्नीसंयाजादौ देशभदाभावात्तन्त्रत्वमित्याशङ्क्य कर्तृभेदाद्भेद इत्याह—

भिन्ना स्युश्चापराग्निकाः ।

११

पर्यग्निकृतानां ● वाजपेये प्राजापत्येषु 'तान् पर्यग्निकृतानुत्सृजन्ति ब्रह्मसाम्न्यालभते' इति श्रुतम् । तत्र 'पर्यग्निकृतानारण्यानुत्सृजन्ती'तिवत्त-

दन्ताङ्गरीतिविधानेन चोदकलोपात् पूर्वकर्मसमाप्तेर्ब्रह्मसाम्न्यालभत इत्यत्र पूर्वद्रव्यदेवतानुषङ्गात् 'आज्येन शेषमि'तिवत्कर्मान्तरत्वमित्याशङ्क्य कर्मान्तरविधावनेकादृष्टकल्पनावाक्यभेदपश्वन्तरानयनतत्संस्कारावृत्त्यादिदोषापत्तेः ब्रह्मसामकाले आलम्भोत्कर्षविधानेन च 'तदा दिवाभिसम्बन्धादि'त्युत्तरेषामेव तत्कालत्वात्पूर्वेषु तूपाकरणादिपर्यग्निकरणान्तेषु 'वैश्वदेवीं कृत्वा 'प्राजापत्यैश्चरन्ती'त्यनेन तत्काल एव कृतेषु पशुविधेर्व्यापारोपरमस्य तदाप्राप्तत्वेनोत्सृजन्तीत्यस्यानुवादत्वादालम्भोत्कर्षविधिरेवात्रेत्याह--

पूर्वोत्कर्षाद् ब्रह्मसाम्नि त्वालम्भे नास्ति भिन्नता ।

१२

पञ्चशारदीया ● पञ्चशारदीयो नामाहीनः पञ्चाहः। तत्र श्रुतम्— 'वैशाख्याममावास्यायां सप्तदशामारुतीस्त्रिवत्सा अप्रवीता उपाकरोति सप्तदश पृश्नोनुक्षणस्तान् पर्यग्निकृतान् प्रोक्षितानितर आलभन्ते प्रेतरानुत्सृजन्ति ततः संवत्सरे राजोवा आनयन्ति तांश्चैवोक्षणः' इत्यादि पूर्ववत्। एवं तृतीये अरुणान् आनयन्ति। चतुर्थेऽपि शृङ्गीः। पञ्चमे कृष्णा आनयन्ती'त्येवं स्त्रीपशुयागानां सर्वानुष्ठानं उक्षणाञ्च पर्यग्निकृतानामुत्सर्गमुक्त्वान्ते श्रुतम्। 'पञ्चमे वर्षे दीक्षित एतानुक्षणस्त्रींस्त्रीनन्वहमालभते पञ्चोत्तमेऽहनी'ति। तत्राद्ये संवत्सरे ये उक्षण उत्सृष्टाः तेषामेव त्रींस्त्रीनित्यनेन ब्रह्मसामालम्भवाक्यवदालम्भोत्कषविधौ लाघवादेतानिति पूर्वपरामर्शाद्वचनाच्च पर्यग्निकृतानामपि पुनः पर्यग्निकरणाविरोधादालम्भोत्कर्षाच्च प्राप्तस्यैवोत्सर्गस्योत्सर्गवचनैरनुवादात् पूर्ववत्तन्त्रमङ्गानि पशवश्चेत्याशङ्क्य 'दीक्षित एतांस्त्रींस्त्रीनि'ति वाक्ये एतानिति सप्तदशोक्षणः परामृश्य'त्रींस्त्रीनन्वहमि'ति 'पञ्चोत्तमेऽहनी'ति चानेकार्थविधौ वाक्यभेदापत्त्या सङ्ख्याकालविशिष्टपूर्वकर्मविधानाङ्गीकारेणालम्भोत्कर्षविधायके तस्मिन् प्राजापत्यन्यायासम्भवात्पूर्वत्र चारण्यवत्तदन्ताङ्गरीतिविधानेन प्रथमवर्षोपक्रान्तानामुक्षयागानां त्रिवत्सानामिव तत्रैव समाप्त्या प्रतिवर्षं स्त्रीपुंपशुयागानां भिन्नवादः उक्षसु विधिश्चेति वैरूप्याच्च प्रत्यब्दं मारुतपदानुषङ्गेण चतुस्त्रिंशद्यागाः पञ्चमे चान्येषामेवोक्षणामालम्भ इत्याह—

त्रींस्त्रींन्विधिः पञ्च शारदीये पश्वन्तराश्रयः ।

१३

दशपेये ● राजसूये अभिषेचनीयः सोमयागः ततः संसृपाहवींषि, ततो दशपेयः सोमयागः। तत्र 'सह सोमं क्रीणात्यभिषेचनीयस्य दशपेयस्य चे'ति वचनेनाभिषेचनीयसोमक्रयकाले दशपेयक्रयोक्तेः तदन्तापकर्षन्यायेन प्राचामपकर्षात्सहोपक्रमे द्वावपि सामानतन्त्रावित्याशङ्क्य वचनस्य क्रयारम्भात्पूर्वमियता द्रव्येण त्वया मह्यं सोमो देय इति सङ्केतरूपगौणक्रयसाहित्यपरत्वेन मुख्यक्रयसाहित्यपरत्वाभावाद्दशपेये 'सद्यः सोमं क्रीणन्तो'ति वचनादभिषेचनीये चावभृथदर्शनात् कृष्णग्रीववत्संसृपाहविर्विच्छेदेन कालभेदाच्च तन्त्रभेद इत्याह—

दशपेये चाभिषेचनीये (नास्त्येकतन्त्रता)।

१४

निष्कासस्यावभृथे ● वरुणप्रघासेषु 'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ती'ति श्रुतम्। तत्र सौत्यपशुवत्प्रधानामिक्षायागस्यैवायं प्रचारविप्रकर्षः। अवभृथशब्दस्तु देवतासाम्याद्गौणः। न चानुवादे गौणत्वं दोषः। तद्धर्मकर्मविधौ तु विधौ गौणत्वं स्यात्। तेन तस्यैवायमभ्यास इति स्विष्टकृदादेस्तन्त्रत्वमित्याशङ्क्यानुवादत्वे वैय्यर्थ्यात्प्रचरन्तीत्यभावात्प्रातः सवन इतिवत्कालविशेषानुक्तेस्तुषगुणान्तरोक्तेश्च प्रचारविप्रकर्षायोगेन कर्मान्तरत्वस्यावश्यं वाच्यत्वात्तस्य चामिक्षाशेषप्रतिपत्त्यर्थत्वेऽप्यवभृथे द्रव्यस्य गुणत्वेन कर्मणः प्राधान्येनावभृथशब्दात्तद्भावानुपपत्त्या अवभृथशब्दप्रसादेनार्थकर्मत्वस्यापि सत्त्वाद्वचनाच्चान्यत्र विनियुक्तस्याप्यन्यत्र 'मैत्रावरुणाय दण्डमि'तिवद्विनियोगात्स्विष्टकृद्वदर्थकर्मत्वमपीत्याह—

वारुण्या नैव निष्कासे प्रचारविधिरिष्यते।

१५

उदयनीये ● सोमे 'प्रायणीयस्य निष्कासे उदयनीयमनुनिर्वपती'ति श्रुतम्। तत्र निष्कासे तृतीयार्थलक्षणया प्राग्वत्तुषनिष्कासद्रव्यकमुदयनीयधर्मकं कर्मान्तरम्, यद्वा सप्तम्या द्वितीयार्थलक्षणया प्रायणीयनिष्कासस्योदयनीयनिर्वापसंयोगः प्रतिपत्तिरित्याशङ्क्य मुख्यस्यैवोदनीयस्येह प्रकृतत्वेन प्रकरणान्तरन्यायायोगात्प्रयाजशेषे जुहूरिक्तीभाववदत्र दृष्टप्रयोजनाभावात्तत्र तृतीयाभङ्गवदत्र सप्तमीभङ्गायोगाच्च प्रतिपत्तित्वायोगाद् भाव्युपयोगाभावाद्द्वितीयानिर्दिष्टोदयनीयहविः संस्कारार्थं प्रायणीयनिष्कासे निर्वाप इत्याह—

प्रायणीयस्य निष्कासे नैव कर्मान्तरं भवेत्।

तद्धर्मककर्मान्तरविधिर्न भवेदित्यर्थः॥

एकादशे द्वितीयः पादः॥

तृतीयः पादः

१

अङ्गानां मुख्यः ● 'पूर्वेद्युरमावास्यायां वेदिं करोति' 'अप्स्ववभृथेन' इत्यादौ वचनादङ्गानां प्रधानाद्भिन्नदेशकालत्वमित्याह—

वचनाद् भिन्नकालत्वं वेद्याद्यङ्गेषु सम्मतम्।

२

द्रव्यस्यकर्म ● आधानं कर्माङ्गमिति कृत्वा चिन्त्यते। तत्र प्रयाजवदङ्ग-

त्वादावृत्तिरित्याशङ्क्य प्रयोगमध्ये कृतानां प्रधानापूर्वार्थत्वात्तदपवर्गेऽपवर्गादावृत्तावप्याधानस्य वाचनिके वसन्तादिकाले सर्वाभिसन्धिना कृतत्वेन सर्वार्थत्वात्तन्त्रत्वमित्याह—

अङ्गञ्चेत्तन्त्रमाधानम्,

३

यूपश्चाकर्मकालत्वात् ● दैक्षे पशावुपदिष्टो यूपः सवनीयानुबन्ध्ययोस्त्वतिदिष्टः तत्रातिदेशस्योपदेशपूर्वकत्वेन 'दीक्षासु यूपमि'ति वाक्येनाध्वरकल्पानिर्वापन्यायेन दैक्षयूपस्यैवापकर्षः, अन्यथा द्विरुक्ततापत्तेः। तेनाग्नीषोमीयापवर्गे तस्यापवर्गात्सौत्यादावन्यो यूप इत्याशङ्क्य ज्योतिष्टोमे यूपाभावात्तदङ्गावतारन्यायेन प्रकरणात्तदीयपशुत्रययूपोद्देशेनोक्तस्य दीक्षाकालत्वस्य दैक्षप्रकरणाभावेन पशुत्रये समानविधानत्वादध्वरकल्पायान्त्वाद्यनिर्वापाद्यपकर्षेऽपि प्रधानकालाबाधस्य नियमविधानस्य च लाभादिह त्वग्नीषोमीयापकर्षेऽपि प्रधानकालबाधापूर्वविधिसाम्यादकर्मकालेऽगृह्यमाणविशेषत्वाच्च तन्त्रं यूप इत्याह—

सोमे यूपः पशुत्रये।

४

संस्कारास्त्वावर्तेरन् ● 'दीक्षासु यूपमि'ति छेदनमात्रापकर्षेऽपि यूपसंस्काराणां तक्षणादीनामग्नीषोमीयापवर्गात्प्रतिपशु पुनः करणमित्याशङ्क्य यूपस्य प्रागसिद्धत्वेन छेदनादिभिर्यूपं कुर्यादित्यर्थेन छेदनग्रहणस्योपलक्षणतया तेषामप्यपकर्षात्तन्त्रत्वम्। यद्वाऽस्तु छेदनमात्रापकर्षः। अन्येषान्तु देशकाल एवानुष्ठानम्, तथापि यूपद्वारत्वात्तस्य च साधारणत्वात्तेषामपि साधारण्यमित्याह—

तक्षणादेर्न चावृत्तिः,

५

स्वरुः ● 'यूपस्य स्वरुं करोती'ति यूपादुत्पन्नस्य स्वरोः पश्वञ्जनार्थत्वेन तदपवर्गे तस्यापवर्गादञ्जनान्तरेऽन्यशकलोपादानम्, यः प्रथमः शकलः स स्वरुरिति त्वैकैकप्रहरणे यः प्रथमः शकल इत्यर्थः। तेनैकस्मिन् यूपे प्रहरणबहुत्वेन शकलबहुत्वसम्भवादेकयूपानां पशूनां स्वरुभेद इत्याशङ्क्य प्रहरणस्यानुक्तत्वेन प्राथम्यस्य शकलमात्रापेक्षत्वाच्छकलस्य च व्यामोहनिवृत्त्यर्थं यूपच्छेदनकाल एव ग्रहणादगृह्यमाणविशेषत्वात्तन्त्रमित्याह—

स्वरुरप्येक एव हि।

६

अहर्गणे ● सोमे 'कृष्णविषाणया कण्डूयत' इति। तथा'नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यती'ति श्रुतम्। तत्राहर्गणे आद्येऽह्नि प्रासने त्यक्तायाः

पुनर्ग्रहणायोगादुत्तरेष्वहस्सु दक्षिणानयनात्प्राचां विषाणाकण्डूयनधर्मबाधः। अत्येऽन्हि तु प्रासने पूर्वेष्वहस्सु दक्षिणोत्तरभाविनां पाणिकण्डूयनधर्मबाधः। तेन विकल्प इत्याशङ्क्य पाणिकण्डूयनस्यार्थिकत्वेन प्रकृतावशास्त्रीयत्वादन्त्येऽन्हि प्रासनमित्याह--

अहर्गणे त्वन्तिमेऽह्नि विषाणाप्रासनं भवेत् ॥

७

वाग्विसर्गो ● इष्टौ 'प्रणीताः प्रणेष्यन्वाचं यच्छति तां सह हविष्कृता विसृजती'ति श्रुतम्। तत्र नानाबीजेष्टौ कृष्णाजिनास्तरणादिफलीकरणान्तानां पञ्चमे क्रमोक्त्या प्रथमबीजे वाग्विसर्गे परेषां वाग्यमलोपापत्तेरन्त्यबीजे वाग्यमकरणे तु पूर्वेषां वाग्विसर्गबाधापत्तेराद्यस्यान्त्यस्य वा हविष्कृदाह्वानकाले वाग्विसर्गः कर्तव्य इत्याशङ्क्य वाग्यमविधेरवधिमात्रसमर्पणेन वाग्विसर्गस्यात्र विधेयत्वाभावादन्यथा वाक्यभेदापत्तेर्विसर्गस्यानङ्गत्वेनाविसृष्टायामपि वाचि कस्यचिद्धर्मबाधाभावाच्चान्ते विसर्ग इत्याह--

नानाबीजावहन्तौ स्यात्सर्वान्ते वाग्विसर्जनम् ।

८

पशौ च ● पशौ हविष्कृदाह्वानं सिद्धं कृत्वा चिन्त्यते। तत्रेष्टौ 'प्रणेष्यन्नि'ति लृटा भाविसंयोगे प्रणीतामात्रार्थत्वापत्तेरारादुपकारकोऽयं वाग्यमः प्रयाजादिवत्। तेन पाशुकेन वाग्यमेन प्रसङ्गासिद्धेर्न पुरोडाशकाले वाग्यमः किन्तु पशुकाल इत्याशङ्क्य वाग्यमस्य प्रणिधानद्वारा कर्त्रर्थत्वेन सन्निपातित्वात् वाग्यमं विना पौरोडाशिकानां वैगुण्यापत्तेश्च पुरोडाशकाले वाग्यम इत्याह--

यदाह्वानं पशौ तु स्यात्पुरोडाशे विसर्जनम् ।

९

अग्नियोगः ● अग्नौ 'अग्निं युनज्मि शवसा घृतेनेति जुहोति अग्निमेव तद्युनक्ति पञ्चभिर्युनक्ति पाङ्क्तो यज्ञः' इत्यग्नियोगयुनक्तियोगाख्यहोमेन संस्करोति इत्यर्थः। तया'इमं स्तनमूर्जस्वन्तं धयामीत्याज्यस्य पूर्णां स्रुचं जुहोति एष वा अग्नेर्विमोकः'। अत्र भाष्ये अग्नेः सर्वार्थत्वेन तत्संस्कारस्य योगस्य सर्वार्थत्वात्सर्वापवर्गे विमोक इत्याशङ्क्य 'पङ्क्तो यज्ञ' इति वाक्यशेषेण योगस्य यज्ञार्थत्वात्प्रधानान्ते विमोकः एवं 'यदवृता वषट्कुर्युर्भातृव्यमेव यज्ञस्याशीर्गच्छेदि'ति सौमिकस्यापि वरणस्य यज्ञसंयोगेन प्रधानमात्रार्थत्वात्तेन बाधितं दार्शं वरणमवभृथे प्राप्तं 'न होतारमि'ति पर्युदस्यते अन्यथा सौमिकवरणस्य साङ्गार्थत्वे ऐष्टिकस्य प्राप्त्यभावान्निषेधायोगः। यद्यप्यपूर्वेऽवभृथे न वरणप्राप्तिस्तथाप्याज्यभागाङ्गत्वेन होतुरङ्गप्रधानार्थत्वात्प्राप्तेर्वरणं प्राप्तम्। तेन युक्तो निषेधः। तथा अहरहर्युनक्ति 'अहरहर्विमुञ्चती'ति लिङ्गं द्वादशाहे।

साङ्गप्रधानार्थत्वे त्वाद्यन्तयोरेव योगविमोकदर्शनं स्यात्। तेनाग्नेर्योगो विमोकः सौमिकं वरणञ्च प्रधानमात्रार्थमित्युक्तं तदाह—

अग्नेर्विमोको वरणं सोमे चोक्तं प्रधानगम् ॥

१०

भाष्ये। वार्तिके तु 'पाङ्क्तो यज्ञ' इति वाक्यशेषाद्द्वादशाहिकलिङ्गादवभृथलिङ्गाच्च प्रधानार्थत्वमित्याशङ्क्याग्नेः सर्वार्थत्वात्तद्योगो विमोकश्च सर्वार्थः। न च वाक्यशेषविरोधः, पञ्चत्वगुणविधौ श्रुतस्य तस्योत्पत्तिवाक्यावगतसर्वार्थत्वबाधकत्वाभावात्। यज्ञशब्दोऽपि 'वारणो यज्ञावचरः' इतिवद्यागमात्रपरो न प्रधानमात्रपरः। अवभृथलिङ्गन्तु सौमिकवरणस्य साङ्गप्रधानार्थत्वेऽपि युक्तम्। सौमिकं हि वरणमानत्यर्थम्। प्राकृतन्तु प्रवृत्ते होतर्यदृष्टार्थम्। अतस्तत्सोमाङ्गेष्टिषु कार्यमिति द्वादशे वक्ष्यते। तेनावभृथे दृष्टार्थे सौमिके वरणे सत्यपि प्राकृतस्यादृष्टार्थस्य प्राप्तेर्निषेधो युक्तः। द्वादशाहे तु सर्वार्थत्वे न्यायतः सर्वाद्यन्तयोः प्राप्तौ वचनात्प्रत्यहमावृत्तिर्विधीयते, अन्यथा वचनवैयर्थ्यात्। तेन सर्वान्ते विमोक इत्युक्तम् तदाह—

साङ्गप्रधानार्थन्त्विवति वार्तिकसम्मतम्।

११

सुब्रह्मण्या ● सोमे उपसत्कालं सुब्रह्मण्याह्वानम्। तस्याहर्गणे प्रधानभेदादावृत्तिरित्याशङ्क्य कर्मकालत्वाविशेषग्रहाच्च दीक्षावत्तन्त्रत्वमित्याह—

सुब्रह्मण्योपसत्काला तन्त्रेण स्यादहर्गणे।

१२

तत्काला ● सुत्याकालं सुब्रह्मण्याह्वानं सत्यप्येकस्य सन्निधिविशेषे यूपाहुतिवत्सर्वसुत्यार्थमित्याशङ्क्य आद्यसुत्यमिति कालभेदेन विशेषग्रहाद्देवतासंस्कारकस्यास्य तत्कर्मापवर्गेऽपवर्गाच्च प्रत्यहमाह्वानं कर्त्तव्यमित्याह—

सुत्याकाला तु भिन्ना स्यात्प्रत्यहं कालभेदतः।

१३

लौकिकेषु तु ● समादिदेशानामृत्विजां स्रुवादिपात्राणाञ्च निरिष्टिकानामुपादाने शिष्टाचारविरोधात्प्रतिप्रयोगं भिन्नानामुपादानमित्याशङ्क्यात्र शिष्टविगानाभावादन्येषां वा ग्रहणमित्यनियममाह—

प्रतिप्रयोगं देशर्त्विक्पात्राणां भिन्नता न तु ॥

१४

यज्ञायुधानि ● आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चे'ति तृतीयया पात्राणां दाहे गुणत्वात्पूर्वप्रयोगाहितसंस्कारस्योत्तरेऽप्यभावाच्च समादिदेशव-

त्पात्रेष्वप्यनियम इत्याशङ्क्य पात्राणां गुणभावेऽपि मरणस्यानित्यत्वेन पूर्व-प्रयोगान्ते पात्रत्यागे कृतेऽन्यप्रयोगात्प्राग्यजमाने मृते यज्ञपात्राभावाद्दाहवैगुण्या-पत्याऽवश्यमुत्तरकालं यावत्तेषां धार्यत्वात्तैरेव सिद्धेर्नान्योपादानमित्याह—

पात्राण्याजन्मधार्याणि,

१५

वस्तुतस्तु प्रयाजशेषवल्लक्षणया पात्राणां कर्मत्वाद्दक्षिणे हस्ते जुहूमासादयती'ति द्वितीययासादनकर्मत्वाच्च पात्राणां संस्कार्यत्वमेव। मध्ये प्रसङ्गाच्चिन्ता। तानि पात्राणि दर्शपूर्णमासप्रभृतिधार्याणि। तयोः प्रकृतित्वात्तत्रैव पात्रोपदेशाच्चेत्याशङ्क्य अधारितेषु पात्रेषु दर्शेष्टेः प्राग्यजमानमरणे तस्याहिताग्नेः सतो यज्ञपात्राभावेन संस्कारलोपापत्तेः। आधाने 'यज्ञियैः केतुभिः सहे'ति लिङ्गेन पात्रस्वीकाराच्च पवमानेष्टिप्रभृति धार्याणीत्याह—

पवमानेष्टिमादितः।

१६

उपरिष्टात् ● वाजपेये प्राजापत्येषु श्रुतम् 'उपरिष्टात् सोमानां प्राजापत्यैः चरन्ती'ति। अत्र च 'तीर्थं वै प्रातस्सवनं यत्प्रातस्सवने पशव आलभ्यन्ते, इति वाक्यात्तान् 'ब्रह्मसाम्न्यालभेत' इति वाक्याच्च वपाहोमान्तप्राजापत्यानां पूर्वयोः सवनयोः विकल्पेनानुष्ठानम्। अङ्गप्रचारे तु चिन्त्यते। तत्र प्रकृतार्भवपवमानकाले सवनीयस्य पशोः प्रचारात्तत्रैव प्राजापत्यानां प्रचारः आर्भवकालश्च 'केषाञ्चित्सोमानामूर्ध्वमपी'ति वचनाविरोधः। एवन्तु चोदकात्सिद्धेर्वाक्यवैय्यर्थ्यम्। तेन प्राकृतकालप्रत्यासत्तेः शस्त्रवतां सोमानामूर्ध्वमित्यन्यः। तत्र न प्रत्यासत्तिमात्रेण चोदकानुग्रहो भवति। तेनाग्निष्टोमप्रचारादूर्ध्वमागन्तूनामुक्थ्यादीनां विकाराणां स्थाने प्रचारस्स्यादित्याशङ्क्य सामान्यतो दृष्टस्याप्रमाणत्वात्सर्वसोमान्ते प्राजापत्यप्रचारः। ततश्च 'प्रहृत्य परिधीन् हारियोजनं जुहोती'त्यत्र लक्ष्यानपायन्यायेन हारियोजनात्पूर्वं पश्वङ्गपरिधिप्रहरणाभावेऽपि तदुपलक्षितकालानपायाद्धारियोजनं हुत्वा प्राजापत्यप्रचारानन्तरं परिधिप्रहरणमिति चिन्ताफलमित्याह—

प्राजापत्यप्रचारः स्यात्सर्वसोमोर्ध्वमेव तु।

१७

उत्कर्ष ● सवनीयपशौ प्राकृतः सूक्तवाकः 'सुन्वन्यजमानः' इत्याद्यन्यथा पठितः, सः अनुयाजोत्कर्षादाग्निमारुतादूर्ध्वमुत्कृष्टः सवनीयहविष्षु प्रसङ्गेनोप करोति। तत्र सूक्तवाके उत्कृष्यमाणे 'भृज्जन्निन्द्राय हरिवते धाना इति सवनीय देवतापदानामनुयाजोत्कर्षे दाक्षिणाग्निकहोमयोरिवानुत्कर्ष इत्याशङ्क्य मन्त्र-पदापेक्षया भृज्जन्नित्यादेरर्थसमाप्त्या तदुत्कर्षे सवनीयदेवतापदानामप्युत्कर्षादु-

त्कृष्टैरपि च तैः सवनीयहविर्देवतानामेव प्रकाशनेन मन्त्रलिङ्गाविरोधाद्ध-रिवदादिपदासहितस्यैवोत्कर्ष इत्याह—

अग्निमद्यपदापेक्ष उत्कर्षो हरिवत्पदे ॥

तृतीयः पादः ॥

चतुर्थः पादः

१

चोदनैकत्वात् ● राजसूयेऽनुक्तदेशकालानि दक्षिणाभेदवन्ति कर्माणि। यथा 'आग्नावैष्णवमेकादशकपालं निर्वपति वामनो गौर्दक्षिणा, सोमापौष्णं चरुं निर्वपति श्यामो दक्षिणे'त्यादि। तत्र देशकालकर्तृफलाभेदादङ्गानां तन्त्रत्वम्। न च दक्षिणाभेदात्कर्तृभेदे तन्त्रभेदः। वचनात्तेभ्य एव पुनर्दक्षिणादानसम्भवात्। यद्वा एकैवेयं दक्षिणा विभज्य दीयते अन्वहं द्वादशशतमितिवत्। तेनैकतन्त्र्यमित्याशङ्क्य द्वादशाहे प्रत्यहं दक्षिणाशब्दाभावादेकानतिसत्वेऽपीह दक्षिणाभेदेन तदानतिभेदादन्यथा दक्षिणावयवे लक्षणापत्तेस्तद्भेदाच्च कर्तृस्वरूपस्यापि भेदाद्वामनानतैः पूर्वकर्म कर्तव्यम्। श्यामानतैरुत्तरमित्येवं दक्षिणाभेदात्तन्त्रभेद इत्याह—

राजसूये दक्षिणाया भेदेऽङ्गावृत्तिरिष्यते।

२

अनियमात्स्यादिति ● दक्षिणाभेदात्कर्तृत्वे भिन्ने सति तदधिष्ठानभूताः ऋत्विजस्ते वा अन्ये वेति चिन्त्यते। अत्र भाष्ये दक्षिणाभेदेन प्रयोगाणां भिन्नत्वात्तदङ्गभूतस्यैव वैधवरणस्यापि भेदः। ततश्चैककर्मापवर्गे तदपवर्गात्कर्मान्तरार्थं वरणे तेषामन्येषां चोपादानमित्यनियम इत्याशङ्क्य चिकीर्षान्यायेन सकलस्य राजसूयस्य फलसामग्रीत्वेन चिकीर्षितत्वेन महावेदेरिव वरणस्य साङ्गप्रधानार्थत्वादन्यथाऽनियमे पूर्वर्त्विक्हानेऽन्यालाभे च कर्मलोपाद्वैगुण्यापत्तेः तन्त्रं वरणमित्युपक्रमप्रवृत्ता एवान्तात्कर्तार इत्युक्तम्। वार्तिके त्विष्टिपशुसोमचोदकैः पृथग्वरणप्राप्त्या सर्वार्थतयैकवरणाभावे चिकीर्षान्यायायोगादिष्टिपशुसोमानां परस्परमङ्गाङ्गित्वाभावेन च सौमिकवरणस्य दीक्षणीयादिष्विव प्रसङ्गसिध्ययोगात्कर्मकालीनत्वाच्च दीक्षाकालीनयूपच्छेदनस्य पशुत्रये इव तन्त्रत्वायोगाच्छास्त्रीयं वरणं प्रयोगभेदाद्भिन्नमेव। भाष्यन्तु लौकिकवरणस्य कर्मादावविघ्नार्थमवश्यं कर्त्तव्यत्वात्तत्तन्त्रत्वपरमित्युक्तम् तदाह—

भेदेऽपि दक्षिणायास्स्युः ऋत्विजस्तु त एव हि।

३

अवेष्टौ ● राजसूये अवेष्टिर्नामेष्टिः पञ्चहविष्का श्रुता 'आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा, ऐन्द्रमेकादशतपालमृषभो दक्षिणा, वैश्वदेवं चरुं

पष्ठौही दक्षिणा, मैत्रावरूणीमामीक्षां वशा दक्षिणा, बार्हस्यत्यं चरुं शितिपृष्ठौ दक्षिणे'ति। सेयं राजसूये दशपेयान्ते'दिशोऽनुव्यावस्थापयन्ति दिशामवेष्टयो भवन्ति दिक्ष्वेव प्रतितिष्ठन्ती'त्युदवसानीयास्थाने श्रुता राजसूयाङ्गम्। तस्या एव बहिः प्रयोगो 'यदि ब्राह्मणो यजेते'त्यनेन द्वितीये उक्तः। 'तस्य'एतयान्नाद्यकाममि'ति फलसम्बन्धः। न चैतयेतिविशेषश्रुत्या अन्नाद्यसंयोगान्न स्वाराज्यवाक्यगतयजतिचोदनया प्रकरणापेक्षिण्या इयं गृह्यत इति वाच्यम्। ऋताविष्टयो भवन्तीति बहुत्वाद्दक्षिणाभेदाच्च प्रयोगाणां बहुत्वे सत्येतयेत्यनेन निर्देशायोगात्। एवं प्रयोगभेदे स्थिते क्रतुमध्यप्रयोगे चिन्त्यते। तत्रावेष्टिरित्येकत्वात्क्रतुमध्येऽपीयं समानतन्त्रा, अन्यथा तन्त्रभेदे हविरेकत्वात् बह्वपेक्षमध्यनिधानं 'आहुतिमाहुतिं हुत्वे'ति वीप्सा च बाध्येत। प्रधानाहुतिपरा हीयम्। 'हविषो हविष इष्ट्वा बार्हस्पत्यमभिधारयन्ती'ति श्रुतेः। न च तद्बहिः प्रयोगपरम्। तथात्वे उत्पत्तौक्लृप्तदक्षिणाभेदाद्बहिः प्रयोगेऽपि तन्त्रभेदप्रसङ्गात्। अथ तत्र तन्त्रैक्येऽपि दक्षिणाभेदः स क्रतुमध्येऽपि तुल्यः। तेनोभयत्र तन्त्रैक्यमित्याशङ्क्य बहिः प्रयोगेऽतिदेशप्राप्तदक्षिणाभेदरूपधर्ममात्रबाधेन तन्त्रैक्येऽपि क्रतुमध्ये दक्षिणाभेदेन पर्यवसत्कर्तृभेदाद् 'दिक्ष्विष्टयो भवन्ती'ति देशभेदाच्च तन्त्रभेदावगतेर्बहिः प्रयोगस्थमध्यनिधानस्य वीप्सायाश्च तन्त्रोपस्थित्यभावाद्भिन्नतन्त्रतेत्याह—

अवेष्टी राजसूयान्तर्भिन्नतन्त्रा च सम्मता।

बहिः प्रयोगे तु प्रयोगैक्याद्दक्षिणैक्याच्च समानतन्त्रत्वमित्याह—

बहिःक्रतोर्दक्षिणैक्यं तन्त्रैक्यं चेति निश्चयः॥

४

पवमानहविः ● आधाने पवमानहवींषि 'अग्नये पवमानायाग्नये पावकायाग्नये शुचय' इति। तान्यधिकृत्य'अन्हो निरूप्याणि सर्वाणि सह निरूप्याणी'ति श्रुतम्। तथा 'यः कामयेत वसीयान् श्रेयान् स्यामिति तस्याग्नये पबमानाय, निरूप्य पावकशुचिभ्यामुत्तरे हबिषो समानबर्हीषो निर्वपेदि'ति। तदिह काम्ये प्रयोगे किं समानतन्त्रत्वमुत भिन्नतन्त्रत्वमिति चिन्त्यते। तत्रान्ह इति कालविधेर्दर्शत्रिकवत्तन्त्रैक्यम् न चावेष्टिवन्नित्यकाम्यप्रयोगभेदात्तन्त्रैक्यभेदयोर्व्यवस्थेति वाच्यम्। नित्यप्रयोगानुवादेन काम्यवाक्ये फलसम्बन्धतन्त्रभेदयोर्विधौ वाक्यभेदापत्तेः। तेन काम्यवाक्यस्य फलार्थत्वालाभात्कर्त्रैक्यबोधनादपि प्रयोगैक्यावगतेः काम्येऽपि तन्त्रैक्यमित्याशङ्क्य दध्यादिवद्धविरार्तितस्य प्रयोगभेदे गुणस्यैव फलार्थत्वेन वाक्यभेदाभावात्काम्ये प्रयोगे प्रथमं पृथङ्निरुप्य पश्चादुत्तरे समानतन्त्रे कुर्यादित्याह—

काम्ये तु पवमानादि त्रिके तन्त्रस्य भिन्नता।

५

द्वादशाहे ● द्वादशाहे 'द्वादश दीक्षा द्वादशोपसद' इति श्रुतम्। तत्र द्वादशयागानां फले चोदितानां प्रत्येकमङ्गग्राहित्वाद्दीक्षोपसद्गतायाश्च द्वादश-

सङ्ख्यायाः प्रत्येकमङ्गत्वाद्द्वादश पञ्चविंशतिरात्राः कर्त्तव्याः। यद्वा द्वादशाह-शब्दो गुणविधिर्न तु नाम, तेन द्वादशाहकालोऽङ्गं कालश्च साङ्गप्रयोगगामीति दीक्षोपसद्युक्ताः द्वादश साद्यस्क्राः कर्तव्याः। यद्वा गृह्णीम एतद्द्वादशाहशब्दो गुणविधिरिति तथाप्येकैकस्य साङ्गस्य पृथक् प्रयोगकरणे फलवाक्यगतसाहित्य-बाधापत्त्या तन्त्रेण द्वादशाहस्याङ्गत्वादेकैकदिने तिस्रः तिस्रो दीक्षा इति चतुरहे द्वादश दीक्षाः, तथैव चतुरहे उपसदश्चतुरहे च सुत्या इत्याशङ्क्याभिप्लवपृष्ठ्य-षडहादिभिर्द्वादश सुत्याः प्राप्ता द्वादशाहशब्दस्य यजिसमानाधिकरणस्य तत्प्रख्य-न्यायेन नामधेयत्वात् 'षट्त्रिंशदहो वा एष यद्द्वादशाह' इति लिङ्गाच्च दीक्षोप-सद्गता प्रत्येकं द्वादशसङ्ख्या तन्त्रेण द्वादशाहाङ्गमित्याह—

द्वादशोपसदो दीक्षास्तन्त्रं स्युर्द्वादशाहके।

६

भेदस्तु ● दीक्षोपसद्व्रतसवनीयपशुपुरोडाशादीनां सुत्याकालत्वेऽपि तन्त्र-त्वमित्याशङ्क्य प्रधानकालीनत्वात्तादर्थ्येन विशेषग्रहाद्भेद इत्याह—

सौत्यपश्वादयः सुत्याकालीना भिन्नतामियुः।

७

सुत्याविवृद्धौ ● सोमे उपसत्सुब्रह्मण्याह्वान'मित्यहे सुत्यामागच्छ मघव-न्नि'ति श्रुतम्। तद्द्वादशाहद्यहर्गणेषु तन्त्रमित्युक्तम्। तत्र प्रकृतौ'इत्यह इतीति-शब्देन चतुरह इत्येवं कालेयत्ताया निर्दिष्टत्वादिहापि चोदकात्तथैव प्राप्तेः प्रथमोपसदि सर्वेषां सुत्यान्हां निर्देशार्थं त्रयोदशाहे चतुर्दशाह इत्येवं चतुर्विशाह-पर्यन्तमेकधाशब्दवदहः शब्दस्य सङ्ख्याशब्दस्य चाभ्यास इत्याशङ्क्य प्रकृतावहः सुत्याशब्दयोः परार्थत्वादहर्गणे च येन केनचिदन्हाप्युपलक्षणसिद्धेः तत्र च मुख्य-त्वात्प्रथमेनान्हा उपलक्षणमित्याद्योपसदि त्रयोदशाहे इति द्वितीयोपसदि द्वादशाह इति तृतीयोसदि त्वेकादशाह इत्येवमेकैकस्मिन्नौपसदे ह्येकैकस्यैवोपलक्षणं न तु प्रतिदिनं सर्वेषामुपलक्षणमित्याह—

नान्होऽभ्यासस्तूपसत्सुब्रह्मण्यास्वपि स्मृतः।
त्रयोदशाह आद्या स्याद् द्वादशाहे ततः परा॥

८

पशुगणे ● एकदेवत्येषु प्राजापत्यपशुषु कुम्भीवपाश्रपण्यादिकं तन्त्र-मित्याह—

श्रपणीशूलकुम्भ्यस्तु तन्त्रं पशुगणे स्मृताः।

९

भेदस्तु ● भिन्नदेवत्येष्वपि स्वस्वयाज्यार्धर्चान्ते वसाहोमोक्तेर्वसानां सङ्करापत्तेश्च कुम्भ्यादिभेद इत्याशङ्क्य कालभेदस्यैव वसाहोमभेदहेतुत्वेन

स्वस्वयाज्यार्धनिमित्तावृत्तौ होमावृत्तेः चिन्हकरणेन चाङ्गानां विवेकसम्भवात्त-न्त्रत्वमित्याह—

तथैव देवताभेदे,

१०

जात्यन्तरेषु ● अजमेषादिजातिभेदे तु पङ्क्तिवैषम्यात् सहत्वे चाजादीनां चिरपाकादश्रृतत्वापत्तेर्मेषाणां शीघ्रपाकाद्विलयापत्तेश्च कुम्भ्यादिभेद इत्याह--

भिन्ना जात्यन्तरे मताः ।

११

कपालानि ● पौण्डरीकादावश्वबहुत्वे न्यायतः प्राप्ताश्वप्रतिग्रहेष्टेस्तन्त्रता यावत्तावच्छब्दाभ्यां निरस्ता । पुरोडाशानान्तु बहुदीर्घेषु चतुर्षु कपालेषु श्रपण-सम्भवाच्चतुर्णां कपालानां तन्त्रत्वमित्याशङ्क्य सर्वेषां कपालावयवेषु श्रपणे-नैकस्यापि चतुष्कपालत्वानापत्तेर्यावत्कपालं प्रथयतीति प्रकृतौ यावत्कपालं प्रथनोक्तेश्च भेद इत्याह—

न तन्त्रं स्युः कपालानि नानाश्वानां प्रतिग्रहे ।।

१२

एकद्रव्ये ● 'अवरक्षो दिव' इति हन्तिमन्त्रस्य प्रतिप्रहारं प्रधानावृत्तावा-वृत्तिरित्याशङ्क्य हन्तिस्वरूपे वैय्यर्थ्यान्निवमाद्यन्यायेन मन्त्रस्यावघातकरणक तण्डुलभावनाङ्गत्वात्साभ्यासस्य चावघातस्य भावनाङ्गत्वात्तादृशस्यैव मन्त्रो-ऽङ्गमिति नास्ति प्रधानावृत्तिरिति सकृन्मन्त्र इत्याह—

हन्तिमन्त्रस्य नावृत्तिः,

१३

द्रव्यान्तरे ● नानाबीजेष्वपि प्राजापत्येषु मनोतामन्त्रवत्सर्वावघात-चिकीर्षया प्रयुक्तो मन्त्रस्तन्त्रमित्याशङ्क्यावघातभावनाभेदवत्सकृत् प्रयोग इत्या-शङ्क्यावघातेऽवहतानामेव पुनः पुनरवघातान्मन्त्रस्य सकृत्वेऽपि निर्वापादौ प्रतिमुष्टिव्रोह्यादिसंस्कार्यद्रव्यभेदान्मन्त्रावृत्तिरित्याह —

मन्त्रावृत्तिस्तु निर्वापस्तरणे लवनेऽपि च ।

१४

वेदिप्रोक्षणे ● इष्टौ 'वेदिरसि बर्हिषे त्वेति त्रिर्वेदिं प्रोक्षती'त्यत्र मन्त्रस्य प्रोक्षणभावनार्थत्वात्तस्याश्च सङ्ख्यया भिन्नत्वान्मन्त्रावृत्तिरित्याशङ्क्य-(वाक्येन)विशेषग्रहाद्भेद इत्याह—

नानाबीजेषु सा भवेत् ।

सा मन्त्रावत्तिः ।

१५

निर्वपणे ● इष्टौ 'चतुरो मुष्टीन्निर्वपति' 'अयुग्वा युग्वा मुष्टीर्लुनाति' 'त्रिधातु वेदिं स्तृणाति' 'चतुर्जुह्वा गृह्णाति' इत्यादि निर्वापे लवने वेदिस्तरणे जुह्वाद्याज्यग्रहणे च ये मन्त्राः 'देवस्यत्वा' 'बर्हि र्देवसदनं दामि' ऊर्णां म्रदसं त्वा' 'शुक्रं त्वा शुक्रायामि'ति तेषामवघातमन्त्रवत् क्रियावृत्तौ सुग्विधानेनात्रावृत्तायाः क्रियाया एकत्वान्मन्त्रस्यावृत्तेश्च क्रियाङ्गत्वेन परस्परमङ्गाङ्गित्वाभावात्सकृन्मन्त्र इत्याह—

सकृन्मन्त्रस्तु वेद्यादि प्रोक्षणादौ क्रियैक्यतः ।

१६

कण्डूयने ● सोमे 'कृष्णविषाणया कण्डूयत' इति श्रुतम् । तत्र पादाद्यनेकाङ्गेषु युगपत्कण्डूरुत्पद्येत तदा संस्कार्याङ्गभेदात् 'कृष्यैत्वे'ति मन्त्रस्य प्रत्यङ्गमावृत्तिरित्याशङ्क्याङ्गानामविनियुक्तत्वात्संस्कार्यत्वाभावेनात्मनोऽनाकुलत्वार्थं दुःखोच्छेदस्यैवात्र फलत्वात्तत्र सर्वदुःखोच्छेदार्थं सकृत्प्रयुक्तस्य मन्त्रस्यागृह्यमाणविशेषत्वात्तन्त्रत्वमित्याह—

तन्त्रं कण्डूयौगपद्ये,

कालभेदे तु भिन्नो मन्त्र इत्याह—

भिन्नोऽन्यथा भवेत् ।

१७

स्वप्ननदीतरण ● सोमे 'त्वमग्ने व्रतपा असी'ति स्वप्नमन्त्रस्य 'देवीराप' इति नदीतरणमन्त्रस्य 'उन्दतीर्बलं धत्ते'ति वृष्टिमन्त्रस्य 'अबद्धं मन' इत्यमेध्यदर्शनमन्त्रस्य च प्रतिस्वप्नम् अनेकस्रोतसो नद्याः प्रतिस्रोतं सन्तानेनाभिवर्षणे युगपद्वानेकामेध्यदर्शने चावृत्तिः स्यादित्याशङ्क्य रात्रौ सर्वस्वप्नमेकनाद्याः सर्वस्रोतसि सर्वावृष्टिमेककानि च सर्वामेध्यान्युद्दिश्य सकृत्प्रयोगात्सकृन्मन्त्र इत्याह—

नानास्वप्नेषु नानौघे नानावर्षेष्वमेध्यके ।
सकृदेव भवेन्मन्त्रः,

१८

प्रयाणे ● दीक्षितप्रयाणे 'भद्रादभी'ति मन्त्रस्य विश्रम्य गतौ पुनः पुनः प्रयोगः स्यादित्याशङ्क्य समीहितप्राप्तेरेकं प्रयाणमिति सकृन्मन्त्र इत्याह—

विश्रम्य गमनेऽपि च ।

१९

उपरवः ● सोमे चतुर्षूपरवेषु 'वैष्णवान् खनामि' इति मन्त्रस्य बहुबचना-

न्तत्वात् तन्त्रत्वमित्याशङ्क्य बहुवचनस्य पूजार्थकत्वात् खननक्रियाभेदेन संस्कार्यभेदादावृत्तिरित्याह—

आवृत्तिस्स्यादुपरवमन्त्रस्य खनिभदेतः ।

२०

हविष्कृतं ● प्राजापत्यानां ब्रह्मसामालम्भपक्षे ऋतुपशूनां प्राजापत्यानां चाध्रिगुः सौम्यान्तरितयोश्चाग्नेयकृष्णग्रीवयोर्मनोता, सवनीय हविष्षु हविष्कृदाह्वानञ्चाकरणत्वात्तन्त्रमित्याशङ्क्यार्थप्रकाशनस्य दृष्टार्थत्वात्कालभेदाच्चावृत्तिः कालैक्ये तु तन्त्रमित्याह—

कालभेदेऽध्रिगुमनोता हविष्कृच्चाभिधत्ते ।
कालैक्ये तन्त्रम्,

उपसंहरति ।

इत्युक्तानया एकादशे त्विह ॥

इति भट्टकमलाकरात्मजानन्तभट्टकृतायां
शास्त्रार्थमालावृतौ एकादशोऽध्यायः ॥

वादाः ४ अधिकरणानि ६४

द्वादशः प्रसङ्गाध्यायः

प्रथमः पादः

१

तन्त्रिसमवाये ● एकादशे तन्त्रावापाभ्यां प्रयोगपरिमाणं चिन्तितम्। इदानीं प्रसङ्गेन तदुच्यते। प्रसङ्गो नामान्योद्देशेनानुष्ठितस्यापि अन्योपकारकत्वम्। तत्र दैक्षे पशौ कृतानामङ्गानामुद्देशात्पश्वर्थत्वेन पुरोडाशोपकारकत्वायोगात्प्रकृतौ च तदर्थं कृतस्यैव तदर्थत्वेनान्यार्थस्यान्योपकारार्थत्वादर्शनात् वपया प्रचर्य पुरोडाशेन प्रचरन्ती'ति वपोत्तरकाले साङ्गस्य पुरोडाशस्य कर्तव्यस्य केवलस्य तदानीं करणे वैगुण्यापत्तेराज्यभागयोश्च पशावविद्यमानयोः पुरोडाशे कर्तव्ययोः प्रयाजानन्तर्यबाधापत्तेः पौरोडाशिकानामाज्यभागानां पशौ करणे तु पुरोडाशयागस्याज्यभागानन्तर्यभङ्गापत्तेः पाशुकैश्च पृषदाज्यद्रव्यकैरेकादशसंख्यैरनुयाजैस्तिष्ठत्पशुकालोनैरेकादश सङ्ख्यैश्च प्रयाजैस्त्रिपञ्चाङ्गकपुरोडाशस्य साङ्गत्वायोगान्न प्रसङ्गः किन्तु पौरोडाशिकान्यङ्गानि पृथक् कार्याणीत्याशङ्क्य पश्वर्थाङ्गजन्योपकाराणामाक्रतुसमाप्तेरनपवृक्तानामुपस्थितत्वेन पशुतन्त्रमध्यपतितपुरोडाशप्रयोगविधेस्तद्वतां लब्धप्रधानमात्रविधायित्वाद् द्रव्यसङ्ख्यादिकृतस्य च वैगुण्यस्याङ्गजन्योपकारस्यावैगुण्यादर्थस्याविकृतत्वादित्युक्तेश्चादोषत्वादेकादशसु पञ्चानां त्रयाणां प्राकृतानां पृषदाज्येऽप्याज्यत्वसत्वेन तदपूर्वाणामविकृतानामेवोपकारकत्वाद्दर्शे पौर्णमासीकृताङ्गप्रसङ्गापत्तिशङ्कायाश्च 'पौर्णमास्यां पौर्णमास्ये'ति वाक्याभ्यां प्रयोगद्वयोक्तेस्तन्त्रमध्ये विध्यभावेन चायोगात्सिद्धः प्रसङ्ग इत्याह—

पश्वर्थैस्तु प्रयाजाद्यैः पुरोडाशोपकारतः।
प्रसङ्गसिद्धेरेतेषां तदर्था न पुनः क्रिया॥

२

जैमिनेः ● यत्पुनराज्यभागावघातादिकमङ्गं पशौ नास्ति तदपि पुरोडाशप्रयोगविधिना न विधीयते। पाशुकेन चोदकेन निराकाङ्क्षत्वेन पुरोडाशे चोदकलोपात्। तेन पशौ विद्यमानानामेकपुरोडाशेन सङ्ग्रहादाज्यभागादेरकरणमित्याशङ्क्य पाशुकैरङ्गैः पुरोडाशस्य कथम्भावाऽशान्त्या पौरोडाशिकचोदकस्यावश्याङ्गीकार्यत्वादतिदेशेन तु प्राप्तेषु प्राकृतेष्वङ्गेषु तद्विशिष्टयाः भावनायाः प्रयोगविधिना विधानात्पुरोडाशप्रयोगविधिः पश्वर्थप्रक्रान्तैस्तद्वतामाश्रित्याङ्गान्तरयुक्तां भावनां विधत्त इति सिद्धमङ्गान्तरानुष्ठानमित्याह—

पशौ यत्त्वाज्यभागावघातादि स्यात् तदत्र तु।

३

नानार्थत्वात् ● सोमे महावेदेः प्रचारार्थत्वेन हविरासादनार्थत्वाभावाद्दैक्षपशुसवनीयहविरासादनार्थं दार्शिकी वेदिः पृथक् कार्येत्याशङ्क्य प्रचारार्थाया अपि वेदेः प्रसङ्गाद्धविरासादनोपकारकत्वादासादनमात्रस्यैव प्रकृतौ वेद्यां श्रुतत्वेन स्वार्थायामेवेत्यस्याशास्त्रार्थत्वाच्च न वेदिभेद इत्याह—

सौमिको दैक्षपश्वादौ वेदिः,

४

पात्रेषु ● सोमाङ्गेष्टिषु सौमिकैरेव ग्रहचमसादिभिर्होमादिकार्यसिद्धेः प्रसङ्ग इत्याशङ्क्य जुह्वाद्यङ्गलोपे होमवैगुण्यान्न प्रसङ्ग इत्याह—

तत्पात्रता न तु।

५

शामित्रे ● पशौ शामित्रोऽग्निः श्रपणार्थः पुरोडाशेऽपि स्यादित्याशङ्क्य पशुश्रपणस्य पुरोडाशे प्रसङ्गायोगेन द्वयोः श्रपणभेदात्पुरोडाशे च चोदकप्राप्तस्य गार्हपत्ये हविः श्रपणस्यावैगुण्याय शालामुखीये गार्हपत्यस्थानापन्ने श्रपणमित्याह—

पुरोडाशस्य शामित्रः श्रपणे न प्रसज्यते।

६

श्रपण ● कौण्डपायिनामयनाग्निहोत्रे श्रपणं चोदकप्राप्ते शालामुखीये कर्तव्यम्। तस्य ज्योतिष्टोमे शालामुखीय एव 'तदूर्ध्वं गार्हपत्यो भवती'ति वचनेन गार्हपत्यकार्ये विधानादित्याशङ्क्य चोदकान्नामातिदेशस्य प्राबल्यात् नित्याग्निहोत्रवत् मुख्ये प्राजहित एव श्रपणमित्याह—

कौण्डपाय्यग्निहोत्रे तु श्रप्यं प्राजहिते हविः।

७

हविर्धाने ● सोमे हविर्धानशकटाभ्यामेव सवनीयनिर्वापादेरपि प्रसङ्गेन सिद्धेर्न शकटान्तरं ग्राह्यमित्याशङ्क्यापरेण गार्हपत्यं निर्वपतीति चोदकप्राप्तदेशबाधापत्तेर्मन्त्रवन्निबद्धयोर्हविर्धानयोरन्यत्र नयनायोगाद्वान्यद्ग्राह्यमित्याह—

सौमिके तु हविर्धाने सवनीयान्न निर्वपेत्॥

८

तद्युक्तं च कालभेदात् ● सोमे दीक्षाकालं जागरणमाम्नातम्। तत्र सोमार्थेन दीक्षाकालीनजागरणेन सिद्धेर्न प्रायणीयादौ दार्शिकं जागरणं भिन्नं कार्यमित्याशङ्क्य यदि तावद्दृष्टार्थं यज्ञाङ्गरक्षणार्थं जागरणं ततो दीक्षाकालेषु रक्षितेषु तदुत्तरकालानां रक्षणासिद्धेरदृष्टार्थत्वे तु सौमिकेन जागरणेनैष्टिकजन्यादृष्टसिद्धौ मानाभावात्प्रायणीयादौ प्राकृतं जागरणं कार्यमित्याह—

न दैक्षः प्रायणीयादौ जागरस्तु प्रसज्यते ।

प्राकृत इति शेषः ।

९

मन्त्राश्च ● वरुणप्रघासेषु दक्षिणोत्तरविहारयोरध्वर्युणा होत्रा च प्रयुक्ता निर्वापादिमन्त्रा अन्यतरेण प्रयोक्तव्यास्तेन तन्त्रमित्याशङ्क्य निर्वपामीत्माभिवादित्वान्न तन्त्रता सम्भवतीति भिन्नः प्रयोग इत्याह—

प्रघासेषु द्वयोर्मन्त्रा निर्वापादौ न तन्त्रता ।

१०

धारणार्थत्वात् ● सोमाङ्गेष्टिषु चोदकप्राप्तमग्न्यन्वाधानं कार्यमित्याशङ्क्य यदि तद्धारणार्थं यदि वाग्नेराद्यसमिन्धनार्थं तथापि सोमार्थेन प्रसङ्गात्कार्यसिद्धेर्न भिन्नं कार्यमित्याह

अन्वाधानं न सोमाङ्गेष्टिषु,

११

तथा व्रत ● तत्रैव प्राकृतं व्रतोपायनं कर्तव्यमित्याशङ्क्य पयःसोमार्थेन प्रसङ्गात्कार्यसिद्धेर्न भिन्नं कार्यमित्याह—

न प्राकृतं व्रतम् ।

१२

ग्रहणार्थाव ● यदुक्तमग्निधारणार्थमग्न्यन्वाधानमिति तदाक्षिप्यते । न तद्धारणार्थम् किन्तु देवतापरिग्रहार्थमपि श्रूयते—'ममाग्ने वर्च इत्यग्निं गृह्णाति देवता एव तत्पूर्वेद्युर्गृहीत्वा श्वोभूते यजते' इति । तेन तत्सोमाङ्गेष्टिषु देवतापरिग्रहार्थं कार्यमित्याशङ्क्याग्निधारणे दृष्टे प्रयोजने सत्यदृष्टदेवतापरिग्रहार्थत्वायोगाद्वाक्यशेषस्य तु स्तुतिमात्रोपयुक्तत्वादथापि देवतापरिग्रहार्थे **तथापि** 'अग्निरवमो देवतानां विष्णुः परमः देवता एव तदुभयीः परिगृह्य श्वोभूते यजते' इति दीक्षणीयाया अपि देवतापरिग्रहार्थत्वश्रुतेः । तत्र च यद्यपि 'दीक्षाः सोमस्ये'ति **वचनात्** प्रधानदेवतासंस्कारकेष्टिस्तथापि वैश्वदेवग्रहे विश्वेदेवशब्दस्य देवतागणे रूढत्वाभावेनावयव्युत्पत्त्या सर्वदेवतावाचित्वाद्दीक्षणीयया तत्परिग्रहे च प्रसङ्गादङ्गदेवतानामपि परिग्रहसिद्धेर्देवतापरिग्रहार्थत्वेऽपि नेष्टिषु तत्कार्यमित्याह—

अन्वाधानं यद्यपि स्याद्देवतानां परिग्रहे ।
तथापि तत्र दीक्षेष्टेः परं ते तैर्न सिद्धितः ॥

१३

सन्नह ● सोमाङ्गेष्टिष्वतिदेशप्राप्तं पत्नीसन्नहनं कार्यमित्याशङ्क्य सन्नहनस्य वासोधारणार्थत्वाद् दीक्षाकाले च सोमार्थेन सन्नहनेन वाससो धारितत्वादकर्त्तव्यम् । अथापि न वासोधारणार्थं तथापि **सन्नद्धयैव कर्माणि**

कार्याणीत्येतदर्थं सन्नहनम् तत्र चान्यार्थेनापि तेन सा सन्नद्धैवेति न पुनः कार्य-मित्याह—

पत्नीसन्नहनन्नैव दीक्षेष्टेःपरमिष्यते ।

१४

अन्यविधानात् ● एवं तास्वारण्याशनरूपे व्रतमपि न कार्यं सोमार्थेनैव पयोव्रतादिना नियमसिद्धेरित्याह—

नारण्याशानमप्युक्तम् ,

१५

शेषभक्षास्तथेतिचेत् ● एवं तर्हि इडाभक्षणादयोऽपि वृत्यर्थत्वात्स्वामिनो नेत्याशङ्क्य 'इडां भक्षयती'ति द्वितीयया तेषां शेषप्रतिपत्यर्थत्वेन वृत्यर्थत्वा-भावात्ते स्युरित्याह—

शेषभक्षास्तु सम्मताः ।

१६

भृतत्वाच्चापरिक्रयः ● सोमे 'दक्षिणा सोमस्ये'ति वचनात्प्रधानार्था द्वादशशतदक्षिणा । तेनाङ्गेष्टिषु चोदकप्राप्तान्वाहार्यदक्षिणा स्यादित्याशङ्क्य साङ्गप्रधानार्थया तयैव प्रसङ्गात्कार्यसिद्धेः पृथक् दक्षिणायां चाङ्गेष्वानति-भेदादङ्गे प्राधानानामश्रुतकर्तृभेदापत्तेर्नाङ्गेषु भिन्ना दक्षिणेत्याह—

नान्वाहार्यो दक्षिणा स्यात् ,

१७

शेषभक्षास्तथेति चेत् ● सोमभक्षस्य परिक्रयार्थत्वात् सोमदक्षिणया निवृत्तिरित्याशङ्क्य द्वितीयया भक्षाणां शेषप्रतिपत्यर्थत्वस्य दशमे साधितत्वान्न सोमभक्षनिवृत्तिरित्याह—

सोमभक्षस्तु ऋत्विजाम् ।

१८

प्रवृत्तवरणत्वात् ● सोमाङ्गेष्टिषु'अग्निर्मे होते'ति सौमिकेन वरणेनान-तिसिद्धेः प्राकृतं'अग्निर्देवो होते'ति होतुर्वरणं न कार्यम् । न च प्रकृतौ प्रवृत्ते होतरि क्रियमाणमृतुज्यायावरणवददृष्टार्थं होतुर्वरणमतस्तदिष्टिषु स्यादिति वाच्यम् । ऋतुयाज्यावरणं हि सौमिके वरणे नानत्यर्थं पूर्वं कृते युक्तमदृ-ष्टार्थम् । न चेष्टौ होतुः प्रागस्ति वरणम् । तेन यथा पूर्वेद्युर्वेदिकरणेऽनुमति-दानार्थं प्रवृत्ते ब्रह्मणि परेद्युः प्रणीताप्रणयनकाले क्रियमाणं दृष्टार्थमेव, अन्यथा सोमेष्टिषु ब्रह्मवरणापत्तेः । तथा प्रवृत्तेऽपि होतुर्वरणं दृष्टार्थमेव । तस्माद्ब्रह्मव न्न होतुर्वरणमित्याशङ्क्य दक्षिणादानस्य भविष्यतोऽप्यानतिनिमित्तत्वेऽपि प्रवृ-त्तवरणस्य कथञ्चन द्रष्टार्थत्वायोगाद् ब्रह्मवरणस्य तु येषां पूर्वेद्युराज्ञा विहिता

तेषां वेद्यपकर्षवशादर्थक्रमेण पाठं बाधित्वा पूर्वेद्युरेवानुष्ठानाद्येषान्तु नोक्ताः तेषान्त्वपरेद्युरेवेत्युभयथाप्यप्रवृत्तविषयस्य ब्रह्मवरणस्य दृष्टार्थत्वाद्धोतृवरणस्य तु 'अवृतः सामिधेनी'रित्युक्तेः पूर्वमपकर्षायोगात् प्रवृत्ते उक्तमदृष्टार्थं होतुर्वरण-मतस्तत्सोमाङ्गेष्टिषु स्यादित्याह—

अग्निर्दैव इति त्वार्षे होतुर्वरणमिष्यते ।

सोमाङ्गेष्टिष्वित्यध्याहारः ।

१९

यज्ञौत्पत्त्युपदेशे ● 'यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्ये'त्यत्र बर्हिःसाधारण्यविधिरित्युक्तम् । इदानीं प्रोक्षणादिकर्मणां कर्मत्रये आवृत्तिरुतोप-सत्स्वेवानुष्ठानमिति विचार्यते । तत्र तन्त्रमध्यपाताभावान्न प्रसङ्गो नापि तन्त्रता, आतिथ्याकालत्वेन विशेषग्रहणादतस्तेषामवृत्तिः स्यादित्याशङ्क्य अग्नी-षोमीयापवर्गेऽपि यूपानपवर्गात्तत्संस्काराणां सवनीयानुबन्ध्यार्थत्ववद्बर्हिषः साधा-रण्येऽप्यातिथ्यापवर्गे तस्यानपवर्गादातिथ्याकाले कृतानां संस्काराणामुपसत्स्वग्नी-षोमीये च प्रसङ्गादुपकारकत्वात्तत्र च तन्त्रमध्ये विधानाभावेऽपि बर्हिः कार्यार्थिनां संस्काराणां बर्हिरैक्यात्तद्द्वारा सर्वार्थत्वावगतेः प्राथम्यादातिथ्या-कालेऽनुष्ठानस्य नान्तरीयकत्वान्न ते भेदेन कर्तव्या इत्याह—

आतिथ्यायामेव बर्हिःसंस्काराः प्रोक्षणादयः ॥

२०

देशपृथक्त्वात् ● तदेव बर्हिः प्राग्वंशे आतिथ्यार्थं स्तीर्णं पुनरुत्तरवेदि-देशे दैक्षपश्वर्थं यदास्तीर्यते तदा'ऊर्णाम्रदसं त्वे'ति मन्त्रोऽपि प्रसङ्गात्सकृत्स्या-दित्याशङ्क्य 'वेदिं स्तृणीतेति द्वितीयया स्तरणस्य वेदिसंस्कारार्थत्वेन संस्कार्य-देशभेदे समन्त्रकस्तरणावृत्तिप्रतीतेरन्यथाग्नीषोमीयहविरासादानवैगुण्यापत्तेरा-वृत्तिर्मन्त्रस्येत्याह—

देशभेदात्तु दैक्षे स्यान्मन्त्रवत्स्तरणं पुनः ।

तस्मिन्नेव बर्हिषि देशभेदात्पुनः स्तीर्यमाणे 'पूषा ते ग्रन्थिं ग्रथ्नातु बृहस्पते-र्मूर्ध्ने'ति बन्धनहरणमन्त्रयोस्तदावृत्तावावृत्तिरित्याशङ्क्य प्रकृतावरण्यात्तस्य बर्हिषो यद्विहारदेशं प्रति प्रापणं तदर्थत्वान्मन्त्रद्वयस्य यथा प्रकृतावेव गार्हपत्या-दाहवनीयं प्रति नीयमानेन प्रयोगस्तत्रापि विहारदेशं प्रापितस्य बर्हिषो वेदि-प्रापणार्थे सन्नहने हरणे च न मन्त्र इत्याह—

बर्हिस्सन्नहने मन्त्रो हरणे च न तु स्मृतः ॥

द्वादशे प्रथमः पादः

द्वितीयः पादः

१

विहार ● आधानोत्पन्नाः प्रयोजनापेक्षाः गार्हपत्यादयः सामर्थ्यात्पचन-प्रकाशनहोमहविःश्रपणादिलौकिकवैदिकसर्वाग्निकार्यार्थाः अन्यथा मांसपाक-निषेधायोगादित्याशङ्क्य 'यदाहवनीये जुहोति' 'गार्हपत्ये हवींषि श्रपयति' 'दक्षिणाग्नावन्वाहार्यं पचती'त्यादि प्रत्यक्षवचनान्निर्दिष्टैरेव प्रयोजनैर्निराकाङ्-क्षाणां लिङ्गात्सर्वार्थत्वायोगान्मांसपाकनिषेधस्य तु वैदिकश्रपण एवोपपन्नत्वा त्स्थालीपाकादौ विशेषत औपसानाग्नेरुक्त्या तत्र श्रौताग्निप्राप्त्यभावाच्च श्रौत एव कर्मणि गार्हपत्यादय इत्याह—

गार्हपत्यादयः श्रौतकर्मण्येव न लौकिके ।

२

सवनीये ● सवनीये पशौ चोदकप्राप्तः पशुपुरोडाशो न कार्यः । तत्कार्यस्य छिद्रापिधानस्य सवनीयैरेव सिद्धेः । प्रकृतौ हि 'सुषिरो वा एतर्हि पशुर्यद्वपामुत्खिदन्ति व्रीहिमयः पुरोडाशो निरुप्यते अपिहत्या अच्छिद्रताया' इति छिद्रापिधानं तस्य कार्यं श्रुतम् । सवनीयेऽपि तदेव श्रूयते 'अनुसवनं सवनीयाः पुरोडाशा निरुप्यन्ते अपिहत्या अच्छिद्रताया' इति । तेनोभयोरेक-कार्यत्वात्पशुपुरोडाशनिवृत्तिः, यद्वा 'पुरोडाशेन माध्यन्दिने सवने' इति लिङ्गा-द्विकल्प इत्याशङ्क्य पशुपुरोडाशस्य दृष्टदेवतासंस्कारकत्वे सम्भवति प्रत्यक्ष-विरुद्धानपेक्षितछिद्रापिधानार्थत्वायोगेन तद्वचनस्यार्थवादत्वात् 'पुरोडाशेन मध्यन्दिने सवने' इति च लिङ्गस्यापाक्षिकत्वात्प्रत्यक्षश्रुतानां सावनीयानामाति-देशिकपुरोडाशेन विकल्पायोगाच्च पुरोडाशो नित्यं स्यादित्याह—

सौत्ये पशौ पुरोडाशः सवनीयात्पृथक् भवेत् ।

३

हविष्कृत्सवनीयेषु ● प्रकृतौ पात्रप्रोक्षणानन्तरं क्रियमाणं हविष्कृदा-ह्वानमाज्यौषधसान्नय्यानामङ्गमिति कृत्वा चिन्त्यते । तदा हि सान्नाय्यविकारे पशावपि स्वीयपात्रप्रोक्षणानन्तरमाहूतया हविष्कृत् सवनीयपुरोडाशष्वपि तन्मध्य-पातिषु प्रसङ्गादुपकरोतीति न पृथगाह्वातव्येत्याह—

सौत्ये पशौ हविष्कृच्चेत्सवनीयेषु नो पृथक् ।

४

पशौ संस्कृतौ ● तृतीयसवने सवनीयपशुपाकानन्तरं क्रियमाणानां सवनीय हविः सौम्यचरुद्विकपालाश्विनानामर्थे पुनर्भिन्नं हविष्कृदाह्वानं हविष्कृत्समाख्यया कार्यम् । सवनीयार्थमाहूतायास्तत्सिद्धावपवृत्तत्वादित्याशङ्क्य प्रातः सवने पश्व-र्थपात्रप्रोक्षण एव सर्वयज्ञे साहाय्यं कर्तुमाहूतायास्तस्याः लिङ्गात्सर्वार्थतावगमेन दुर्बलया हविष्कृत्समाख्यया बाधायोगात्पशौ पक्वेऽप्यापशुप्रयोगं पत्नीसंयाजान्ते

उत्थानविधानेन तत एव सवनीयादिषु प्रसङ्गसिद्धेश्च न पुनराह्वानमित्याह—

चरौ सौम्ये द्विकपालाश्विनादिषु च नो पृथक् ।

५

निशियज्ञे ● 'अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यो रक्षोभ्यो बिभियादि'ति विधायोक्तम् 'अमावास्यायां निशि यजेते'ति । तत्रामावस्यायां निशीति सामानाधिकरण्येनामावास्याशब्दस्य काले मुख्यस्य कर्मवाचित्वायोगेन वाक्यात्प्रकरणाद्वा कर्मोपस्थापनायोगात्प्रकरणान्तरत्वाच्च निशीष्टेर्दर्शस्य च मिथः समीक्षणाभावाद्दर्शवन्निशीष्टिरपि स्वाङ्गानि पृथक् प्रयुञ्ज्यादित्याशङ्क्य अमावास्याशब्दस्य कालवाचित्वे प्रकरणान्तरे च सत्यपि प्रवृत्तामावास्यातन्त्र-मध्यपतिताया निशीष्टेः फलतस्तन्त्रमध्यविधानलाभाद्दर्शतन्त्रं गृहीत्वा कृतार्थेष्टिर्न स्वीयतन्त्रप्रयोजिका । यत्तु तत उपजीवितुमशक्यमिध्माबर्हिः सामिधेन्यादि तत्तु स्वयं प्रयोजयत्येवेत्याह—

बर्हीध्मवर्जं दर्शाङ्गं निशीष्टौ स्यात् प्रसङ्गतः ।

६

आरम्भणीया ● अत्र वार्तिके यावज्जीवप्रयोगस्यैकत्वात् तन्मध्यपतितासु विकृतिषु प्रसङ्गसिद्धेर्न पृथगारम्भणीया कर्तव्येत्याशङ्क्य यावज्जीववाक्ये काल-विधिपक्षं विना प्रसङ्गाशङ्कायोगात्कालविधेस्त्वभ्यासलक्षणापत्या द्वितीये निरस्तत्वान्नैवं सिद्धान्तसिद्धिरिति मत्वा कर्तृधर्मो नियमश्चोद्यत इत्यवलम्ब्यैवा न्यथा व्याख्यातम् । तत्र नवमे सकृदेवारम्भणीया कर्तव्या न प्रतिप्रयोगमित्युक्ते-स्तज्जन्यसंस्कारस्य विकृतौ सत्वात्प्रसङ्ग इत्याशङ्क्य प्रयोगाणां भिन्नत्वेऽपि दर्शपूर्णमासारम्भस्यैकत्वेन तद्द्वारारम्भणीयेष्टेरप्येकत्वाद्विकृतौ त्वारम्भभेदा-द्भिन्नेत्युक्तं तदाह—

प्रकृत्यर्थारम्भणीया विकृतौ न प्रसज्यते ॥

तेन तत्र भिन्नेत्यध्याहारः ।

७

विप्रतिषिद्ध ● पञ्चदशरात्रे अग्निष्टुत् प्रथममहः । तत्र नामातिदेशा-दाग्नेयी सुब्रह्मण्या । ततो ज्योतिर्गौरायुरिति त्र्यहः । तत्र नाम्ना ऐन्द्री । परि-शिष्टेष्वेकादशस्वहस्सु द्वादशाहादैन्द्री तत्रोपसत्कालीनसुब्रह्मण्यायां तन्त्रेणाह्वान-मित्युक्तम् । अत्र भाष्ये चोदकनामधेययोर्भूयोऽल्पविरोधे आग्नेयैन्द्योरनियमः, यद्वा ज्योतिर्गौरायुरिति नामभिस्त्र्यहे ऐन्द्रो । अग्निष्टुति त्वाग्नेयीत्येवं नामप्राप्ता-ग्नेयैन्द्योरनियम इत्याशङ्क्य बहूनां साधर्म्यादैन्द्रीति सिद्धान्तितम् । वार्तिके तु देवतासंस्कारार्थाह्वानस्य संस्कार्यभेदे आवृत्तेरेव न्याय्यत्वाद्द्वे अपि सुब्रह्मण्ये भेदेनाह्वातव्ये इति न तन्त्रं न वा प्रसङ्गस्सम्भवतीत्यन्यदुदाहरणमुक्तम् । पशु-कामेष्टौ 'अग्नये दात्रे पुरोडाशोऽष्टाकपालः । इन्द्राय प्रदात्रे एकादशकपालः

दधिमधुघृतमापो धानास्तत्संसृष्टं प्राजापत्यमि'ति प्राजापत्येषु पञ्चसु यागभेद इत्यष्टमे सिद्धम्। तत्राग्नेयः प्राजापत्या धानाश्चाग्नेयविकारत्वादुभयथाप्यविरुद्धाः। तद्भिन्नेषु पञ्चसु यागेषु ऐन्द्रपुरोडाशः हविःसामान्याद्देवतांशसाम्याच्चैन्द्रयागविकारः। तेन तत्र दधनि च दर्शतन्त्रम्। मधुघृतायां तूपांशुयाजविकारत्वात्पौर्णमासतन्त्रम्। तत्र सहप्रयोगे दर्शविकारयोर्द्वयोर्वृधन्वतीमन्त्रौ प्राप्तौ, पौर्णमासीविकाराणां त्रयाणां वार्त्रघ्न्यौ। एवं हविषः संसृष्टत्वात्सकृदभिमर्शे चतुर्होतृपञ्चहोत्रोर्विरोधः। तत्रान्यतरेण कार्यसिद्धेरनियमः। यद्वा ऐन्द्रपुरोडाशस्य वस्तुतो मुख्यत्वाद्दार्शिक एव विध्यन्त इत्याशङ्क्य भूयसां मध्वादीनां साधर्म्याय पौर्णमासिकधर्मानुग्रह इत्याह—

विरुद्धधर्मसत्वे तु भूयसां स्यात्सधर्मता।

८

मुख्यं वा ● यत्र समसङ्ख्यानां धर्मविप्रतिषेधः यथाध्वरकल्पायाम् 'आग्नावैष्णवं द्वादशकपालं निर्वपदेपराह्णे सरस्वत्यज्यभागा स्यादि'ति तत्राग्नावैष्णवस्यैन्द्राग्नविकारत्वाद्दार्शतन्त्रम्। अन्त्ये तु पौर्णमासम्। तेन तत्राद्ये वेदानन्तरवेदिकरणपञ्चहोत्राभिमर्शनवृधन्वत्याज्यभागानुवाक्याप्राप्तेरन्त्ये च हविरधिवासनानन्तरवेदिकरणचतुर्होत्राभिमर्शनवार्त्रघ्न्यनुवाक्याप्राप्तेरनियम इत्याशङ्क्य प्रथमस्यासञ्जातविरोधित्वात्तन्त्रमिति वृधन्वन्तावेवात्र मन्त्राविर्याह—

तत्साम्ये मुख्यधर्मः स्यात्,

वस्तुतस्त्वयमाग्नावैष्णवः पञ्चाक्षरत्वसाम्याद्द्वादशकपालत्वसाम्याच्चाग्नीषोमीयविकार एव। तेनान्यदुदाहरणं द्रष्टव्यम्।

९

अङ्गगुणविरोधे च ● 'य इष्ट्या पशुना सोमेने'त्यत्र दीक्षणीयासुत्ययोः पर्वकालत्वासम्भवादनियमो मुख्यधर्मानुग्रहो वेत्याशङ्क्याङ्गानां प्रधानार्थत्वेन प्रधानसाद्गुण्यस्यैवापेक्षितत्वात्सोमकालाबाध इत्याह—

न प्रधानाङ्गबाधनम्।
यथा सुत्या पर्वकाले स्यात्तथा दीक्षाङ्गबाधनम्।

१०

परिधिः ● 'परिधौ' पशुं नियुञ्जीते'त्युत्पन्ने परिधौ परिधानं यूपकार्यञ्च कुर्वन् परिधिः स्वधर्मान् संमार्जनादीन् यूपधर्मांश्च परिव्याणादील्लभेतेत्याह—

परिधिस्तु द्विधर्मा स्यात्,

११

यौप्यस्तु ● तक्षणादिविरुद्धधर्मेषु यूपस्य हविषा पशुना साक्षात् सम्बन्धेन तद्द्वारा प्रधानसम्बन्धाद् यूपधर्मानुग्रह इत्याशङ्क्य परिधेः सतो नियोजने

विघानादपरित्यक्तस्वधर्मा परिधिः यूपधर्माल्लिभेतेत्याह—

विरोधे परिधेर्मताः ।

१२

पशुसवनीयेषु ● सौत्यः 'वपया प्रातस्सवने प्रचरन्ति पुरोडाशेन माध्यन्दिने अङ्गैस्तृतीयसवन' इति वचनात्प्रातस्सवने आरभ्य तृतीयसवने समाप्यते। सवनीयाः पुरोडाशाः प्रतिसवनं विहिताः 'अनुसवनं सवनीयाः पुरोडाशा निरुप्यन्त' इति। माध्यन्दिनतृतीयसवनीयपुरोडाशानां सौत्यपशुतन्त्रान्तःपातादसन्दिग्धं प्रासङ्गिकत्वम्। प्रातस्सवनिकानां पशोश्च मिथः चिन्त्यते यस्य पूर्वमुपक्रमो यस्य वा पश्चात्समाप्तिः स तन्त्री, अन्यस्तु प्रसङ्गी। तत्र पशोर्हृदयादिप्रचारस्य तृतीयसवने विधानात्प्रातस्सवनिकपौरोडाशिकानुयाजानां च 'आग्निमारुतादूर्ध्व-मनुयाजैश्चरन्ती'त्युत्कर्षविधानात्पशोः पुरोडाशानाञ्च मिथस्तन्त्रित्वप्रसङ्गित्व-योर्न विशेष इत्याशङ्क्य दैक्षे पशौ'अग्निमद्य होतारमवृणीते'ति पठितस्य पुनः सौत्ये पशौ'अग्निमद्य होतारमवृणीतायं सुतासुती' इति विकृतस्य मैत्रावरुणकर्तृक-स्य प्रैषस्य सवनीयानां तन्त्रित्वे तेषां पाशुकप्रैषाभावेन प्रशास्त्रभावेन चानुपपत्तेर-नूयाजानामपि 'अङ्गैस्तृतीयसवन' इत्युत्कृष्टानां पाशुकानामेवाग्निमारुतोत्तरकाले नियमात्पुरोडाशानान्त्वनुसवनं निरुप्यन्त इति वचनात्प्रातः सवने समाप्त्या तदीयानूयाजोत्कर्षविधानायोगात्पूर्वदिने पञ्चदोहानां पाकानन्तरं सौत्यपशुतन्त्रो-पक्रमाच्च पशुरेव तन्त्री पुरोडाशास्तु प्रसङ्गिन इत्याह—

न तन्त्रं सवनीयेषु तेन ते स्युः प्रसङ्गिनः ।

१३

अपूर्वे च ● प्रकृतिर्यावज्जीवं पर्वणि प्रयुज्यते। विकृतिरपि कामेन निमित्तेन वा तत्रैव प्राप्नोति। तत्र प्रकृतिविकृत्योस्तन्त्रेण प्रयोगं कृत्वा चिन्त्यते। तत्र प्रकृतेः पूर्वं प्रवृत्तत्वात्सैव तन्त्रिणी न विकृतिः। तस्याः प्रसङ्गित्वात्। तेन राक्षोघ्नी सामिधेन्यादि विरुद्धधर्मबाध इत्याशङ्क्य सर्वदा प्राकृतानां प्रयोगे वैकृतविशेषविधिवैयर्थ्यापत्तेः प्रतिपर्व प्रकृतेः समाप्त्या च यावज्जीविकैकप्रयोगा-भावात्प्रकृतेः पूर्वं प्रवृत्यभावाच्च विकृतिरेव तन्त्रिणीत्याह—

प्रकृत्येयमेकतन्त्रा विकृतिः सैव तन्त्रिणी ।

१४

अधिकश्च गुणः ● आग्रयणेष्टयामैन्द्राग्नवैश्वदेवद्यावापृथिव्यानि हवींषि। तत्र द्यावापृथिव्यस्य वैश्वदेविकैककपालविकारत्वात् प्रसूनं बर्हिः प्राप्तम्। ऐन्द्राग्न वैश्वदेवयोस्त्वनियतम्। तत्रैन्द्राग्नादेर्मुख्यत्वाद्भूयस्त्वाच्च तदीय एवानियमो बर्हिषि स्यात्। न तु एकस्य जघन्यस्य च द्यावापृथिव्यस्य धर्मः प्रसूननियम आदर्तव्य इत्याशङ्क्य प्रसूनोपादानेऽप्यन्ययोर्वैगुण्याभावादनियमे चास्य वैगुण्या-पत्तेः नियमस्य शास्त्रार्थत्वाभावाच्च कांस्यभोजिन्यायेन प्रसूनमेवेत्याह—

बर्हिराग्रयणे द्यावापृथिव्ये पुष्पितं भवेत् ।

१५

तत्प्रकृत्यानु ● यथा 'अग्निमद्ये'ति वैशेषिकप्रैषदर्शनात् पशोस्तन्त्रित्वमेवं वैशिषिकप्रसूनविधिदर्शनाद्द्यावापृथिव्यस्यैव तन्त्रित्वम्। ततश्च विरुद्धेष्वपि द्यावापृथिव्यस्यैव तन्त्रित्वम् ततश्च विरुद्धेष्वपि द्यावापृथिव्यस्यैव धर्मोऽनुग्राह्य इत्याशङ्क्येतरेतरानालोचनेन विहितानां सर्वेषां तन्त्रिणामविरुद्धेष्वेकानुसरणेऽपि विरुद्धस्थले मुख्यभूयस्त्वाभ्यामेव निर्णयादैन्द्राग्नादिधर्मा एव ग्राह्या इत्याह—

द्यावापृथिव्यस्यैव स्यात्तावता नैव तन्त्रिता ॥

द्वादशे द्वितीयः पादः ॥

तृतीयः पादः

१

विश्वजिति ● अष्टरात्रे विश्वजित्प्रथमः तत्र नामातिदेशादेकाहविश्वजिद्धर्मो'अवभृथादुदेत्य वत्सत्वचं परिधत्त' इति प्राप्तः। अन्येषु सप्तसु ज्योतिष्टोमात् अहतं वासः प्राप्तम्। तत्र महाव्रते तार्प्यादिवद् 'वासांसि विस्रंसयती'ति वासो बहुत्वदर्शनादसति समुच्चये भूयोधर्मत्वादहतानुग्रह इत्याशङ्क्य कौपीनाच्छादने वत्सत्वचोऽयोग्यत्वात्कम्बलादिवदुत्तरीयादि स्थानापन्नत्वेन भिन्नविषयत्वात् समुच्चय इत्याह—

वत्सत्वचो विश्वजिति वाससा स्यात्समुच्चयः ।

२

अनुनिर्वाप्येषु ● अग्नीषोमीयस्य पशुपुरोडाशायामिष्टौ 'देवसुवां हवींष्यनुनिर्वपति'इत्यत्रानुनिर्वाप्याणां भूयस्त्वात्तेषां तन्त्रित्वं पशुपुरोडाशस्य तु प्रसङ्गित्वमित्याशङ्क्य तेषां सहचोदनोपक्रमयोरभावात्पुरोडाशतन्त्रमध्ये तेषां विधानादनुशब्दाच्च पुरोडाशस्यैव तन्त्रित्वमित्याह—

अग्नौ दैक्षपशावष्टहविषां नैव तन्त्रिता ।

३

एक कर्मणि ● इष्टौ 'ऊर्ध्वमाघारयति ऋजुमाघारयती'त्यादावेकार्थत्वान्निरपेक्षविधानाच्च विकल्प इत्याशङ्क्य सर्वेषां सह सम्भवात् प्रयोगविधिना सर्वेषां ग्रहणाच्च समुच्चय इत्याह—

आधारे ऋजुमित्यादि विज्ञेयन्तु समुच्चितम् ।

४

एकार्थास्तु ● व्रीहियवादावपि पूर्ववत् सर्वाङ्गोपसंहारिप्रयोगवचनानुग्रहादष्टदोषदुष्टविकल्पापत्तेश्च ग्रहयागन्यायेन प्रधानस्यापि यागस्याभ्यासमाश्रित्य प्रयोगः। यद्वा मिश्रैर्वा याग इत्याशङ्क्य सोमे द्रव्यदेवतासंयोगानामदृष्टार्थत्वात्प्रकरणेन युगपद्ग्रहणाच्च सर्वसम्पादनायाभ्यासेऽपि व्रीहियवयोरेक पुरोडाशनिर्वृत्तिद्वारा यागनिर्वृत्तावन्योन्यानपेक्षतया नियमविधित्वादन्यव्यावृत्या विहितयोर्विकल्पस्यैव न्याय्यत्वान्मिश्रणे च 'समर्थः पदविधिरिति सुविभक्त्यवगतनैरपेक्ष्यबाधापत्तेर्विकल्प इत्याह—

यागे व्रीहियवादेः स्यात् विकल्पो न समुच्चयः।

विकल्पे अष्टौ दोषास्तु विरोधाधिकरणे वार्तिके उक्ताः। व्रीहिशास्त्रप्रवृत्तिकाले यवशास्त्रे प्रतीतप्रमाणत्वापन्हवः। अप्रतीताप्रामाण्यकल्पनञ्चेति दोषद्वयम्। कल्पिताप्रामाण्यस्य च यवशास्त्रस्य प्रामाण्योज्जीवनं विना तदर्थानुष्ठानायोगात्तदर्थानुष्ठानकाले यवशास्त्र एव कल्पिताप्रामाण्यत्यागः निराकृतप्रामाण्योज्जीवनञ्चेत्येवं चत्वारो दोषाः। एवं व्रीहिशास्त्रेऽपि। एवं त्रिविकल्पे द्वादशदोषाः। अग्निहोत्रे दशद्रव्यविकल्पे चत्वारिंशत् ते चाष्टौ दोषाः व्यवस्थितविकल्पेन सम्भवन्तीत्युक्तं शाखान्तराधिकरणे वार्तिके। बृहद्रथन्तरादौ वाचनिके च विकल्पे वाशब्देन पक्षे कर्तव्यतोक्तेर्नाप्रामाण्यापत्तिरिति न तत्राष्टौ दोषाः। यदा तु 'व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्यः यवैरिष्ट्वा यवैरेव यजेता व्रीहिभ्य' इति सङ्कर्षणकाण्डवाक्याद् व्रीहियवाग्रयणाभ्यां व्यवस्था तस्मिन् व्यवस्थितकल्पेऽपि नाष्टौ दोषा इत्युक्तं राणके।

५

प्रायश्चित्तेषु ● यानि दोषनिर्घातार्थानि कर्माणि यथा'योऽमावास्यां पौर्णमासीं वातिपातयेत् अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' 'योऽमावास्यां पौर्णमासीं वातिपातयेद्वैश्वानरं द्वादशकपालं निर्वपेदि'त्यादीनि तेऽप्यदृष्टार्थत्वात्प्रयाजादिवत्समुच्चय इत्याशङ्क्य दोषनिर्घातार्थं भिन्नवाक्ये निरपेक्षतया विधानाद्विकल्प इत्याह—

एकार्थत्वात् पाथिकृतीवैश्वानर्योर्विकल्पनम्।

६

समुच्चयस्तु ● यानि न दोषनिर्घातार्थानि निमित्ते विधीयन्ते यथा'भिन्ने जुहोती'त्यादीनि तेषां भिन्नप्रयोजनत्वात्समुच्चय इत्याह—

भिन्नस्कन्नादि होमानां भिन्नार्थत्वात्समुच्चयः॥

७

मन्त्राणां ● 'पर्वणि नाध्येतव्यमि'त्यादि मन्त्राध्ययनधर्माणां मन्त्रप्रयोगार्थत्वात्कर्मकालेऽपि प्रवृत्तिरित्याशङ्क्य स्वाध्यायविधिविहितग्रहणार्थाध्य-

यनस्याविघ्नसमाप्त्युपकारेणाङ्गभूतानामेषां कर्माङ्गत्वाभावात्कर्मणां पर्वकालत्वेन तत्र निषेधे कर्माभावापत्तेश्च तत्कर्मसु कर्मनिषेधप्रवृत्तिरित्याह—

कर्ममध्ये मन्त्रपाठे पर्वदोषो न विद्यते ।

८

भाषास्वरोपदेशे ● ये मन्त्राः संहितायां भिन्नस्वरेणाम्नाताः ब्राह्मणे चान्यस्वरेण विनियुक्तास्तेषु स्वरविशिष्टस्य विधिना विधानात् ब्राह्मणस्वर एव स्यादित्याशङ्क्य लिङ्गविनियोज्येषु मन्त्रेषु तावद्ब्राह्मणस्य गुणार्थवादपरिसङ्ख्यार्थत्वाद्वचनविनियोज्येषु तु ब्राह्मणस्य मन्त्रविधिपरत्वेन स्वरविधिपरत्वाभावान्न कर्मसु ब्राह्मणस्वर इत्याह—

संहितास्थः स्वरो मन्त्रे ब्राह्मणस्थो न कर्हिचित् ॥

९

तन्न्यायत्वात् ● ये तु संहितायां नोक्ताः किन्तु ब्राह्मण एव तत्र तु ब्राह्मणस्वर एवेत्याह—

ये संहितायां नो मन्त्रास्तेषां ब्राह्मणगः स्वरः ।

१०

मन्त्राणां ● करणमन्त्रेषु मन्त्रमध्ये समवेताभिधायिपदोत्तरं वा कालविलम्बेन वा कर्मप्रयोग इत्याशङ्क्य सर्वमन्त्रजन्यस्मरणस्य कर्माङ्गत्वादन्यथा कृत्स्नमन्त्रविनियोगवैयर्थ्यापत्तेः कालान्तरे तु ज्ञाननाशान्मन्त्रान्तस्य कर्मादेश्च सन्निपात इत्याह—

मन्त्रान्ते स्यात्तु कर्मादिः,

११

सन्ततवचनाच्च ● 'सन्ततां वसोर्धारां जुहोति' इत्यत्र कर्मण एकत्वेन सन्ततशब्दस्यानेकापेक्षसाहित्यपरत्वायोगान् मन्त्रकर्मणोः साहित्यपरः सन्ततशब्दः । ततश्च मन्त्रादेः कर्मादेश्च सन्निपातः स्यादित्याशङ्क्य क्षणिकस्य कर्मणो दीर्घमन्त्रसाहित्यायोगाद् 'द्वादश द्वादशानि जुहोती'ति कर्मणां भेदोक्तेश्च सन्ततशब्दस्याविच्छेदार्थत्वात्तत्रापि मन्त्रान्ते कर्मादिरित्याह—

वसोर्धारासु चैव हि ।

१२

आघारे च ● सन्ततमाघारयतीऽत्यत्र कर्मण एकत्वान्मन्त्रकर्मणोस्साहित्यं विवक्षितम् । ततश्चादिसंयोगः स्यादित्याशङ्क्य क्षणिकस्य कर्मणो दीर्घमन्त्रसाहित्यायोगेनाघार्यमाणद्रव्यस्य दीर्घधारयाविच्छेदस्य सन्ततशब्दार्थत्वादत्रापि मन्त्रान्ते कर्मादिसन्निपात इत्याह—

आधारेऽप्येवमेव स्यात्,

१३

मन्त्राणाम् ● 'भगो वां विभजतु पूषा वां विभक्त्वित्यादिष्वेकार्थत्वा-द्विकल्प इत्याह—

विभागार्था विकल्पिताः ।

१४

सङ्ख्याविहितेषु ● 'तां चतुर्भिरभ्रिमादत्त' इत्यत्राप्येकार्थत्वान्मन्त्राणां विकल्प इत्याशङ्क्य लिङ्गादेव मन्त्राणां प्राप्तत्वेन चतुस्सङ्ख्याया एवात्र कर्मा-ङ्गत्वात्तदनुरोधेन मन्त्राणां समुच्चयः । तत्र चान्त्यस्य साक्षात्क्रियाङ्गत्वेऽपि पूर्वेषां त्रयाणां संस्कारद्वारा तदर्थत्वमित्याह—

सङ्ख्यायुतेऽभ्रिदानादौ चतुर्णां स्यात्समुच्चयः ।

१५

ब्राह्मणविहितेषु ● ये तावद्ब्राह्मणविहिता मन्त्राः यथा 'उरुप्रथस्वे'ति पुरोडाशं प्रथयति' उरुप्रथस्वोरु ते यज्ञपतिः प्रथतामि'ति तत्र लिङ्गादेव विनियोगे वचनद्वयं मन्त्रसमुच्चयार्थमित्याशङ्क्य लिङ्गान्नैरपेक्ष्यावगतेर्वचनस्य त्वर्थवादार्थत्वान्न समुच्चय इत्याह—

उरुप्रथस्वेत्यादीनां विकल्पः ।

१६

हौत्रास्तु ● 'उच्छ्रयस्व वनस्पते' इत्यादीनां क्रियमाणानुवादिनां होतृ-मन्त्राणामपि करणमन्त्रवदेकार्थत्वाद्विकल्प इत्याशङ्क्य तेषामध्वर्युणा क्रियमाणस्य कर्मण स्मृत्यविच्छेदार्थत्वात्तस्य चान्तादपेक्षणात्सर्वेषां समुच्चय इत्याह—

क्रियमाणानुवादित्वात्करणेष्वेव स स्मृतः ॥

द्वादशे तृतीयः पादः

चतुर्थः पादः

१

जपाश्च ● 'वैष्णवीमृचमनूच्य' इति जपः । गुणकीर्तनं स्तुतिः यथा 'अग्निर्मूर्द्धेति ।'आयुर्मे देही'त्याशीः । तत्रापि ब्राह्मणविहितवद्विकल्प इत्याशङ्क्या दृष्टार्थत्वात्समुच्चय इत्याह—

जपाशीः स्तुतिमन्त्राणामदृष्टार्थत्वात्समुच्चयः ।

२

याज्यानुवाक्या ● ऐन्द्राबार्हस्पत्ये कर्मणि 'इदं वामास्ये हवि'रित्यादिके

द्वे याज्यानुवाक्यायुगले उक्ते। तयोः युगलयोर्याज्यानुवाक्ययावत्समच्चय इत्याशङ्क्य तत्र पुरोनुवाक्यासमाख्यावशात्समुच्चयेऽपि देवताप्रकाशनार्थयोर्युगलयोर्दृष्टार्थत्वाद्विकल्प इत्याह—

याज्यानुवाक्यायुगले विकल्पोऽन्यत्र तच्चयः ॥

अन्यत्र याज्यानुवाक्यादौ। तयोर्याज्यानुवाक्ययोः चयः समुच्चय इत्यर्थः ॥

३

क्रयणेषु तु ● 'एकहायन्या क्रीणाति' 'वाससा क्रीणाति' इत्यादीनामेकक्रयार्थानां क्रयद्रव्याणां व्रीहियववद्विकल्प इत्याशङ्क्य तृतीयया निरपेक्षाणां क्रयार्थत्वेऽपि क्रयस्य मूल्यदानमात्ररूपत्वाभावेन गवा आनत्यभावे सोमालाभे सति क्रयश्रुतिबाधापत्तेरुत्पत्तिवाक्यशिष्टं नैरपेक्ष्यं बाधित्वा प्रधानाबाधाय सम्भवतां समुच्चयो 'दशभिः क्रीणाती'ति वाक्यमसिद्धं कृत्वा ज्ञेय इत्याह—

क्रयार्थानां हेमवासोगव्यादीनां समुच्चयः।

४

संस्कारे च ● देक्षे पशौ 'गुदेनोपयजती'त्यत्र गुदस्य तृतीयया करणत्वावगमादर्थकर्मत्वम्। तेन पशुगणे गुदानां विकल्प इत्याशङ्क्यान्यार्थलब्धपश्वनुनिष्पन्नगुदस्य प्रयाजशेषन्यायेन प्रतिपाद्यत्वात्समुच्चय इत्याह—

उपयागे पशुगणे गुदानां स्यात्समुच्चयः ॥

५

सङ्ख्यासु तु ● आधाने 'एका देया षड् देयाः' इत्येवमादीनामानत्यर्थत्वात्क्रयवत् समुच्चय इत्याशङ्क्य समुच्चयेऽश्रुतसङ्ख्यान्तरापत्तेर्विकल्प इत्याह—

आधाने दक्षिणासु स्यात्सङ्ख्याभेदो विकल्पितः।

६

द्रव्यविकारात्तु ● इष्टौ 'जाघन्या पत्नीः संयाजयन्त्याज्येन वे' ति विकल्पः श्रुतः। सोऽतिदेशाद्दैक्षपशौ प्राप्तः। तत्रापि पुनः श्रुतं 'जाघन्या पत्नीः सयाजयन्ती'ति। तत्रेष्टौ जाघन्यास्तृतीयया गुणत्वेऽपि देक्षे पशौ हृदयाद्यर्थलब्धपश्वनुनिष्पन्नाया जाघन्याः पुनर्वचनं दृष्टार्थत्वाय प्रतिपत्त्यर्थमेव वाच्यमिति पशुगणे जाघनीनां समुच्चयः स्यादित्याशङ्क्याङ्गत्वेनैवातिदेशप्राप्ताया जाघन्याः पशुप्रकरणाधीतेन वाक्येन नियमकरणात्संस्कारत्वे चापूर्वार्थस्य यागस्याङ्गं द्रव्यार्थत्वे वैरूप्यापत्तेः नियमार्थोऽयं विधिः। तेन पशुगणे विकल्पेनैका जाघनीत्याह—

जाघन्येका पशुगणे नियमार्थो विधिर्यतः।

७

उखायां ● अग्नौ 'वृक्षाग्रात् ज्वलतो ब्रह्मवर्चसकामस्यावदध्यात्।

भ्राष्ट्रादन्नाद्यकामस्ये’ति श्रुतम् । तत्रेहावधानात्कामः श्रूयते नाग्न्यन्तरात् । न ह्यत्र ब्रह्मवर्चसकामो वार्क्षाग्निं होमार्थं कुर्यादिति श्रूयते । येनोख्यस्य होमार्थस्य चमसस्य गोदोहनेनेव बाधः स्यात् । तेनोख्ये होमार्थे सत्येव तस्योपर्यग्न्यन्तरस्यैव फलार्थं विधानादुख्यस्य निवृत्तिरित्याह—

नित्योख्यस्याग्निना कामे बाधो वार्क्षं विना भवेत् ।

८

स आहवनीयःस्यात् ● स वार्क्षादिराहूयतेऽस्मिन्निति व्युत्पत्या आहवनीयः स्यात् तेन तत्र गतश्रीत्वनिमित्तधारणादयो धर्माः कार्या इत्याशङ्क्य आहवनीयादिशब्दानामाधानजन्यसंस्कारवाचित्वान्न वार्क्षोऽग्निराहवनीय इति न तत्र गतश्रीधारणादय इत्याह—

वार्क्षो नाहवनीयः स्यात् गतश्रीधारणं न तत् ।

९

तस्मिन्संस्कारकर्म ● एवं तर्हि वार्क्षाग्नेर्होमार्थत्वादाधानसंस्कारस्तत्र स्यादित्याशङ्क्यारणिमन्थनादेरशक्यत्वान्न तत्र मन्थादिसंस्कार इत्याह—

नापि मन्थादिसंस्कारः,

१०

नित्यधारणे ● इदानीं नित्यस्योख्यस्य गतश्रीत्वनिमित्तं धारणं भवति न वेति चिन्त्यते । तत्र ‘न प्रति सन्दध्यादि’ति धारणनिषेधो नासत्यां प्राप्तौ घटते । प्राप्तिश्च विधिं विना नेति विधिरनुमीयते । तेनानुमितेन विधिना विहितंनिषेधेन तु प्रतिषिद्धधारणमिति विहितप्रतिषिद्धत्वाद्विकल्प इत्याशङ्क्याहवनीयस्यैव सन्तापादुख्यतामुपगतस्य गतश्रीत्वनिमित्तं धारणमुख्यविषयेऽनेन निषिध्यत इत्युख्यस्य नित्यमधारणमित्याह—

नोख्ये नित्यं तु धारणम् ।

११

परार्थान्येक ● अनेकयजमानसमवाये शुक्रारम्भादीन्येकेनैव कार्याणि न तु सर्वैः प्रयोजनाभावादित्याह—

बहुयष्टृषु शुक्रादेरेकोऽन्वारम्भमाचरेदहीनेषु,

१२

मुख्यो वा ● अहीनवत्सत्रेष्वपि शुक्रारम्भादिकं केनचित्कार्यमित्याशङ्क्येतरेषामार्त्विज्यविरोधाद्गृहपतिरेव कुर्यादित्याह—

अथ सत्रेषु कुर्याद्गृहपतिस्तु तत् ।

१३

सत्रे ● सत्रेऽञ्जनादयस्संस्कारा गृहपतेरेव भवन्त्युत सर्वेषामिति चिन्त्यते ।

तत्र गृहशब्देन कर्मोच्यते तस्य सर्वेऽपि स्वामित्वात्पतय इति कस्यचिद्विशेषसंज्ञा व्यर्था । तेन तस्यैव फलभूयस्त्वनिमित्ताः संस्कारा नान्येषामित्याशङ्क्य गृहपति-समाख्याया आर्त्विज्यपदार्थाकरणनिमित्तत्वात्फलाधिक्यस्य तु 'स हि भूयिष्ठा-मृद्धिमर्ध्नोदिति वाचनिकत्वेन संस्काराधिक्यनिमित्तत्वाभावात्सर्वेषां संस्कारा इत्याह—

सत्रेषु फलिसंस्काराः सर्वेषामञ्जनादयः ॥

१४

विप्रतिषेधे ● यत्र तु याजमानार्त्विज्ययोर्विरोधस्तत्र चोदकप्राप्तं याज-मानमेव तैः कार्यमित्याशङ्क्य 'ये यजमानास्त ऋत्विज' इति प्रत्यक्षवचनेन यजमानानामार्त्विज्यविधानात्तेन तु चोदकप्राप्तस्य कर्माङ्गकर्तृगुणस्य याजमान-नस्य बाधादा[1] र्त्विज्यमेव कुर्युः ॥

१५

प्रभुत्वात् ● याजमानार्त्विज्ययोरार्त्विज्यं बलीय इति स्थितम् । आर्त्विज्ये कर्तारः के ? इति चिन्त्यते । द्विजसाधारण्येन त्रयाणामप्यार्त्विज्येऽधिकारः ? उत ब्राह्मणानामेव ? अध्ययनविधिसिद्धज्ञानवत्वात् त्रयोऽप्यार्त्विज्यमर्हन्ति । ननु 'षट्कर्मैको भवत्येषाम्' इत्यादिस्मृत्या ब्राह्मणस्यैवार्त्विज्येऽधिकार इति चेत् क्रतुप्रकरणेऽनाम्नानात्पुरुषार्थत्वात्स्मृतेश्च त्रयाणामप्यधिकार इत्याशङ्क्य ब्राह्म-णानामेवेत्याह—

द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः ।
ब्राह्मणार्त्विज्यनियमः क्रत्वर्थेनापि च स्मृतः ॥

इति कमलाकरभट्टविरचितशास्त्रमालायाः तदात्मजेनानन्तभट्टेन विरचितायां शास्त्रमालावृत्तौ द्वादशस्य चतुर्थः पादः ॥

पादा ४ अधिकरणानि ६६ द्वादशस्वध्यायेषु
पादाः ६० अधिकरणानि १०६

द्वादशोऽध्यायः समाप्तः ॥
समाप्तश्च ग्रन्थः ॥

●

---

१. एतदन्तमेव ग्रन्थो विद्यते । शिष्टं पत्रं नष्टम् ।

श्रीः

श्री कमलाकरभट्टप्रणीतमीमांसाशास्त्रमालायाः श्लोकपाठः :

प्रथमः प्रमाणाध्यायः

प्रथमः पादः ● स्वाध्यायो ह्यर्थधीहेतुः न विचारं विना भवेत्। तदर्थं शास्त्रमारब्धव्यं जिज्ञासासूत्र ईरितम् ।। ●धर्मस्वरूपप्रामाण्ये चोदनालक्षणत्वतः। ● तत्प्रमाणपरीक्षातः, ●प्रत्यक्षादेरमानता ।। ●त्रिधेरेव प्रमाणत्वम्, ●पदानां नित्यता ततः। ●काठकादेः प्रवचनाद्वेदवाक्यस्य नित्यता ।।

द्वितीयः पादः ● स्तुत्यर्था ह्यर्थवादास्स्युः, ● क्वचित्फलविधिर्न च। ● क्वचिद्धेतुविधिर्न च, ● मन्त्राणां स्मृतिहेतुता ।।

तृतीयः पादः ● स्मृतीनां वेदमूलत्वात्प्रामाण्यम्, ● न विरोधतः। ● वेदाविरोधेऽपि च न लोभादेर्मूलसम्भवात् ।। ● आचमनादिस्मृतेः श्रौतक्रमहानेऽप्यबाधनम्। बौद्धप्रसिद्धाहिंसादि प्रमाणं नेति वार्तिके ।। ● अनिबन्धेऽपि शिष्टानामाचारस्य प्रमाणता। ● वाक्यशेषाद्धीर्धशूकाद्यर्थो यवपदादिषु ।।

वार्तिकमतेन आर्यप्रसिद्धः पीत्वादौ म्लेच्छार्थो न गजादिकः।

यद्वा स्मृतेर्विरुद्ध आचारो नादृत्योऽदृष्टहेतुकः ।।

यद्वा त्रिवृदादौ नवर्चादिर्वाक्यशेषार्थनिर्णयः। ● आर्याविरोधे म्लोच्छोत्थोऽप्यर्थः स्यात्तु पिकादिषु। ● न स्वातन्त्र्यं कल्पसूत्रं मन्वादेर्वेदवन्मतम् ।। ● होलाकादेरव्यवस्था मूलश्रुत्यविशेषतः। ● प्रमाणन्तु व्याकरणम्, ● अभेदो लोकवेदयोः ।। जातिरेव च शब्दार्थो मीमांसाशास्त्रसम्मतः ।।

चतुर्थः पादः ● उद्भिदादेर्यौगिकस्य नाम्नः प्रामाण्यमीरितम्। ● धातु पारार्थ्यादि दोषादुद्भिदादिषु नामता ।। ● चित्राज्यादेर्वाक्य भेदात्, ● तत्प्रख्यादग्निहोत्रके। ● श्येनादावुपमायोगात् ● वैरूप्याद्वाजपेयके ।। (मीमांसानुक्रमणिकाश्लोकाः प्रदर्शिताः।) ●विधिरष्टाकपालवाक्, ● बर्हिश्शब्दस्तृणं वक्ति। ● यौगिकं प्रोक्षणीपदम् ● निर्मन्थ्ये योगनियमः ।। ● वैश्वदेवे तु नामता,

---

१. श्लोकानामारम्भे दत्ता चिन्हान्यधिकरण सूचकानि।

● अष्टसङ्ख्यावयुत्योक्ता । ● प्रस्तरे यष्टृवाग्गुणात् अग्निर्वै ब्राह्मणो जात्या, यूपे सूर्य इति स्तुतिः, प्रशंसाश्वे पशूक्तिस्स्यात्, भूम्ना स्युः सृष्टयो मताः प्राणभृत्प्राणभृद्योगात्, सन्देहे निर्णयः स्तुतेः, अनुष्ठानावसायोऽर्थात् ॥

द्वितीयो भेदाध्यायः

प्रथमः पादः ● भावार्थेभ्यस्त्वपूर्वं स्यात् ● तत्सत्ता साधिता ततः । ● गुणकर्मावघातादिः, ● स्रुचां सम्मार्जनं तथा ॥ ● स्तोत्र शस्त्रं प्रधानं स्यात्, ● मन्त्रस्थे लिङि नो विधिः । ● मन्त्र प्रसिद्धो मन्त्रस्स्यात्, ● शिष्टन्तु ब्राह्मणं भवेत् । ● ऊहादेर्नैव मन्त्रत्वम् ● पादबद्धा ऋगुच्यते । ● गीतिस्साम, ● तयोर्भिन्नं यजुस्स्यात्, निगदोऽपि न तु । ● एकार्थकञ्च साकाङ्क्षमेकं वाक्यं यजुश्च तत् ॥ ● इषे त्वादौ मन्त्रभेदो विनियोगस्य भेदतः । ● तनूरित्यस्यानुषङ्गो यात इत्यादिके ततः ॥ अच्छिद्रादेः पुनात्वैक्यात् त्रिषु स्यादनुषञ्जनम् । ● व्यवायान्नानुषज्यते संयज्ञेन गच्छतामिति ॥

द्वितीयः पादः ● शब्दान्तरेण भेदस्स्यात्, ● अभ्यासाच्च ततः परम् । ● अभ्यासस्यापवादस्स्यात् विद्वद्वाक्येऽनुवादतः ॥ ● समुदायानुवादस्याप्यपवादस्ततस्त्रिषु । ● आघाराग्निहोत्रवाक्ये कर्मविधायके ततः ॥ ● पशुसोमयोरिति । ● सङ्ख्यया कर्मभेदस्स्यात् । ● ज्योतिरादिषु नामता । ● वाजिनाख्यगुणाद् भेदः, ● दध्याद्यैस्तदभिन्नता ॥ ● दध्यादिगुणमात्रात्तु फलं होमाभिधानतः ॥ ● रेवत्यादिगुणान्नैव फलं कर्मान्तरन्त्विह । ● फलार्थे सौभरे साम्नि ह्रीषादेर्नियमो मतः ॥

तृतीयः पादः ● निमित्तार्थं श्रुतो नैव रथन्तरगुणाद्भिदा । ● अवेष्टौ प्राप्त्यभावात्तु ब्राह्मणादिविधिर्मतः ॥ ● वसन्ते ब्राह्मणादीनामाधानविधिरिष्यते । ● दाक्षायणे गुणस्यैव फलं कर्मान्तरं न च ॥ ● वायव्यं श्वेतमित्यादौ दर्शालम्भे गुणौ न च ॥ ● इतो गुणविधिर्यागविधिर्नैवेति पञ्चभिः । वत्सालम्भो न यागस्स्यात्, ● न च रूपहितौ यागः ॥ ● पर्यग्निकृतवाक्ये च त्वाष्ट्रं गुणविधिस्त्वयम् । ● अंश्वदाभ्यग्रहौ चापि, ● अग्निं चिनुत इत्यपि । न हि यागविधिस्त्वेषु संस्कारविधयो ह्यमी ॥ ● नित्याद्भिन्नन्तु मासाग्निहोत्रं स्यात्तदसन्निधेः । ● असन्निधौ फलं तद्वत् संस्कारश्चापि भेदकः । ● सन्निधौ त्वविभागात्स्यान्न देशाद्यैस्तु भिन्नता ॥ ● न कालद्वययुग्भिन्न आग्नेयादेककालिकात् ॥

चतुर्थः पादः ● नित्यः काम्यप्रयोगात्तु भिन्नः कर्म न भिद्यते । ● सर्वशाखासु कर्मैक्यं न तु भेदो गुणादितः ॥

तृतीयश्शेषाध्यायः

प्रथमः पादः ● भेदाधीनन्तु शेषत्वम्, ● पारार्थ्यं शेषता मता । ● यागः फले फलं पुंसि द्रव्यवच्छेष इष्यते ॥ ● व्रीह्यादाववघातादेर्व्यवस्था, ● स्फ्यादिके तथा । ● आरुण्यं क्रय एव स्यात्, ● ग्रहैक्यं न विवक्षितम् ॥ ● ग्रहत्वस्य विवक्षा स्यात्, ● पश्वङ्गे यूप एव तु । साप्तदश्यं वाजपेये, ● प्रयाजाङ्गमभिक्रमः । ● उपवीतन्तु दर्शाङ्गं सामिधेन्यङ्गता न तु । ● सर्वयज्ञेषु पात्राणि वारणानोति भाष्यकृत् ॥ ● वार्त्रघ्न्योश्च वृधन्वत्योर्व्यवस्था त्वाज्यभागयोः । ● हस्तावनेजनं मुष्टीकरणं सर्वकर्मयुक् ॥ ● चतुर्धाकरणन्त्वाग्नेयस्यैव हविषः स्मृतम् ॥

द्वितीयः पादः ● मन्त्राणां मुख्य एवार्थो न गौणः, ● वचनात्तु सः । ● गौणऽवघातो नाङ्गन्तु हविष्कृन्मन्त्र इष्यते ॥ ● व्रतं कुणुत नाग्नीदित्येतयोर्वाग्विसर्जने । उत्थाने चाङ्गता, ● सेष्टा सूक्तवाकप्रहारयोः । ● सूक्तवाकस्य लिङ्गात्तु विभागः पर्वणोर्द्वयोः । ● काम्ययाज्यानुवाक्यानामैन्द्राग्नाद्यङ्गता क्रमात् ॥ ● आग्नीध्रादेरुपस्थाने त्वाग्नेयी प्रकृता भवेत् । ● भक्षानुवाकभागानां ग्रहणाद्यङ्गता पृथक् ॥ ● तृप्तौ नाङ्गन्तु मन्द्राभिभूतिरित्यादिको मतः । ● तदा कृत्वा पञ्च चिन्ताः ● तथोत्तरे पात्नीवते । ● त्वष्टुः, ● त्रयस्त्रिंशतां न ● देवेऽप्यनुवषट्कृतेः ॥ ● अनैन्द्राणाममन्त्रत्वमुक्तम्, ● ऐन्द्राग्नेऽप्यमन्त्रता । ● छन्दोऽन्तरेऽपि गायत्रच्छन्दसा स्यात्तथैव तु । सिद्धान्ते सवनार्थत्वादनैन्द्रेऽपीन्द्रपीतयोः ॥

तृतीयः पादः ● उपक्रमाद्वेदधर्मा उच्चैष्ट्वाद्या ऋचां न तु । ● वेदान्तरगतेऽङ्गन्तु मुख्यवेदसधर्मता ॥ ● अङ्गाधिक्यं यत्र वेदे तत्र कर्मविधिर्भवेत् । ● प्रक्रियातः प्रयाजादेः, ● क्रमाद्दब्ध्यादिकस्य च ॥ ● समाख्ययाध्वर्युहोतृकर्त्रादिरङ्गता मता । ● श्रुतिर्लिङ्गञ्च वाक्यञ्च प्रक्रिया स्थानमेव च । समाख्या शेषमानानि दुर्बलन्तु परम्परम् ॥ ● द्वादशोपसदः श्रुत्याहीनाङ्गं प्रकृतेर्न तु । ● द्विस्वामिके क्रतावङ्गं युवं हि प्रतिपन्मता ॥ ● नोत्कर्षः स्यात्तु जाघन्याः, ● भवेत्सन्तर्दने तु सः । ● प्रवर्ग्यस्य निषेधस्तु भवेदाद्यप्रयोगतः ॥ ● स्यात्पौष्ण-

पेषणोत्कर्षः, ● चरौ न पशुडाशयोः । ● अन्येन सहिते पूष्णि नैव पेषणमिष्यते ॥

चतुर्थः पादः ● निवीतमुपवीतस्य स्तुतिः, ● दर्शे तु तद्भवेत् । ● उपवीतन्तु संयोगभेदाद् दर्शाङ्गमेव तु ॥ मृते यज्ञोपवीती हि दैवे नायं विधिर्मतः । पुरोदगग्रदर्भाणां स्मृतेः प्राप्तेर्विधिर्न च ॥ ● धारयत्युपरीत्येतद्विधिः, ● प्राची विधिर्न च । ● स्तुतिर्यदन्तरेत्यादिः, ● ऋत्वङ्गमनृतं भवेत् । ● क्रतुयुक्तस्य पुंसस्तु धर्मो जञ्झभ्यमन्त्रगः ॥ ● त्यागोऽवगोरणस्यापि, ● मलवद्वाससा वदेत् पुरुषार्थः, ● स्वर्णधृतिस्तथा । ● श्रौते जयादयः, ● वैदिके ह्यश्वदाने स्यात्, ● दातुरेव सा । वार्तिके तूभयोरेषा, ● वैधे सा सोमवामिनः । ● नर्त्विग्वमन इष्टिस्स्यात्, ● यागाङ्गं ह्यववदानकम् (भाष्ये) अथ वार्तिके प्रोक्ता कृत्स्नस्य हविषोऽङ्गता । प्रक्षेपो ह्यवदानस्य प्रतिपत्तिरितीरिता ॥ ● सर्वेभ्यश्शेषकार्याणि, ● यद्येकस्मात्तदाद्यतः । ● व्यादेशो भक्षणार्थस्स्यात् स्यान्नानेन परिक्रयः ।

पञ्चमः पादः ● उपांशुयाजाज्ये नैव शेषकार्यं, ● तथा, न च साकम्प्रस्थायीयकुम्भ्यां, ● नापि सौत्रामणीग्रहे ॥ ● न पृथक्सर्वपृष्ठायाम्, ● द्विर्भक्षस्त्वैन्द्रवायवे । ● सोमे शेषस्य मन्त्रादौ, वचनाच्छेषभक्षणम् ॥ ● चमसेषु समाख्यानात्, ● सुब्रह्मण्यहीना भक्षे स्युरिति वार्तिकसम्मतम् । ● ग्रावस्तुतोऽपि भक्षस्स्याद्धारियोजनके ग्रहे ॥ ● प्रथमस्स्याद्वषट्कर्तुः, ● होमाभिषवयुक्परः ॥ ● समवाये तु भक्षाणां क्रमेणैवं समुच्चयः । ● एकपात्रे वषट्कर्तुरादितस्स्यात्तु भक्षणम् ॥ ● अनुज्ञया तु भक्षस्स्यात्, ● मन्त्रैणेव च सा मता । ● अनुज्ञपूर्विका सा स्याद्व्युत्क्रमान्मन्त्रयोर्भवेत् ॥ ● याज्यावषट्कारभक्षा यष्टुरेव न होतृगाः । ● स्तिभिनीभिश्च यागस्स्यात्, ● भक्षे स्युर्ब्राह्मणाश्शतम् ॥

षष्ठः पादः ● अनारभ्याधीतपर्णत्वादेः प्रकृतिगामिता । ● साप्तदश्यं पाञ्चदश्यावरोधाद्विकृतौ भवेत् ॥ ● नैमित्तिकञ्च काम्यञ्च प्रकृतौ नित्यबाधकम् । ● अग्न्यर्थमेवाधानं स्यान्नेष्टयङ्गं तास्तदर्थकाः ॥ ● आधानं न क्रतोरङ्गं पूर्वं साध्यानुपस्थितेः । ● पवमानेष्टौ तु सा नाङ्गं, ● पूर्वैः स्थानस्य चिन्तनम् ॥ दैक्षाङ्गं पशुधर्मास्स्युः, ● दोहधर्मा द्वयोर्मताः । ● ग्रहधर्मास्तु सर्वार्थाः प्रातस्सवनिका अपि ॥ ● धर्माणां रशनायाश्च परिव्याणद्वयेऽङ्गता । ● अंश्वदाभ्येऽपि वाक्येन ग्रहधर्मा-

स्समा मताः ॥ ● इष्टकानाञ्च ये धर्माश्चित्रिण्यादौ च ते समाः। ● नैमित्तिकन्तु नित्येन तत्समानं विविच्यते ॥ ● मुख्याभावे प्रतिनिधिः समानविधिरेव तु। ● पूतीकेषु प्रतिनिधिर्नियमात्स्यात्समानता ॥ ● संस्थानामसमानत्वाद्धर्मास्स्युरतिदेशतः ॥

सप्तमः पादः ● वेदिर्बर्हिश्च तद्धर्मा वाक्यादङ्गप्रधानगाः। ● केशश्मश्र्वादिवपनं नाङ्गाङ्गं तत्प्रधानगम् ॥ ● अङ्गप्रधानेषु समा सौमिकी वेदिरिष्यते। ● चतुर्होत्राभिमर्शः स्यात्प्रधानाङ्ग हविः समः ॥ ● दीक्षाश्च दक्षिणाश्चैव सोमाङ्गं नाङ्गगाः स्मृताः। ● वाक्येऽन्तरालं लक्ष्यं स्यादर्धान्न बहिरित्यतः ॥ ● लक्ष्यो देशो हविर्धानात्सामिधेन्यङ्गमिष्यते। ● पूर्वैस्सह समाख्याया विरोधस्याथ चिन्तनम् ॥ दर्शादौ ऋत्विजो नाना स्वमिनस्त्याग एव तु। ● संज्ञावरणभेदात्स्युर्भिन्ना होत्रादयश्च ते। ● तद्भिन्ना बहवश्च स्युः, ● चमसाध्वर्यवो दश। ● शमिता चोपगातारस्तेष्वेकः, ● अन्यस्तु विक्रयी। ● चमसाध्वर्यवो नैव, ● स्वामी स्यादिति वार्तिके, ● तेषां व्यवस्थितं कार्यम्, ● होमाङ्गन्त्वग्नयस्समाः। ● प्रैषयुक्तेऽनुवचने प्रशास्तुर्विधिरिष्यते। ● चमसेऽध्वर्युरेव स्यादन्ये वा तदसम्भवे। ● वाजपेयश्येनयोस्तु ऋत्विजः प्रकृताविव।

अष्टमः पादः ● परिक्रयस्स्वामिनस्स्यान्नाध्वर्योस्तु समाख्यया। ● श्मश्रुवापादयोऽप्येवम्, ● तपोऽप्यनशनादिकम्। ● क्वचिद्वचनादृत्विजामपि, ● सदो मानफलञ्चैवम् वचनादृत्विजामपि। ● आयुर्दाद्याः स्वामिनस्स्युः, ● वाजस्य मेत्यादयस्तु द्वयोः। ● ज्ञत्वेऽपि वाचयेत् ● अध्वर्युणैव कार्यन्तु वत्सस्योपावसर्जनम्। ● ऋत्विक्समासेऽध्वर्योस्स्यान्मन्त्रो हौत्रं परो वदेत्। ● प्रैषार्थकर्तुर्भेदस्स्यात्, ● प्रैषश्चाध्वर्युकर्तृकः। ● ममाग्नेऽध्वमर्न्युत्रेऽपि फलं स्वामिगतं भवेत्। ● मामासन्ताप्तमिति तु, ● तथा तन्नो सहेति च। ● वेदिर्बर्हिश्चाङ्गप्रधानगम्, यूपावटे न च। ● पवित्रे च विधृतौ लौकिकं तृणम्। ● ऐन्द्रवायवपात्रादौ प्रकृतं शकलादिकम्। ● काम्येष्टिप्रधानार्थमुपांशुत्वं विधीयते। ● दृतौ नवनीतं यच्छेचनाङ्गेष्टिषु तन्मतम्। ● न सुत्याकालता तस्य किन्तु सर्वेष्टिगं स्मृतम्। ● सवनीयहविस्सर्वं तारसन्तु विधीयते ॥

चतुर्थः प्रयुक्त्यध्यायः

प्रथमः पादः ● मुख्यं प्रयोजकं शेषी नानुषङ्गिकमिष्यते । ● लिप्सासूत्रेऽथ चत्वारि वर्णकानि क्रमेण तु ।। पुरुषर्थः प्रीतिहेतुः क्रत्वर्थमितरत्स्मृतम् । रागात्प्रवृत्तिर्न फले विधिः, क्रत्वर्थता न च गोदोहनस्य, द्रव्यस्याप्यर्जने नियमस्य च ।। ● नोद्यन्तं न क्रतोरङ्गम्, ● तथा यज्ञायुधानि च । ● पशुनेति श्रुता सङ्ख्या न द्रव्याङ्गं क्रतोस्तु सा ।। ● सङ्ख्यावत्तु पशोर्लिङ्गं क्रतोरङ्गं विवक्षितम् । ● त्यागांशेनाप्यदृष्टार्था मताः स्विष्टकृदादयः ।। ● न दध्यानयनस्यापि वाजिनं स्यात्प्रयोजकम् । ● नाक्षाभ्यञ्जनमप्येकहायनीनयनस्य च ।। ● कपाले न तुषावापः, ● न पशोः शकृदादि च । ● स्विष्टकृन्नोत्तरार्धस्य द्रव्यस्यापि प्रयोजकः ।। ● न प्रयाजाज्यशेषस्याप्यभिघारः प्रयोजकः । ● बर्हिर्यागे त्वानयनमाज्यस्य स्यात्प्रयोजकम् ।। ● व्यवस्था जौहवादीनां प्रयाजेष्वितरेषु च । ● चतुस्सङ्ख्याद्वयं लक्ष्यमष्टावुपभृत्यपि ।।

द्वितीयः पादः ● न स्वर्वर्था यूपधर्माः, ● न प्राचीदिग्वचस्तथा । ● शाखाधर्मा न मूलार्थाः, ● न शाखाहरणं यजौ ।। ● प्रणीतानां निनयनं न प्रयोजकमिष्यते । ● प्रशास्त्रे दण्डदानन्तु दण्डस्य स्यात्प्रयोजकम् ।। ● विषाणाप्रासनेडादिः प्रतिपत्तिरुदाहृता । ● सोमलिप्तस्य नयनं न प्रयोजकमिष्यते ।। ● द्रव्यदेशादि, ● शुक्लादिगुण, ● अवहननादिविधिर्यो नियमार्थस्स इष्यते ।। ● यागाश्रुतावप्याग्नेये युक्त्या स्याद्यागकल्पना । जुहोतिश्रवणं यागे प्रक्षेपाधिक्यमेव वा । ● आतिथ्योपसदोर्दीक्षे बर्हिस्साधारणं मतम् ।।

तृतीयः पादः ● पर्णतादौ च संस्कारे प्रयाजादौ फलं न च । ● काम्यादन्यत्तु नित्यं स्यात्साधनं वारणादि च ।। ● दध्यादिकन्तु क्रत्वर्थं फलार्थं विधिभेदतः । ● पयोव्रतन्तु क्रत्वर्थम्, ● कल्प्यं विश्वजितः फलम् ।। ● तच्चैकम्, ● स्वर्ग एवासौ, ● रात्रिसत्रेऽर्थवादिकं फलम् । ● सौर्ये न स्वर्गः, ● सर्वेभ्यस्स्यात्फले विधिः । ● प्रयोगैक्यात्फलैक्यन्तु, ● चित्राद्यामुष्मिकन्तु वा ।। ● बृहस्पतिसवो वाजपेयाङ्गम्, ● वैमृधोऽपि न दर्शे च । ● नानुयाजाङ्गं सोमे स्यादाग्निमारुतम् । ● दर्शेष्टचङ्गं न सोमस्स्यात्, ● जातेष्टेः

यद्वा पुत्रगं फलम् । न जातकर्मणः प्राक्सा, नाशौचे किन्तु पर्वणि

वसन्ते स्याद् बृहस्पतिसवो न शरदि क्वचित् ।।

चतुर्थः पादः ● सर्वे यागाः प्रधानं स्यू राजसूये महाक्रतौ । ● विदेवनादयस्सर्वयागाङ्गम्, ● सौम्य एव च चरुर्नोपसदङ्गम्, ● स्युरामनास्त्वङ्गमेव तु । ● दधिग्रहस्तु नित्यस्स्यात् ● नित्यो वैश्वानरो न च । ● षष्ठी चितिर्निमित्ते स्यात्, ● नेष्टयङ्गं पितृयज्ञकः ।। ● सौत्ये पशौ तु यूपार्था द्वितीया रशना मता । ● यूपार्था न स्वरुः किन्तु तस्य पश्वञ्जनाङ्गता ।। ● दर्शेष्टौ षट्प्रधानास्स्युर्यागाः कालस्य योगतः । ● ज्योतिष्टोमे सोमयागः प्रधानं नेतरे मताः ।।

पञ्चमः क्रमाध्यायः

पथमः पादः ● श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिकक्रमाः । श्रौतो ब्रह्मादिदीक्षादौ, ● अर्थस्स्याद्धोमपाकयोः । शाखान्तरीयानुमन्त्रमन्त्रेष्वनियतः क्रमः । ● पाठक्रमः प्रयाजेषु, ● प्राजापत्ये प्रवृत्तितः ।। ● साद्यस्क्रे स्थानतः सौत्ये, ● मुख्यस्सारस्वतादिषु । ● निर्वापाज्यादिधर्मेषु मुख्यात्पाठक्रमो बली ।। ● विधिपाठान्मन्त्रपाठक्रमस्तु बलवान्भवेत् । ● विकृतावाज्यचर्वादौ क्रमस्तु प्राकृतो भवेत् ।। ● अनीकादौ प्रातरादौ न द्व्यहे सद्य इष्टयः । ● तिष्ठन्तं पशुमित्यत्र तदन्तमपकर्षणम् । अनुयाजादिकोत्कर्षः स्याच्छस्त्रादाग्निमारुतात् ।। ● निर्वापेण प्रोक्षणादेर्बोधात्प्रागैष्टिका मताः । ● दीक्षायूपापकर्षेऽपि प्राचां नास्त्यपकर्षणम् ।। ● प्रासङ्गिकैस्तु नोत्कर्षो दाक्षिणाग्निकहोमयोः । ● वेदेर्दर्शेऽपकर्षेऽपि प्राचां नैवापकर्षणम् ।। ● नैवाग्निहोत्रस्योत्कर्षस्त्विष्टचा सान्तपनीयया । ● उक्थ्योत्कर्षे षोडशिनोऽप्युत्कर्षः परभावतः ।।

द्वितीयः पादः ● प्राजापत्ये पशुगणे पदार्थसमयः स्मृतः । अश्वदाने सहस्रादौ काण्डानुसमयो मतः ।। ● मुष्टचादौ काण्डमेकैकम्, ● प्रदानान्तमवद्यतौ । ● बहुयूपेष्वञ्जनादि परिव्याणान्तमिष्यते ।। ● देवतैक्येऽवदानेषु काण्डं नानुसमीयते । ● नानाबीजेषु काण्डं स्यात्तेनोलूखलमेककम् ।। ● पृषदाज्येऽनुयाजार्थे कालैक्यात्पात्रभिन्नता । ● नक्षत्रेष्टावुपहोमा नारिष्ठेभ्यः परा मताः ।। ● विदेवनादेराकर्षोऽभिषेकस्यापकर्षणात् । ● अग्नौ सावित्रहोमादेर्दीक्षणीया परा भवेत् ।। ● दीक्षेष्टिः कर्तृसंस्कारा रुक्ममोकादयस्ततः ।।

तृतीयः पादः • विकृतौ या प्रयाजादिसङ्ख्या सर्वगता तु सा। • षण्णामुपसदां स्वस्वस्थाने वृद्धिर्न दण्डवत्॥ • धाय्यामध्ये तु तद्भिन्नाङ्गं चान्ते निवेशयेत्। • आगन्तूनां स्तोमवृद्धौ पर्यासान्ते निवेशनम्॥ • समागमोऽन्त्ययोर्गायत्र्यादौ स्यात्पवमानयोः। • अंश्वादिचित्रिण्यादीनि क्रत्वग्न्यङ्गं सकृद्भवेत्॥ • मध्यमायां चितौ ज्ञेयाः प्रत्यक्षब्राह्मणेष्टकाः। • लोकम्पृणातः पूर्वन्तु तत्रापि स्यान्निवेशनम्॥ • व्रतानि पूर्वं होमादिपवमानेष्टचनन्तरम्। • क्रत्वन्तेऽग्निचितो धर्माः, • इष्टचन्ते दीक्षितस्य तु॥ • काम्येष्टीनां न क्रमोऽङ्गं प्रयोगविधिभेदतः। • य एतेनेति चाद्यत्वमग्निष्टोमगतं मतम्॥ • अथान्येनेति सर्वेषां क्रतूनां प्राङ्निषेधनम्। • अथान्येनेत्यत्र नैकस्तोमोक्तिः किन्तु सर्वगा॥

चतुर्थः पादः • श्रौतश्चार्थः पाठतस्तु बलवान् क्रम इष्यते। • मुख्यप्रवृत्तेरङ्गानां प्रधानासन्नियोगतः॥ • आधानानन्तरं त्विष्टिः सोमो वा प्रथमो भवेत्। • यद्वा सोमः पूर्वमिष्टेरपि स्यात्। • एतौ पक्षौ क्षत्रविड्ब्राह्मणानाम्। • सोमाधाने सोमकालस्य बाधः। • उत्क्रष्टव्यः स्यात्पुरोडाश एव। • द्वैदिन्यं स्यान्नेष्टिधर्मो विकारे। • सोमोर्ध्वं सान्नाय्य धर्मा विकारः। • इष्टेः पश्चात्सोमधर्मा विकारः।

षष्ठोऽधिकाराध्यायः

प्रथमः पादः • स्वर्गादिफलमिज्यादेः, • मनुष्योऽत्राधिकारभाक्। • पत्नीनाञ्चाधिकारोऽत्र, • दम्पत्योश्च यजिस्सह॥ • वसानौ दम्पती प्रोक्तौ, • यावदुक्ताः स्त्रियः क्रियाः। • शूद्राधिकारी नेज्यादौ, • अद्रव्योऽप्यधिकारवान्॥ • इतः कमलाकरभट्टपद्यानि। • अङ्गहीनस्तदर्जनात्, • असमाधेयवैकल्यो नाधिक्रियेत कर्मसु। • अत्र्यार्षेयस्य हानम्, • जात्यन्तरं रथकारगोः॥ • स्थपतेस्तु निषादस्य स्थपतीष्टावधिक्रिया।

द्वितीयः पादः • एकैकस्य फलं कृत्स्नं सत्रिणां नांशतो भवेत्। • दर्शादौ कर्तुरेकत्वान्न बहूनामधिक्रिया॥ • समाप्यमेव प्रारब्धं काम्यं प्राप्तेऽपि तत्फले। • गृहादि न, • तथा नित्यं कलञ्जादि निषेधानाम॥ • उपनीतेः परं स्मार्तधर्माश्शौचादयो मताः। प्रदोषादौ जीवनेऽग्निहोत्राद्यं नान्यकालगम्॥ • तदावृत्ती तदावृत्तिः, • स्कान्नहोमादिके तथा। निमित्त-

भेदादावृत्तिः गुरोरनुगमादिके । ● नित्यं स्यात्सोमविद्यादि तच्च वर्णत्रये भवेत् ॥

तृतीयः पादः ● यथाशक्ति तु नित्यं स्यात्, ● काम्यं स्यात्साङ्गमेव तु । ● यागाद्यभेदाद्द्रव्यस्य भेदेऽपि गुणभावतः ॥ ● अङ्गलोपे प्रधानस्यात्यागात्प्रतिनिधिर्मतः । ● न स्याच्चैव प्रतिनिधिर्मन्त्रदेवाग्निकर्मसु ॥ ● माषादि तु निषिद्धं यत्तन्न प्रतिनिधीयते । ● स्वामिनो न प्रतिनिधिः प्रोषितेऽथ मृतेऽपि वा ॥ ● सत्रे न स्वामिनः किन्तु कर्तृसङ्ख्यार्थमिष्यते । ● कर्ममध्ये प्रतिष्ठत्वादानीतो न फलं लभेत् ॥ ● तत्र स्युः फलिसंस्काराः, ● सदृक् प्रतिनिधीयते । ● कर्मान्तरं वैकल्पिकम्, ● पूतीके नियमाद्विधेः । ● अपचारे प्रतिनिधेः मुख्यस्य सदृशो मतः ॥ ● सोमतुल्यः प्रतिनिधिर्न पूतीकलतासमः ॥ ● प्रतिनिध्यार्थिना मुख्ये लब्धे तस्यैव सङ्ग्रहः ॥ ● संस्कृतेऽपि प्रतिनिधौ तत्त्यागः प्राक्प्रधानतः । ● कृते प्रधाने मुख्यस्यानादरस्स्याद् गुणत्वतः । ● मुख्यं संस्कारलोपेऽपि बलीयः, ● अर्थाक्षमं न तु । ● शेषकार्ये डाशमानेऽप्यक्षमं मुख्यमेव तु ॥

चतुर्थः पादः ● द्यववदानस्य नाशेऽपि पुरोडाशोऽन्य इष्यते । ● इडाद्यर्थनाशे शेषलोपो ह्यन्यत्र शेषतः ॥ ● ऋत्विजां शेषभक्षास्स्युरिडा तु स्वामिपञ्चमा । ● भिन्नहोमः कृत्स्नभिन्नेऽप्यंशभिन्ने च सम्मतः ॥ ● कृत्स्नक्षामे पुनर्यागो नाशे दाहानिवारणात् । ● एकार्त्तावपि चैन्द्रस्स्यादुभयत्वाविवक्षया ॥ ● द्वौ होमाभिषवौ स्यातां निमित्तं सोमभक्षणे । ● निमित्तं पुनराधेये त्वग्न्योरनुगमो द्वयोः ॥ ● दर्शात्कर्मान्तरन्त्वैन्द्रः, ● दर्शं नैव च बाधते । ● आगुर्यं सत्राकरणे तत्स्थानी विश्वजिन्मतः ॥ ● वत्सैर्व्रते कालविधिः, ● सान्नाय्यं स्याद्विनापि सः । ● प्रस्तरे कालसंयोगश्शाखायास्सह भावतः ॥

पञ्चमः पादः ● यज्यभेदः पूर्वदेवापनयोऽभ्युदये मतः । ● उपांशुयाजेऽन्याभावात्पूर्वलोपाच्च लुप्तता ॥ ● अनिरुप्तेऽपि चेदं स्यात्, ● वैकृतीभ्यश्च निर्वपेत् । ● चन्द्रोदयोऽर्धे निरुप्तं तूष्णीं शिष्टन्तु निर्वपेत् ॥ ● हविर्मात्रस्य चोद्देशात्स्यादसन्नयतोऽपि च । ● सोमक्रयात्पूर्वमपि सत्रोत्थानेऽस्ति विश्वजित् ॥ ८. दीक्षास्त्रैकद्वादशका प्रकृतौ स्युर्विकल्पिताः । द्वादशाहे द्वादशैव दीक्षास्स्युर्नियमेन तु ॥ ● गवामयनदीक्षायां माघीस्यात्पौर्णमासिका । ● विघ्नादवभृथोत्कर्षे नाग्निहोत्रा-

दिकाः क्रियाः ।। • तल्लोपे प्रतिहोमा न, • नेष्ट्यु-त्कर्षेऽपि ते मताः । • यदा स्युस्ते तदा सायमाद्याः षोडशिभिन्नके ।। • भिन्ने स्युः प्रकृतौ होमाः, • व्यापन्नं स्यादभोजकम् । • प्रायश्चित्तमपच्छेदयौगपद्येऽपि विद्यते ।। • प्रायश्चित्ते विकल्पस्स्यात्, • क्रमे पूर्वन्तु दुर्बले । • उद्गातुरन्तेऽपच्छेदे स्यात्सर्वस्वं पुनः क्रतौ ।। • अहर्गणे त्वपच्छेदे तस्यैवान्हः पुनः क्रिया ।।

षष्ठः पादः • तुल्यकल्पास्तु सत्रे स्युः, • कुलाये भिन्नकल्पकौ । राजा पुरोहितश्चापि द्वन्द्वस्य बलवत्वतः ।। • सत्रे स्युर्ब्राह्मणास्सर्वे, • वैश्वामित्राश्च तत्समाः ।। • अग्न्याहिताश्च ते, • पात्राण्येषां सामान्यतो जगुः ।। • प्रकृतौ साप्तदश्यं स्याद्वैश्येनोत्कर्षमर्हति ।

सप्तमः पादः • सर्वस्वदाने देयं स्वधनम्, • भूमिं विहाय तु । • नाश्वस्य, • नासतोदानम्, • न शूद्रे दानवर्जिते ।। • यावत्स्याद्दक्षिणा-काले तत्सर्वं देयमेव हि । • क्रतुभक्षार्थवर्जं यत्तत्सर्वं देय-मिष्यते • अहीनाद्ये विश्वजिति सर्वस्वं प्राकृताधिकम् । • द्वादशात्तु शतादूर्ध्वं सर्वस्वं नोनमिष्यते ।। • रूढ्याऽपरिमि तन्त्वन्यत्, • उक्तसङ्ख्यादिकं मतम् । • यदा विधिस्तदा माषपाके स्यात्सर्वधर्मता ।। • सहस्रवत्सरे सत्रे संवत्सरपदद्दिनम् ।।

अष्टमः पादः • चतुर्होत्रादिभिश्च, • उपनये होमाश्च लौकिके । • स्थ-पतीष्टिश्च लौकिके, • अवकीर्णिपशुस्स्याल्लौकिकेऽनले ।। • सौम्यायने तु चौलादि शुभम्, • पित्र्यन्तु दक्षिणे । • द्रव्य-सत्वेऽपि याच्ञा स्यात् क्रयणञ्च, • पयोव्रतं प्रैषे बुद्धेऽपि वासश्चाप्यहतादि तथेष्यते । • रोगे पयोव्रतं न स्यात्, मन्त्राच्छागः पशुस्मृतः ।।

सप्तमस्सामान्यातिदेशाध्यायः

प्रथमः पादः • प्रकृतौ व्यवस्थातोऽङ्गानां स्यादतिदेशनम् । स त्रिधा वचनान्नाम्ना लिङ्गाच्चेति क्रमाज्जगुः । • श्येनाङ्गानामिषा-वाद्यः, • काण्डगः पञ्चसञ्चरे ।। • ऐन्द्राग्नैककपालेऽपि साकमेधेऽप्यसौ भवेत् । • कायप्राघासिकाङ्गानां प्राप्तिरेक-कपालके ।।

द्वितीयः पादः • रथन्तरादिकं साम गीतिस्सैवातिदिश्यते ।।

तृतीयः पादः • सत्रेऽग्निहोत्रे नाम्ना स्यात्, • प्रायणीयेन यौगिके । • विश्वजितस्सर्वपृष्ठः स्यान्मुख्यपृष्ठातिदेशतः ।। • प्रघासावभृथे सोमावभृथाद्धर्मदेशनम् । • तत्र द्रव्यं तुषादि स्यान्न तु डाशः कदाचन ।। • वैष्णवे न च, • निर्मन्थ्यबर्हिराज्यादिकेऽपि च । • प्राकृतन्तु प्रणयनं भाष्ये मध्यमयोश्च तत् । अपूर्वन्तु प्रणयनं पूर्वाग्नेरिति वार्तिके ।। • स्वरसामैककपालामिक्षादौ धर्मदेशनम् । • यूपादिके तथा । • वासोऽनसोर्न क्रियाङ्गम्, • स्तोत्रेऽग्निर्लौकिको भवेत्, • यूपधर्मा नोपशये । • नाग्नौ पृष्ठास्सधर्मकाः ।।

चतुर्थः पादः • लिङ्गात्सौर्यादिके धर्माः वैदिकास्तेऽपि साम्यतः । ज्योतिरादौ न लिङ्गात्स्युर्नाम्ना तद्बाधनान्मताः ।।

अष्टमो विशेषातिदेशाध्यायः

प्रथमः पादः • एकस्मादेव धर्मास्स्युर्लिङ्गात्ते च व्यवस्थिताः । • अर्थतश्शब्दतो वापि सादृश्याद्धर्मदेशनम् ।। • सोमोऽपूर्वस्तु, • सौर्यादौ दर्शादेर्धर्मदेशनम् । • दैक्षे पशौ च दर्शेष्टेः, • दैक्षात्सौत्ये पशौ तथा ।। • द्वैरशन्यात्सौत्यधर्माः स्युरेकादशिनेषु च । • तद्धर्मास्स्युः पशुगणेषु, • अव्यक्तासु तु सोमतः ।। • अहर्गणे द्वादशाहात्, • गव्यादन्यायनेषु तु ।। • आद्यधर्मास्तु साद्यस्कादिषु स्युस्तु निकायिषु । • पुमर्थत्वान्नातिदेशः फलादेर्नियमस्य च ।। • गुणाः फलानि चानङ्गं विकृतौ नातिदिश्यते । • सौर्यादौ पर्वणोः पञ्चहोत्रादेर्न व्यवस्थितिः ।। • देवतैक्यात्तु सौर्ये स्यादाग्नेयाद्धर्मदेशनम् । • श्रुतधर्मास्स्युराग्नेये पयसि द्रव्यसाम्यतः ।। • व्रीहिधर्माः कृष्णलेषु, • आज्यधर्मं मधूदकम् ।।

द्वितीयः पादः • सुरायां वाजिने चेष्टः धर्मास्स्युः, • पयसः पशौ । • आमिक्षायां पयो धर्मा न तु दध्नः कदाचन ।। • सत्रेष्वहीने द्विविधाद् द्वादशाहसधर्मता । • कौण्डपाय्ययने पञ्चदशरात्रे च सत्रता ।।

तृतीयः पादः • नाना हविष्षु धर्मास्स्युर्ह्येकदेवत्यसाम्यतः । • सप्तरात्रे सङ्ख्यसाम्यात्पार्ष्टिकं त्रिवृदादिकम् ।। • षट्त्रिंशत्संज्ञके रात्रे षडहावृत्तिरिष्यते । • शतोक्थ्ये गणधर्मास्स्युर्न ज्यौतिष्टोमिका मताः ।। • प्राकृतोक्थ्य धर्मास्स्युः शतोक्थ्ये न गणस्य ते । • बृहस्पतिसवे दाशतय्यो गायत्रिसंज्ञिताः ।।

चतुर्थः पादः • तत्प्रख्यत्वाद्दर्विहोमस्स्यात्संज्ञा वैदिकेष्वपि । • अपूर्वास्ते च सम्मताः ।

नवम ऊहाध्यायः

प्रथमः पादः • धर्मास्सर्वेऽपूर्वार्थाः, व्रीह्याद्यर्था न ते मताः । प्रयोजकं निमित्तं वाप्यपूर्वं तेषु सम्मतम् ।। नैव श्रुत्यादिभिर्व्रीह्यर्थता सन्निपातिषु । साध्यं ज्ञातमपूर्वन्तु निमित्तं युक्तमेव तु ।। पञ्चैवं वर्णकान्यत्र केचित् त्रीणि समूचिरे । • वाक्यलिङ्गश्रुतीनान्तु विरोधस्त्रिषु चिन्त्यते ।। हन्त्यभावेऽप्यपूर्वार्थं नखेषु प्रोक्षणं मतम् । वाग्यमो दीक्षणीयार्थस्सोमापूर्वार्थता न तु ।। • लिङ्गात्तत्फलदेवार्था मन्त्रा ऊह्यास्तदन्यके । • न देवतायाः प्रीत्यर्थो यागस्तस्या गुणत्वतः ।। • न व्रीहिपरिधित्रित्वं प्रोक्षणादेः प्रयोजकम् । • उपांशुत्वं दैक्षापूर्वं पदार्थाङ्गञ्च, • वाग्यमः ।। • हिरण्यशकलैरग्नेः प्रोक्षणन्तु सकृद्भवेत् । • संयाजान्तत्व मन्हान्तु द्वादशाहे विनोत्तमम् ।। • त्रिरभ्यासस्स्थानधर्मो नत्वृचो धर्म इष्यते ।। • सकृदारम्भणीया स्यादारम्भश्चादिमा कृतिः ।। • सवित्रादिपदे नोहः, • जुष्टार्थाग्निपदे तु सः । मांसडाशे धान्यशब्दे मांसशब्दोह इष्यते ।। • इडायान्तु परार्थत्वान्न सत्रे ऊह इष्यते । • यजमानस्सूक्तवाके सत्रेषूह्यः प्रधानतः ।। • त्रिवत्से वापि साण्डे तु नोह्यास्तस्यै श्रृतादयः । • कृत्वा सामानविध्यन्तु मेष्यां प्रास्यै । • इरापदं गिरास्थाने, • नियतं तत्प्रगीतकम् ।।

द्वितीयः पादः • गीतिस्साम, तथोहश्च पौरुषेयस्तु, • साम संस्कारकमृचाम्, • तेनाभ्यस्तं तत्प्रत्यृचं भवेत् । • संशराख्यविलेशाख्यदोषात्तत्स्यात्समासु च । • उत्तराग्रन्थ पठिते ज्ञेये योन्युत्तरा न तु ।। त्रैशोकन्तु बृहत्योस्स्यान्न समानियमोऽत्र हि । • इतस्समापवादस्तु चतुर्षु स्यात्प्रगाथतः ।। रथन्तरं बृहच्चोभे प्रगाथात्ककुभौ मते ।। यौधाजये रौश्वे च बृहत्यौ ग्रथनादपि । श्यावाश्वान्धीगवे द्वे तु प्रगाथानुष्टुभोर्मते ।। चतुश्शतं बार्हतेषु द्वयोः प्रग्रथनादृचः ।। • शाखाभेदे गीतिभेदाद्विकल्पः, • सामभिस्स्तुतिः । अयं सहस्रो पस्थानमृचा स्यात्तु प्रगीतया ।। तानो यज्ञे स्मृतः, • साम्नामूहस्स्यादुत्तरावशात्, • स्तोमास्स्युर्विकृतौ । • ऋग्भ्योऽधिकास्स्युः स्तोमसंज्ञकाः ।। • धर्मप्राप्तिस्तु विकृतौ स्थानापत्त्या च पञ्चधा । व्रीहिस्थाने तु नीवारश्चरौ, सत्रे च विश्वजित् ।। नखास्तुषविभोकार्थाः, यूपार्थे परिधिस्तथा । इरापदं गिरास्थाने तन्निषेधानुवादतः । • नियोजनार्था यूपधर्मास्तदर्थे परिधावपि ।। • इज्यर्थयोः श्रृतदध्नोः प्रणीताधर्मता मता । • रथन्तरबृहद्धर्मव्यवस्था नौषधादिवत् ।। • रथन्तरवृहद्धर्माः कण्वे भाष्ये समुच्चिताः ।

● विकल्पो वार्तिके प्रोक्तः । ● व्यवस्था संसवादिषु । ● नातिदेशः पार्वणयोर्विकृतौ होमयोर्मतः । ● अदृष्टार्थाः प्रयाजकाः ।

तृतीयः पादः ऊहोऽग्निव्रीहिपयसोः, ● पौण्डरीके च रक्तता । ● यूपस्य लौकिके स्पर्शे प्रायश्चित्तं न वैदिके ।। ● पाशं पाशानिति द्वावप्यूह्यौ द्विपशुके मतौ । ● पाशानिति बहुत्वस्य निवेशः प्रकृतौ भवेत् ।। ● पत्नीद्वित्वबहुत्वयोः, ● विकृतौ पत्न्यनेकत्वेऽदृष्टार्थत्वादनूह्यता । ● संस्थापश्वैकविध्ये तु प्रास्मै मेष्यां न तूह्यते ।। ● व्रीहीणां मेघ इत्यूह्यं व्रीहिप्रतिनिधौ न तु । ● अध्रिगौ पश्वनेकत्वे सूर्यं चक्षुर्न चोह्यते ।। ● तत्रैकधा पदाभ्यासः पश्वनेकत्व इष्यते । ● देवता स्यान्मेध पतिर्द्वित्वमाश्रयगामि तु ।। ● वैश्वदेवे तु नोह्यते । ● देवतारूपभेदेत्वेकत्वोहः प्रवर्तते ।।

चतुर्थः पादः ● अनेकपशुवङ्क्रीणां समस्य वचनं भवेत् । ● चतुस्त्रिंशद्वाजिनस्तु मन्त्रपक्षे तथाध्रिगुः ।। ● समस्य वङ्क्रयः प्रैषे पक्षे तूपरगोभृगे । ● उरूकेति वपा ज्ञेया, ● प्रशस्तौ प्रशसेति च ।। ● श्येनमस्य शलेत्यादि साकल्पे तु विधीयते । ● दर्शार्थमुद्धृते नष्टे नैव ज्योतिष्मती भवेत् । ● गतश्रिया धृतेर्नष्टे नेष्टिः । ● दर्शार्थमुद्धृतौ न मन्त्रः । ● नैव पयसि श्रपणार्थे प्रदेयता, ● श्रृतदध्नोरभ्युदये धर्मास्तु स्युः प्रदेयगाः । ● न स्युस्ते पशुकामेष्टौ, ● श्रपणेऽपि च । ● पर्यग्निकृतवाक्ये तु तदन्ताङ्गविधिर्भवेत् । ● आज्येन शेषकर्माऽन्यत्र तु प्रतिनिधिः पशुः ।।

दशमोध्यायः

प्रथमः पादः ● प्राकृताङ्गविकारोहोत्तरं तद्बाध उच्यते । उपकारस्यातिदेशात्पदार्थानाञ्च तन्मुखः ।। कृष्णलेष्ववघातो न, विष्णोरुरुक्रमस्यापि स्फ्याश्लेषावाहनं न च, ● नारम्भेष्टिर्मता तत्र पृथक्सोमाङ्गकोष्टसु, ● राजसूये, ● स्वस्याञ्च न पृथग्भवेत् । ● खलेवाल्यां नैव यूपाहुतिः, ● स्थाण्वाहुतिर्न च ।। ● इष्टावन्त्यः प्रयाजस्तु देवतासंस्कृतिर्मता । ● नाग्नेय आज्यभागस्तु देवतासंस्कृतिर्मता ।। ● पशौ पशुपुरोडाशः पशुदैवतसंस्कृतिः । ● ओदनश्चरु शब्दार्थः, ● स स्थालपामेव पच्यते ।। ● चरौ पेषणसंवापसंयावतपनोपधाः । प्रथनं

श्लक्ष्णताध्यूहज्वलनासादनादिकम् ।। अर्थलोपान्न कर्तव्यमिति बा प्रयोजनम् ।।

द्वितीयः पादः • पाकः श्रुतः कृष्णलेषु स्यात् । • नोपस्ताराभिधारणम् । • वचनात्कृष्णले भक्षाः । • तेषामुपहतिस्सह ।। • ब्राह्मणस्ते तु नान्येषाम्, • नानाकालाश्च ते मताः ।। • कृष्णले ब्रह्मसम्बन्धाच्चतुर्धाकरणं न च ।। • सत्रे न दक्षिणा, • शेषभक्षास्सोमेष्टिगा मताः । • सत्रिणां वरणं नैव, • दक्षिणा च न दीयते ।। • न पृष्ठशमनीयोऽङ्गं सत्रे, • कुर्युः पृथक् च तम् । • सहत्वेऽप्यृत्विजां स स्यात्, • कामेष्टावृत्विजो न हि ।। • द्वेष्ये दानं तथैव च, • अस्थियागो जीवतां स्यात् । • मृतस्याधिक्रिया यद्विलुप्यन्ने जपसंस्काराः ।। • क्रत्वर्थं क्रियतेऽत्र तु शुक्रारम्भादिकम्, • नास्थ्नां गुणकामना । • आयुरादि, • न होतृकामास्स्युः, • समाप्यस्सर्वस्वारो मृतेऽपि तु ।। • मृतेऽस्थियज्ञवत्कर्म, • आर्भवान्तञ्चायुरादिकम् । • ऋतुयाज्यावृतिस्सत्रेऽप्यात्रेये दानमेव च । • हवणीगुणलोपेऽपि निर्वापः पवभानगः ।। • चरौ स्यात्सप्तदशसु शरावेषु चतुर्ग्रहः । मुष्टिलोपे द्वादश स्युर्मन्त्रैः ।। • धेनुवत्सर्षभादौ स्याद्गो जात्या छागबाधनम् । • श्वेते पशौ नाजबाधो ह्यजे श्वेतादिसम्भवात् ।। • खलेवाल्यां खादिरत्वछेदनादि तु लुप्यते । • पर्यूहणाभ्यञ्जनादि स्यात्, • क्रमान्यत्वेऽपि नान्यथा ।।

तृतीयः पादः • प्राकृताङ्गं गुणविधेर्नापूर्वा विकृतिर्भवेत् । • हिरण्यगर्भ मन्त्रोऽङ्गमुत्तराधारकर्मणः ।। • उत्करादौ वाजिनादेः प्राकृतासादनादिकम् । • आग्नियः प्राकृतीभिस्स्युर्दीक्षाहुतयस्समुच्चिताः ।। • दक्षिणा पुनराधेये प्राकृत्या बाधिका मता । • वासोवत्सावाग्रयणे प्राकृत्या बाधकौ मतौ ।। • तत्रान्वाहार्यधर्मास्स्युः, • वासोवत्सं न पच्यते । • नाभिघार्यम्, • तथा सोमे गोगतं द्वादशं शतं दक्षिणा, • सा विभज्यैव, • विभागोऽर्धादिसंज्ञया । • धेनुस्सर्वनिर्वर्तिका, • एकसङ्ख्या द्वादशेति सङ्ख्याया बाधिका मता ।। • साण्डस्सर्वनिवर्तकः । • प्रकाशौ बाधकौ स्यातां भागस्याध्वर्यवस्य च ।। • अश्वस्स्यात्समस्तस्य निवर्तनाय, • तथा समस्तं चमसेन बाध्यम् । न ब्रह्मभागव्यतिरिक्तदानम् । • यजूरथोऽध्वर्युमुपैति नान्यम् ।।

चतुर्थः पादः • उपहोमा न बाधन्ते, • कुशानां बाधकाश्शराः । • दर्भ-

मन्त्रार्थयोर्घोषः, ● बार्हस्पत्यो न बाधकः । ● प्राजापत्या न बाधन्ते, ● अनूयाजास्स्युस्सहामनैः । ● उपगानं समुच्चेयम्, ● तथा गौग्गुलवाञ्जनम् । ● समुच्चयो वाससां स्यात्, ● श्लोकस्तोत्रं न बाधकम् ।। ● कौत्सादि पूर्वं बाधेत, ● तद्बाधस्समसङ्ख्यया । ● न बाधः स्तोमवृद्धौ तु । ● पवमानेऽधिकोद्धृती ।। ● विधिशब्दस्तु मन्त्रे स्यात्, ● एवं सौर्यादिके । ● अग्निस्तु पावकस्सगुणो भवेत् । ● बुधन्वत्ता नैव गुणः पवमानेष्टिषु श्रुतः, ● अनुबध्ये न गोशब्दो न द्रुमादिर्वनस्वतौ । किन्तूस्नापदमाद्ये तु वाच्यमन्त्ये वनस्पतिः ।। ● अवभृथेऽग्नीवरुणौ स्विष्टकृद्गुणकौ मतौ । ● अग्निः पशुपुरोडाशे निर्गुणः स्विष्टकृन्मतः ।। ● तृतीयस्स्यादनूयाजः स्विष्टकृत्संस्कृतिर्मता । ● याज्यनुवाक्ये दृष्टार्थे, ● मनोतोहो न विद्यते ।। ● स्वयोनौ कण्वपूर्वकं रथन्तरन्तु गेयं स्यात् । ● स्वयोन्युत्तरयोश्च तत्, ● निगमाश्चाज्यपानिति । अग्निष्टुति ग्रहान्यत्वेऽप्यबाधस्स्तोत्रशस्त्रयोः ।।

पञ्चमः पादः ● बह्वेकदेशग्रहणेऽन्त्यलोपः । ● एकत्रिके स्यात्तृचमाद्यमेव । ● भत्रेदृगेका धुरि सामगीतौ, ● अहर्गणे स्युर्दशरात्रधर्माः ।। ● नाद्यादरस्स्यात्पवनादिमन्त्रे, ● सामागमेनाधिकसङ्ख्यपूर्तिः ।। ● ऋगागमस्स्यात्पवमान आद्ये, ● अभ्यस्या यथोक्तं खलु सामिधेनी ।। ● स्यात्षोडशीतु प्रकृतौ प्रयोगे, ● स गृह्यते चाग्रयणान्न तूक्थ्यात् ।। ● सवने च तृतीयके, ● स राजप्रयोगेऽपि स्तोत्रशस्त्रयुतो भवेत् । ● सर्वेषान्तु द्विरात्राणामुत्तरेऽह्न्ययं मतः । ● चतुर्थेऽह्न्यहीनस्य प्रथमे तु भवेदसौ ।। ● जगत्साभा तु विषुवान् तत्रैवाग्रयणाग्रता । ● रथन्तरबृहद्धर्मा विरुद्धास्संसवे न तु ।। ● धाराग्रहाणां पूर्वस्स्यात्स्वस्थाने ह्यैन्द्रवायवः । ● धाराग्रहेभ्यः पूर्वं स्याद् गुणकामेऽपि नित्यवत् ।। ● धाराग्रहेभ्यः पूर्वन्तु, ● सादनञ्च तदा मतम् । ● प्रदानन्तु स्वकाले स्यात्सादनान्नापकृष्यते ।। ● अनिमित्ता त्र्यनीकायामग्रतयोर्द्वयोः । ● व्यूढः समूढविकृतिर्गवामयनसत्रगः ।। ● स्वस्थानाद्वर्धतेऽनीका न दण्डकलितं मतम् । ● छन्दोव्यतिक्रमो व्यूढे नार्थगो मन्त्रगस्तु सः ।।

षष्ठः पादः ● तृचे सामानि गायति, ● कालार्थं स्वर्दृशं प्रति । ● बृहद्रथन्तरं पृष्ठ्ये एकं स्यात्षडहेऽन्वहम् ।। ● द्वादशाहेविभज्यैकादशिन्याः प्रथमान्त्ययोः । ● विश्वजित्सर्वपृष्ठे स्युः पृष्ठानि स्तोत्रभेदतः ।। ● उक्थ्यो वैरूपसामेति

पृष्ठस्तोत्रे तु तद्भवेत् । • स्तोत्रीयानवकन्त्वेव त्रिवृदग्निष्टुदादिके ॥ • संसवादौ द्वयोस्साम्नोः पृष्ठस्तोत्रे समुच्चयः । • प्रातिलोम्येऽपि षडहे तदन्ते मधुभोजनम् ॥ • संस्थाभावान्न षडहावृत्तौ तस्य पुनः क्रिया । • कालभेदाद्व्यवेते तु षडहे तत्पुनः क्रिया । • क्रत्वङ्गत्वाद्दीक्षितानां सत्रेऽपि मधुभोजनम् ॥ • दशमाहे मानसस्स्याद् ग्रहोऽतो विकृतावपि । • सत्रे कर्तृबहुत्वं स्यात्, • ऋत्विक्कार्ये च तद्विधिः ॥ • सत्राहीनतया द्वेधा द्वादशाहोऽत्र सम्मतः । • पौण्डरीकेऽयुतमश्वसहस्रम्, नयनं प्रत्यहं तस्य विभज्य द्वादशाहवत् ॥ • मनोर्ऋचस्सामिधेन्यो न सर्वाः प्रकृतेस्समाः । • मानोपावहरणे वासः, • अहीने च तद्भिदा ॥ • तेषामुपावहरण काले ग्रहणमिष्यते ॥

सप्तमः पादः

• न पशुहृदयादीनि हवींषि, • एकादशैव च । • त्र्यङ्गैरिज्या शेषबाधः, • अध्यूध्न्या होत्रैडबाधनम् ॥ • वनिष्टु नाग्नीदैडस्य, • न प्रशास्तुश्च बाधनम् । • न द्विभागस्स तन्त्रेणोभयसिद्धितः ॥ • वपाश्रपणकर्तापि स्थाता भक्षं न भक्षयेत् । • गृहमेधीयस्त्वपूर्वं, आज्यभागपुनर्विधेः ॥ • यावदुक्तं प्राकृतं स्यादिडास्विष्टकृदादिकम् । • परिसङ्ख्यापदात्तत्र प्राशित्रादेर्निवर्तनम् ॥ • आतिथ्याप्रायणीयेष्टचोरिडाशंय्वन्तमेव तु । • पूर्वाभ्यां शंय्विडाभ्यान्तु तत्समाप्तिरुदीरिता । • अपूर्वास्स्युश्चोपसदः स्रौवाधारपुनर्विधेः । • वैकल्पिक्यवादेऽस्तु नियमार्थः पुनर्विधिः ॥ • विकल्पाभ्युच्चयौ न स्तः श्यामाकादि श्रुतं यदा । • खादिरस्याभ्युच्चयश्च यूपे नौदुम्बरे भवेत् ॥ • शुक्लव्रीहिश्रुतौ बाधो यवानां न विकल्पनम् । • पञ्चावत्तं वपास्थं यत्सर्वपश्वङ्गगामि तत् ॥

अष्टमः पादः

• न होतारं पर्युदासो नानूयाजेषु च स्मृतः । • न तौ पशौ निषेधस्स्यान्न सोमे तु स्तुतिर्मता ॥ • निषेधो नातिरात्रे स्यात्, • अर्थवादस्त्वनाहुतिः । • त्रैयम्बका नाभिघार्या अभिघार्या वा स्तुतिर्मता ॥ • न ब्रह्मेति निषेधस्स्यादाधाने साम पाक्षिकम् । • दीक्षितो न जुहोतीति क्रत्वर्थं स्यान्निषेधनम् ॥ • सामान्याहवनीयस्य विशेषाद्बाधकं पदम् । • पश्वादौ सामिधेनीस्थसाप्तदश्योपसंहृतिः ॥ • स्वाहाकारो दर्विहोमे नोपसंहारमर्हति । • विकृतावग्न्यतिग्राह्यमतिदेशात्प्रवर्तते । तच्छ्रुतिर्गुणकामानां तेन वेद्यादि कल्प्यते ॥

• हविर्द्विरवदानाच्च चतुष्ट्वं नाङ्गमिष्यते । • चतुर्गृहीतमाज्यस्योपांशुयाजे भवेद्धविः ॥ • आग्नेयैन्द्राग्नयोरुक्तिः सान्नाय्यस्तुतिरिष्यते । • हविस्तूपांशुयाजाज्यं सर्वस्मा इति वाक्यतः ॥ • नानियमः, • विष्ण्वादिदेवतास्तत्र शाखाभेदाद्विकल्पिताः । • तावब्रूतां कालविधेः पौर्णमास्यां भवेत्तु सः ॥ • उपलक्ष्यानपायाच्च सोमात्प्रागपि स स्मृतः ॥

एकादशस्तन्त्राध्यायः

प्रथमः पादः • तन्त्रं फलं यागषट्के, • अङ्गानां कार्यैक्यमेव च । तस्मिन् समुच्चयोऽङ्गानां भाष्ये प्रोक्तं द्वयोरिह ॥ • समुच्चित्येति वार्तिके, • काम्यावृत्तौ फलावृत्तिः, • हन्त्यावृत्तिश्च दृष्टतः, सर्वौषधे सकृद्धन्तिः ॥ • अङ्गानाञ्च सकृत्कृतिः, • कपिञ्जलेषु नित्यं स्यात् । • यावत्स्वं चोत्तरा दुहिः, • दर्शाङ्गानान्तु तन्त्रत्वम् ॥ • न कृष्णग्रीवयोस्तु तत् ।

द्वितीयः पादः • आग्नेयादेरेकदेशकर्तृकालं तथाङ्गकम् । • इष्टौ पर्वद्वयेकालभेदान्नैवास्ति तन्त्रता । • अन्येषान्तूत्पत्तिवाक्ये कालभेदान्न तन्त्रता । • प्राजापत्येषु पशुषु तन्त्रञ्चैव वसाहुतिः ॥ • भिन्नदेवत्येषु भिन्ना याज्यार्थस्य विभेदतः । • यूपाहुतिस्तु यूपैकादशिन्यां तन्त्रमेव तु ॥ • आप एवावभृथाङ्गेषु तु स्युः करणत्वतः । • प्रधासेषु त्वङ्गभेदे देशभेदाद्विहारयोः ॥ • ब्रह्महोत्रादयस्तन्त्रम्, भिन्नास्स्युरापराग्निकाः । • पूर्वोत्कर्षात् ब्रह्मसाम्नि त्वालम्भे नास्ति भिन्नता ॥ • त्रींस्त्रीन्विधिः पञ्चशारदीये पश्वन्तराश्रयः । • दशपेयेचाभिषेचनीये (नास्त्येकतन्त्रता) । • वारुण्या नैव निष्कासे प्रचारविधिरिष्यते । • प्रायणीयस्य निष्कासे नैव कर्मान्तिरं भवेत् ॥

तृतीयः पादः • वचनाद्भिन्नकालत्वं वेद्याद्यङ्गेषु सम्मतम् । • अङ्गञ्चेतन्त्रमाधानम्, • सोमे यूयः पशुत्रये ॥ • तक्षणादेर्न चावृत्तिः, • स्वरुरप्येक एव हि । • अहर्गणे त्वन्तिमेऽन्हि विषाणाप्रासनं भवेत् ॥ • नानाबीजावहन्तौ स्यात्सर्वान्ते वाग्विसर्जनम् । • यथाह्वानं पशौ तु स्यात्पुरोडाशे विसर्जनम् । • अग्नेर्विमोको वरणं सोमे चोक्तं प्रधानगम् ॥ • साङ्गप्रधानार्थन्त्विवति वार्तिकसम्मतम् । • सुब्रह्मण्योपसत्काला तन्त्रेण स्यादहर्गणे ॥ • सुत्याकाला तु भिन्ना स्यात्प्रत्यहं काल-

भेदतः । ● प्रतिप्रयोगं देशर्त्विक्पात्राणां भिन्नता न तु ।। ● पात्राण्याजन्म धार्याणि, ● पवमानेष्टिमादितः । ● प्राजापत्यप्रचारः स्यात्सर्वसोमोर्ध्वमेव तु ।। ● अग्निमद्यपदापेक्ष उत्कर्षो हरिवत्पदे ।।

चतुर्थः पादः ● राजसूये दक्षिणाया भेदेऽङ्गावृत्तिरिष्यते । ● भेदेऽपि दक्षिणायास्स्युः ऋत्विजस्तु त एव हि ।। ● अवेष्टौ राजसूयान्तर्भिन्नतन्त्रा च सम्मता । बहिः क्रतोर्दक्षिणैक्यं तन्त्रैक्यञ्चेति निश्चयः ।। ● काम्ये तु पवमानादि त्रिके तन्त्रस्य भिन्नता ।। ● द्वादशोपसदो दीक्षास्तन्त्रं स्युर्द्वादशाहिके । ● सौत्यपश्वादयः सुत्याकालीना भिन्नतामियुः ।। ● नान्होऽभ्यासस्तूपसत्सुब्रह्मण्यास्वपि स्मृतः । त्रयोदशाह आद्या स्याद्द्वादशाहे ततः परा ।। ● श्रपणीशूलकुम्भ्यस्तु तन्त्रं पशुगणे स्मृताः । ● तथैव देवताभेदे, ● भिन्ना जात्यन्तरे मताः ।। ● न तन्त्रं स्युः कपालानि नानाश्वानां प्रतिग्रहे । ● हन्तिमन्त्रस्य नावृत्तिः, ● मन्त्रावृत्तिस्तु निर्वापस्तरणे लवनेऽपि च ।। ● नाना बीजेषु सा भवेत्, ● सकृन्मन्त्रस्तु वेद्यादि प्रोक्षणादौ क्रियैक्यतः । ● तन्त्रं कण्डूयौगपद्ये भिन्नोऽन्यथा भवेत् ।। ● नानस्वप्नेषु नानौघे नानावर्षेष्वमेध्यके । सकृदेव भवेन्मन्त्रः, ● विश्रभ्यगमनेऽपि च ।। ● आवित्तिस्स्यादुपरवमन्त्रस्य खनिभेदतः । ● कालभेदेऽध्रिगुभनोता हविष्कृच्चाभिधत्ते कालैक्ये तन्त्रम्, इत्युक्तानया एकादशे त्विह ।।

द्वादशः प्रसङ्गाध्यायः

प्रथमः पादः ● पश्वर्थैस्तु प्रयाजाद्यैः पुरोडाशोपकारतः । प्रसङ्गसिद्धेरेतेषां तदर्था न पुनः क्रिया ।। ● पशौ यत्त्वाज्यभागावघातादि स्यात्तदत्र तु । ● सौमिको दैक्षपश्वादौ वेदिः, ● तत्पात्रता न तु ।। ● पुरोडाशस्य शामित्रः श्रपणे न प्रसज्यते । ● कौण्डपाय्यग्निहोत्रे तु श्रप्यं प्राजहिते हविः ।। ● सौमिके तु हविर्धाने सवनीयान्न निर्वपेत् । ● न दैक्षः प्रायणीयादौ जागरस्तु प्रसज्यते ।। ● प्रधासेषु द्वयोर्मन्त्रा निर्वापादौ न तन्त्रता ● अन्वाधानं न सोमाङ्गेष्टिषु, ● न प्राकृतं व्रतम् ।। ● अन्वाधानं यद्यपि स्याद्देवतानां परिग्रहे । तथापि तत्र दीक्षेष्टेः परं ते तैर्न सिद्धितः ।। ● पत्नीसन्नहनं नैव दीक्षेष्टेः पर-

मिष्यते। ● नारण्याशनमप्युक्तम्, शेषभक्षास्तु सम्मताः ॥ ● नान्वाहार्यो दक्षिणा स्यात्। ● सोमभक्षस्तु ऋत्विजाम् ॥ ● अग्निर्देव इति त्वार्षे होतुर्वरणमिष्यते। ● आतिथ्यायामेव बर्हिस्संस्काराः प्रोक्षणादयः ॥ ● देशभेदात्तु दैक्षे स्यान्मन्त्रवत्स्तरणं पुनः। ● बर्हिस्सन्नहने मन्त्रे हरणे च न तु स्मृतः ॥

द्वितीयः पादः ● गार्हपत्यादयः श्रौतकर्मण्येव न लौकिके। ● सौत्यपशौ पुरोडाशः सवनीयात्पृथग्भवेत् ॥ ● सौत्ये पशौ हनिष्कृच्चेत्सवनीयेषु नो पृथक्। ● चरौ सौम्ये द्विकपालाश्विनादिषु च नो पृथक् ॥ ● बर्हीध्मवर्जं दर्शाङ्गं निशीष्टौ स्यात्प्रसङ्गतः। ● प्रकृत्यर्थारम्भणीया विकृतौ न प्रसज्यते ॥ ● विरुद्धधर्मसत्त्वे तु भूयसां स्यात्सधर्मता। ● तत्साम्ये मुख्यधर्मस्स्यात्, ● न प्रधानाङ्गबाधनम् ॥ यथा सुत्या पर्वकाले स्यात्तथा दीक्षाङ्ग बाधनम् ॥ ● परिधिस्तु द्विधर्मा स्यात्, ● विरोधे परिधेर्मताः। ● न तन्त्रं सवनीयेषु तेन ते स्युः प्रसङ्गिनः ॥ ● प्रकृत्येयमेकतन्त्रा विकृतिस्सैव तन्त्रिणी। ● ब्रहिराग्रयणे द्यावापृथिव्ये पुष्पितं भवेत् ॥ ● द्यावापृथिव्यस्यैव स्यात्तावता नैव तन्त्रिता ॥

तृतीयः पादः ● वत्सत्वचो विश्वजिति वाससा स्यात्समुच्चयः। ● अग्नौ दैक्षपशावष्ट हविषां नैव तन्त्रिता ॥ ● आघारे ऋजुमित्यादि विज्ञेयन्तु समुच्चितम्। ● यागे व्रीहियवादेः स्याद्विकल्पो न समुच्चयः ॥ ● एकार्थत्वात्पाथिकृतीवैश्वानर्योर्विकल्पनम्। ● भिन्नस्कन्नादि होमानां भिन्नार्थत्वात्समुच्चयः ॥ ● कर्ममध्ये मन्त्रपाठे पर्वदोषो न विद्यते। ● संहितास्थः स्वरो मन्त्रे ब्राह्मणस्थो न कर्हिचित् ॥ ● मन्त्रान्ते स्यात्तु कर्मादिः, ● वसोर्धारासु चैव हि। ● आधारेऽप्येवमेव स्यात्, ● विभागार्था विकल्पिताः ॥ ● सङ्ख्यायुतेऽभ्रिदानादौ चतुर्णां स्यात्समुच्चयः। ● उरुप्रथस्वेत्यादीनां विकल्पः। ● क्रियमाणानुवादित्वात्करणेष्वेव स स्मृतः ॥

चतुर्थः पादः ● जपाशीः स्तुतिमन्त्राणामदृष्टार्थत्वात्समुच्चयः। ● याज्यानुवाक्यायुगले विकल्पोऽन्यत्र तच्चयः। ● ऋयार्थानां हेमवासोगव्यादीनां समुच्चयः। ● उपयागे पशुगणे गुदानां स्यात्समुच्चयः ॥ ● जाघन्येका पशुगणे नियमार्थो विधिर्यतः। ● नित्योख्यस्याग्निना कामे बाधो वाक्यं विना भवेत् ॥

● वार्क्षो नाहवनीयस्स्यात् गतश्रीधारणं न तत्। ● नापि मन्त्रादिसंस्कारः, ● नोख्ये नित्यन्तु धारणम् ॥ ● बहुयष्टृषु शुक्रादेरेकोऽन्वारम्भमाचरेदहीनेषु। ● अथ सत्रेषु कुर्याद् गृहपतिस्तु तत्। ● सत्रेषु फलिसंस्कारास्सर्वेषामञ्जनादयः॥ ● द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः। ब्राह्मणार्त्विज्यनियमः क्रत्वर्थे नापि च स्मृतः॥ *

द्वादशोऽध्यायः

●

---

* अधिकरणसूचकसंख्यासु क्वचित्क्वचिद्वैपरीत्यं सञ्जातम्। तत्संशोध्य पठन्त्वध्येतारः। क्वचिदक्षरसंयोजने व्यतिक्रमप्रयुक्ता अशुद्धयस्सञ्जाताबह्व्यः तास्संशोध्याध्यापयन्त्वध्यापका इति सप्रश्रयं प्रार्थयते सम्पादः।